**[ दात्ताः ]** दत्तस्येमे = दात्ताः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा सि । अत्र स्वरेषु हि आदौ अकारः स चात्रास्ति इति दुसंज्ञा स्यात् ।

शालीया इत्यादिषु तु आदिस्वरोऽकारो नास्ति किन्तु द्वितीय आकार इति न स्यात् । यस्येति संज्ञिनिर्देशार्थम् । अनेन यच्छब्देन हि स इत्याक्षिप्यते । स्वरेष्विति व्यञ्जनानपेक्षया वृद्धिनिःकृष्टस्वरसंनिवेशापेक्षमादित्वं यथा विज्ञायेतेत्येवमर्थम् । तेन व्यञ्जनादेरपि दुसंज्ञा सिद्धा भवति ।

**[ साभासन्नयनः ]** सभा-सन्नयन । सभायाः सन्नयनं = सभासन्नयनम्, सभासन्नयने भवः = साभासन्नयनः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते'० (१।३।५३) विसर्गः ॥छा॥

## एदोद्देश एवेयादौ ॥ ६।१।९ ॥

**[ एदोत् ]** एच्च ओच्च = एदोत् । प्रथमा सि ।

**[ देशे ]** देश सप्तमी ङि ।

**[ एव ]** एव प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ ईयादौ ]** ईय आदिर्यस्य सः = ईयादिः, तस्मिन् = ईयादौ ।

'ईयः स्वसुश्च' (६।१।८९) - 'जातेरीयः सामान्यवति' (७।३।१३९) इत्यादेरीयस्य न ग्रहणं तेषु दुसंज्ञानिबन्धनकार्याभावात्।

**[ सैपुरिका, सैपुरिकी ]** 'षिंग्ट् बन्धने' (१२८७) षि । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सि । सिन्वन्तीति सयः । मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'अप्रयोगीत्' (१।१।३७) विच्लोपः । से - पुर । सयां पुरं = सेपुरम् । सेपुरे भवा = सैपुरिका-सैपुरिकी । 'व्यादिभ्यो णिकेकणौ' (६।३।३४) इत्यधिकारे 'वाहीकेषु ग्रामात्' (६।३।३६) णिकप्र० → इक-इकण्प्र० → इक । 'वृद्धिः स्वरे'० (७।४।१) वृ० ऐ । 'अवर्णवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्'(२।४।८६) अलुक् ।

**[ स्कौनगरिका, स्कौनगरिकी ]** 'स्कुंग्श् आप्रवणे' (१५१४) स्कु । स्कुनन्तीति स्कवः । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'अप्रयोगीत्' (१।१।३७) विच्लोपः । स्कवां नगरं = स्कोनगरम् । स्कोनगरे भवा = स्कौनगरिका-स्कौनगरिकी । 'वाहीकेषु ग्रामात्' (६।३।३६) णिकप्र० → इक-इकण्प्र० → इक । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अणञेयेकण्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

सेपुरं स्कोनगरं च वाहीकग्रामौ ।

**[ दैववाचकं नन्द्यध्ययनम् ]** देव 'वचंक् भाषणे' (१०९६) वच् । देवान् वक्तीति देववाचकः । बाहुलकाण्णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । देववाचकेन कृतं प्रोक्तं वा = दैववाचकम् । 'कृते' (६।३।१९२) 'तेन प्रोक्ते' (६।३।१८१) वा अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । सि-अम् । नन्दिनो नन्देर्वा अध्ययनं = नन्द्यध्ययनम् । सि-अम् ।

**[ क्रौडः ]** क्रोडं नाम उदग्ग्रामस्तत्र भवः = क्रौडः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

क्रोडशब्दः स्वाङ्गेऽपि वर्त्तते ।

**[ दैवदत्तः ]** देवदत्तं नाम वाहीकग्रामस्तत्र भवः = दैवदत्तः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

देवदत्तशब्दः पुंस्यपि क्रियाशब्दश्च ।

उपचारात् सेपुरस्थे(स्थः) पुरुषोऽपि सेपुरस्तस्यापत्यम् । 'अवृद्धाद्'० (६।१।११०) आयनिञ् न च वक्तव्यं देशे एव न वर्त्तते इति मुख्याभिधेयापेक्षया देशे एव वर्त्तते इत्युक्तमन्यथा सर्वेऽपि शब्दा उपचारेण स्वार्थं त्यजन्त्येव ॥छ॥

## **प्राग्देशे** ॥ ६।१।१० ॥

**[ प्राग्देशे ]** प्राचां देशः = प्राग्देशः । प्राङ् चासौ देशश्च = प्राग्देशः, तस्मिन् ।

शर । शरा अस्यां सन्ति = शरावती । 'नद्यां मतुः' (६।२।७२) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्चमवर्गान् मतोर्मो वः' (२।१।९४) मस्य व० । 'अनजिरादिबहुस्वर-शरादीनां मतौ' (३।२।७८) दीर्घः । 'अधातूदृदितः' (२।४।२) ङी । कः पुनः प्राग्देशः ? यः शरावत्या सरितः पूर्वोत्तरेण वहन्त्याः पूर्वतो दक्षिणतो वा भवति स प्राग्देशः स्यात् । यस्तु पश्चिमत उत्तरतो वा स उदग्देशः ।

**[ एणीपचनीयः ]** एत । 'श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नश्च' (२।४।३६) ङी-तस्य नत्वं च । 'डुपचींष् पाके' (८९२) पच् । एण्यः पच्यन्ते यत्र । 'अनट्' (५।३।१२४) अनट्प्र० → अन । एणीपचने भवः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ गोनर्दीयः ]** गो 'नर्द शब्दे'(३०२) नर्द् । गावो नर्दत्यस्मिन्निति गोनर्दः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । यद्वा नर्दन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । गां नर्दयतीति गोनर्दः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लोपः । गोनर्दे भवः = गोनर्दीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ भोजकटीयः ]** भोज अट (१९४) - पट (१९५) - इट (१९६) - किट (१९७) - 'कट गतौ' (१९८) कट् । भोजं-राजविशेषं कटति = भोजकटः । 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । भोजकटे भवः = भोजकटीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कोशवृक्षीयः ]** कोश-वृक्ष । कोशप्रधाना वृक्षा यत्र । कोशहेतुभूता वृक्षा यत्र । कोशवृक्षे भवः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ गोमयह्रदीयाः ]** गोभिर्निर्वृत्तम् । 'नृ--हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय । गोमयस्य ह्रदः । गोमयश्चासौ ह्रदश्च । गोमयह्रदे भवः । 'वाहीकेषु'० (६।३।३६) बाधकः 'क-खोपान्त्य-कन्था-पलद-नगर-ग्राम-ह्रदोत्तरपदाद् दोः' (६।३।५९) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ ऐकचक्रकः ]** एक-चक्र । एकं चक्रं यत्र तत् = एकचक्रम् । एकचक्रे भवः = ऐकचक्रकः । 'रोपान्त्यात्' (६।३।४२) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ क्रोडीयः ]** क्रोड । क्रोडं नाम प्राग्ग्रामस्तत्र भवः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ दैवदत्तिका, दैवदत्तिकी ]** देवदत्तं नाम प्राग्ग्रामस्तत्र भवा = दैवदत्तिका-दैवदत्तिकी । 'काश्यादेः' (६।३।३५) णिकप्र० → इक-इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अणञेयेकण्'० (२।४।२०) ङी ।

ननु प्राचीति क्रियतां देशाधिकारे सति किं देशग्रहणेन ? इत्याह - तदनुवृत्तौ हि एवकारोऽप्यनुवर्त्तेत, तन्निवृत्त्यर्थं वचनमित्यर्थः ॥छ॥

**वाऽऽद्यात्** ॥ ६।१।११ ॥

**[ वाऽऽद्यात् ]** वाश्च आद्याच्च = वाऽऽद्यात् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् ।

विकल्पाधिकार-आद्यात् इत्यधिकारो द्वयं वेदितव्यम्, नन्वत्र वक्ष्यमाणतद्धितप्रत्ययानां विकल्पनात् पक्षे वाक्यसमासौ दर्श्येते तथा कथमपवादप्रत्ययानां विकल्पेन पक्षे नोत्सर्गप्रत्ययः ? इत्याह-उत्सर्गरूपस्तु तद्धितोऽपवादविषये 'पीला-साल्वा-मण्डूकाद्वा' (६।१।६८) इत्यादौ वाग्रहणान्न भवति । आद्यादिति विना तु अस्येति देवतार्थे इत्यपि स्यात् ।

**[ ऐन्द्रं हविः ]** इन्द्र । इन्द्रो देवताऽस्य । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति'० (७।४।१) वृ० ऐ । सि-अम् । हविस् ।

**[ ऐन्द्रो मन्त्रः ]** इन्द्र । इन्द्रो देवताऽस्य । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति'० (७।४।१) वृ० ऐ । प्रथमा सि । मन्त्रः ॥छ॥

**गोत्रोत्तरपदाद् गोत्रादिवाऽजिह्वाकात्य-हरितकात्यात्** ॥ ६।१।१२ ॥

**[ गोत्रोत्तरपदात् ]** गोत्रं च उत्तरपदं च = गोत्रोत्तरपदम्, तस्मात् ।

**[ गोत्रात् ]** गोत्र पञ्चमी ङसि ।

**[ इव ]** इव प्रथमा सि ।

**[ अजिह्वाकात्यहरितकात्यात् ]** जिह्वाकात्यश्च हरितकात्यश्च = जिह्वाकात्यहरितकात्यम्, न जिह्वाकात्यहरित-कात्यम् = अजिह्वाकात्यहरितकात्यम्, तस्मात् ।

**[ चारायणीयाः ]** चरस्यापत्यम् । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । चारायणस्येमे । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा जस् ।

**[ पाणिनीयाः ]** पणनं = पणः । 'पणेर्माने' (५।३।३२) अल्प्र० → अ । पणोऽस्यास्तीति । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । पणिनोऽपत्यं वृद्धम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । पाणिनस्यापत्यं युवा = पाणिनिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पाणिनेरिमे च्छात्राः । 'वृद्धेञः' (६।३।२८) इति विषये 'यूनि लुप्' (६।१।१३७) इति युवार्थे इञ्लुप् ततो 'दोरीयः' (६।३।३२) ईयप्र० । प्रथमा जस् ।

**[ जैमिनीयाः ]** चमू (३८०) - छमू (३८१) - जमू (३८२) - झमू (३८३) - 'जिमू अदने' (३८४) जिम् । जेमन्तीति । क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक् । अग्रे इन् । जेमामिनः = जेमिनः । जेमिनस्यापत्यं युवा = जैमिनिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जैमिनेरिमे च्छात्राः = जैमिनीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'यूनि लुप्' (६।१।१३७) इञ्लुप् । प्रथमा जस् ।

**[ रौढीयाः ]** 'रुहं जन्मनि' (९८८) रुह् । रुह्यते स्म । क्तप्र० → त । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः - पूर्व उकारस्य दीर्घः । रूढस्यापत्यं = रौढिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । रौढेरिमे च्छात्राः = रौढीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'यूनि लुप्' (६।१।१३७) इञ्लुप् ।

**[ कम्बलचारायणीयाः ]** कम्बलप्रधानः चारायणः = कम्बलचारायणः । कम्बलचारायणस्येमे च्छात्राः = कम्बलचारायणीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । प्रथमा जस् ।

**[ ओदनपाणिनीयाः ]** ओदन पणनं = पणः । 'पणेर्माने' (५।३।३२) अल्प्र० → अ । पणोऽस्यास्तीति । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । पणिनोऽपत्यं वृद्धम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । पाणिनस्यापत्यं युवा । 'अत इञ्' (६।१।३१) इञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ओदनभक्ष्यः पाणिनिः-ओदनप्रधानो वा पाणिनिः । 'मयूरव्यंसकेत्यादयः' (३।१।११६) मध्यमपदलोपीसमासः । ओदनपाणिनेरिमे च्छात्राः = ओदनपाणिनीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । शेषं पूर्ववत् ।

**[ कडारजैमिनीयाः ]** कडारप्रधानो जैमिनिः = कडारजैमिनिः । कडारजैमिनेरिमे च्छात्राः = कडारजैमिनीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । शेषं पूर्ववत् ।

**[ घृतरौढीयाः ]** घृतभक्ष्यो रौढिः = घृतरौढिः । घृतरौढेरिमे च्छात्राः = घृतरौढीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । शेषं पूर्ववत् । प्रथमा जस् ।

**[ शाकलाः ]** शकल । शकलस्यापत्यं वृद्धं = शाकल्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शाकल्यस्येमे च्छात्राः = शाकलाः । 'शकलादेर्यञः' (६।३।२७) अञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । प्रथमा जस् ।

**[ काण्वाः ]** कण्व । कण्वस्यापत्यं वृद्धं = काण्व्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । काण्व्यस्येमे च्छात्राः = काण्वाः । 'शकलादेर्यञः' (६।३।२७) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । प्रथमा जस् ।

**[ दाक्षाः ]** दक्ष । दक्षस्यापत्यं युवा = दाक्षिः । 'अत इञ्' (६।१।४२) इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । दाक्षेरिमे च्छात्राः = दाक्षाः । 'वृद्धेञः' (६।३।२८) अञ्प्र० । 'यूनि लुप्' (६।१।१३७) इञ्लुप् । प्रथमा जस् ।

**[ पान्नागाराः ]** पन्न-अगार । पन्नं-पतितमगारं यस्य सः=पन्नागारः । पन्नागारस्यापत्यं वृद्धम् । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । पान्नागारेरिमे च्छात्राः = पान्नागाराः । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा जस् ।

**[ व्रैहिशाकलाः ]** व्रीहिभक्ष्यः शाकल्यः = व्रीहिशाकल्यः । व्रीहिशाकल्यस्य इमे च्छात्राः । 'शकलादेर्यञः' (६।३।२७) अञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । 'वृद्धिः स्वरे'० (७।४।१) वृ० ऐ । प्रथमा जस् ।

**[ पैङ्गलकाण्वाः ]** पिङ्गलेन उपलक्षितः काण्व्यः = पिङ्गलकाण्व्यः । पिङ्गलकाण्व्यस्येमे च्छात्राः = पैङ्गलकाण्वाः । 'शकलादेर्यञः' (६।३।२७) अञ्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । प्रथमा जस् ।

**[ कापिलदाक्षाः ]** कपिलेन उपलक्षितो दाक्षिः = कपिलदाक्षिः । कपिलदाक्षेरिमे च्छात्राः = कापिलदाक्षाः । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । प्रथमा जस् ।

**[ क्षैरपान्नागाराः ]** क्षीरभक्षः पान्नागारि(ः) = क्षीरपान्नागारिः । क्षीरपान्नागारेरिमे च्छात्राः = क्षैरपान्नागाराः । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । 'वृद्धिः स्वरे'० (७।४।१) वृ० ऐ ।   प्रथमा जस् ।

**[ कातीयाः ]** कत । कतस्याऽपत्यं वृद्धम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । कात्यस्येमे च्छात्राः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । प्रथमा जस् ।

**[ जैह्वाकाताः ]** कात्यः पूर्ववत् । जिह्वाचपलः कात्यः = जिह्वाकात्यः । जिह्वाकात्यस्येमे च्छात्राः = जैह्वाकाताः । अत्र ईयप्रत्ययो न भवति किन्तु 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । प्रथमा जस् ।

**[ हारितकाताः ]** हरित 'भक्षण् अदने' (१७१७) भक्ष् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । हरितं भक्षयतीति हरितभक्षः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लुक् । हरितभक्षः कात्यः = हरितकात्यः । हरितकात्यस्येमे च्छात्राः = हारितकाताः । अत्र ईयप्रत्ययो न भवति किन्तु'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । प्रथमा जस् ।।छ।।

**प्राग् जितादण्** ॥ ६।१।१३ ॥

**[ प्राक् ]** प्राक् प्रथमा सि ।

**[ जितात् ]** जित पञ्चमी ङसि ।

**[ अण् ]** अण् प्रथमा सि ।

**[ औपगवः ]** उप-गो । उपगतो गौर्येन सः=उपगुः । 'गोश्चान्ते'० (२।४।९६) ह्रस्वः । उपगोरपत्यम् = औपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) उकारस्य अव् ।

**[ माञ्जिष्ठम् ]** मञ्जि 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (न्या० सं० वक्ष० (१)/सूत्र(२९)) स्था । मञ्जौ तिष्ठति । 'स्था-पा-स्ना-त्रः कः'(५।१।१४२) कप्र० → अ । 'गो-ऽम्बा-ऽऽम्ब-सव्या-ऽप-द्वि-त्रि-भूम्यग्नि-शेकु-शङ्कु-क्वङ्गु-मञ्जि-पुञ्जि-बर्हिः-परमे-दिवेः स्थस्य' (२।३।३०) षत्वम् । मञ्जिष्ठया रक्तं वस्त्रं = माञ्जिष्ठम् । 'तवर्गस्य श्चवर्ग'० (१।३।६०) थ० → ठ० । 'रागाट्टो रक्ते' (६।२।१) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ भैक्षम् ]** भिक्षा । भिक्षाणां समूहः = भैक्षम् । औत्सर्गिकाणो बाधकस्य, 'कवचि-हस्त्यचित्ताच्चेकण्' (६।२।१४) इतीकण्बाधको 'भिक्षाऽऽदेः' (६।२।१०) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आश्मः ]** अश्मन् । अश्मनो विकारः = आश्मः । 'विकारे' (६।२।३०) अण्प्र० → अ । 'वाऽश्मनो विकारे' (७।४।६३) अन्त्यस्वरादिलोपः ।

**[ स्रौघ्नः ]** स्रुघ्न । स्रुघ्ने भवः = स्रौघ्नः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

प्राग्जितोऽयं अधिकारः परिभाषा-विधिर्वा न्यायसूत्रम् ॥छा॥

**धनादेः पत्युः ॥ ६।१।१४ ॥**

**[ धनादेः ]** धनं आदिर्यस्य सः = धनादिः, तस्मात् ।

**[ पत्युः ]** पति पञ्चमी ङसि । 'इवर्णादेरस्वे स्वरे य-व-र-लम्' (१।२।२१) यत्वम् । 'रिव-ति-खी-तीय उर्' (१।४।३६) ङसिस्थाने उर् ।

**[ धानपतः ]** धनपति । धनपतेरपत्यं = धानपतः । अनेन विहितः 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । धनपतौ भवः = धानपतः । 'भवे' (६।३।१२३) अण्प्र० → अ । धनपतेरागतः । 'तत आगते' (६।३।१४९) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ आश्वपतः ]** अश्वपति । अश्वपतेरपत्यम् = आश्वपतः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । अश्वपतौ भवः । 'भवे' (६।३।१२३) अण्प्र० → अ । अश्वपतेरागतः । 'तत आगते' (६।३।१४९) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ राष्ट्रपतम् ]** राष्ट्रपति । राष्ट्रपतेरिदम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ धान्यपतम् ]** धान्यपति । धान्यपतेरिदम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ प्राणपतम् ]** प्राणपति । प्राणपतेरिदम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ गार्हपत्यम् ]** गृहपति । गृहपतेरिदं = गार्हपत्यम् । मतान्तरे 'अनिदम्यणपवादे च दित्यदित्यादित्य-यमपत्युत्तरपदाञ्ञ्यः' (६।१।१५) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेञ्णिति तद्धिते' (७।४।१) वृ० आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ सैनापत्यम् ]** सेनापति । सेनापतेरिदं=सैनापत्यम् । 'अनिदम्यणपवादे'० (६।१।१५) ञ्यप्र० → य । 'वृद्धिः स्वरे'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

पत्युत्तरपदलक्षणस्य ञ्यस्य राष्ट्रादिषु त्रिषु शब्देषु 'दोरीयः' (६।३।३२) इतीयस्य चापवादोऽयम् ॥छ॥

**अनिदम्यणपवादे च दित्यदित्यादित्य-यमपत्युत्तरपदाञ्ञ्यः ॥ ६।१।१५ ॥**

**[ अनिदमि ]** न इदम् = अनिदम् । 'अन् स्वरे' (३।२।१२९) अन्, तस्मिन् ।

**[ अणपवादे ]** अणोऽपवादः = अणपवादस्तस्मिन् ।

**[ च ]** च प्रथमा सि ।

**[ दित्यदित्यादित्ययमपत्युत्तरपदात् ]** पतिः उत्तरपदं यस्य सः = पत्युत्तरपदः । दितिश्च अदितिश्च आदित्यश्च यमपत्युत्तरपदश्च = दित्यदित्यादित्ययमपत्युत्तरपदम्, तस्मात् ।

**[ ञ्यः ]** ञ्य प्रथमा सि ।

**[ दैत्यः ]** दिति । दितेरपत्यं = दैत्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि ।

**[ आदित्यः ]** अदिति । अदितेरपत्यमादित्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । प्रथमा सि ।

**[ दैत्यम् ]** दितिर्देवताऽस्य = दैत्यम् । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । सि-अम् ।

**[ आदित्यम् ]** अदितिर्देवताऽस्य = आदित्यम् । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । सि-अम् ।

**[ आदित्य्यम् ]** अदितेरपत्यम् । आदित्यो देवताऽस्य । ञ्यः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलोपः । 'ततोऽस्याः' (१।३।३४) द्वित्वम् । अथवा अदितिर्देवताऽस्य । ञ्यः । आदित्यो देवताऽस्य । ञ्यः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् तदा यस्य लुप् न भवति अनपत्यत्वात् । सि-अम् ।

**[ याम्यम् ]** यमस्याऽपत्यं=याम्यम् । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेञ्णिति०' (७।४।१) वृ० आ ।

**[ बार्हस्पत्यः ]** बृहत्-पति । बृहतां पतिः । 'वर्चस्कादिष्ववस्करादयः' (३।४।४८) तस्य स० । बृहस्पतेरपत्यं = बार्हस्पत्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । सि-अम् ।

**[ बार्हस्पत्यम् ]** बृहस्पतिर्देवताऽस्य = बार्हस्पत्यम् । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेञ्णिति'० (७।४।१) वृ० आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । सि-अम् ।

**[ प्राजापत्यम् ]** प्रजापतिर्देवताऽस्य = प्राजापत्यम् । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

**[ आदित्यः ]** आदित्य । आदित्यस्यापत्यम् = आदित्यः । अनेन ञ्यः । 'अवृद्धाद् दोर्नवा' (६।१।११०) इत्यायनिञः पक्षे इञ् प्राप्नोति सोऽनेन ञ्यप्रत्ययेन बाध्यते वृद्धिरपि । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलोपः । 'ततोऽस्याः' (१।३।३४) द्वित्वम् ।

**[ याम्यः ]** यमस्यापत्यं = याम्यः । अनेन ञ्यः । शेषं पूर्ववत् ।

अत्र परत्वात् 'अत इञ्' (६।१।३१) इतीञ् स्यात् ।

**[ वानस्पत्यम् ]** वनस्पति । वनस्पतीनां समूहः = वानस्पत्यम् । अनेन ञ्यः । अत्राचित्तलक्षणः 'षष्ठ्याः समूहे' (६।२।९) इति अणो बाधक इकण् स्यात्, तस्याऽपि बाधकोऽयं ञ्यो हि प्राग्जितीयमणं बाधित्वा सावकाश इत्यणोऽपवादग्रहणमन्यथा अण्विषये एव स्यात्, न अणोऽपवादविषये ।

**[ वास्तोष्पत्यभार्यः ]** वास्तोष्पतिर्देवताऽस्याः । 'द्यावापृथिवी-शुनासीरा-ऽग्नीषोम-मरुत्वद्-वास्तोष्वति-गृहमेधादीय-यौ' (६।२।१०८) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । वास्तोष्पत्या भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री०' (३।२।४९) पुंवद्भावः प्रथमपदे ।

**[ आदितीयम् ]** आदित्य । आदित्यस्येदम् = आदितीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलोपः । सि-अम् ।

**[ औष्ट्रपतम् ]** उष्ट्रपतिर्नाम वाहनं तस्येदम् = औष्ट्रपतम् । 'वाहनात्' (६।३।१७८) अञ्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । सि-अम् ।

ञकारस्य वृद्धिः 'ञिदार्षादणिञोः' (६।१।१४०) इति च प्रयोजनम् ।

**[ याम्यः ]** यम । यमस्यापत्यं वृद्धं = याम्यः । अनेन ञ्यप्र० । वृद्धिः । यामस्यापत्यं युवा । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इति इञो लोपे याम्यः पिता पुत्रश्च ॥छ॥

### बहिषष्टीकण् च ॥ ६।१।१६ ॥

**[ बहिषः ]** बहिस् पञ्चमी ङसि । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् ।

**[ टीकण् ]** टीकण् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ बाहीकः ]** बहिर्जातः = बाहीकः । अनेन टीकण्प्र० → ईक जातेऽर्थे, भवे तु 'यज्ञे ञ्यः' (६।३।१३४) इत्यधिकारे 'गम्भीर-पञ्चजन-बहिर्देवात्' (६।३।१३५) ञ्य एव स्यात् न टीकण्, ञ्योऽप्यत्र जात एव भवे तु सिद्धत्वात् ।

**[ बाह्यः ]** बहिर्जातः = बाह्यः । अनेन ञ्यप्र० → य । 'प्रायोऽव्ययस्य' (७।४।६५) इस्लोपः । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ ।

टकारो ङ्यर्थः ।

**[ बाहीकी ]** बाहीक 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

णकारो णित्कार्यार्थः ॥छ॥

**कल्यग्नेरेयण्** ॥ ६।१।१७ ॥

**[ कल्यग्नेः ]** कलिश्च अग्निश्च = कल्यग्नि, तस्मात् ।

**[ एयण् ]** एयण् प्रथमा सि ।

**[ कालेयम्, आग्नेयम् ]** कलि-अग्नि । कलिर्देवताऽस्य = कालेयम् । अग्निर्देवताऽस्य = आग्नेयम् । कलौ भवं = कालेयम् । अग्नौ भवम् = आग्नेयम् । कलिना दृष्टं साम = कालेयम् । अग्निना दृष्टं साम = आग्नेयम् । कलेरिदं = कालेयम् । अग्नेरिदम् = आग्नेयम् । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

अणपवादे च कलेरागतं = कालेयम् । अग्नेरागतम् = आग्नेयम् । 'तत आगते' (६।३।१४९) इत्यणो बाधको अत्र 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) इत्यादिना रूप्य-मयटौ स्याताम्, तयोर्बाधकोऽनेन एयण्प्र० → एय । वृद्धिः ।

कलये हितं = कालेयम् । अग्नये हितम् = आग्नेयम् । अनेनैव मतान्तरे एयण्प्र० → एय । स्वमते तु 'तस्मै हिते' (७।१।३५) यप्र० । सि-अम् ।

**[ कालेयः, आग्नेयः ]** कलेर्निमित्तमुत्पातः संयोगो वा = कालेयः । अग्नेर्निमित्तमुत्पातः संयोगो वा = आग्नेयः । सिद्धान्ते तु अत्र 'हेतौ संयोगोत्पाते' (६।४।१५३) इतीकण्बाधकोऽनेन एयण्प्र० → एय । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते'० (१।३।५३) विसर्गः ॥छ॥

**पृथिव्या ञा-ऽञ्** ॥ ६।३।१८ ॥

**[ पृथिव्याः ]** पृथिवी पञ्चमी ङसि ।

**[ ञाऽञ् ]** ञश्च अञ् च = ञाऽञ् । प्रथमा सि ।

**[ पार्थिवः, पार्थिवा, पार्थिवी ]** पृथिवी । पृथिव्यां भवः = पार्थिवः । अनेन ञ-अञ्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति'० (७।४।१) वृ० आर् । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः । ञाऽञोः स्त्रियां विशेषः प्रथमे ञ । 'आत्' (२।४।१८) आप्प्र० → आ । अञ् इत्यत्र 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

अणपवादे च पृथिव्या अपत्यं = पार्थिवः । अनेन ञ-अञ्प्र० । 'वृद्धिः । शेषं पूर्ववत् । अत्र 'ङ्याप्त्यूङः' (६।१।७०) इत्यनेन एयण् स्यात् । पृथिव्या अपत्यानि । अञो लुपि पृथिवीनां सङ्घादिविवक्षायां 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) अकञ्विषये 'न प्राग्जितीये स्वरे' (६।१।१३५) इति अञो लुबभावे अकञ्बाधके 'सङ्घ-घोषा-ऽङ्क-लक्षणेऽञ्-यञिञः' (६।३।१७२) इत्यणि पार्थिवः । एताषामर्थे...... श्च अञ्विधानस्य प्रयोजनम् ॥छ॥

**उत्सादेरञ्** ॥ ६।१।१९ ॥

**[ उत्सादेः ]** उत्स आदिर्यस्य सः = उत्सादिः, तस्मात् ।

**[ अञ् ]** अञ् प्रथमा सि ।

**[ औत्सम् ]** उत्स । उत्सस्येदम् = औत्सम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ औदपानम् ]** उदक 'पां पाने' (२) पा । उदकं पीयतेऽस्मिन्निति । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'नाम्न्युत्तरपदस्य च' (३।२।१०७) उदकस्य उदभावः । उदपानस्येदम् = औदपानम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

अणपवादे च –**[ औत्सः ]** उत्सस्यापत्यम् = औत्सः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औदपानः ]** उदपानस्यापत्यम् = औदपानः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ तारुणः, तालुनः ]** तरुण 'वयस्यनन्त्ये' (२।४।२१) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । तरुण्या अपत्यं = तारुणः-तालुनः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । 'ऋफिडादीनां डश्च लः' (२।३।१०४) लत्वं विकल्पेन ।

**[ पाञ्चालः ]** पञ्चाल । पञ्चालेषु भवः = पाञ्चालः । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्। प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

औत्स इति 'अत इञ्' (६।१।३१) इञ् प्राप्नोति, तारुण इति 'ङसोऽपत्ये' (६।१।२८) इत्यस्य बाधको 'ङ्याप्त्यूङः' (६।१।७०) इत्येयण् । पाञ्चाल इति 'ईतोऽकञ्' (६।३।४१) इत्यधिकारे भवार्थे 'बहुविषयेभ्यः' (६।३।४५) इत्यकञ् प्राप्नोति ।

ननु यद्यणपवादेऽप्यञ् भवति कथं तर्हि कौरव्य इति ? इत्याह - कुरोरपत्यं = कोरव्यं(व्यः) । राष्ट्रक्षत्रियवाचकस्य 'दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः' (६।१।११८) ब्राह्मणवाचकस्य 'कुरोर्वा' (६।१।१२२) ('कुर्वादेर्ञ्यः') (६।१।१००) ञ्यप्र० । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् इति ञ्यविधौ कुरुशब्दस्योपादानस्यानवकाशत्वात् भवति ।

**[ कौरवः ]** कुरोरपत्यं = कौरवः । अत्र अर्थविवक्षायां अनेनैव अञ् भवति । 'वृद्धिः स्वरेष्वादेर्ञ्णिति'० (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

उत्तरत्र बष्कयशब्दस्य समासे प्रतिषेधादुत्साद्यन्तस्यापीह प्रत्ययः, तेन -

**[ गौधेनवम् ]** गावश्च ता धेनवश्च = गोधनवः । 'पोटा-युवति-स्तोक-कतिपय-गृष्टि-धेनु-वशा-वेहद्-बष्कयणी-प्रवक्तृ-श्रोत्रिया-ऽध्यापक-धूर्त्त-प्रशंसारूढैर्जातिः' (३।१।१११) कर्मधारयः । गोधेनुभ्य आगतं = गौधेनवम् । 'तत आगते' (६।३।१४९) इति अणप्राप्तोऽनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् । अन्यथा रूप्यमयटौ स्याताम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) इत्यनेन ।

अच्छन्दसीत्यादयो ग्रीष्मादीनामर्थनिर्देशार्थः सप्तम्यन्ताः ।

**[ भल्लकीयः ]** भलि (८१२) - 'भल्लि परिभाषण-हिंसा-दानेषु' (८१३) भल्ल् । भल्लते इति भल्लकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । भल्लकाय हितः । 'तस्मै हिते' (७।१।३५) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ रथन्तरं साम ]** रथ 'तॄ प्लवन-तरणयोः' (२७) तॄ । रथान् तरतीति । 'भृ-वृ-जि-तॄ-तप-दमेश्च नाम्नि' (५।१।११२) खप्र० → अ । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ मध्यन्दिनम् ]** मध्यं दिनस्य = मध्यन्दिनम् । 'लोकम्पृण-मध्यन्दिना'० (३।२।११३) मोऽन्तः ।

**[ महिमन् ]** महिमन् । महिम्नां भावः । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) इति (अन्त्यस्वरादिः) लोपः ।

**[ मिहत् ]** 'मिहं सेचने' (५५१) मिह् । मेहतीति । उणादयः इत(अ)प्र० । मिह । मिह इवाचरति । 'कर्तुः क्विप्०' (३।४।२५) । क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । इत्यपि केचित् ।

पञ्चाल इति – 'अमद्रस्य दिशः' (७।४।१६) – 'मद्रादञ्' (६।३।२४) इत्येतयोः सूत्रयोर्यानि सुपाञ्चालकादीनि दर्शितानि तानि मतान्तरेण, ते हि उत्सादौ ब्राह्मणवाचिनं पञ्चालं शब्दं पठन्ति । राष्ट्रवचनात्त्वकञेव, स्वमते त्वकञ् च प्राप्नुवन्तीति भणनाद् राष्ट्राकञ(?) 'उष्ट्रादकञ्' (६।२।३६) प्राप्तौ उत्सादिपाठे इति अकञ् न स्यादेव ॥छ॥

### बष्कयादसमासे ॥ ६।१।२० ॥

**[ बष्कयात् ]** बष्कय पञ्चमी ङसि ।

**[ असमासे ]** समस्यन्ते नामानि अत्रेति समासः । न समासः = असमासः, तस्मिन् ।

**[ बाष्कयः ]** वस्कते गोर्दूरम् । 'गय-हृदयादयः' (उणा० ३७०) किद् अयप्र०-वस्कयः । ककुङ् (६२२) - श्वकुङ् (६२३) - त्रकुङ् (६२४) - श्रकुङ् (६२५) - श्लकुङ् (६२६) - ढौकृङ् (६२७) - त्रौकृङ् (६२८) - ष्वष्कि (६२९) - 'वस्कि गतौ' (६३०) 'वस्क्' । वस्कतेऽल्पक्षीरतां इति वस्का । 'अच्' (५।१।४९) अच्प्र० । पृषोदरादित्वात् षत्वम् । 'आत्' (२।४।१८) आप्प्र० । 'यांक् प्रापणे' (१०६२) या । वष्कां यातीति । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'ङ्यापो बहुलं नाम्नि' (२।४।९९) ह्रस्वः। वष्कयस्यापत्यम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौबष्कयिः ]** सोभनो वष्कयः = सुवष्कयः । सुवष्कयस्यापत्यं = सौवष्कयिः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते'० (१।३।५३) विसर्गः ॥छ॥

### देवाद् यञ् च ॥ ६।१।२१ ॥

**[ देवात् ]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । दीव्यतीति देवः । 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) बाधको 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । पञ्चमी ङसि ।

**[ यञ् ]** यञ् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ दैव्यम्, दैवम् ]** देवस्येदम्, देवादागतं वा = दैव्यम्-दैवम् । अनेन यञ्प्र० → य - अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ दैवी, दैव्यायनी वाक् ]** देवस्येयं = दैवी - दैव्यायनी इत्यपि । अनेन यञ्-अञ्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'यञो डायन् च वा' (२।४।६७) ङी - डायन् इति अन्ते आयन् । वाक् प्रथमा सि ॥छ॥

**अः स्थाम्नः** ॥ ६।१।२२ ॥

**[ अः ]** अ प्रथमा सि ।

**[ स्थाम्नः ]** स्थामन् पञ्चमी ङसि । 'अनोऽस्य'(२।१।१०८) अलोपः ।

**[ अश्वत्थामः ]** अश्व 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे'० (न्या० सं० वक्ष० (१)/सूत्र(२९)) स्था । अश्व इव तिष्ठति = अश्वत्थामा । 卐'मन्' (उणा० ९११) मन्प्र० । पृषोदरादित्वात् सस्य त० । 'एकदेशविकृतमनन्यवत्' (न्या० सं० वक्ष० (१)/सूत्र(७)) स्थानित्वम् । अश्वत्थाम्नोऽपत्यम् । अनेन अप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । प्रथमा सि ॥छ॥

**लोम्नोऽपत्येषु** ॥ ६।१।२३ ॥

**[ लोम्नः ]** लोमन् पञ्चमी ङसि ।

**[ अपत्येषु ]** न 'पत्लृ गतौ' (९६२) पत् । न पतन्ति येन जातेन पूर्वजनकादिषु तद् = अपत्यम्, तेषु । 'नञो हलि-पतेः' (उणा० ३५८) यप्र० । 'नञत्' (३।२।१२५) न० → अ० ।

**[ उडुलोमाः, उडुलोमैः ]** उडु-लोमन् । उडुवल्लोमानि यस्य सः = उडुलोमा । उडुलोम्नोऽपत्यानि = उडुलोमाः । अनेन अप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । प्रथमा जस् । तृतीया भिस् ।

**[ शरलोमाः, शरलोमैः ]** शर-लोमन् । शरवल्लोमानि यस्य सः = शरलोमा । शरलोम्नोऽपत्यानि = शरलोमाः । अनेन अप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । प्रथमा जस् । तृतीया भिस् ।

**[ औडुलोमिना ]** उडुलोम्नोऽपत्यम् = औडुलोमिः, तेन । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति'० (७।४।१) वृ० औ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । तृतीया टा ।

**[ औडुलोमिभ्याम् ]** उडुलोम्नोऽपत्ये = औडुलोमौ, ताभ्याम् । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । तृतीया भ्याम् ॥छ॥

**द्विगोरनपत्ये य-स्वराऽऽदेर्लुबद्विः** ॥ ६।१।२४ ॥

**[ द्विगोः ]** द्वौ गावौ यस्य सः = द्विगुः, तस्मात् ।

**[ अनपत्ये ]** न अपत्यम् = अनपत्यम्, तस्मिन् ।

**[ यस्वराऽऽदेः ]** यश्च स्वरश्च = यस्वरौ, यस्वरावादी यस्य सः = यस्वरादिः, तस्य ।

**[ लुप् ]** लोपनं = लुप् । 'क्रुत्-संपदादिभ्यः क्विप् (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्-लोपः ।

**[ अद्विः ]** द्वौ वारौ यस्येति द्विः । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र० । न द्विः = अद्विः । 'क्रियाविशेषणात्' (२।२।४१) अम् ।

---

卐 श० म० न्यासानुसन्धाने - मध्यमवृत्तौ-हैमप्रकाशे-'मन्-वन्-क्वनिप्०' (५।१।१४७) मन्प्र० ।

**[ द्विरथः ]** द्वि-रथ । द्वयो रथयोर्वोढा, द्विरथ्या वोढा वा । 'रथात् साऽऽदेश्च वोढ्रङ्गे' (६।३।१७५) इत्यर्थे 'यः' (६।३।१७६) यप्र० । अनेन यलुप् । यदा द्वयो रथयोर्वोढा इति वाक्यं तदा तद्धितविषये द्विगुः । यथा(दा) द्विरथ्या वोढा वेति तदा समाहारविषये द्विगुः । यथासंभवं 'ङ्यादेगौणस्याक्विपस्तद्धितलुक्यगोणी-सूच्योः' (२।४।९५) ङीनिवृत्तिः ।

**[ पञ्चकपालः ]** पञ्चसु कपालेषु - पञ्चकपाल्यां वा संस्कृतः = पञ्चकपालः । 'संस्कृते भक्ष्ये' (६।२।१४०) अण्प्र० । अनेन लुप् ।

**[ पञ्चेन्द्रः ]** पञ्चानामिन्द्राणीनां समाहारः = पञ्चेन्द्राणि । 'क्लीबे' (२।४।९७) ह्रस्वः । पञ्चेन्द्राणि-पञ्चेन्द्राण्यो वा देवताऽस्य । 'देवता' (६।२।१०१) अण्प्र० । अनेन लुपि ह्रस्वस्यापि स्थानित्वे ङीनिवृत्तौ आनोऽपि निवृत्तिः ।

**[ चतुरनुयोगः ]** चतुर्-अनुयोग । चतुरोऽनुयोगान् अधीते-卐चतुरनुयोगीं वा अधीते । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् ।

**[ त्रिवेदः ]** त्रि-वेद । त्रीन् वेदान् अधीते - त्रिवेदीं वा अधीते । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् ।

**[ पौर्वशालः ]** पूर्वा-शाला । पूर्वा चासौ शाला (च) । 'परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) पुंवत् । 'पूर्वा-ऽपर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीरम्' (३।१।१०३) इति समासः । ततः पूर्वशालायां भवः । 'भवे' (६।३।१२३) अण्प्र० । यदा तु पूर्वस्यां शालायां भवः तदा 'दिक्पूर्वादनाम्नः' (६।३।२३) णप्र० । 'दिगधिकं संज्ञातद्धितोत्तरपदे' (३।१।९८) इति समासः ।

**[ त्रैविद्यः ]** त्र्यवयवा विद्या = त्रिविद्या । 'मयूरव्यंसकेत्यादयः' (३।१।११६) मध्यमपदलोपः । त्रिविद्यामधीते = त्रैविद्यः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ॥छा॥

## प्राग्वतः स्त्री-पुंसात् नञ्-स्नञ् ॥ ६।१।२५ ॥

**[ प्राग्वतः ]** वत्प्रत्ययात् प्राक् = प्राग्वत्, तस्मात् ।

**[ स्त्रीपुंसात् ]** स्त्री च पुमान् च = स्त्रीपुंसम्, तस्मात् । 'स्त्रियाः पुंसो द्वन्द्वाच्च' (७।३।९६) अत्समासान्तः ।

**[ नञ्स्नञ् ]** नञ् च स्नञ् च = नञ्स्नञ् ।

**[ स्त्रैणः ]** स्त्री । स्त्रिया अपत्यं = स्त्रैणः । अनेन नञ्प्र० → न । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पौंस्नः ]** पुम्स् । पुंसोऽपत्यं = पौंस्नः । अनेन स्नञ्प्र० → स्न । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'पदस्य' (२।१।८९) सलोपः । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा॥

## त्वे वा ॥ ६।१।२६ ॥

**[ त्वे ]** त्व सप्तमी ङि ।

**[ वा ]** वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

---

卐 हैमप्रकाशे - चतुरनुयोगं वा अधीते ।

**[ स्त्रैणम्, स्त्रीत्वम्, स्त्रीता ]** स्त्री । स्त्रिया भावः = स्त्रैणम्, स्त्रीत्वम्, स्त्रीता । अनेन विकल्पे नञ्प्र० → न । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । पक्षे-त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पौंस्नम्, पुंस्त्वम्, पुंस्ता ]** पुम्स् । पुंसो भावः = पौंस्नम्, पुंस्त्वम्, पुंस्ता । अनेन विकल्पे स्नञ्प्र० → स्न । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । पक्षे-त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । 'पदस्य' (२।१।८९) सलुक् । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ॥छ॥

**गोः स्वरे यः** ॥ ६।१।२७ ॥

**[ गोः ]** गो पञ्चमी ङसि । 'एदोद्भ्यां ङसि०' (१।४।३५) ङसि० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ स्वरे ]** स्वर सप्तमी ङि ।

**[ यः ]** य प्रथमा सि ।

**[ गव्यम् ]** गो । गोरिदं = गव्यम् । 'तस्येदम्' (६।३।१६०) अण्प्राप्तौ अनेन यप्र० । 'य्यक्ये' (१।२।२५) गो० → गव्० ।

**[ गव्यः ]** गो । गोरपत्यं = गव्यः । 'चतुष्पाद्भ्य एयञ्' (६।१।८३) एयञ्प्राप्तौ अनेन यप्र० । 'य्यक्ये' (१।२।२५) गो० → गव्० ।

**[ गव्यम् ]** गो । गवि भवं = गव्यम् । 'भवे' (६।३।१२३) अण् - एयण्प्राप्तौ अनेन यप्र० । 'य्यक्ये' (१।२।२५) गो० → गव्० ।

**[ गव्यः ]** गो । गौर्देवताऽस्य = गव्यः । 'देवता' (६।२।१०१) अण्प्राप्तौ अनेन यप्र० । 'य्यक्ये' (१।२।२५) गो० → गव्० ।

**[ गव्यः ]** गो । गवा चरति = गव्यः । 'चरति' (६।१।११) इकण्प्राप्तौ अनेन यप्र० । 'य्यक्ये' (१।२।२५) गो० → गव्० ।

**[ गोरूप्यम् ]** गो । गोभ्यो हेतुभ्य आगतं = गोरूप्यम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) रूप्यप्र० ।

**[ गोमयम् ]** गो । गोभ्यो हेतुभ्य आगतं = गोमयम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय ॥छ॥

**ङसोऽपत्ये** ॥ ६।१।२८ ॥

**[ ङसोऽपत्ये ]** ङस् षष्ठी ङस्(पञ्चमी ङसि) । अपत्य सप्तमी ङि ।

**[ भानवीयः ]** भानु । भानोरयं = भानवीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ श्यामगवीयः ]** श्याम-गो । श्यामा गौर्यस्य सः = श्यामगुः । 'गोश्चान्ते'० (२।४।९६) ह्रस्वः । 'परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) पुंवत् । श्यामगोरयं = श्यामगवीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

'तस्येदम्' (६।३।१६०) इत्येवाणादिसिद्धौ अपत्यविवक्षायां तदपवादबाधनार्थं वचनम्, तेन -

**[ भानवः ]** भानोरपत्यं = भानवः ।

**[ श्यामगवः ]** श्यामगोरपत्यं = श्यामगवः । अत्र 'दोरीयः' (६।३।३२) इतीयो न भवति । अनेन अण्प्र० । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

अयमर्थः - उपगोरित्यस्य कम्बलेन संबद्धत्वान्न तत्संबन्धित्वेनापत्यं वक्तुमण्प्रत्ययः समर्थः ।।छ।।

**आद्यात्** ।। ६।१।२९ ।।

**[ आद्यात् ]** आद्य पञ्चमी ङसि । आदि । आदौ भवः = आद्यः । 'दिगादि-देहांशाद् यः' (६।३।१२४) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः, तस्मात् ।

आद्यात् परमप्रकृतेरेवेति कोऽर्थः ? गर्गादिरूपात् न गार्गिरित्यादिरूपादित्यर्थः ।

**[ औपगवः ]** उपगोरपत्यमनन्तरं-वृद्धं वा = औपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । औपगवस्यापत्यमौपगवः । पुनरपि 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । आद्यात्-परमप्रकृतेरेवेति भणनात् प्रथमप्रत्ययस्याऽणो निवृत्तिरुक्ता नैमित्तिकाभावश्च अनेनैव सूत्रैण अतो(तः) पुनरपि वृद्धिरवादिकं कार्यम् । औपगवस्यापत्यं युवा = औपगविः । 'वृद्धाद् यूनि' (६।१।३०) इत्यस्यापवादः 'अत इञ्' (६।१।३१) इञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औपगवेरपत्यमौपगवः । 'ङसोऽपत्ये' (६।१।२८) पुनरपि अण् । आद्यात् इत्यनेन इतरप्रत्ययविषयेऽग्रेतनयोरण्-इञौ प्रत्यययोर्निवृत्तिः क्रियते इत्यर्थः ।

**[ गार्ग्यः ]** गर्ग । गर्गस्यापत्यं पौत्रमनन्तरं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यस्यापत्यं = गार्गिः । 'अत इञ्' (६।१।३१) इञ्प्र० । अग्रेतनयञ्लोपे इञ्प्र० → इ । गार्गि(र्गे)रपत्यं = गार्ग्यः । पुनः 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । अनेन अग्रेतन इञ्निवृत्तिः । गार्ग्यस्यापत्यं = गार्ग्यः । पुनरपि यञ् । यद्वा गार्ग्यस्यापत्यं युवा । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । गार्ग्यायणस्यापत्यम् । पुनरपि यञ् । अनेन इतरप्रत्ययविषये अग्रेतनयोर्यञ्-आयनणौ निवृत्तिः क्रियते इत्यर्थः ।

अनन्तरादयोऽपि परमप्रकृतिरूपेणैवापत्ये प्रत्ययमुत्पादयन्ति ।।छ।।

**वृद्धाद् यूनि** ।। ६।१।३० ।।

**[ वृद्धात् ]** वृद्ध पञ्चमी ङसि ।

**[ यूनि ]** युवन् सप्तमी ङि । 'श्वन्-युवन्-मघोनो ङी-स्याद्यघुट्स्वरे व उः' (२।१।१०६) व० → उ० । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

**[ गार्ग्यायणः ]** गर्ग । गर्गस्यायपत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यस्यापत्यं युवा = गार्ग्यायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दाक्षायणः ]** दक्ष । दक्षस्यापत्यं पौत्रमनन्तरम् । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षेरपत्यं युवा । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ नाडायनिः ]** नड । नडस्यापत्यं वृद्धं = नाडायनः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन। 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । नाडायनस्यापत्यं युवा । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छ।।

**अत इञ्** ॥ ६।१।३१ ॥

**[ अतः ]** अत् पञ्चमी ङसि ।

**[ इञ् ]** इञ् प्रथमा सि ।

'ङसोऽपत्ये' (६।१।२८) इति वर्त्तते । अणोऽपवादः ।

**[ दाक्षिः ]** दक्षस्यापत्यम् । अनेन इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'वृद्धिः स्वरेष्वादेञ्णिति तद्धिते' (७।४।१) वृ० आ ।

**[ इः ]** अ । अस्य-विष्णोरपत्यम् = इः-कामः । अनेन इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शौभंयः ]** शुभ 'यांक् प्रापणे' (१०६२) या । शुभं यातीति । 'मन् - वन-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'अप्रयोगीत्' (१।१।३७) विच्लोपः । शुभंयोऽपत्यं = शौभंयः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः ।

**[ कैलालपः ]** कीलाल 'पां पाने' (२) पा । कीलालं पिबतीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'अप्रयोगीत्' (१।१।३७) विच्लोपः । कीलालपोऽपत्यम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**त्यजस्व कोपं कुलकीर्तिनाशनम्, भजस्व धर्मं कुलकीर्तिवर्धनम् ।**
**प्रसीद जीवेम सबान्धवा वयम्, प्रदीयतां दाशरथाय मैथिली ॥ १ ॥**

**[ मैथिली ]** मिथिला । मिथिलाया अयं स्वामी । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । तस्यापत्यम् । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० → अ । मिथिलस्य राज्ञोऽपत्यं वा । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ दाशरथिः ]** दशरथस्यापत्यं = दाशरथिः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

यतः सर्वोऽपि लोकः कालं दृष्ट्वा काकमित्येव व्यवहरति, न काकापत्यमिति काकाद्यपत्यविवक्षायां भवत्येव ।

**[ कुतश्चरति मायूरिः, केन कापिञ्जलिः कृशः ]** मयूरी । मयूर्या अपत्यम् । कपिञ्जलि । कपिञ्जलेरपत्यम् । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।८) ई-इलुक् ।

एतेन काक्यादिभ्य एयणादयोऽपि विशेषप्रतीतौ व्याख्याताः, अन्यत्र जात्याभिहितत्वात् भवन्तीत्यर्थः ।

**[ क्रौञ्चः ]** क्रुञ्च् । 'अजादेः' (२।४।१६) व्यञ्जनान्तादाप् । क्रुञ्चाया अपत्यम् । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ कौकिलः ]** कोकिलाया अपत्यम् । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ गौधेरः ]** गोधा । गोधाया अपत्यम् । 'गोधाया दुष्टे णारश्च' (६।१।८१) एरण्प्र० → एर । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ चाटकैरः ]** चटका । चटकाया अपत्यम् । 'चटकाण्णैरः स्त्रियां तु लुप्' (६।१।७९) णैरप्र० → ऐर । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ क्षत्रं क्षत्रियः ]** 'क्षणूग् हिंसायाम्' (१५०१) क्षण् । क्षणनं = क्षत् । क्विप्र० । गमां क्वौ (४।२।५८) इति न्लोपे 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । देंङ् (६०४) - 'त्रैंङ् पालने' (६०५) त्रै । 'आत् सन्ध्यक्षरस्य' (४।२।१) त्रा । क्षतस्त्रायते = क्षत्रः । क्षणनं = क्षतम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'यमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) न्लोपः । क्षतात् त्रायते । 'स्था-पा-स्ना-त्रः कः' (५।१।१४२) कप्र० → अ । उभयत्र 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । पृषोदरादित्वात् निपातः । यद्वा क्षदि हिंसार्थः सौत्रो धातुः, क्षद् । क्षदते-हिनस्ति-वधयति सर्वान् शत्रून् = क्षत्रः । 'हु-या-मा-श्रु-वसि-भसि-गु-वी-पचि-वचि-धृ-यम्यमि-मनि-तनि-सदि-छादि-क्षि-क्षदि-लुपि-पति-धूभ्यस्त्रः' (उणा० ४५१) त्रप्र० । पृषोदरादित्वात् द्लोपः । क्षत्रस्यापत्यं = क्षत्रियः । 'क्षत्रादियः' (६।१।९३) इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ राजन्यः ]** राजन् । राज्ञोऽपत्यं = राजन्यः । 'जातौ राज्ञः' (६।१।९२) ञ्यप्र० → य ।

**[ मनुष्यः, मानुषः ]** मनु । मनोरपत्यं = मनुष्यः-मानुषः । 'मनोर्याऽणौ षश्चान्तः' (६।१।९४) य - अण्प्र० → अ, षोऽन्तश्च । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । यत्र अण् तत्र वृद्धिः ॥छ॥

**बाह्वादिभ्यो गोत्रे** ॥ ६।१।३२ ॥

**[ बाह्वादिभ्यः ]** बाहुरादिर्येषां ते = बाह्वादयस्तेभ्यः ।

**[ गोत्रे ]** गोत्र सप्तमी ङि ।

स्वापत्यसन्तानस्य स्वव्यपदेशकारणमृषिरनृषिर्वा यः प्रथमः पुरुषस्तदपत्यं गोत्रम् ।

अनकारान्तार्थो बाधकबाधनार्थ आरम्भः ।

**[ बाहविः ]** बाहु । 'बाहोरपत्यं = बाहविः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ औपचाकविः ]** उप-चाकु । चाकोः समीपम् = उपचाकुः । उपचाकोरपत्यम् = औपचाकविः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ औदञ्चिः ]** उत् 'अञ्चू गतौ च' (१०५) अञ्च् । उदञ्चतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । उदञ्चोऽपत्यम् । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । इहोदञ्चिति पैलादिषु चोदञ्चीति सनकारस्य पाठादनर्चायामपि नलोपाभावः ।

**[ बाहवः ]** योऽद्यत्वे बाहुर्नाम तस्यापत्यं = बाहवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७)) अव् ।

संभवापेक्षं च गोत्रग्रहणम्, तेन -

**[ पाञ्चिः ]** पञ्चानामपत्यं = पाञ्चिः ।

**[ साप्तिः ]** सप्तानामपत्यं = साप्तिः ।

**[ आष्टिः ]** अष्टानामपत्यमाष्टिः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'नोऽपदस्य तद्धिते'० (७।४।६१) अन्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**उपचाकु**रित्यत्र 'उपसर्गाच्चेर्डित्' (उणा० ७५४) डिद् आकुप्र० ।

**निवा( चा )कु**रित्यत्र 'उपसर्गाच्चेर्डित्' (उणा० ७५४) डिद् आकुप्र० ।

**चटाकु**रित्यत्र 'चटि-कठि-पर्दिभ्य आकुः' (उणा० ७५२) आकुप्र० ।

**चाटाकु**रित्यत्र बाहुलकात् दीर्घः ।

उप-समीपे बिन्दुर्यस्य स **उपबिन्दुः** ।

कृ**कला** शिरो ग्रीवा ।

सो(शो)भनं मित्रं यस्याः सा **सुमित्रा** ।

रामादयः सा(शा)म्बपर्यन्ताः वृष्णयः ।

**सुधावत्** इत्यत्र मत्प्र० । **स्वधावत्** इत्यत्रापि ।

**卐अनुरहत्** इत्यत्र शतृप्र० ।

**शृङ्खलतोदिन्** इत्यत्र शिखादित्वादिन्प्र० ।

**खरनादिन्** इत्यत्र गणपाठात् 'पूर्वपदस्था'० (२।३।६४) इति न णत्वम् ।

**इन्द्रशर्मन्** - इन्द्र एनं शीर्यात् ।

**मद्रशर्मन्** - मद्र एनं शीर्यात् ।

अ**ग्निशर्मन्** - अग्निरेनं शीर्यात् ।

दे**वशर्मन्** - देवमेनं शीर्यात् । सर्वत्र 'तिक्कृतौ नाम्नि' (५।१।७१) मन्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**उदञ्च** - उदञ्चति क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ हास्तिशीर्षिः ]** हस्तिन्-शिरस् । हस्तिशिरसोऽपत्यं = हास्तिशीर्षिः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'शीर्षः स्वरे तद्धिते' (३।२।१०३) शिरस्० → शीर्षादेशः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औडुलोमिः ]** उडुवल्लोमानि यस्य सः = उडुलोमा । । उडुलोम्नोऽपत्यम् = औडुलोमिः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः ।

**[ शारलोमिः ]** भा(शा)रभूतानि लोमानि यस्य सः = भा(शा)रलोमा । भा(शा)रलोम्नोऽपत्यम् । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृद्धिः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः ।

**[ साखिः ]** सखि । सख्युरपत्यं = साखिः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

**[ सांवेशिः ]** संवेशिन् । संवेशिनोऽपत्यं = सांवेशिः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ ।

**[ औदङ्किः ]** उद्गतोऽङ्कात् = उदङ्कः । उदङ्कस्याऽपत्यम् = औदङ्किः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

---

卐 हैमप्रकाशे - अनुहरत् ।

**[ औद्दालकिः ]** 'दल विशरणे' (४१३) दल्, उत्पूर्व० । ऊर्ध्वं दलतीति उद्दालकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । उद्दालकस्यापत्यम् = औद्दालकिः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ। 'अवर्णेवर्णस्य' (७।४।६८) अलुक ।

**[ वाल्मीकिः ]** वल्मीकस्यापत्यं = वाल्मीकिः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ। 'अवर्णेवर्णस्य' (७।४।६८) अलुक ।

**[ आरुणिः ]** अरुणस्यापत्यम् = आरुणिः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० आ। 'अवर्णेवर्णस्य' (७।४।६८) अलुक । सर्वत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । रः पदान्ते'० (१।३।५३) विसर्गः ।

उक्तार्थादन्यत्रेति कोऽर्थः ? वृद्धार्थादन्यत्राकारान्तानां विदादीनां 'ऋषि-वृष्ण्यन्धक'० (६।१।६१) इत्यनेनाण् स्यात्, सोऽनेन बाध्यते ।

**[ वैदिः ]** विद । विदस्यापत्यमनन्तरं = वैदिः । 'विदादेर्वृद्धे' (६।१।४१) अञ् प्राप्नोति सोऽनेन बाध्यते । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक ।

**[ और्विः ]** उर्व । उर्वस्यापत्यमनन्तरम् = और्विः । 'विदादेर्वृद्धे' (६।१।४१) अञ् प्राप्नोति सोऽनेन बाध्यते । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक ।

**[ गार्गिः ]** गर्ग । गर्गस्यापत्यमनन्तरम् । 'गर्गादेर्यञ्' (६।१।४२) यञ् प्राप्नोति सोऽनेन बाध्यते । अनेनैव इञ्प्र० → इ ।

**[ वात्सिः ]** वत्स । वत्सस्यापत्यमनन्तरम् । 'गर्गादेर्यञ्' (६।१।४२) यञ् प्राप्नोति सोऽनेन बाध्यते । अनेनैव इञ्प्र० ।

**[ कौञ्जिः ]** कुञ्ज । कुञ्जस्यापत्यं = कौञ्जिः । 'कुञ्जादेर्ञायन्यः' (६।१।४७) इत्यस्य प्राप्तौ अनेन इञ्प्र० ।

**[ ब्राध्निः ]** ब्रध्न । ब्रध्नस्यापत्यं = ब्राध्निः । 'कुञ्जादेर्ञायन्यः' (६।१।४७) इत्यस्य प्राप्तौ अनेन इञ्प्र० ।

**[ आश्विः ]** अश्व । अश्वस्यापत्यम् = आश्विः । 'अश्वादेः' (६।१।४९) आयनञ् इत्यस्य प्राप्तौ अनेन इञ्प्र० ।

**[ आर्किः ]** अर्क । अर्कस्यापत्यम् = आर्किः । 'अश्वादेः' (६।१।४९) आयनञ् इत्यस्य प्राप्तौ अनेन इञ्प्र० ।

**[ नाडिः ]** नड । नडस्यापत्यं = नाडिः । 'नडादिभ्य आयनण्' (६।१।५३) इत्यस्य प्राप्तौ अनेन इञ्प्र० ।

**[ मौञ्जिः ]** मुञ्ज । मुञ्जस्यापत्यं = मौञ्जिः । 'नडादिभ्य आयनण्' (६।१।५३) इत्यस्य प्राप्तौ अनेन इञ्प्र० ।

**[ औपमन्यवः ]** 卐उप-समीपे मन्युर्यस्य सः = उपमन्युः । उपमन्योरपत्यम् = औपमन्यवः । 'विदादेर्वृद्धे' (६।१।४१) इत्यस्य प्राप्तौ 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अणप्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७००) अव् ।

**[ जामदग्नः ]** जमदग्नेरपत्यम् । 'गर्गादेर्यञ्' (६।१।४२) इत्यस्य प्राप्तौ 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अणप्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ भास्मः ]** भस्मन् । भस्मनोऽपत्यम् । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अणप्र० । 'अणि' (७।४।५२) इति प्रतिषेधे 'अवर्मणो मनोऽपत्ये' (७।४।५९) इत्यनेन अन्त्यस्वरादिलोपः - अन्लोपः । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ।

---

卐 हैमप्रकाशे - उपगतो मन्युम् = उपमन्युः ।

**[ सौमनसः ]** सुष्ठु मनो यस्य सः = सुमनाः । सुमनसोऽपत्यं = सौमनसः । 'अश्वादेः' (६।१।४९) इत्यस्य प्राप्तौ 'ऋषि-वृष्ण्य०' (६।१।६१) अण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ ।

**[ लौगवः ]** लिगु । लिगोरपत्यम् । 'गर्गादेर्यञ्' (६।१।४२) इत्यस्य प्राप्तौ 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र०।

**[ शारद्वतः ]** शरद्वत् । शरद्वतोऽपत्यम् । 'विदादेर्वृद्धे' (६।१।४१) इत्यस्य प्राप्तौ 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० ।

इतः प्रभृति गोत्र इत्यधिकाराद् गोत्रे संभवति ततोऽन्यत्र प्रतिषेधः ।

अयमर्थः - ये शब्दा गोत्रेऽगोत्रे च वर्त्तन्ते तेभ्यो गोत्र एव प्रत्ययो भवति, न त्वगोत्रे, ये च गोत्रार्थे न संभाव्यन्ते ततोऽगोत्रार्थेऽपीञ् भवत्येव ॥छ॥

## **वर्मणोऽचक्रात्** ॥ ६।१।३३ ॥

**[ वर्मणः ]** वर्मन् पञ्चमी ङसि ।

**[ अचक्रात् ]** न चक्रम् = अचक्रम्, तस्मात् ।

**[ ऐन्द्रवर्मिः ]** इन्द्र 'वृग्ट् वरणे' (१२९४) वृ । इन्द्र एनं वृषीष्ट । 'तिक्कृतौ नाम्नि' (५।१।७१) मन्प्र०। 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । इन्द्रवर्मणोऽपत्यम् = ऐन्द्रवर्मिः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अन्लोपः ।

**[ चाक्रवर्मणः ]** चक्रं एनं वृषीष्ट । 'तिक्कृतौ नाम्नि' (५।१।७१) मन्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । चक्रं वर्म यस्य । चक्रवर्मणोऽपत्यं = चाक्रवर्मणः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० - अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्मणो मनोऽपत्ये' (७।४।५९) इति वर्मणो वर्जनात् अनो न लुक् ॥ छ ॥

## **अजादिभ्यो धेनोः** ॥ ६।१।३४ ॥

**[ अजादिभ्यः ]** 卐 अज आदिर्येषां ते = अजादयः, तेभ्यः ।

**[ धेनोः ]** धेनु पञ्चमी ङसि ।

**[ आजधेनविः ]** अजा चासौ धेनुश्चेति कार्यम् । 'पोटा - युवति - स्तोक-कतिपय - गृष्टि - धेनु - वशा - वेहद् - बष्कयणी - प्रवक्तृ - श्रोत्रिया-ऽध्यापक - धूर्त्त - प्रशंसारूढैर्जातिः' (३।१।१११) इति समासः । न तु अजा एव धेनवो यस्येति । तदा 'स्वाङ्गान्ङीर्जातिश्चाऽमानिनि' (३।२।५६) इति पुंवन्निषेधः स्यात् । अजधेनु । अजधेनोरपत्यम् = आजधेनविः । अनेन इञ्प्र०→ इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ बाष्कधेनविः ]** बष्कधेनोरपत्यं = बाष्कधेनविः । अनेन इञ्प्र०→ इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ॥ छ ॥

## **ब्राह्मणाद्वा** ॥ ६।१।३५ ॥

**[ ब्राह्मणात् ]** ब्राह्मण पञ्चमी ङसि ।

---

卐 श० म० न्या० - अजा शब्द आदिर्यस्य गणस्य सोऽयमजादिः । अथवा अजाशब्द आदौ येषां शब्दानां ते अजादयः शब्दाः, तेभ्यः ।

**[ वा ]** वा प्रथमा सि ।

**[ ब्राह्मणधेनविः, ब्राह्मणधेनवः ]** ब्राह्मणधेनोरपत्यम् । अनेन विकल्पेन इञ्प्र० → इ । 卐卐 पक्षे - 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ॥ छ ॥

**भूयः-सम्भूयो-ऽम्भो-ऽमितौजसः स्लुक् च** ॥ ६।१।३६ ॥

**[ भूयःसम्भूयोऽम्भोऽमितौजसः ]** भूयश्च सम्भूयश्च अम्भश्च अमितौजश्च = भूयःसम्भूयोऽम्भोऽमितौजस्, तस्मात् ।

**[ स्लुक् ]** सो लुक् = स्लुक् । प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ भौयिः ]** अयं बहुः (२) । द्वयोर्मध्येऽतिशयेन बहुः = भूयान् । 'गुणाङ्गा०' (७।३।९) ईयसुप्र० → ईयस् । 'भूर्लुक् चेवर्णस्य' (७।४।४१) भूरादेशः - ईकारलोपश्च । भूयस् । भूयसोऽपत्यं = भौयिः । अनेन इञ्प्र० → इ - सलुक् च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ साम्भूयिः ]** 卐 सङ्गतो भूयान् = सम्भूयः । प्रादिसमासः । सम्भूयसोऽपत्यं = साम्भूयिः । अनेन इञ्प्र० → इ - सलुक् च । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आम्भिः ]** अम्भस् । अम्भसोऽपत्यम् = आम्भिः । अनेन इञ्प्र० → इ - सलुक् च । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आमितौजिः ]** 'मांक् माने' (१०७३) मा । मीयते स्म = मितः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'दो-सो-मा-स्थ इः' (४।४।११) इ । न मितं ओजो यस्यासौ अमितौजाः । अमितौजसोऽपत्यम् = आमितौजिः । अनेन इञ्प्र० → इ - सलुक् च । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आकतिः ]** अक 'तसूच् उपक्षये' (१२२४) तस् । अकं तस्यति । 'क्विप्' (५।१।१४८) क्विप्प्र० । अकतसोऽपत्यम् = आकतिः । मतान्तरेऽनेन इञ्प्र० → इ - सलुक् च । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ॥ छ ॥

**शालङ्क्यौदि-षाडि-वाड्वलि** ॥ ६।१।३७ ॥

**[ शालङ्क्यौदिषाडिवाड्वलि ]** शालङ्किश्च औदिश्च षाडिश्च वाड्वलिश्च = शालङ्क्यौदिषाडिवाड्वलि । प्र० सि । 'अनतो लुप्' (१।४।५९) सिलुप् ।

**[ शालङ्किः ]** शलङ्कु । शलङ्कोरपत्यं = शालङ्किः । अनेन इञ्प्र० → इ - उकारलोपश्च निपात्यते । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ ।

**[ औदिः ]** उदक । उदकस्यापत्यम् = औदिः । अनेन इञ्प्र० → इ - कलोपश्च निपात्यते । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ ।

**[ षाडिः ]** षष् । षण्णामपत्यं = षाडिः । अनेन इञ्प्र० → इ - ष० → डत्वं च निपात्यते । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ।

---

卐卐 श० म० न्या० - पक्षे औत्सर्गिके 'ङसोऽपत्ये' (६।१।२८) अणि अवादेशे ब्राह्मणधेनवः इति ।

卐 म० वृ० - भूयोभिः सङ्गतः ।

**[ वाड्वलिः ]** वाच् 'वद व्यक्तायां वाचि' (९९८) वद् । वाचं वदति = वाग्वादः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । वाग्वादस्यापत्यं = वाड्वलिः । अनेन इञ्प्र० → इ - वाचोऽन्तस्य डत्वं - वल भावश्चोत्तरपदस्य ॥ छ ॥

**व्यास-वरुट-सुधातृ-निषाद-बिम्ब-卐卐चण्डालादन्तस्य चाक्** ॥ ६।१।३८ ॥

**[ व्यासवरुटसुधातृनिषादबिम्बचण्डालात् ]** व्यासश्च वरुटश्च सुधाता च निषादश्च बिम्बश्च चण्डालश्च = व्यासवरुटसुधातृनिषादबिम्बचण्डालम्, तस्मात् ।

**[ अन्तस्य ]** अन्त षष्ठी ङस् ।

**[ च ]** च प्रथमा सि

**[ अक् ]** अक् प्रथमा सि ।

यद्यन्तग्रहणं न स्यात् तदा 'अनेकवर्णः सर्वस्य' (७।४।१०७) स्यात् ।

**[ वैयासकिः ]** वि 'आसिक् उपवेशने' (१११९) आस् । 卐 विशिष्टमास्ते = व्यासः । 'अच्' (५।१।४९) अच्प्र० → अ । विविधमासयति वा = व्यासः । 'अच्' (५।१।४९) अच्प्र० → अ । वि 'असूच् क्षेपणे' (१२२१) अस् । विशेषेण अस्यते = व्यासः । कर्मणि घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । व्यासस्यापत्यं = वैयासकिः । अनेन इञ्प्र० → इ - अन्तस्याकारस्य अक् च । 'लोकात्' (१।१।३) व् पाठउ विश्लेषियइ । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) ऐ० - वै० ।

**[ वारुटकिः ]** वरुट । वरुटस्यापत्यम् । अनेन इञ्प्र० → इ - अन्तस्याकारस्य अक् च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ ।

**[ सौधातकिः ]** सुधातृ । सुधातुरपत्यम् । अनेन इञ्प्र० → इ - अन्त ऋकारस्य अक् च । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ ।

**[ नैषादकिः ]** नि 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । निषीदन्तीत्यत्र । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'सदोऽप्रतेः परोक्षायां त्वादेः' (२।३।४४) इति षत्वम् । निषादस्यापत्यम् । अनेन इञ्प्र० → इ - अन्तस्याकारस्य अक् च । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० ऐ ।

**[ नैषादः ]** निषादस्यापत्यं वृद्धं = नैषादः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बैम्बकिः ]** बिम्बस्यापत्यं = बैम्बकिः । अनेन इञ्प्र० → इ - अन्तस्याकारस्य अक् च । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० ऐ ।

**[ चाण्डालकिः ]** चण्डालस्यापत्यं = चाण्डालकिः । अनेन इञ्प्र० → इ - अन्तस्याकारस्य अक् च । 'वृद्धिः स्वरेष्वादे०' (७।४।६१) वृ० आ ।

सुधातृ-व्यासाभ्यां 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) इत्यनेन अणोऽपवादः । वरुटात् 'सेनान्त०' (६।१।१०२) इति कारुलक्षणस्य ञ्यस्यापवादः । शेषेभ्योऽपि 'अत इञ्' (६।१।३१) इत्यनेन इजि प्रा-र्थं वचनम् ॥ छ ॥

---

卐 श० म० न्या० - व्यस्यति - विस्तारयति वाचमिति व्यासः ।

卐卐 लघु-मध्यम-बृहद्वृत्त्यादिषु तथा हैमप्रकाशे च **चण्डालादन्त्यस्य** इत्येवं पाठोऽस्ति ।

## पुनर्भू-पुत्र-दुहितृ-ननान्दुरनन्तरेऽञ् ॥ ६।१।३९ ॥

**[ पुनर्भूपुत्रदुहितृननान्दुः ]** पुनर्भूश्च पुत्रश्च दुहितृश्च(दुहिता च) ननान्दृश्च(ननान्दा च) = पुनर्भूपुत्रदुहितृननान्दृ, तस्मात् ।

**[ अनन्तरे ]** न विद्यते अन्तरं - विधानं(व्यवधानं) यत्र तत् = अनन्तरम्, तस्मिन् ।

**[ अञ् ]** अञ् प्रथमा सि ।

**[ पौनर्भवः, पौनर्भवौ, पौनर्भवाः ]** पुनर्भवति । क्विप्प्र० । पुनर्भू । पुनर्भ्वा अनन्तरमपत्यं = पौनर्भवः । पुनर्भ्वा अनन्तरेऽपत्ये - पौनर्भवौ । पुनर्भ्वा अनन्तराण्यपत्यानि = पौनर्भवाः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि - औ - जस् ।

**[ पौत्रः ]** पुत्र । पुत्रस्यानन्तरमपत्यं = पौत्रः । वृद्धापत्ये पौत्रिरेव । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दौहित्रः ]** दुहितृ । दुहितुरनन्तरमपत्यं = दौहित्रः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेञ्णिति तद्धिते' (७।४।१) वृ० औ । 'इवर्णादेरस्वे०' (१।२।२१) र० ।

**[ नानान्द्रः ]** ननान्दृ । ननान्दुरपत्यमनन्तरं = नानान्द्रः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'इवर्णादेरस्वे०' (१।२।२१) र० ।

**[ वैदः ]** विद । विदस्यापत्यं वृद्धं = वैदः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि ।

**[ वैदौ ]** विद । विदस्यापत्ये वृद्धे = वैदौ । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा औ ।

**[ विदाः ]** विदस्यापत्यानि = विदाः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'यञञोऽश्यापर्णान्त - गोपवनादेः' (६।१।१२६) अञ्लुप् । प्रथमा जस् ।

**[ वैदम् ]** विदस्यापत्यानि । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । 'यञञोऽश्यापर्णान्त०' (६।१।१२६) अञ्लुप् । विदानां सङ्घादिः । 'सङ्घ-घोषा-ऽङ्क-लक्षणेऽञ्-यञिञः' (६।३।१७२) अण्प्र० । 'न प्राग्जितीये स्वरे' (६।१।१३५) इति अण्विषये लुप्तप्रत्ययस्याञो लोपाभावः । कोऽर्थः ? पुनरपि निवर्त्तते । 'वृद्धिः स्वरेष्वादेञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् ।

**[ औपगवाः ]** उपगोरपत्यानि = औपगवाः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा जस् ।

**[ औपगवकम् ]** औपगवानां सङ्घः । 'चरणादकञ्' (६।३।१६८) इत्यधिकारः 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) इति अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पौत्रः ]** पुत्र । पुत्रस्यानन्तरमपत्यम् । 'पुनर्भू-पुत्र-दुहितृ-ननान्दुरनन्तरेऽञ्' (६।१।३९) अञ्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः पु० → पौ० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पौत्रस्यापत्यम् । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इञो लुप् ।

**[ कार्त्रायणिः ]** कर्तृ । कर्तुरपत्यं = कार्त्रः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'इवर्णादिरस्वे०' (१।२।२१) रत्वम् । कार्त्रस्यापत्यम् । 'द्विस्वरादणः' (६।१।१०९) आयनिञ्प्र० → आयनि । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अस्य च ब्राह्मणत्वात् 'अब्राह्मणात्' (६।१।१४१) इति न लुप् । उच्यते - पुनर्भ्वाद्यपत्यस्यागोत्रत्वाद् गोत्राधिकारे विहिता लुप् संघाद्यण् च न भविष्यति ।

पौत्रशब्दाच्चावृद्धप्रत्ययान्तत्वादञ्यणि च इञ् आयनिञ् च न भविष्यतीति । विशेषाभाव एव ॥छ॥

**परस्त्रियाः परशुश्चासावर्ण्ये** ॥ ६।१।४० ॥

**[ परस्त्रियाः ]** परा-स्त्री । परा-पुरुषाद्भिन्नवर्णा स्त्री = परस्त्री । 'परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) पुंवत्, तस्याः = परस्त्रियाः । 'स्त्रीदूतः' (१।४।२९) दास्० → आस्० । इय् ।

**[ परशुः ]** परशु प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ असावर्ण्ये ]** समानो वर्णो यस्याः सा = सवर्णा । 'समानस्य धर्मादिषु' (३।२।१४९) समान० → स० । 'आत्' (२।४।१८) आप्प्र० → आ । सवर्णाया भावः = सावर्ण्यम् । 'पति-राजान्त-गुणाङ्ग-राजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । न सावर्ण्यम् = असावर्ण्यम्, तस्मिन् = असावर्ण्ये ।

**[ पारशवः ]** पर-स्त्री । परात् पुरुषाद्भिन्नवर्णा स्त्री = परस्त्री, तस्या अनन्तरापत्यं = पारशवः । अनेन अञ्प्र० → अ - परस्त्री → परशुरादेशश्च । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । यो ब्राह्मणेन शूद्रयोषिति जातः सः पारशवः । वारडः प्राकृतभाषयोच्यते ।

**[ पारस्त्रैणेयः ]** परस्य स्त्री = परस्त्री, तस्या अनन्तरापत्यं = पारस्त्रैणेयः । 'कल्याण्यादेरिन् चाऽन्तस्य' (६।१।७७) एयण्प्र० → एय - ईकारस्य इनादेशः । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । जारजातः कथ्यते ॥छ॥

**विदादेर्वृद्धे** ॥ ६।१।४१ ॥

**[ विदादेः ]** विद आदिर्यस्य सः = विदादिः, तस्मात् ।

**[ वृद्धे ]** वृद्ध सप्तमी ङि ।

**[ वैदः, वैदौ, विदाः ]** विद । विदस्यापत्यं वृद्धं = वैदः । विदस्यापत्ये वृद्धे = वैदौ । विदस्यापत्यानि वृद्धानि = विदाः । अनेन त्रिषु अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । बहुवचनं यत्र दीयते तत्र 'यञञोऽश्यापर्णान्त - गोपवनादेः' (६।१।१२६) अञ्लुप् । सि-औ-जस् ।

**[ और्वः, और्वौ, उर्वाः ]** उर्व । उर्वस्यापत्यं वृद्धम् = और्वः । उर्वस्यापत्ये वृद्धे = और्वौ । उर्वस्यापत्यानि वृद्धानि = उर्वाः । अनेन अञ्प्र० → अ । बहुवचनं यत्र दीयते तत्र 'यञञोऽश्यापर्णान्त०' (६।१।१२६) अञ्लुप् । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ-जस् ।

**[ काश्यपः, काश्यपौ, कश्यपाः ]** कशामर्हति । 'दण्डादेर्यः' (६।४।१७८) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'पां पाने' (२) पा । कश्यं पिबतीति कश्यपः । 'आतो डो-ऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः (२।१।११४) आलुक् । कश्यपस्यापत्यं वृद्धं = काश्यपः । कश्यपस्यापत्ये वृद्धे = काश्यपौ ।

कश्यपस्यापत्यानि वृद्धानि = कश्यपाः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यत्र जस् तत्र 'यञञोऽश्यापर्णान्त'० (६।१।१२६) अञ्लुप् । सि-औ- जस् ।

**[ भारद्वाजः, भारद्वाजौ, भरद्वाजाः ]** 'भृंग् भरणे' (८८६) भृ । भरतीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । धृज (१३०) - धृजु (१३१) - ध्वज (१३२) - ध्वजु (१३३) - ध्रज (१३४) - ध्रजु (१३५) - 'वज गतौ' (१३६) वज् । वजनं = वाजः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । भरन् वाजोऽस्य सः = भरद्वाजः । यद्वा भरन्तं वजति - वाजयति वा = भरद्वाजः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'णेरनिटि' (४।३।८३) णिच्लुक् । भरद्वाजस्यापत्यं वृद्धं = भारद्वाजः । भरद्वाजस्यापत्ये वृद्धे = भारद्वाजौ । भरद्वाजस्यापत्यानि वृद्धानि = भरद्वाजाः । अनेन अञ्प्र० → अ । यत्र जस् तत्र 'यञञोऽश्यापर्णान्त०' (६।१।१२६) अञ्लुप् । अन्यत्र 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ-जस् ।

**[ अथेन्द्रहूः सप्तमः काश्यपानाम्, भारद्वाजानां कतमोऽसि ]**

**[ काश्यपानाम् ]** कश्यप । कश्यपस्य इमे = काश्यपाः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तेषाम् ।

**[ भारद्वाजानाम् ]** भरद्वाजस्य इमे = भारद्वाजाः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तेषाम् ।

कश्यपस्यापत्यानि इत्यत्र कश्यपेन सर्वेषां सम्बन्धोऽस्ति, पारम्पर्येण सम्बन्धात् । इदमर्थे तु एकस्यैव कश्यपेन सम्बन्धभूतोऽर्थेभेदो भवेदित्याह - **सर्वेषामपि हि पितरोऽभेदोपचारेण कश्यपाः ।**

**[ बभ्रुः ]** बभ्रु । बभ्रोरपत्यं वृद्धम् । न केवलं 'गर्गादेर्यञ्' (६।१।४२) ।

**[ मण्डुः ]** मण्डोरपत्यं वृद्धम् । न केवलं 'गर्गादेर्यञ्' (६।१।४२) ।

**[ लमकः ]** लमकस्यापत्यं वृद्धं = लमकः । न केवलं 'नडादिभ्य आयनण्' (६।१।५३) ।

**[ वैदिः ]** विद । विदस्यापत्यमनन्तरं = वैदिः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) इत्यण्बाधकः 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ विश्वानर ]** 'नरे' (३।२।८०) दीर्घत्वम् ।

**[ ऋष्टिषेण ]** 'एत्यकः' (२।३।२६) षत्वम् ।

**[ माठर्यः, माठर्यौ ]** मठर । मठरस्यापत्यं = माठर्यः । मठरस्यापत्ये = माठर्यौ । मतान्तरे यकारादि - अञ्प्र० - वृद्धिश्च । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ ।

**[ मठराः ]** बहुवचनेषु 'यञञोऽश्यापर्णान्त-गोपवनादेः' (६।१।१२६) अञ्लुप् । यस्यापि निवृत्तौ मठरा निष्पद्यते ॥छ॥

### **गर्गादेर्यञ्** ॥ ६।१।४२ ॥

**[ गर्गादेः ]** गर्ग आदिर्यस्य सः = गर्गादिस्तस्मात् ।

**[ यञ् ]** यञ् प्रथमा सि ।

**[ गार्ग्यः ]** 'गॄत् निगरणे' (१३३५) गॄ । गिरति निरवद्यमिति गर्गः । 'गम्यमि - रम्यजि-गद्यदि-छाग-डि-खडि-गॄ-भॄ-वृ-स्वृभ्यो गः' (उणा० ९२) गप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । गर्गस्यापत्यं वृद्धं = गार्ग्यः । अनेन यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वात्स्यः ]** 'वद व्यक्तायां वाचि' (९९८) वद् । वदति मातरं दृष्ट्वा निरवद्यमिति वत्सः । 'मा-वा-वद्यमि-कमि-हनि-मानि-कष्यशि-पचि-मुचि-यजि-वृ-तृभ्यः सः' (उणा० ५६४) सप्र० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त । वत्सस्यापत्यं वृद्धं = वात्स्यः । अनेन यञ्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गार्गिः ]** गर्गस्यापत्यमनन्तरं = गार्गिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गार्गिः ]** गर्गो नाम कश्चित्, तस्यापत्यं वृद्धं = गार्गिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मानव्यायनी ]** मनु । मनोरपत्यं वृद्धम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'लोहितादिशकलान्तात्' (२।४।६८) ङी-डायन्० → आयन्० च । 'डित्यन्त्यस्वरादेः (२।१।११८) अन्त्यस्वरादिलोपः ।

**[ मानवी प्रजा ]** मनु । मनोरपत्यं = मानवी प्रजा । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'अणञेयेकण्०' (२।४।२०) ङी । उभयत्र सि ।

**[ रामो जामदग्न्यः ]** राम । प्रथमा सि । जमदग्नि । जमदग्नेरपत्यमनन्तरमपि वृद्धम् । अनेन यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ व्यासः पाराशर्यः ]** व्यास प्रथमा सि । पर कॄ (१५२९) - मॄ (१५३०) - 'शॄश् हिंसायाम्' (१५३१) शॄ, आङ्पूर्व० । परान् आशृणातीति पराशरः । 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । 'नामिनो०' (४।३।१) गु० अर् । पराशरस्यापत्यमनन्तरमपि वृद्धं = पाराशर्यः । अनेन यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

पुत्रेऽपि पौत्रादिकार्यकरणात् तथोच्यते -

**[ जामदग्नः ]** जमदग्नेरपत्यमनन्तरं = जामदग्नः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ पाराशरिः ]** पराशरस्यापत्यं = पाराशरिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कथं पाराशरः ? ]** पा(प)राशरस्यायं = पाराशरः । 'तस्येदम्' (६।३।१६०) । अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वाज ]** 'वज मार्गणसंस्कारगत्योः' (१५९०) वज् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । वाजयतीति वाजः । अच्प्र० । 'णेरनिटि' (४।३।८३) णिच्लुक् ।

**[ अज ]** न जायते = अजः । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् ।

**[ संकृति ]** संकृतीत्यत्र गणपाठात् सडभावः ।

**[ व्याघ्रपात् ]** व्याघ्रस्येव पादौ यस्यासौ व्याघ्रपात् । 'सु-संख्यात्' (७।३।१५०) पाद० → पात् ।

**[ वि( वे )दभृत् ]** 'टुडुभृंग्क् पोषणे च' (११४०) भृ ।★ वेदं बिभर्ति = वेदभृत् । क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ पितृबध् ]** पितृ 'बन्धंश् बन्धने' (१५५२) बन्ध् । पितरं बध्नाति । क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ प्राचीनयोग ]** प्राचीनो योगो यस्य सः = प्राचीनयोगः ।

**[ पुलस्ति ]** 卐 'पुलण् समुच्छ्राये' (१६८९) पुल् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । पोलयतीति पुलस्तिः । 'अगि-विलि-पुलि क्षिपेरस्तिक्' (उणा० ६६०) किद् अस्तिप्र० । 'णेरनिटि' (४।३।८३) णिच्लुक् ।

**[ रेभ ]** 'रेभृङ् शब्दे' (७७५) रेभ् । रेभते । 'अच्' (५।१।४९) अच्प्र० → अ ।

**[ अग्निवेश ]** अग्नि 'विशंत् प्रवेशने' (१४१५) विश् । अग्निमपि विशति = अग्निवेशः । 'अच्' (५।१।४९) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ शङ्ख ]** 'शमूच् उपशमे' (१२३०) शम् । शाम्यत्युपसर्गाणीति शङ्खः । 'शमि-मनिभ्यां खः' (उणा० ८४) खप्र० ।

**[ विश्वावसु ]** विश्व-वसु । विश्वस्मिन् वसूनि यस्य सः = विश्वावसुः । 'वसु-राटोः' (३।२।८१) दीर्घत्वम् ।

**[ कुरुकत ]** 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) का । 'पृषि-रञ्जि-सिकि-का-ला-वृभ्यः कित्' (उणा० २०८) किद् अतप्र० । 'इडेत्-पुसि-चाऽऽतो लुक्' (४।३।९४) आलुक् । कुरूणां कतः = कुरुकतः ।

**[ लोहित ]** 'रुहं जन्मनि' (९८८) रुह् । 'हृ-श्या-रुहि-शोणि-पलिभ्य इतः' (उणा० २१०) इतप्र० - रोहितः - लत्वे लोहितः ।

**[ बभ्रु, बभ्लु ]** 'टुडुभृंग्क् पोषणे च' (११४०) भृ । 'भृंग् भरणे' (८८६) भृ वा । 'हनि-या-कृ-भृ-पॄ-तॄ-त्रो द्वे च' (उणा० ७३३) किद् उप्र० - द्वित्वं च बभ्रुः - लत्वे बभ्लुः ।

**[ मण्डु ]** 卐卐 'मडु भूषायाम्' (२३१) मड् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) मण्ड् । मण्डते(ति) । 'भृ-मृ-तॄ-त्सरि-तनि-धन्यनि-मनि-मस्जि-शी-वटि-कटि-पटि-गडि-चञ्च्यसि-वसि-त्रपि-शॄ-स्वृ-स्निहि-क्लिदि-कन्दीन्दि-विन्द्यन्धि-बन्ध्यणि-लोष्टि-कुन्थिभ्य उः' (उणा० ७१६) उप्र० ।

**[ मङ्खु ]** उख (६३) - नख (६४) - णख (६५) - वख (६६) - मख (६७) - रख (६८) - लख (६९) 'मखु गतौ' (७०) मख् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) मङ्ख् । मङ्खतीति मङ्खुः । 'भृ-मृ-तॄ-त्सरि-तनि-धन्यनि-मनि-मस्जि-शी-वटि-कटि-पटि-गडि-चञ्च्यसि-वसि-त्रपि-शॄ-स्वृ-स्निहि-क्लिदी-कन्दीन्दि-विन्द्यन्धि-बन्ध्यणि-लोष्टि-कुन्थिभ्य उः' (उणा० ७१६) उप्र० ।

**[ गूहलु ]** 'गुहौग् संवरणे' (९३५) गुह् । गोहतीति । 'गूहलु-गुग्गुलु-कमण्डलवः' (उणा० ८२४) 'गूहलु' निपातः ।

**[ तलुक्ष ]** तरु 'क्षि क्षये' (१०) क्षि । तरून् क्षयतीति । 'क्वचित्' (५।१।१७१) डप्र० । लत्वे कृते तलुक्ष ।

---

卐 उणादौ - 'पुल महत्त्वे' ।

卐卐 उणादौ - 'मनिंच् ज्ञाने' (१२६३) मन् । 'तमि-मनि-कणिभ्यो डुः' (७६५) डुप्र० । मण्डुः - ऋषिः ।

★ हैमप्रकाशे - विदं बिभर्ति = विदभृत् ।

**[ कुण्डिनी ]** 'कुडुङ् दाहे' (६९०) कुड् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) कुण्ड् । अवश्यं कुण्डते । 'णिन् चाऽऽवश्यकाऽधमर्ण्ये' (५।४।३६) णिन्प्र० → इन् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ यज्ञवल्क ]** यज्ञो वल्कोऽस्य सः ।

**[ मुद्गर, मुद्गल ]** मुदि गिरति = मुद्गर । 'मुदि-गूरिभ्यां टिद् गजौ चान्तौ' (उणा० ४०४) टिद् अरप्र० - लत्वे मुद्गल ।

**[ मुसर ]** मुस 'रांक् दाने' (१०६९) रा । मुसं रातीति ।'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[मुसल]** मुस 'लांक् आदाने' (१०६८) ला । मुसं लातीति । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्य०' (२।१।११४) आलुक् । अथवा 'मुसच् खण्डने' (१२२८) मुस् । 'तृपि-वपि-कुपि-कुशि-कुटि-वृषि-मुसिभ्यः कित्' (उणा० ४६८) किद् अलप्र० ।

**[ मन्द्रित ]** मन्द्रो गंभीरः शब्दः, सोऽस्यास्ति । इतप्र० । मन्द्रं करोति वा । क्तप्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ पिङ्गल ]** पिङ्गं लातीति पिङ्गलः । 'क्वचित्' (५।१।१७१) डप्र० ।

**[ गोलुन्द ]** गां लुनाति । 'कुमुद-बुद्बुदादयः' (उणा० २४४) । उदप्र० निपातः ।

**[ उलूक ]** उलिः सौत्रो धातुः - उल् । ओलति । 'शम्बूक-शाम्बूक-वृधूक-मधूकोलूकोरुबूक-वरुकादयः' (उणा० ६१) इति 'उलूक' निपातः ।

**[ भिष ]** भिषि सौत्रो धातुः - भिष् । भिषते । 'नाम्युपान्त्य - प्री - कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० - भिषः ।

**[ भिषज, भिष्णाज ]** भिषि सौत्रो धातुः । 'भिषेर्भिष-भिष्णौ च वा' (उणा० १३१) किद् अजप्र० - निपात्यते ।

**[ वृहलू ]** वृहं लुनाति - वृहलू ।

**[ पप्फलू ]** 卐पुष्पाणि लुनाति । 'क्विप्' (५।१।१७१) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

इति गर्गादिः ॥ब॥

### मधु-बभ्रोर्ब्राह्मण-कौशिके ॥ ६।१।४३ ॥

**[ मधुबभ्रोः ]** + मधुश्च बभ्रुश्च = तत्, तस्मात् ।

**[ ब्राह्मणकौशिके ]** ब्राह्मणश्च कौशिकश्च = ब्राह्मणकौशिकम्, तस्मिन् ।

**[ माधव्यो ब्राह्मणः ]** मधु । मधोरपत्यं वृद्धं ब्राह्मणः = माधव्यः । अनेन यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ माधवोऽन्यः ]** मधोरपत्यं = माधवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

---

卐 हैमप्रकाशे - फलानि लुनाति । पृषोदरादित्वात् पप्फलूः ।

+ श० म० न्या० - मधुश्च बभ्रुश्चैतयोः समाहारो मधुबभ्रू, तस्मात् = मधुबभ्रोरिति । यद्यपि समाहारे क्लीबत्वमुचितमिति मधुबभ्रुणोरिति पाठो युक्तः, तथापि सौत्रत्वाल्लाघवार्थं च प्रकृतनिर्देश इति विज्ञेयम् ।

**[ बाभ्रव्यः कौशिकः ]** बभ्रु । बभ्रोरपत्यं वृद्धं कौशिकः = बाभ्रव्यः । अनेन यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ बाभ्रवोऽन्यः ]** बभ्रोरपत्यं = बाभ्रवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

बभ्रोर्गर्गादिपाठाद्यञि सिद्धे कौशिके नियमार्थं वचनम् । गर्गादिपाठस्तु लोहितादिकार्यार्थः, तेन-

**[ बाभ्रव्यायणी ]** बभ्रोरपत्यं वृद्धं स्त्री कौशिकी । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'यञो डायन् च वा' (२।४।६७) ङी - डायन्० → आयन्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ॥छ॥

**कपि-बोधादाङ्गिरसे** ॥ ६।१।४४ ॥

**[ कपिबोधात् ]** कपिश्च बोधश्च = कपिबोधम्, तस्मात् ।

**[ आङ्गिरसे ]** अङ्गिरसोऽपत्यमाङ्गिरसः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ, तस्मिन् ।

**[ काप्यः ]** कपि । कपेरपत्यं वृद्धमाङ्गिरसः = काप्यः । अनेन यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ। 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ बौध्यः ]** बोध । बोधस्यापत्यं वृद्धमाङ्गिरसः = बौध्यः । अनेन यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कापेयः ]** कपेरपत्यं वृद्धम् । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) । वृ० आ। 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ बौधिः ]** बोधस्यापत्यम् । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

कपिशब्दो गर्गादिषु पठ्यते, तस्येहोपादानं नियमार्थम्-**आङ्गिरस एव यञ् नान्यत्रेति** । लोहितादिकार्यार्थश्च गणपाठः ।

**[काप्यायनी]** कपेरपत्यं वृद्धं स्त्री । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'लोहितादिशकलान्तात्' (२।४।६८) ङी० → ई० - डायन्० → आयन्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ।

**[ माधवी, माधव्यायनी ]** मधोरपत्यं वृद्धं स्त्री ब्राह्मणी = माधवी - माधव्यायनी । अनेनैव पदेन साध्यः । 'यञो डायन् च वा' (२।४।६७) ङी - डायन्० → आयन्० विकल्पेन । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् ।

**[ बौधी, बौध्यायनी ]** बोधस्यापत्यं वृद्धं स्त्री = बौधी-बौध्यायनी । अनेनैव पदेन साध्यः । 'यञो डायन् च वा' (२।४।६७) ङी० - डायन्० → आयन्० विकल्पेन । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् ॥छ॥

**वतण्डात्** ॥ ६।१।४५ ॥

**[ वतण्डात् ]** 'वन भक्तौ' (३२९) वन् । वन्यते-सेव्यते = वतण्डः । 'वनेस्त च' (उणा० १७५) अण्डप्र० - न० → त०, तस्मात् ।

**[ वातण्ड्यः ]** वतण्ड । वतण्डस्यापत्यं वृद्धमाङ्गिरसः = वातण्ड्यः । अनेनैव यञ्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

आङ्गिरसादन्यत्र - **( वातण्ड्यः, वातण्डः )** वतण्डस्यापत्यं वृद्धम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

गर्गादिपाठादेव यञि सिद्धे वचनमाङ्गिरसे शिवाद्यण् बाधनार्थम् । ननु यः शिवादौ अण् सोऽपत्यमात्रे विहितो गर्गादौ तु यञ् वृद्धापत्ये तस्माद् विशेषविधानादेव आङ्गिरसेऽन्यत्रापि च यञ् सिद्धौ किमर्थं सूत्रम् ? इत्याशङ्का । शिवादिपाठोऽप्यस्य वृद्ध एवाण्विधानार्थः । अन्यत्र अनन्तरापत्ये हि ऋषित्वादेव अण् सिद्धः ॥छ॥

## स्त्रियां लुप् ॥ ६।१।४६ ॥

**[ स्त्रियाम् ]** स्त्री सप्तमी ङि । 'स्त्रीदूतः' (१।४।२९)ङि० → दाम्० → आम्० । 'स्त्रियाः' (२।१।५४) इय् ।

**[ लुप् ]** लुप् प्रथमा सि ।

**[ वतण्डी ]** वतण्डस्यापत्यं वृद्धं स्त्री आङ्गिरसी । 'वतण्डात्' (६।१।४५) यञ्प्र० । अनेन यञ्लुप् । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ वातण्डी ]** वतण्डस्यापत्यं वृद्धम् । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ। 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ वातण्ड्यायनी ]** वतण्डस्यापत्यं वृद्धम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'लोहितादिशकलान्तात्' (२।४।६८) ङी० → ई० - डायन्० → आयन्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ॥छ॥

## कुञ्जादेर्ञायन्यः ॥ ६।१।४७ ॥

**[ कुञ्जादेः ]** कुञ्ज आदिर्यस्य सः = कुञ्जादिः, तस्मात् ।

**[ ञायन्यः ]** ञायन्य प्रथमा सि ।

**[ कौञ्जायन्यः ]** टुक्षु (१०८४) - रु (१०८५) - 卐 'कुंक् शब्दे' (१०८६) कु । कौति = कुञ्जः । 'कुवः कुब् - कुनौ च' (उणा० १२९) कुञ्जनिपातः । कुञ्जस्यापत्यं वृद्धम् । अनेन ञायन्यप्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कौञ्जायन्यौ ]** कुञ्जस्यापत्ये वृद्धे = कौञ्जायन्यौ । शेषं पूर्ववत् ।

**[ ब्राध्नायन्यः ]** 'वृधूङ् वृद्धौ' (९५७) वृध् । वर्धते गुणैः । 'दिन-नग्न - फेन - चिह्न - ब्रध्न - धेन - स्तेन - च्यौक्नादयः' (उणा० २६८) नप्र० - ब्रध्ननिपातः । ब्रध्नस्यापत्यमनन्तरम् । 'ऋषि-वृष्ण्यन्धक - कुरुभ्यः' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ब्राध्नस्यापत्यं वृद्धम् । अनेन ञायन्यप्र० ।

**[ ब्राध्नायन्यौ ]** ब्राध्नस्यापत्यं(त्ये) वृद्धे । अनेन ञायन्यप्र० । शेषं पूर्ववत् ।

---

卐 उणादौ - 'कुङ् शब्दे' ।

**[ कौञ्जिः ]** कुञ्जस्यापत्यमनन्तरं = कौञ्जिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

ञकारो ञित्कार्यार्थः । ।।छा।

**स्त्रीबहुष्वायनञ्** ॥ ६।१।४८ ॥

**[ स्त्रीबहुषु ]** स्त्री च बहुश्च = स्त्रीबहवस्तेषु ।

**[ आयनञ् ]** आयनञ् प्रथमा सि ।

**[ कौञ्जायनी ]** कुञ्जस्यापत्यं वृद्धं स्त्री = कौञ्जायनी । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'जातेरयान्त०' (२।४।५४) ङी ।

**[ ब्राध्नायनी ]** ब्रध्नस्यापत्यं वृद्धं स्त्री । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'जातेरयान्त०' (२।४।५४) ङी ।

**[ कौञ्जायनाः ]** कुञ्जस्यापत्यानि वृद्धानि । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । प्रथमा जस् ।

**[ ब्राध्नायनाः ]** ब्रध्नस्यापत्यानि वृद्धानि । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । प्रथमा जस् ।।छा।

**अश्वादेः** ॥ ६।१।४९ ॥

**[ अश्वादेः ]** अश्व आदिर्यस्य सः = अश्वादिः, तस्मात् ।

**[ आश्वायनः ]** अश्वस्यापत्यं वृद्धम् । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शाङ्खायनः ]** शङ्खस्यापत्यं वृद्धम् । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ। 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आश्विः ]** अश्वस्यापत्यम् । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आश्विः ]** अश्वो नाम कश्चित्, तस्यापत्यं वृद्धम् = आश्विः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैल्य ]** विलि । विलेरपत्यम् । 'दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः' (६।१।११८) ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ रामोद ]** रामं उदकं यस्य । 'नाम्न्युत्तरपदस्य च' (३।२।१०७) उदक० → उद० ।

**[ रामोदक्ष ]** रामा उद्गतेऽक्षिणी यस्य = रामोदक्ष ।

**[ गोल ]** कैं (३६) 'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । गायतीति । 'ग्रह्याद्भ्यः कित्' (उणा० ४९४) किद् ओलप्र० । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् ।

**[ पावितृ ]** पवितृ बाहुलकाद् दीर्घः ।

**[ आनडुह्य ]** अनडुह् । अनडुहोरपत्यं वृद्धम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ ।

**[ आनडुह्यायन ]** आनडुह्यस्यापत्यं युवा = आनडुह्यायनः । अनेन आयनञ्प्र० → आयन । यथा आनडुह्यायनस्यायं शिष्यः । 'दोरीयः' (६।३।३२) ईयप्रत्ययविषये 'यूनि लुप् (६।१।१३७) आयनञ्लुप् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । आनडुहीयेत्येवं भवति । अन्यथा 'वायनणायनिञोः' (६।१।१३८) विकल्पेन स्यात् इति शेषः ।

**[ आश्वः, आश्वायनः ]** अश्वस्यापत्यं वृद्धम् । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ ।

**[ शाङ्खः, शाङ्ख्यः, शाङ्खायन्यः, शाङ्खायनः ]** शङ्खस्यापत्यं वृद्धम् । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'कुञ्जादेर्ञायन्यः' (६।१।४७) ञायन्यप्र० → आयन्य । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ जानायनिः, जानायनो युवा ]** जन । जनस्यापत्यं वृद्धम् । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । जानायनस्यापत्यम् । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन अथवा आयनञ्प्र० । वृद्धिः । जानायनस्यापत्यं युवा । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लुप् ।

**[ औत्सायनः ]** उत्स । उत्सस्यापत्यं वृद्धम् । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ ।

**[ ग्रैष्मायणः ]** ग्रीष्म । ग्रीष्मस्यापत्यं वृद्धम् । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'र-षृवर्णान्नो ण एकपदेऽनन्त्यस्या-ऽल - च - ट - तवर्ग - श-सान्तरे' (२।३।६३) न० → ण० ।

**[ आर्जुनायनः ]** अर्जुनस्यापत्यं वृद्धम् । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ।

**[ वैल्यायनो युवा ]** वैल्यस्यापत्यं युवा । अनेन आयनञ्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा॥

### शप-भरद्वाजादात्रेये ॥ ६।१।५० ॥

**[ शपभरद्वाजात् ]** शपश्च भरद्वाजश्च = शपभरद्वाजम्, तस्मात् ।

**[ आत्रेये ]** अत्रेरपत्यम् । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'अवर्णे०' (७।४।६८) इलुक् । 'वृद्धिः स्वरे०' (७।४।६८) वृद्धिः । आत्रेय सप्तमी ङि ।

**[ शापायनः आत्रेयश्चेत् ]** शपस्यापत्यं वृद्धमात्रेयः = शापायनः । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ।

**[ भारद्वाजायनः आत्रेयश्चेत् ]** 'टुडुभृंग्क् पोषणे च' (११४०) भृ । भरतीति(बिभर्तीति) भरत् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'वज मार्गणसंस्कारगत्योः' (१५९०) वज् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । भरतं वाजयतीति

भरद्वाजः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'णेरनिटि' (४।३।८३) णिच्लुक् । भा(भ)रद्वाजस्यापत्यं वृद्धमात्रेयः । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ।

**[ शापिः ]** शप । शपस्यापत्यं वृद्धम् । 卐'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ भारद्वाजः ]** भरद्वाजस्यापत्यं वृद्धम् । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## भर्गात् त्रैगर्त्ते ॥ ६।१।५१ ॥

**[ भर्गात् ]** भर्ग पञ्चमी ङसि ।

**[ त्रैगर्त्ते ]** तिस्रो गर्त्ता यस्य सः = त्रिगर्त्तः । त्रिगर्त्तस्यापत्यं = त्रैगर्त्तः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तस्मिन् ।

**[ भार्गायणस्त्रैगर्त्तश्चेत् ]** भर्ग । भर्गस्यापत्यं वृद्धं = भार्गायणः । अनेन आयनञ्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ भार्गिः ]** भर्गस्यापत्यम् । 卐卐'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## आत्रेयाद् भारद्वाजे ॥ ६।१।५२ ॥

**[ आत्रेयात् ]** अत्रि । अत्रेरपत्यम् = आत्रेयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक्, तस्मात् ।

**[ भारद्वाजे ]** भरद्वाजस्यापत्यं वृद्धम् = भारद्वाजः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तस्मिन् ।

**[ आत्रेयायणो भारद्वाजो युवा ]** अत्रि । अत्रेरपत्यं वृद्धम् । 'इतोऽनिञः' (६।१।७२) एयण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । आत्रेयस्यापत्यं युवा = आत्रेयायणः । अनेन आयनञ्प्र० → आयन ।

**[ आत्रेयोऽन्यः ]** आत्रेय । आत्रेयस्यापत्यम् । +'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लुप् । अन्य प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

## नडादिभ्य आयनण् ॥ ६।१।५३ ॥

**[ नडादिभ्य आयनण् ]** नड आदिर्येषां ते = नडादयः, तेभ्यः । आयनण् प्रथमा सि । 'रोर्यः' (१।३।२६) र० → य० । 'स्वरे वा' (१।३।२४) यलुक् ।

**[ नाडायनः ]** नड । नडस्यापत्यं वृद्धं = नाडायनः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ चारायणः ]** चा(च)र । चरस्यापत्यं वृद्धं = चारायणः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णा०' (२।३।६३) न० → ण० ।

---

卐 श० म० न्या० 'अत इञ्' (६।१।३१) इञ्प्र० ।  卐卐 श० म० न्या० - 'अत इञ्' (६।१।३१) इञ्प्र० ।
\+ श० म० न्या० '-अत इञ्' (६।१।३१) इञ्प्र० ।

**[ नाडिः ]** नडस्यापत्यमनन्तरं = नाडिः । 卐'बाह्वादिभ्याो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**णकारो वृद्ध्यर्थः ।**

द्वीपा इति स्त्रीलिङ्गपाठः । पुल्लिङ्गेऽयं चरितार्थः ।

एयणा बाध्येत इति तद्बाधनार्थः ।

अन्यच्च 'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् (न्या० सं० वक्ष० (१) सूत्र (१६) ) इति परिभाषया अन्येषां स्त्रीलिङ्गे प्राप्तस्य निषेधः, तेनान्येषां स्त्रीलिङ्गे यथाप्राप्तमेव ।

**[ मिमत ]** मीश्चासौ मतश्च = मिमतः । बहुलं ह्रस्वः ।।छ।।

**यञिञः** ॥ ६।१।५४ ॥

**[ यञिञः ]** यञ् च इञ् च = यञिञ्, तस्मात् ।

'वृद्धाद् यूनि' (६।१।३०) इति वचनाद् यूनीति लभ्यते ।

**[ गार्ग्यायणः ]** गर्ग । गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादिर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्। गार्ग्यस्यापत्यं युवा = गार्ग्यायणः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वात्स्यायनः ]** वत्स । वत्सस्यापत्यं वृद्धम् । 'गर्गादिर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वात्स्यस्यापत्यं युवा = वात्स्यायनः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दाक्षायणः ]** दक्ष । दक्षस्यापत्यं वृद्धं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षेरपत्यं युवा = दाक्षायणः । अनेन आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ प्लाक्षायणः ]** प्लक्ष । प्लक्षस्यापत्यं वृद्धं - प्लाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । प्लाक्षेरपत्यं युवा = प्लाक्षायणः । अनेन आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ औदुम्बरायणः ]** उदुम्बर । उदुम्बरस्य राज्ञोऽपत्यं वृद्धम् = औदुम्बरिः । 'साल्वांश - प्रत्यग्रथ-कलकूटाश्मकादिञ्' (६।१।११७) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औदुम्बरेरपत्यं युवा = औदुम्बरायणः। अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ तैलखलायनः ]** तिलखल । तिलखलस्य राज्ञोऽपत्यं वृद्धं = तैलखलिः । 'साल्वांश-प्रत्यग्रथ०' (६।१।११७) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तैलखलेरपत्यं युवा = तैलखलायनः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

वृद्धविहितस्येञो ग्रहणादिह न भवति-

---

卐 श० म० न्या० - 'अत इञ्' (६।१।३१) इञ्प्र० ।

**[ औदुम्बरः, औदुम्बरायणिः ]** उदुम्बराणां राजा = औदुम्बरिः । 'साल्वांश-प्रत्यग्रथ०' (६।१।११७) इञ्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औदुम्बरेरपत्यम् = औदुम्बरः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'अवृद्धाद् दोर्नवा' (६।१।११०) द्वितीये आयनिञ्प्र० → आयनि । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ गार्गेयः ]** गर्ग । गर्गस्यापत्यं वृद्धम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'यञो डायन् च वा' (२।४।६७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । गार्ग्या अपत्यं = गार्गेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ दाक्षेयः ]** दक्षस्यापत्यं वृद्धम् । 'अत इञ्' (६।१।३१) इञ्प्र० । 'वृद्धिः स्वरे.' (७।४।१) वृ० आ । 'नुर्जातेः' (२।४।७२) ङी । ('इञ इतः' (२।४।७१) ङी) । दाक्ष्या अपत्यं = दाक्षेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

**हरितादेरञः** ॥ ६।१।५५ ॥

**[ हरितादेः ]** 卐हरित आदिर्यस्य सः = हरितादिः, तस्मात् ।

**[ अञ् ]** अञ् प्रथमा सि ।

**विदाद्यन्तर्गणो हरितादिः ।**

**[ हारितायनः ]** हरितस्यापत्यं वृद्धं = हारितः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । हारितस्यापत्यं युवा = हारितायनः । अनेन आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कैन्दासायनः ]** 卐卐कुत्सितो दासः = किन्दासः । किन्दासस्यापत्यं वृद्धं = कैन्दासः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कैन्दासस्यापत्यं युवा । अनेन आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्।

**[ वैदः ]** विद । विदस्यापत्यं वृद्धं = वैदः । 'विदादेर्वृद्धे' (६।१।४१)अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वैदस्यापत्यं युवा = वैदः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लुप् ।

**[ हारितः ]** हरितस्यापत्यं वृद्धं = हारितः । अण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यूनीति अर्थ उभयपदे स्थितः ॥छ॥

**कोष्टृ-शलङ्कोर्लुक् च** ॥ ६।१।५६ ॥

**[ क्रोष्टृशलङ्कोः ]** क्रोष्टा च शलङ्कुश्च = कोष्टृशलङ्कु, तस्मात् ।

**[ लुक् ]** लुक् प्रथमा सि ।

---

卐 श० म० न्या० - हरित आदौ यस्य सोऽयं गणो हरितादिः ।

卐卐 हैमप्रकाशे - किमपि दासते ।

**[ च ]** च प्रथमा सि ।

**[ क्रौष्टायनः ]** 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश् । क्रोशतीति । 'कृ-सि-कम्यमि-गमि-तनि-मनि-जन्यसि-मसि-सच्यवि-भा-धा-गा-ग्ला-म्ला-हनि-हा-या-हि-क्रुशि-पूभ्यस्तुन्' (उणा० ७७३) तुन्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'यज - सृज - मृज - राज - भ्राज - भ्रस्ज - व्रस्च - परिव्राजः शः षः' (२।१।८७) श० → ष० । 'क्रुशस्तुनस्तृच् पुंसि' (१।४।९१) तुन् → तृजादेशः । क्रोष्टुरपत्यं वृद्धं = क्रौष्टायनः । अनेन आयनण्प्र० → आयन - अन्तस्य ऋकारस्य च लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ शालङ्कायनः ]** शलङ्कु । शलङ्कोरपत्यं वृद्धम् । अनेन आयनण्प्र० → आयन-अन्तस्य उकारस्य च लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

**दर्भ-कृष्णा-ऽग्निशर्म-रण-शरद्वच्छुनकादाग्रायण-ब्राह्मण-वार्षगण्य-वाशिष्ठ-भार्गव-वात्स्ये** ॥६।१।५७॥

**[ दर्भकृष्णाऽग्निशर्मरणशरद्वच्छुनकात् ]** दर्भश्च कृष्णश्च अग्निशर्मा च रणश्च शरद्वच्च शुनकश्च = दर्भकृष्णाऽग्निशर्मरणशरद्वच्छुनकम्, तस्मात् ।

**[ आग्रायणब्राह्मणवार्षगण्यवाशिष्ठभार्गववात्स्ये ]** आग्रायणश्च ब्राह्मणश्च वार्षगण्यश्च वाशिष्ठश्च भार्गवश्च वात्स्यश्च = आग्रायणब्राह्मणवार्षगण्यवाशिष्ठभार्गववात्स्यम्, तस्मिन् ।

**[ दार्भायण आग्रायणश्चेत् ]** दर्भ । दर्भस्यापत्यं वृद्धं आग्रायणश्चेत् = दार्भायणः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दार्भिरन्यः ]** दर्भस्यापत्यं = दार्भिः । दर्भादिभ्यः पक्षे卐 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० सर्वत्र । 'वृद्धिः स्वरे०' (७।४।१) । वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कार्ष्णायनो ब्राह्मणः ]** कृष्णस्यापत्यं वृद्धं ब्राह्मणश्चेत् = कार्ष्णायनः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कार्ष्णिरन्यः ]** कृष्णस्यापत्यं = कार्ष्णिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० ।

**[ आग्निशर्मायणो वार्षगण्यः ]** अग्निशर्मन् । अग्निशर्मणोऽपत्यं वृद्धं वार्षगण्यश्चेत् = आग्निशर्मायणः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । वृषगणस्यापत्यं वृद्धं = वार्षगण्यः। 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आग्निशर्मिरन्यः ]** अग्निशर्मणोऽपत्यम् । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० । शेषं पूर्ववत् ।

**[ राणायनो वासिष्ठः ]** रण । रणस्यापत्यं वृद्धं वासिष्ठश्चेत् = राणायनः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वसिष्ठस्यापत्यं = वासिष्ठः । 'ऋषि - वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ ।

**[ राणिरन्यः ]** रणस्यापत्यं = राणिः । 'बाह्वादि०' (६।१।३२) इञ्प्र० ।

---

卐 श० म० न्या० - 'अत इञ्' (६।१।३१) इञ्प्र० ।

**[ शारद्वतायनो भार्गवः ]** शरद्वत् । शरद्वतोऽपत्यं वृद्धं भार्गवश्चेत् = शारद्वतायनः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आ । भृगोरपत्यं = भागर्वः । 'ऋषि-वृष्ण्य०' (६।१।६१) अण्प्र० → अ ।

**[ शारद्वतोऽन्यः ]** शरद्वतोऽपत्यं वृद्धं = शारद्वतः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आ ।

**[ शौनकायनो वात्स्यः ]** शुनकस्यापत्यं वृद्धं वात्स्यश्चेत् = शौनकायनः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वत्सस्यापत्यं वृद्धं = वात्स्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य ।

**[ शौनकोऽन्यः ]** शुनकस्यापत्यं वृद्धम् । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा॥

**जीवन्त-पर्वताद्वा** ॥ ६।१।५८ ॥

**[ जीवन्तपर्वतात् ]** जीवन्तश्च पर्वतश्च = जीवन्तपर्वतम्, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ जैवन्तायनः ]** जीवन्तस्यापत्यं वृद्धं = जैवन्तायनः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ जैवन्तिः ]** जीवन्तस्यापत्यम् । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पार्वतायानः ]** पर्वन् । पर्वाण्यत्र सन्ति । 'मरुत् - पर्वणस्तः' (७।२।१५) तप्र० । पर्वतस्यापत्यं वृद्धम् । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पार्वतिः ]** पर्वतस्यापत्यम् । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ॥छा॥

**द्रोणाद्वा** ॥ ६।१।५९ ॥

**[ द्रोणात् ]** द्रोण पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

योगविभागाद्वृद्ध इति निवृत्तम् ।

**[ द्रौणायनः, द्रौणिः ]** द्रोणस्यापत्यं = द्रौणायनः । अनेन आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । अन्यत्र 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा॥

**शिवादेरण्** ॥ ६।१।६० ॥

**[ शिवादेः ]** शिव आदिर्यस्य सः = शिवादिः, तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ शैवः ]** शिवस्यापत्यं = शैवः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रौष्ठः ]** 卐प्रोष्ठस्यापत्यं = प्रौष्ठः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रौष्ठिकः ]** 卐卐प्र - ओष्ठ । प्रवृद्धावोष्ठौ यस्य सः = प्रौष्ठः । 'वौष्ठौतौ समासे' (१।२।१७) अलुक् । प्रोष्ठावस्य स्तः = प्रोष्ठिकः । 'अतोऽनेकस्वरात्' (७।२।६) इकप्र० । प्रोष्ठिकस्यापत्यं = प्रौष्ठिकः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ जम्ब ]** 'जनैचि प्रादुर्भावे' (१२६५) जन् । जायते = जम्ब । 'तुम्ब-स्तम्बादयः' (उणा० ३२०) 'जम्ब'निपातः ।

**[ कुथार ]** कुथ 'ॠंक् गतौ' (११३५) ऋ । कुथमियर्त्ति = कुथारः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि - हलेः' (४।३।५१) वृ० आर् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

**[ ककुस्थ ]** कु । 'अव्ययस्य को द् च' (७।३।३१) इति अक्प्र० - ककु । कुत्सितं तिष्ठन्ति विपक्षा अस्मिन् = ककुस्थः । 'आतो डोऽह्वा - वा - मः' (५।१।७६) डप्र० → अ । ' डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ कहूय ]** क 'ह्वेंग् स्पर्धा - शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । कं ह्वयतीति क्विप् । यजादि - वचेः किति (४।१।१०९) य्वृत् व० → उ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । कहूं यातीति कहूयः । 'आतो डोऽह्वा - वा - मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्य०' (२।१।११४) आलुक् ॥छा।

### ऋषि - वृष्ण्यन्धक - कुरुभ्यः ॥ ६।१।६१ ॥

**[ ऋषिवृष्ण्यन्धककुरुभ्यः ]** ऋषयश्च वृष्णयश्च अन्धकाश्च कुरवश्च = ऋषिवृष्ण्यन्धककुरवः, तेभ्यः । ऋषयो लौकिका वसिष्ठादयः अपत्ययोगात् । वृष्णयः - अन्धकाः - कुरवश्च प्रसिद्धा वंशाख्याः क्षत्रियाः । वंशेन आख्या येषां ते ।

अत इञोऽपवादः ।

ऋषि - **[ वासिष्ठः ]** वसिष्ठस्यापत्यं = वासिष्ठः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैश्वामित्रः ]** विश्वामित्रस्यापत्यं = वैश्वामित्रः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गौतमः ]** गो 'तमूच् काङ्क्षायाम्' (१२३२) तम् । गास्ताम्यतीति गौतमः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अमोऽकम्यमि - चमः' (४।२।२६) ह्रस्वः । गोतमस्यापत्यं = गौतमः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

वृष्णि - **[ वासुदेवः ]** वसुदेवस्यापत्यं = वासुदेवः ।

**[ आनिरुद्धः ]** न निरुध्यते स्म । 'क्त - क्तवतू' (५।१।१७४) क्तप्र० → त । 'अधश्चतुर्थात् तथोर्धः (२।१।७९) त० → ध० । 'तृतीयस्तृतीय - चतुर्थे' (१।३।४९) ध० → द० । अनिरुद्धस्यापत्यम् = आनिरुद्धः ।

**[ वाज्रः ]** वज्रस्यापत्यं = वाज्रः ।

---

卐 शिवादिगणे प्रौष्ठशब्दोऽस्ति । श० म० न्या०- प्रगतौ प्रवृद्धौ वौष्ठौ यस्य सोऽयं प्रौष्ठस्तस्यापत्यमपि प्रौष्ठः ।

卐卐 शिवादिगणे पौष्ठिकशब्दोऽस्ति । श० म० न्या० - प्रवृद्धावोष्ठौ यस्य सोऽयं प्रौष्ठिकस्तस्यापत्यमपि प्रौष्ठिकः ।

**[ प्रातिवाहनः ]** प्रतिवाहनस्यापत्यं = प्रातिवाहनः ।

**[ औदारः ]** उदारस्यापत्यम् = औदारः । अनेन अण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

अन्धक - **[ श्वाफल्कः ]** श्वफल्कस्यापत्यं = श्वाफल्कः ।

**[ रान्ध्रसः ]** रन्ध्र 'षोंच् अन्तकर्मणि' (११५०) षो । 'षः सोष्ट्यै - ष्ठिव - ष्वष्कः' (२।३।९८) सो । 'आत् सन्ध्यक्षरस्य' (४।२।१) सा । रन्ध्राणि स्यति - अन्तं नयति । 'आतो डोऽह्वा - वा - मः' (५।१।७६) डप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । रन्ध्रसोऽपत्यं = रान्ध्रसः ।

**[ चैत्रकः ]** चित्रकस्यापत्यं = चैत्रकः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

कुरु - **[ नाकुलः ]** न विद्यते कुलमस्य । 'नखादयः' (३।२।१२८) नकुलनिपातः । नकुलस्यापत्यं = नाकुलः ।

**[ साहदेवः ]** सह 'दिवूच् क्रीडा - जयेच्छा - पणि - द्युति - स्तुति - गतिषु' (११४४) दिव् । कुलेन सह दीव्यतीति सहदेवः । 'अच्' (५।१।४९) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । सहदेवस्यापत्यं = साहदेवः ।

**[ दौःशासनः ]** दुर् 'शासूक् अनुशिष्टौ' (१०९५) शास् । दुःखेन शास्यते । शासू - युधि - दृशि - धृषि - मृषा-ऽऽतोऽनः' (५।३।१४१) अनप्र० । दुःशासनस्यापत्यं = दौःशासनः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दौर्योधनः ]** दुर् 'युधिंच् सम्प्रहारे' (१२६०) युध् । दुःखेन युध्यते । 'शासू - युधि०' (५।३।१४१) अनप्र० । 'लघोरुपा०' (४।३।४) गु० ओ । दुर्योधनस्यापत्यं = दौर्योधनः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आत्रेयः ]** अत्रि । अत्रेरपत्यम् = आत्रेयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ जातसेन्यः, जातसेनिः ]** जातां सेनायां यः सः = जातसेनः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । जातसेनस्यापत्यम् । 'सेनान्त - कारु-लक्ष्मणादिञ् च' (६।१।१०२) ञ्यप्र० → य - इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औग्रसेन्यः, औग्रसेनिः ]** उग्रा सेना यस्य सः = उग्रसेनः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । उग्रसेनस्यापत्यम् = औग्रसेन्यः - औग्रसेनिः । 'सेनान्त०' (६।१।१०२) ञ्यप्र० → य - इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

वृष्णि - **[ वैष्वक्सेन्यः, वैष्वक्सेनिः ]** विष्वक् सेनायां यस्य सः = विष्वक्सेनः । विष्वक्सेनस्यापत्यं = वैष्वक्सेन्यः, वैष्वक्सेनिः । 'सेनान्त - कारु०' (६।१।१०२) ञ्यप्र० → य - इञ्प्र० → इ । 'वृद्धिः स्वरे० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

कुरु - **[ भैमसेन्यः, भैमसेनिः ]** भीमा सेना यस्य सः = भीमसेनः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । भीमसेनस्यापत्यं = भैमसेन्यः - भैमसेनिः । 'सेनान्त - कारु०' (६।१।१०२) ञ्यप्र० → य - इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ दौर्योधनिः ]** दुःखेन युध्यते । 'शासू - युधि०' (५।३।१४१) अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । दुर्योधनस्यापत्यं = दौर्योधनिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ यौधिष्ठिरिः ]** युधिष्ठिरस्यापत्यं = यौधिष्ठिरिः । 'बाह्वादि०' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ आर्जुनिः ]** अर्जुनस्यापत्यम् = आर्जुनिः । 'बाह्वादि०' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।।छ।।

## कन्या - त्रिवेण्याः कनीन - त्रिवणं च ॥ ६।१।६२ ॥

**[ कन्यात्रिवेण्याः ]** कन्या च त्रिवेणी च = कन्यात्रिवेणी, तस्याः = कन्यात्रिवेण्याः । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० ।

**[ कनीनत्रिवणम् ]** कनीनश्च त्रिवणश्च = कनीनत्रिवणम् ।

**[ च ]** च प्रथमा सि ।

**[ कानीनो व्यासः, कर्णश्च ]** कन्याया अपत्यं = कानीनः । अनेन अण्प्र० → अ - कन्या → कनीनादेशः । उपचारात् देवताप्रभावाद्वा कन्याया अपि कदापि अपत्यसम्भवो घटते ।

**[ त्रैवणः ]** त्रिवेणी । त्रिवेण्या अपत्यं = त्रैवणः । अनेन अण्प्र० → अ - त्रिवेणी → त्रिवणादेशः ।

'ङ्याप्त्यूङ :' (६।१।७०) एयणोऽपवादः ।।छ।।

## शुङ्गाभ्यां भारद्वाजे ॥ ६।१।६३ ॥

**[ शुङ्गाभ्याम् ]** शुङ्गश्च शुङ्गा च = शुङ्गौ, ताभ्याम् = शुङ्गाभ्याम् । 'पुरुषः स्त्रिया' (३।१।१२६) पुरुषः शिष्यते ।

**[ भारद्वाजे ]** भारद्वाज सप्तमी ङि ।

**[ शौङ्गो भारद्वाजः ]** शुङ्गस्य शुङ्गाया वा अपत्यं = शौङ्गः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अ-आलुक् । भरद्वाजस्यापत्यं = भारद्वाजः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शौङ्गिः, शौङ्गेयश्चान्यः ]** शुङ्ग - शुङ्गा । शुङ्गस्य शुङ्गाया अपत्यं = शौङ्गिः - शौङ्गेयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अ - आलुक् ।

'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (न्या० सं० वक्ष० (१)/सूत्र (१६)) इति सिद्धे परत्वात् 'द्विस्वरादनद्याः' (६।१।७१) इत्येयण् प्राप्नोति, तद्बाधनार्थं द्विवचनेन स्त्रीलिङ्गः शुङ्गाशब्द उपादीयते ।।छ।।

## विकर्णच्छगलाद्वात्स्या-ऽऽत्रेये ॥ ६।१।६४ ॥

**[ विकर्णच्छगलात् ]** विकर्णश्च छगलश्च = विकर्णच्छगलम् तस्मात् ।

**[ वात्स्याऽऽत्रेये ]** वात्स्यश्च आत्रेयश्च = वात्स्याऽऽत्रेयम्, तस्मिन् ।

**[ वैकर्णो वात्स्यः ]** विशिष्टौ कर्णौ यस्य सः = विकर्णः । विकर्णस्यापत्यं = वैकर्णः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैकर्णिरन्यः ]** विकर्णस्यापत्यमनन्तरं = वैकर्णिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ छागल आत्रेयः ]** छगलस्यापत्यं = छागलः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अत्रेरपत्यम् = आत्रेयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ छागलिरन्यः ]** छगलस्यापत्यमनन्तरम् । ऋषित्वेऽपि व्यावृत्तिबलात् 'अत इञ्' (६।१।३१) - बाह्वादित्वाद्वा इञ्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

### णश्च विश्रवसो विश्लुक् च वा ॥ ६।१।६५ ॥

**[ णश्च ]** ण प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ विश्रवसः ]** विश्रवस् पञ्चमी ङसि - षष्ठी ङस् वा ।

**[ विश्लुक् ]** विशो लुक् = विश्लुक् । प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ वैश्रवणः ]** विश्रवस् । विश्रवसोऽपत्यं = वैश्रवणः । अनेन अण्प्र० → अ - स्० → ण्० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ ।

**[ रावणः ]** विश्रवसोऽपत्यम् । अनेन अण्प्र० → अ -स्० → ण्० - विश्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

अण् सिद्ध एवादेशार्थं वचनम् । एवमुत्तरत्र ॥छ॥

### सङ्ख्या-सं-भद्रान्मातुर्मातुर्च ॥ ६।१।६६ ॥

**[ सङ्ख्यासंभद्रात् ]** सङ्ख्या च सम् च भद्रश्च = सङ्ख्यासंभद्रम् , तस्मात् ।

**[ मातुः ]** मातृ पञ्चमी ङसि - षष्ठी ङस् वा । 'ऋतो डुर्' (१।४।३७) ङसि० - ङस्० → डुर्० → उर्० ।

**[ मातुर् ]** मातुर् प्रथमा सि । 'दीर्घङ्याब् - व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ च ]** च प्रथमा सि ।

**[ द्वैमातुरः ]** द्वि - मातृ । द्वयोर्मात्रोरपत्यं = द्वैमातुरः । 'संख्या समाहारे०' (३।१।९९) तद्धितविषये द्विगुः । अनेन अण्प्र० → अ - मातृ → मातुरादेशश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ ।

**[ षाण्मातुरः ]** षष् - मातृ । षण्णां मातृणामपत्यम् । अनेन अण्प्र० → अ - मातुरादेशश्च । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ।धुटस्तृतीयः' (२।१।७६) ष्० → ड्० । तृतीयस्य पञ्चमे' (१।३।१) ड्स्थान्यासन्नाः ण्० ।

**[ शातमातुरो भरतः ]** शत - मातृ । शतस्य माता = शतमाता, तस्या अपत्यं = शातमातुरः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । भरत प्रथमा सि ।

**[ सांमातुरः ]** सम् - मातृ । सङ्गता माता = संमाता । 'प्रात्यव०' (३।१।४७) समासः । संमातुरपत्यं = सांमातुरः । अनेन अण्प्र० → अ - ''मातुर्'' देशश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ ।

**[ भाद्रमातुरः ]** भद्राया भद्रस्य वा माता = भद्रमाता । 'परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) पुंवत् । भद्रमातुरपत्यं = भाद्रमातुरः । अनेन अण्प्र० → अ - ''मातुर्'' देशश्च । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ।

**[ द्वैमात्रः ]** द्वि - मातृ । द्वयोर्मात्रोरपत्यं = द्वैमात्रः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । रत्वम् । नन्वत्र ञ्णिति तद्धिते 'नामिनोऽकलि - हलेः' (४।३।५१) इति वृद्धिः कथं न भवति ? उच्यते - तक्रकौण्डिन्यन्यायेन ञ्णिति तद्धिते स्वर इति आदेरेव वृद्धिः, न तु 'नामिनोऽकलि - हलेः (४।३।५१) इत्यन्तस्य । यद्वा आख्यात - कृत्प्रकरणमेकमेव तत्साहचर्यादत्र प्रकरणे यत्सूत्रं तद्विहितप्रत्ययो गृह्यते, अयं तु भिन्नप्रकरणविहितः ।

**[ सौमात्रः ]** सुष्ठु - शोभना माता = सुमाता, सुमातुरपत्यं = सौमात्रः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । रत्वम् ।

**[ वैमात्रेयः ]** विमातुरपत्यं = वैमात्रेयः । 'शुभ्रादिभ्यः' (६।१।७३) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । रत्वम् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

### अदोर्नदी - मानुषीनाम्नः ॥ ६।१।६७ ॥

**[ अदोः ]** न दुः = अदुः । 'नञत्' (३।२।१२५) न० → अ०, तस्मात् ।

**[ नदीमानुषीनाम्नः ]** नदी च मानुषी च = नदीमानुष्यौ, तयोर्नाम = नदीमानुषीनाम, तस्मात् । 'अनोऽस्य' (२।१।१०९) अलुक् ।

एयणोऽपवादः ।

**[ यामुनः प्रणेता ]** यमुना । यमुनाया अपत्यं = यामुनः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रणयतीति प्रणेता - ह्रदस्य नाम ।

**[ ऐरावतः उद्ध्यः ]** इरा । इरा जलमत्रास्ति = इरावती । नद्यां मतुः' (६।२।७२) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । उद्ध्य प्रथमा सि ।

**[ वैतस्तः पलालशिराः ]** वि 'तसूच् उपक्षये' (१२२८) तस् । वितस्यति पापम् । 'दम्यमि - तमि - मा - वा - पू - धू - गृ - जृ - हसि - वस्यसि - वितसि - मसीण्भ्यस्तः ' (उणा० २००) तप्र० । वितस्ताया अपत्यं = वैतस्तः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । पलालवच्छिरोऽस्य स धवलत्वात् । प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब् - व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ नार्मदो नीलः ]** नर्मन् 'दोंच् छेदने' (११४८) दो । 'आत् सन्ध्यक्षरस्य' (४।२।१) दा । नर्माणि द्यति - खण्डयति । 'आतो डोऽह्वा - वा - मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११८) अन्त्यस्वरादिलोपः । नर्मदाया अपत्यं = नार्मदः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । नील प्रथमा सि ।

मानुषी - **[ दैवदत्तः ]** देवदत्त 'आत्' (२।४।१८) आप्प्र० → आ । देवदत्ताया अपत्यं = दैवदत्तः ।

**[ सौदर्शनः ]** शोभनं दर्शनं यस्याः सा = सुदर्शना । सुदर्शनाया अपत्यं = सौदर्शनः ।

**[ सौतारः ]** शोभना तारा - कनीनिका यस्याः सा = सुतारा, तस्या अपत्यं = सौतारः ।

**[ स्वायम्प्रभः ]** स्वयं - आत्मना प्रकर्षेण भातीति स्वयम्प्रभा । 'आतो डोऽह्वा- वा - मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११८) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । स्वयम्प्रभाया अपत्यं = स्वायम्प्रभः ।

**[ चैन्तितः ]** 'चितुण् स्मृत्याम्' (१६४५) चित् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । चिन्त्यते स्म । 'क्त - क्तवतू' (५।१।१७४) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् → इ । 'णेरनिटि' (४।३।८३) णिच्लुक । चिन्तिताया अपत्यं = चैन्तितः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ शैक्षितः ]** 'शिक्षि विद्योपादाने (८७९) शिक्ष् । शिक्षते स्म । 'क्त - क्तवतू' (५।१।१७४) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'आत्' (२।४।१८) आप्प्र० → आ । शिक्षिताया अपत्यं = शैक्षितः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

दैवदत्त इति अदोरेवेति सावधारणव्याख्यानात् या नित्यं दुसंज्ञा सैवात्र गृह्यते, न 'संज्ञा दुर्वा' (६।१।६) इति वैकल्पिकी, तेन दे(दै)वदत्त इत्यादि सिद्धम्, अन्यथा सन्देहः स्यात् । अत एव व्यावृत्त्युदाहरणे नित्या दुसंज्ञा उदाहृता ।

**[ चान्द्रभागेयः ]** चन्द्रस्य - पर्वतस्य भागः = चन्द्रभागः । चन्द्रभागादागता । 'तत आगते' (६।३।१४९) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । 'नवा शोणादेः' (२।४।३१) ङीर्वा । चान्द्रभाग्याः - चान्द्रभागाया वा अपत्यं = चान्द्रभागेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य - इवर्णस्य च लुक् ।

**[ वासवदत्तेयः ]** वासवदत्ताया अपत्यम् । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ सौपर्णेयः ]** सुपर्ण्याः - सुपर्णाया वा अपत्यं = सौपर्णेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) ई - आलुक् ।

**[ वैनतेयः ]** विनताया अपत्यं = वैनतेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

सुपर्णा - विनताशब्दयोरेक एवार्थस्तत्कथं देव्याविति द्विवचनम् ? उच्यते - शब्दभेदादर्थभेदो भवतीत्याश्रयणात् ।

**[ शौभनेयः ]** शोभना । शोभनाया अपत्यं = शौभनेयः । 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

शोभनाशब्दो नद्यां म(मा)नुष्यां च वर्तते, न तु नामधेयत्वेन, गुणशब्दत्वात् ॥छ॥

**पीला-साल्वा-मण्डूकाद्वा ॥ ६।१।६८ ॥**

**[ पीलासाल्वामण्डूकात् ]** पीला च साल्वा च मण्डूकश्च = पीलासाल्वामण्डूकम्, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ पैलः, पैलेयः ]** पीला । पीलाया अपत्यं = पैलः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । अग्रेतने 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ साल्वः, साल्वेयः ]** साल्वा । साल्वाया अपत्यं = साल्वः, साल्वेयः । अनेन अण्प्र० → अ । 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ माण्डूकः, माण्डूकिः ]** मण्डूक । मण्डूकस्यापत्यं = माण्डूकः, माण्डूकिः । अनेन अण्प्र० → अ । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ।'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

वाग्रहणं मण्डूकस्येञर्थम् ॥छ॥

## दितेश्चैयण् वा ॥ ६।१।६९ ॥

**[ दितेश्चैयण् ]** दिति पञ्चमी ङसि । च प्रथमा सि । एयण् प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ दैतेयः, दैत्यः ]** दिति । दितेरपत्यम् । अनेन एयण्प्र० → एय । 'अनिदम्यणपवादे च दित्यदित्यादित्य - यमपत्युत्तरपदाञ्ञ्यः' (६।१।१५) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ माण्डूकेयः, माण्डूकिः ]** मण्डूक । मण्डूकस्यापत्यं = माण्डूकः, माण्डूकिः । अनेन एयण्प्र० → एय । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ।'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

चकारो मण्डूकार्थः । अत्र वाग्रहणं विनापि पूर्वसूत्रे वाग्रहणेन मण्डूकेऽणिञोः सिद्धत्वात् , अनेन च एयण्विधानात् त्रैरूप्यं सिद्धमित्यर्थः । वाग्रहणं दितेर्ञ्यार्थम् ॥छ॥

## ङ्याप्त्यूङः ॥ ६।१।७० ॥

**[ ङ्याप्त्यूङः ]** ङी च आप् च तिश्च ऊङ् च = ङ्याप्त्यूङ्, तस्मात् ।

**[ सौपर्णेयः ]** सु-पर्ण । शोभनानि पर्णानि यस्याः सा = सुपर्णा । 'पाक-कर्ण-पर्ण-वालान्तात्' (२।४।५५) ङी । 'अस्य ङ्यां लुक् ' (२।४।८६) अलुक् । सुपर्ण्या अपत्यं = सौपर्णेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ वैनतेयः ]** विनताया अपत्यं = वैनतेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ यौवतेयः ]** युवन् 'यूनस्तिः' (२।४।७७) तिप्र० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । युवतेरपत्यं = यौवतेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ कामण्डलेयः ]** कमण्डलु 'बाह्वन्त - कद्रु - कमण्डलोर्नाम्नि' (२।४।७८) ऊङ्प्र० → ऊ । 'समानानां०' (१।२।१) दीर्घः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अकद्रु - पाण्ड्वोरुवर्णस्यैये' (७।४।६९) ऊलोपः ॥छ॥

**द्विस्वरादनद्याः** ॥ ६।१।७१ ॥

**[ द्विस्वरात् ]** द्वौ स्वरौ यत्र तत् = द्विस्वरम् , तस्मात् ।

**[ अनद्याः ]** न नदी = अनदी, तस्याः = अनद्याः । पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्०

**[ दात्तेयः ]** 'डुदांग्क् दाने' (११३८) दा । दीयते स्म । 'क्त - क्तवतू' (५।१।१७४) क्तप्र० → त । 'दत्' (४।४।१०) दा० → दत्० । दत्ताया अपत्यं = दात्तेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'ङ्याप्त्यूङः' (६।१।७०) इत्येयणो बाधकस्य 'अदोर्नदी०' (६।१।६७) इत्यणो बाधक एयण् ।

**[ गौप्तेयः ]** गुपौ रक्षणे (३३२) गुप् । गुप्यते स्म । 'क्त - क्तवतू' (५।१।१७४) क्तप्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । गुप्ताया अपत्यं = गौप्तेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ सैतः ]** सीताया अपत्यं = सैतः ।

**[ सान्ध्यः ]** सन्ध्या । सन्ध्याया अपत्यं = सान्ध्यः ।

**[ वैण्णः ]** वेण्णा । वेण्णाया अपत्यं = वैण्णः ।

**[ सैप्रः ]** सप(र्प)ति समुद्रेण । 'खुर - क्षुर - दूर - गौर - विप्र - कुप्र - श्वभ्राभ्र - धूम्रान्ध्र०' (उणा० ३९६) सिप्रनिपातः । 'आत्' (२।४।१८) आप्प्र० → आ । सिप्राया अपत्यं = सैप्रः ।

**[ रैवः ]** 'रेवृङ् गतौ' (८२८) रेव् । रेवते - पवित्रीकरोति जनमिति रेवः । 'अच्' (५।१।४९) अच्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ । रेवाया अपत्यं = रैवः ।

**[ शौद्धः ]** शुद्धा । शुद्धाया अपत्यं = शौद्धः ।

**[ कौलः ]** कु 'लांक् आदाने' (१०६८) ला । कुं-पृथ्वीं लाति = कुला । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । कुलाया अपत्यं = कौलः ।

**[ माहः ]** मही । मह्या अपत्यं = माहः ।

सीतादयो नद्यः । 'अदोर्नदी - मानुषीनाम्नः' (६।१।६७) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आ - ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ॥छ॥

**इतोऽनिञः** ॥ ६।१।७२ ॥

**[ इतः ]** इत् पञ्चमी ङसि ।

**[ अनिञः ]** न इञ् = अनिञ् । 'अन् स्वरे' (३।२।१२९) अन् । तस्मात् ।

**[ नाभेयः ]** 'णहींच् बन्धने' (१२८५) णह् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नह् । नह्यति सदाचारं लोकेषु । 'नहेर्भ च' (उणा० ६२१) नाभिनिपातः । नाभेरपत्यं = नाभेयः ।

**[ आत्रेयः ]** अत्रि । अत्रेरपत्यम् = आत्रेयः ।

**[ आहेयः ]** अहि । अहेरपत्यम् = आहेयः ।

**[ दौलेयः ]** दुल्यते पूरेण । 'नाम्युपान्त्य - कृ०' (उणा० ६०९) इप्र० कित् । दुलेरपत्यं = दौलेयः ।

**[ वालेयः ]** वलि । वलेरपत्यं = वालेयः ।

**[ नैधेयः ]** निधि । निधेरपत्यं = नैधेयः । सर्वत्र अनेन एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ दाक्षिः ]** दक्ष । दक्षस्यापत्यं वृद्धं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दाक्षायणः ]** दक्ष । दक्षस्यापत्यं वृद्धं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षेरपत्यं युवा = दाक्षायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ मारीचः ]** मरीचि । मरीचेरपत्यं = मारीचः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ शाकन्धेयः ]** शक । शकस्य राज्ञोऽपत्यानि = शकाः । 'राष्ट्र - क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् । 'अन्धण् दृष्ट्युपसंहारे' (१८८४) अन्ध् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । शकानन्धयति शकन्धिनिपातः । शकन्धेरपत्यं = शाकन्धेयः ।

**[ पारिधेयः ]** परिधि । परिधेरपत्यं = पारिधेयः ।

**[ शाकुनेयः ]** शकुनेरपत्यं = शाकुनेयः ।

**[ आतिथेयः ]** अतिथेरपत्यम् = आतिथेयः । 'शुभ्रादिभ्यः' (६।१।७३) सर्वेषु एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । ॥छ॥

## शुभ्रादिभ्यः ॥ ६।१।७३ ॥

**[ शुभ्रादिभ्यः ]** शुभ्र आदिर्येषां ते = शुभ्रादयः, तेभ्यः ।

**[ शौभ्रेयः ]** शुभ्रस्यापत्यं = शौभ्रेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैष्टपुरेयः ]** विशिष्टानि निवेशितानि प्रविष्टानि वा पुराणि यत् तद् = विष्टपुरम् । विष्टपुरस्यापत्यं = वैष्टपुरेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

मखण्ड्वादीनां विमात्रन्तानां 'शिवादेरण्' (६।१।६०) - 'अदोर्नदी - मानुषीनाम्नः' (६।१।६७) - 'ङसोऽपत्ये' (६।१।२८) अणोऽपवादः । विधवायाः 'क्षुद्राभ्य एरण् वा' (६।१।८०) एरणोऽपवादः । सुदामन् - सुनाम्नोः बाह्वादित्वात् इञा समावेशार्थः , शुभ्रस्य तु ज्येन समावेशार्थः पाठः ॥छ॥

**श्याम-लक्षणाद् वासिष्ठे** ॥ ६।१।७४ ॥

**[ श्यामलक्षणात् ]** श्यामश्च लक्षणश्च = श्यामलक्षणम्, तस्मात् ।

**[ वासिष्ठे ]** वासिष्ठ सप्तमी ङि ।

**[ श्यामेयो वासिष्ठः ]** श्याम । श्यामस्यापत्यं = श्यामेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्यामायनोऽन्यः ]** श्यामस्यापत्यं = श्यामायनः । 'अश्वादेः' (६।१।४९) आयनञ्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्यामिः ]** श्यामस्यापत्यम् । 'अत इञ्' (६।१।३१) इञ्प्र० → इ ।

**[ लाक्षणेयो वासिष्ठः ]** लक्षणस्यापत्यं = लाक्षणेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ लाक्षणिरन्यः ]** लक्षणस्यापत्यं = लाक्षणिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्य प्रथमा सि ॥छ॥

**विकर्ण-कुषीतकात् काश्यपे** ॥ ६।१।७५ ॥

**[ विकर्णकुषीतकात् ]** विकर्णश्च कुषीतकश्च = विकर्णकुषीतकम्, तस्मात् ।

**[ काश्यपे ]** काश्यप सप्तमी ङि ।

**[ वैकर्णेयः काश्पयः ]** विकर्णस्यापत्यं = वैकर्णेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैकर्णिरन्यः ]** विकर्णस्यापत्यम् । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कौषीतकेयः काश्यपः ]** कुषीतकस्यापत्यं = कौषीतकेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कौषीतकिरन्यः ]** कुषीतकस्यापत्यम् । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ ॥छ॥

**भ्रुवो भ्रुव् च** ॥ ६।१।७६ ॥

**[ भ्रुवः ]** भ्रू पञ्चमी ङसि । 'भ्रू-श्नोः' (२।१।५३) उव् ।

**[ भ्रुव् ]** भ्रुव् प्रथमा सि । 'दीर्घङ्याब् - व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ च ]** च प्रथमा सि ।

**[ भ्रौवेयः ]** भ्रू । भ्रुवोरपत्यम् । यथा चुलुकस्यापत्यसंभवः तथा भ्रुवोऽपि । अनेन एयण्प्र० → एय - ''भ्रुव्'' आदेशश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**कल्याण्यादेरिन् चान्तस्य** ॥ ६।१।७७ ॥

**[ कल्याण्यादेः ]** कल्याणी आदिर्यस्य सः = कल्याण्यादिः, तस्मात् ।

**[ इन् ]** इन् प्रथमा सि । 'दीर्घङ्याब् - व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ च ]** च प्रथमा सि ।

**[ अन्तस्य ]** अन्त षष्ठी ङस् ।

**[ काल्याणिनेयः ]** कल्याण 'नवा शोणादेः' (२।४।३१) ङी । कल्याण्या अपत्यं = काल्याणिनेयः । अनेन एयण्प्र० → एय - अन्तस्य ई → इन्देशः । वृद्धिः ।

**[ सौभागिनेयः ]** शोभनो भगो यस्याः सा = सुभगा । सुभगाया अपत्यं = सौभागिनेयः । अनेन एयण्प्र० → एय - आकारस्य इन्देशः । 'हृद्-भग-सिन्धोः' (७।४।२५) उभयपदवृद्धिः ॥छ॥

## कुलटाया वा ॥ ६।१।७८ ॥

**[ कुलटाया वा ]** कुलटा पञ्चमी ङसि । 'आपो ङितां यै - यास् - यास् - याम्' (१।४।१७) ङसि० → यास् । 'सो रुः' (२।१।७२) स० → र० । 'अवर्ण - भो - भगो०' (१।३।२२) रलुक् । वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

आबन्तत्वादेयण् सिद्धः, आदेशार्थं वचनम्, अत एवादेशस्यैव विकल्पः, न त्वेयणः ।

**[ कौलटिनेयः, कौलटेयः ]** कुलानि अटति = कुलटा । कुलटाया अपत्यं = कौलटिनेयः । अनेन एयण्प्र० → एय - आकारस्य इन्देशो विकल्पेन अनेनैव । एवम् - कौलटेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय ।

**[ कौलटेरः ]** कुलटाया अपत्यं = कौलटेरः । 'क्षुद्राभ्य एरण् वा' (६।१।८०) एरण्प्र० → एर । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । या स्त्री कुलान्यटन्ती, शीलं भिनत्ति, सा कुलटा - असती, तस्याः पुत्रः = कौलटेरः ॥छ॥

## चटकाण्णैरः स्त्रियां तु लुप् ॥ ६।१।७९ ॥

**[ चटकात् ]** चटक पञ्चमी ङसि । 'ङे-ङस्योर्या-ऽऽतौ' (१।४।६) ङसि० → आत् ।

**[ णैरः ]** णैर प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (२।१।७२) विसर्गः ।

**[ स्त्रियाम् ]** स्त्री सप्तमी ङि । 'स्त्रीदूतः' (१।४।२९) ङि० → दाम्० → आम्० ।

**[ तु ]** तु प्रथमा सि ।

**[ लुप् ]** लुप् प्रथमा सि ।

**[ चाटकैरः ]** चटक । चटकस्यापत्यं = चाटकैरः । अनेन णैरप्र० → ऐर । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् चटकाया अपत्यं = चाटकैरः । अनेन णैरप्र० → ऐर ।'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । स्त्रियां तु -

**[ चटका ]** चटकस्य चटकाया वा अपत्यं स्त्री । अनेन णैरप्र० । अनेनैव लुप् । 'अजादेः' (२।४।१६) आप्प्र० → आ ।

चटकेति जातिशब्दोऽस्त्येव, स्त्रियामपत्ये प्रत्ययाश्रवणार्थं लुब्वचनम् ।

**अस्त्रियामित्येव सिद्धे प्रत्ययान्तरबाधनार्थं णैरविधानम्** ॥छ॥

## क्षुद्राभ्य एरण् वा ॥ ६।१।८० ॥

**[ क्षुद्राभ्यः ]** क्षुद्रा पञ्चमी भ्यस् ।

**[ एरण् ]** एरण् प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**क्षुद्रा अङ्गहीना = अङ्गेन चक्षुरादिना विकला - अनियतपुंस्का वा स्त्रियः ।** अनियत(ः) पुमान् यासां ताः । 'पुमनडुन्नौ - पयो - लक्ष्म्या एकत्वे' (७।३।१७३) कच्प्र० → क ।

**बहुवचनं क्षुद्रार्थपरिग्रहार्थम् ।** मानुषीनामत्वविवक्षायां 'अदोर्नदी - मानुषीनाम्नः' (६।१।६७) अण् - 'द्विस्वरादनद्याः' (६।१।७१) - 'ङ्याप्त्यूङः' (६।१।७०) इत्याभ्यामेयण्, तयोरपवादः ।

**[ काणेरः, काणेयः ]** काणा । काणाया अपत्यं = काणेरः । अनेन एरण्प्र० → एर । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । द्वितीये उदाहरणे 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ दासेरः, दासेयः ]** दासी । दास्या अपत्यम् । अनेन एरण्प्र० → एर । 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ नाटेरः, नाटेयः ]** नटी । नट्या अपत्यं = नाटेरः । अनेन एरण्प्र० → एर । 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ कार्दनेरः, कार्दनेयः ]** कर्दना । कर्दनाया अपत्यं = कार्दनेरः । अनेन एरण्प्र० → एर । 'द्विस्वरादनद्याः' (६।१।७१) ? ('ङ्याप्त्यूङः' (६।१।७०)) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

अत्र एकमुदाहरणमङ्गहीनायाः, अपराणि त्रीणि शीलहीनायाः । वंशोपरिनर्त्तना भण्डिनी च उच्यते ॥छ॥

## गोधाया दुष्टे णारश्च ॥ ६।१।८१ ॥

**[ गोधाया दुष्टे ]** गोधा पञ्चमी ङसि । 'आपो ङितां०' (१।४।१७) ङसि० → यास्० । 'सो रुः' (२।१।७२) स० → र० । दुष्ट सप्तमी ङि । 'अवर्ण - भो०' (१।३।२२) रलुक् ।

**[ णारः ]** णार प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ गौधारः, गौधेरः ]** गोधा । गोधाया अपत्यं दुष्टं = गौधारः । अनेन णारप्र० → आर - एरण्प्र० → एर च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । योऽहिना गोधायां जन्यते स गौधारः गौधेरः कथ्यते ।

**[ गौधेयोऽन्यः ]** गोधाया अपत्यं = गौधेयः । 'शुभ्रादिभ्यः' (६।१।७३) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । अन्य प्रथमा सि ॥छ॥

## जण्ट - पण्टात् ॥ ६।१।८२ ॥

**[ जण्टपण्टात् ]** 'जनैचि प्रादुर्भावे' (१२६५) जन् । जन्यते = जण्टः । 'पणि व्यवहार- स्तुत्योः' (७१०) पण् । पणाय्यते = पण्टः । 'जनि - पणि - किजुभ्यो दीर्घश्च' (उणा०१४०) इति टप्र० - बाहुलकाद् दीर्घाभावः इति न्यासकारः । पक्षिवाचकाविमौ शब्दौ । जण्टश्च पण्टश्च = जण्टपण्टम्, तस्मात् ।

**[ जाण्टारः ]** जण्टस्यापत्यं = जाण्टारः । अनेन णारप्र० → आर । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पाण्टारः ]** पण्टस्यापत्यं = पाण्टारः । अनेन णारप्र० → आर । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## चतुष्पाद्भ्य एयञ् ॥ ६।१।८३ ॥

**[ चतुष्पाद्भ्यः ]** चत्वारः पादा यासां ताः = चतुष्पादः , ताभ्यः = चतुष्पाद्भ्यः । 'सु - संख्यात्' (७।३।१५०) पाद० → पात्० ।

**[ एयञ् ]** एयञ् प्रथमा सि ।

**[ कामण्डलेयः ]** कमण्डलु । 'बाह्वन्त - कद्रु - कमण्डलोर्नाम्नि' (२।४।७४) ऊङ्प्र० → ऊ । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । कमण्डल्वा अपत्यं = कामण्डलेयः । अनेन एयञ्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अकद्रु - पाण्ड्वोरुवर्णस्यैये' (७।४।६९) ऊलोपः ।

**[ शैतिबाहेयः ]** शिती बाहू यस्याः सा = शितिबाहू । 'बाह्वन्त - कद्रु - कमण्डलोर्नाम्नि' (२।४।७४) ऊङ्प्र० → ऊ । शितिबाह्वा अपत्यं = शैतिबाहेयः । अनेन एयञ्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अकद्रू - पाण्ड्वोरुवर्णस्यैये' (७।४।६९) ऊलोपः ।

**[ माद्रबाहेयः ]** मद्राकारौ बाहू यस्याः सा = मद्रबाहू । 'बाह्वन्त०' (२।४।७४) ऊङ्प्र० → ऊ । मद्रबाह्वा अपत्यं = माद्रबाहेयः । अनेन एयञ्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अकद्रू - पाण्ड्वोरुवर्णस्यैये' (७।४।६९) ऊलोपः ।

**[ जाम्बेयः ]** जम्बू । जम्ब्वा अपत्यं = जाम्बेयः । अनेन एयञ्प्र० → एय । शेषं पूर्ववत् ।

**[ शाबलेयः ]** शबलाया अपत्यं = शाबलेयः ।

**[ बाहुलेयः ]** बहुलाया अपत्यं = बाहुलेयः ।

**[ सौरभेयः ]** सुरभि । सुरभेरपत्यं = सौरभेयः । अनेन एयञ्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६९) इलुक् ॥छ॥

## गृष्ट्यादेः ॥ ६।१।८४ ॥

**[ गृष्ट्यादेः ]** गृष्टिरादिर्यस्य सः = गृष्ट्यादिः, तस्मात् = गृष्टयादेः । पञ्चमी ङसि ।'ङित्यदिति' (१।४।२३) दि० → दे० । 'एदोद्भ्यां०' (१।४।३५) ङसि० → र० ।

**[ गार्ष्टेयः ]** गृष्टि । गृष्टेरपत्यं = गार्ष्टेयः ।

**[ हार्ष्टेयः ]** हृष्टेरपत्यं = हार्ष्टेयः ।'ऋषि - वृष्ण्यन्धक०' (६।१।६१) इत्यण् बाधकस्य 'इतोऽनिञः' (६।१।७२) एयणः । अनेन एयञ्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**गृष्टिशब्दो यश्चतुष्पाद्वचनस्ततः पूर्वेणैव सिद्धे अचतुष्पादर्थमुपादानम् ।**

**[ विश्रि ]** विशंत् प्रवेशने' (१४१५) विश् । विशा विशा विशतीति । 'भू - सू - कुशि - विशि - शुभिभ्यः कित्' (उणा० ६९३) किद् रिप्र० ।

**[ कुद्रि ]** कु 'डुदांग्क् दाने (११३८) दा । कु ददाति = कुद्रि । 'कुब्द्रि - कुद्र्यादयः' (उणा० ६९५) कुद्रिनिपातः । ञकारस्य ञित्कार्यार्थत्वात् -

**[ मैत्रेयः पुत्रः ]** मित्रयु । मित्रयोरपत्यम् । अनेन एयञ्प्र० → एय । 'सारवैक्ष्वाक - मैत्रेय - भ्रौणहत्य - धैवत्य - हिरण्मयम्' (७।४।३०) युलोपः । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । मैत्रेयस्यापत्यम् । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लोपः ॥छ॥

## वाडवेयो वृषे ॥ ६।१।८५ ॥

**[ वाडवेयः ]** वाडवेय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वृषे ]** वृष सप्तमी ङि ।

**[ वाडवेयः ]** जिषू (५२२) - विषू (५२३) - मिषू (५२४) - निषू (५२५) - पृषू (५२६) - 'वृषू सेचने' (५२७) वृष् । वर्षतीति । 'नाम्युपान्त्य - प्री - कृ - गृ - ज्ञः कः' (५।१।५४) कप्र० → अ । वृषो यो गर्भे बीजं निषिञ्चति । वडवा । वडवाया वृषः = वाडवेयः । अनेन एयञ् - एयण् वा प्र० → एय । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ वाडवः ]** उपचारात् सोऽपि बीजं निषिञ्चति । वडवाया अपत्यम् । अस्मादेव भणनात् 'ङ्याप्त्यूङः' (६।१।७०) एयण्बाधित्वा 'ङसोऽपत्ये' (६।१।२८) अणेव भवति । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

निपातनमेयणेयञोरुभयोरपि वृषे स्थापनार्थं, अन्यथा अन्यतरोऽपत्ये 'ङ्याप्त्यूङः' (६।१।७०) एयण्, 'चतुष्पाद्भ्य एयञ्' (६।१।८३) एयञ् प्रसज्येत ॥छ॥

## रेवत्यादेरिकण् ॥ ६।१।८६ ॥

**[ रेवत्यादेरिकण् ]** रेवती आदिर्यस्य सः = रेवत्यादिः , तस्मात् । 'ङित्यदिति' (१।४।२३) दि० → दे० । 'एदोद्भ्यां०' (१।४।३५) ङसि० → र० । इकण् प्रथमा सि ।

**[ रैवतिकः ]** रेवत । 'रेवत - रोहिणाद् भे' (२।४।२६) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । रेवत्या चन्द्रयुक्तया युक्तः कालोऽपि रेवती । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० - ''लुप् त्वप्रयुक्ते'' अण्लुप् । 'ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणी - सूच्योः' (२।४।९५) ङीनिवृत्तिः । पुनर्ङीः । रेवत्यां जाता । 'भर्तु - सन्ध्यादेरण्' (६।३।८९) अण्प्र० । 'चित्रा - रेवती -रोहिण्याः स्त्रियाम्' (६।३।१०८) अण्लुप् - ङीनिवृत्तिः । पुनर्ङीः । रेवत्या अपत्यं = रैवतिकः । अनेन इकण्प्र० → इक । 'जातिश्च णि - तद्धितय - स्वरे' (३।२।५१) पुंवत् । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णे०' (७।४।६८) अवर्णस्य लुक् ।

**[ आश्वपालिकः ]** अश्व 'पलण् रक्षणे' (१६९९) पल् । 'चुरादिभ्यो०' (३।४।१७) णिच्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । अश्वान् पालयति स्त्री चेत् । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'णेरनिटि'

(४।३।८३) णिच्लुक् । 'अणञेयेकण् - नञ्०' (२।४।२०) ङी । अश्वपाल्या अपत्यम् = आश्वपालिकः । अनेन इकण्प्र० → इक । 'जातिश्च णि - तद्धितय - स्वरे' (३।२।५१) पुंवत् । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ।

द्वारपाल्यन्तानामेयणोऽपवादः , यदि मानुषीनाम तदा 'अदोर्नदी०' (६।१।६७) अणोऽपि, वृकवञ्चिनो 'ङसोऽपत्ये' (६।१।२८) अण्, शेषाणां 'अत इञ्' (६।१।३१) इतीञोऽपवादः ॥छा॥

**वृद्धस्त्रियाः क्षेपे णश्च** ॥ ६।१।८७ ॥

**[ वृद्धस्त्रियाः ]** वृद्धं वृद्धा वा चासौ स्त्री च = वृद्धस्त्री, तस्याः = वृद्धस्त्रियाः । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० । 'स्त्रियाः' (२।१।५४) इय् ।

**[ क्षेपे ]** क्षेप सप्तमी ङि ।

**[ णश्च ]** ण प्रथमा सि । च प्रथमा सि ।

**पितुरसंविज्ञाने मात्रा व्यपदेशोऽपत्यस्य क्षेपः ।**

**[ गार्गः, गार्गिको वा जाल्मः ]** गर्ग । गर्गस्यापत्यं वृद्धं स्त्री गर्गः(गार्गी) । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'यञो डायन् च वा' (२।४।६७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । गार्ग्या अपत्यं युवा = गार्गः - गार्गिको वा । अनेन णप्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । एवं अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमं प्रत्यये गते 'जातिश्च णि - तद्धितय - स्वरे' (३।२।५१) पुंवद्भावे 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् ।

**[ ग्लौचुकायनो ग्लौचुकायनिको वा जाल्मः ]** ग्लुचुक । ग्लुचुकस्यापत्यं वृद्धं = ग्लुचुकायनी । 'अदोरायनिः प्रायः' (६।१।११३) आयनिप्र० । 'नुर्जातेः' (२।४।७२) ङी । ग्लुचुकायन्या अपत्यं युवा । अनेन णप्र० । 'जातिश्च०' (३।२।५१) पुंवत् - ङीनिवृत्तौ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । अनेनैव इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'वृद्धाद् यूनि' (६।१।३०) इति यूनीमौ प्रत्ययौ ।

**[ कारिकेयो जाल्मः ]** कारिका । कारिकाया अपत्यं = कारिकेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय। 'तद्धिताऽककोपान्त्य - पूरण्याख्याः' (३।२।५४) पुंवद्भावनिषेधः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ औपगविर्जाल्मः ]** गोः समीपम् । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ (२।४।९६) ह्रस्वः । उपगोरपत्यम् = औपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । औपगवस्यापत्यम् । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गार्गेयो माणवकः ]** गार्गी । गार्ग्या अपत्यं = गार्गेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । माणवकः । मातुः संविज्ञानार्थमिदमुच्यते ॥छा॥

**भ्रातुर्व्यः** ॥ ६।१।८८ ॥

**[ भ्रातुर्व्यः ]** भ्रातृ पञ्चमी ङसि । 'ऋतो डुर्' (१।४।३७) ङसि० → डुर्० → उर्० । व्य प्रथमा सि ।

**[ भ्रातृव्यः ]** भ्रातृ । भ्रातुरपत्यं = भ्रातृव्यः । अनेन व्यप्र० । शत्रुरपि भ्रातृव्य उच्यते स उपचारात् । एकद्रव्याभिलाषश्चोपचारनिमित्तम् ॥छ॥

**ईयः स्वसुश्च** ॥ ६।१।८९ ॥

**[ ईयः ]** ईय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ स्वसुः ]** स्वसृ पञ्चमी ङसि । 'ऋतो डुर्' (१।४।३७) ङसि० → डुर्० → उर्० ।

**[ च ]** च प्रथमा सि ।

**[ भ्रात्रीयः ]** भ्रातृ । भ्रातुरपत्यं = भ्रात्रीयः । अनेन ईयप्र० । 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् ।

**[ स्वस्त्रीयः ]** स्वसृ । स्वसुरपत्यं = स्वस्त्रीयः । अनेन ईयप्र० । 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् ॥छ॥

**मातृ - पित्रादेर्डेयणीयणौ** ॥ ६।१।९० ॥

**[ मातृपित्रादेः ]** माता च पिता च = मातृपितरौ, तावादी यस्य । शब्दप्राधान्याश्रयणात् 'आ द्वन्द्वे' (३।२।३९) न आत्वं योनिसंबन्धाभावात्, तस्मात् ।

**[ डेयणीयणौ ]** डेयण् च ईयण् च = डेयणीयणौ ।

**[ मातृष्वसेयः, मातृष्वस्त्रीयः ]** मातृ - स्वसृ । मातुः स्वसा = मातृष्वसा । 'मातृ - पितुः स्वसुः' (२।३।१८) षत्वम् । मातृष्वसुरपत्यं = मातृष्वसेयः, मातृष्वस्त्रीयः । अनेन डेयण्प्र० → एयण् - ईयण्प्र० → ईय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् ।

**[ पैतृष्वसेयः, पैतृष्वस्त्रीयः ]** पितुः स्वसा = पितृष्वसा । 'मातृ - पितुः स्वसुः' (२।३।१८) षत्वम् । पितृष्वसुरपत्यं = पैतृष्वसेयः, पैतृष्वस्त्रीयः । अनेन डेयण्प्र० → एय - ईयण्प्र० → ईय । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् ।

**[ परममातृष्वसुरपत्यम् ]** मातुः स्वसा = मातृष्वसा । परमा चासौ मातृष्वसा च, तस्या अपत्यम् ।

**[ परमपितृष्वसुरपत्यम् ]** पितुः स्वसा = पितृष्वसा । परमा चासौ पितृष्वसा च, तस्या अपत्यम् ।

**यथाप्राप्तोऽणपि भवति पक्षे -**

**[ मातुःस्वस्त्रः, मातुःष्वस्त्रः ]** मातुः स्वसा (२) । मातुः स्वसुरपत्यम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ। 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् । 'स्वसृ - पत्योर्वा' (३।२।३८) अलुप्समासः । अलुपि वा (२।३।१९) विकल्पेन षत्वम् ।

**[ पैतुःस्वस्त्रः, पैतुःष्वस्त्रः ]** पितुः स्वसा (२) । पितुः स्वसुरपत्यम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ। 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् । 'स्वसृ - पत्योर्वा' (३।२।३८) अलुप्समासः । 'अलुपि वा' (२।३।१९) विकल्पेन षत्वम् ॥छ॥

**श्वशुराद् यः** ॥ ६।१।९१ ॥

**[ श्वशुरात् ]** श्वशुर पञ्चमी ङसि ।

**[ यः ]** य प्रथमा सि ।

**[ श्वशुर्यः ]** श्वशुर । श्वशुरस्यापत्यं = श्वशुर्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्वाशुरिः ]** श्वशुरो नाम कश्चित् तस्यापत्यं = श्वाशुरिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

## जातौ राज्ञः ॥ ६।१।९२ ॥

**[ जातौ ]** जाति सप्तमी ङि । 'ङिर्डौ' (१।४।२५) ङि० → डौ० → औ० ।

**[ राज्ञः ]** राजन् पञ्चमी ङसि । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ राजन्यः क्षत्रियजातिश्चेत् ]** राजन् । राज्ञोऽपत्यं = राजन्यः । अनेन यप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) इति नस्य लोपो न 'अनोऽट्ये ये' (७।४।५१) इत्यनेन अन्त्यस्वरादिलोपनिषेधात् । क्षत्रियजातिश्चेत् ।

**[ राजनोऽन्यः ]** राज्ञोऽपत्यं = राजनः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अणि' (७।४।५२) इत्यनेन अन्त्यस्वरादिलोपनिषेधः । अन्य प्रथमा सि ॥छ॥

## क्षत्रादियः ॥ ६।१।९३ ॥

**[ क्षत्रात् ]** क्षत्र पञ्चमी ङसि ।

**[ इयः ]** इय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ क्षत्रियः जातिश्चेत् ]** क्षत्रस्यापत्यं = क्षत्रियः । अनेन इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । क्षत्रियजातिश्चेत् ।

**[ क्षात्रिरन्यः ]** यदि जातिरपत्यस्य न गम्यते, किंतु क्षत्रस्यापत्यं इत्येतावदेव तत इयाभावे 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्य प्रथमा सि ॥छ॥

## मनोर्याणौ षश्चान्तः ॥ ६।१।९४ ॥

**[ मनोः ]** मनु पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) ओ । 'एदोद्भ्यां ङसि - ङसो रः' (१।४।३५) ङसि० → र० ।

**[ याणौ ]** यश्च अण् च = याणौ ।

**[ षश्च ]** ष प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ अन्तः ]** अन्त प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मनुष्याः, मानुषाः ]** मनु । मनोरपत्यानि = मनुष्याः, मानुषाः । अनेन य - अण्प्र० → अ - षोऽन्तश्च । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । प्रथमा जस् ।

**[ मनुषी, मानुषी ]** मनोरपत्यं स्त्री = मनुषी, मानुषी । अनेन य - अण्प्र० → अ - षोऽन्तश्च । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । प्रथमे 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलोपः । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ मानवः ]** मनोरपत्यं = मानवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । प्रथमा सि ।

**[ मानवाः ]** मनोरपत्यानि = मानवाः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । प्रथमा जस् ।

**[ मानवीः प्रजाः पश्य ]** मनोरपत्यानि स्त्रियश्चेत् मानव्यः प्रजाः तां (ताः) = मानवीः । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । अत्र हि मनोरपत्यमित्येतावानेवार्थो विवक्षितो न जातिः, तेन षोऽन्तो न भवति ।

**[ मानव्यः ]** मनोरपत्यं वृद्धं = मानव्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ मानव्यौ ]** मनोरपत्ये वृद्धे = मानव्यौ । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ मनवः ]** मनोरपत्यानि वृद्धानि = मनवः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'यञञोऽश्या०' (६।१।१२६) यञ्लुप् । प्रथमा जस् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ मानव्यायनी ]** मनु । मनोरपत्यं वृद्धं स्त्री । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'लोहितादिशकलान्तात्' (२।४।६८) ङी - डायन्० → आयन्० । 'डित्यन्त्यस्वरादेः' (२।१।११८) अन्त्यस्वरादिलोपः । 'स्त्रियां नृतोऽस्व०' (२।४।१) ङी । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ॥छ॥

**माणवः कुत्सायाम्** ॥ ६।१।९५ ॥

**[ माणवः ]** माणव प्रथमा सि ।

**[ कुत्सायाम् ]** कुत्सा सप्तमी ङि । 'आपो ङितां यै०' (१।४।१७) ङि ० → याम्० ।

**[ माणवः ]** मनु । मनोरपत्यं कुत्सितं मूढं = माणवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ - न० → णश्च । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ॥छ॥

**कुलादीनः** ॥ ६।१।९६ ॥

**[ कुलात् ]** कुल पञ्चमी ङसि । 'ङे-ङस्योर्या-ऽऽतौ' (१।४।६) ङसि० → आत् ।

**[ ईनः ]** ईन प्रथमा सि ।

**[ कुलीनः ]** कुलस्यापत्यं = कुलीनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बहुकुलीनः ]** ईषदपरिसमाप्तं कुलं = बहुकुलम्, तस्यापत्यं = बहुकुलीनः । 'नाम्नः प्राग्बहुर्वा' (७।३।१२) बहुशब्दस्य पूर्वनिपातः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ क्षत्रियकुलीनः ]** क्षत्रियस्य कुलं = क्षत्रियकुलम्, क्षत्रियकुलस्यापत्यं = क्षत्रियकुलीनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

एषु अत इञः अदोरायनेश्चापवादः ।

**[ आढ्यकुलीनः ]** आढ्यं च तत् कुलं च = आढ्यकुलम्, आढ्यकुलस्यापत्यम् = आढ्यकुलीनः ।

**[ राजकुलीनः ]** राज्ञः कुलं = राजकुलम्, राजकुलस्यापत्यं = राजकुलीनः । अत्र 'अवृद्धाद् दोर्नवा' (६।१।११०) इत्यायनिञो 'अत इञ्' (६।१।३१) इञश्चापवादोऽनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

उत्तरसूत्रे समासे प्रतिषेधादिह कुलान्तः केवलश्च गृह्यते ॥छ॥

**यैयकञावसमासे वा** ॥ ६।१।९७ ॥

**[ यैयकञौ ]** यश्च एयकञ् च = यैयकञौ ।

**[ असमासे ]** न समासः = असमासस्तस्मिन् । 'नञत्' (३।२।१२५) न० → अ० ।

**[ वा ]** वा प्रथमा सि ।

**[ कुल्यः, कौलेयकः, कुलीनः ]** कुलस्यापत्यं = कुल्यः, कौलेयकः । अनेन य - एयकञ्प्र० → एयक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम् - कुलीनः । 'कुलादीनः' (६।१।९६) ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बहुकुल्यः, बाहुकुलेयकः, बहुकुलीनः ]** ईषदपरिसमाप्तं कुलं = बहुकुलम् । 'नाम्नः प्राग्बहुर्वा' (७।३।१२) बहुशब्दस्य पूर्वनिपातः । बहुकुलस्यापत्यं = बहुकुल्यः, बाहुकुलेयकः । अनेन य - एयकञ्प्र० → एयक । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । एवम् - बहुकुलीनः । 'कुलादीनः (६।१।९६) ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आढ्यकुलीनः ]** आढ्यं च तत् कुलं च = आढ्यकुलम्, तस्यापत्यम् = आढ्यकुलीनः । 'कुलादीनः' (६।१।९६) ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**दुष्कुलादेयण् वा** ॥ ६।१।९८ ॥

**[ दुष्कुलात् ]** दुष्कुल पञ्चमी ङसि ।

**[ एयण् ]** एयण् प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ दौष्कुलेयः, दुष्कुलीनः ]** दुष्टं कुलं = दुष्कुलम् । 'निर्दुर्बहिरा०' (२।३।९) षत्वम् । दुष्कुलस्यापत्यं = दौष्कुलेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम् - दुष्कुलीनः । 'कुलादीनः' (६।१।९६) ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**महाकुलाद् वाऽञीनञौ** ॥ ६।१।९९ ॥

**[ महाकुलात् ]** महत् - कुल । महच्च तत् कुलं च = महाकुलम्, तस्मात् । जातीयैकार्थेऽच्वेः' (३।२।७०) डा । 'सन्महत्परमोत्तमोत्कृष्टं पूजायाम्' (३।१।१०७) समासः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लोपः ।

**[ वा ]** वा प्रथमा सि ।

**[ अञीनञौ ]** अञ् च ईनञ् च = अञीनञौ ।

**[ माहाकुलः, माहाकुलीनः, महाकुलीनः ]** महाकुल । महाकुलस्यापत्यं = माहाकुलः, माहाकुलीनः । अनेन अञ्प्र० → अ - ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम् - महाकुलीनः । 'कुलादीनः' (६।१।९६) ईनप्र० ।

**[ महत्कुलीनः ]** महतां कुलं = महत्कुलम्, तस्यापत्यं = महत्कुलीनः । 'कुलादीनः' (६।१।९६) ईनप्र० ॥छ॥

**कुर्वादेर्ञ्यः** ॥ ६।१।१०० ॥

**[ कुर्वादेः ]** कुरुरादिर्यस्य सः = कुर्वादिः, तस्मात् ।

**[ ञ्यः ]** ञ्य प्रथमा सि ।

**[ कौरव्यः ]** कुरु । कुरोर्ब्राह्मणस्यापत्यं = कौरव्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।६८) अव् । अक्षत्रियवचनस्येह कुरोर्ग्रहणम् ।

क्षत्रियवचनात् तु 'दु - नादि - कुर्वित् - कोशला - ऽजादाञ्ञ्यः' (६।१।११८) ञ्यः । अयं च अनयोर्विशेषः । तस्य द्रिसंज्ञत्वात् बहुषु लुप् -

**[ कुरवः ]** कुरोरपत्यानि = कौ(कु)रवः । 'दु - नादि - कुर्वित्०' (६।१।११८) ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । प्रथमा जस् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

अस्य तु द्रिसंज्ञाया अभावात् -

**[ कौरव्याः ]** कुरोर्ब्राह्मणस्यापत्यानि = कौरव्याः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा जस् ।

**[ कौरव्यायणिः ]** कुरोः क्षत्रियस्यापत्यं = कौरव्यः । 'दु - नादि - कुर्वित्०' (६।१।११८) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । कौरव्यस्यापत्यं युवा = कौरव्यायणिः । 'तिकादेरायनिञ्' (६।१।१०७) आयनिञ्प्र० → आयनि । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

अस्माच्चात इञ् -

**[ कौरव्यः ]** कुरोर्ब्राह्मणस्यापत्यं = कौरव्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' ७।४।७०) अव् । कौरव्यस्यापत्यं = कौरव्यः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लुप् ।

कुरुशब्दश्च तिकादिष्वपि पठ्यते -

**[ कौरवायणिः ]** कुरोरपत्यं = कौरवायणिः । 'तिकादेरायनिञ्' (६।१।१०७) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ शाङ्कव्यः ]** शङ्कु । शङ्कोरपत्यं = शाङ्कव्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ शाङ्कव्याः ]** शङ्कोरपत्यानि = शाङ्कव्याः । अनेन ञ्यप्र० । अस्य द्रिसंज्ञाया अभावान्न 'बहुष्वस्त्रियाम्' (६।१।१२४) लुप् । प्रथमा जस् ।

**[ शाङ्कव्यः ]** शङ्कोरपत्यं वृद्धं = शाङ्कव्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ शङ्कवः ]** शङ्कोरपत्यानि वृद्धानि = शङ्कवः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'यञञोऽश्यापर्णान्त - गोपवनादेः' (६।१।१२६) यञ्लुप् । प्रथमा जस् ।

**[ शाङ्कव्यायनी ]** शाङ्कव्यस्यापत्यं युवा स्त्री चेत् । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'लोहितादि०' (२।४।६८) ङी ।

ऐन्द्रजाले: कापिञ्जलादेरपत्यं युवेत्यादौ कृते 'यञिञः' (६।१।५४) आयनण् प्राप्तः स वार्यते इत्यर्थः ॥छ॥

## सम्राजः क्षत्रिये ॥ ६।१।१०१ ॥

**[ सम्राजः ]** सम्राज् पञ्चमी ङसि ।

**[ क्षत्रिये ]** क्षत्रिय सप्तमी ङि ।

**[ साम्राज्यः क्षत्रियश्चेत् ]** सम् 'राजृग् दीप्तौ' (८९३) राज् । सम्राजते । क्विप्प्र० । 'सम्राट्' (१।३।१६) इत्यनेन सम्राज् निपात्यते । सम्राजोऽपत्यं = साम्राज्यः । अनेन ञ्यप्र० → य, क्षत्रियश्चेत् ।

**[ साम्राजः ]** सम्राजोऽपत्यम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ।

**[ सामाज्रिः ]** सम्राजोऽपत्यम् । मतान्तरे 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आ ॥छ॥

## सेनान्त-कारु-लक्ष्मणादिञ् च ॥ ६।१।१०२ ॥

**[ सेनान्तकारुलक्ष्मणात् ]** 卐सेना अन्ते येषां ते = सेनान्ताः । सेनान्ताश्च कारवश्च लक्ष्मणश्च = सेनान्तकारुलक्ष्मणम्, तस्मात् ।

**[ इञ् ]** इञ् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ हारिषेणिः, हारिषेण्यः ]** हरयः सेनायां यस्य सः = हरिषेणः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'एत्यकः' (२।३।२६) षत्वम् । हरिषेणस्यापत्यं = हारिषेणिः, हारिषेण्यः । अनेन इञ्प्र० → इ - ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वारिषेणिः, वारिषेण्यः ]** वारि-जलं सेनायां यस्य सः = वारिषेणः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'एत्यकः' (२।३।२६) षत्वम् । वारिषेणस्यापत्यम् । अनेन इञ्प्र० → इ - ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ तान्तुवायिः, तान्तुवाय्यः ]** तन्तु 'वेंग् तन्तुसन्ताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा । तन्तून् वयति = तन्तुवायः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । तन्तुवायस्यापत्यम् । अनेन इञ्प्र० → इ - ञ्यप्र० → य ।

**[ तौन्नवायिः, तौन्नवाय्यः ]** तुन्नं वयति = तुन्नवायः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । तुन्नवायस्यापत्यम् । अनेन इञ्प्र० → इ - ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

---

卐 श० म० न्या० - सेन शब्दोऽन्ते येषां ते = सेनान्ताः ।

**[ वार्धकिः, वार्धक्यः ]** 卐 'वृधूङ् वृद्धौ' (९५७) वृध् । 卐卐वर्धते सूत्रधारणादिज्ञानमिति वर्धकिः । 'वर्द्धेरकिः' (उणा० ६२४) अकिप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । *वर्धकेरपत्यम् । अनेन इञ्प्र० → इ - ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ ।

**[ कौम्भकारिः, कौम्भकार्यः ]** कुम्भकारस्य कुम्भकार्या वा अपत्यम् । भाष्यकारस्तु स्त्रियां कौम्भकारेय इति मन्यते । अनेन इञ्प्र० → इ - ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अ-ईलुक् ।

रथकारादिञपीत्येके रथकारशब्दोऽजातिवाची चास्ति इत्याह ।

**[ लाक्ष्मणिः, लाक्ष्मण्यः ]** लक्ष्मीरस्यास्ति पुण्यातिशयेन = लक्ष्मणः । 'लक्ष्म्या अनः' (७।२।३२) अनप्र० । लक्ष्मणस्यापत्यम् । अनेन इञ्प्र० → इ - ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

ऋषि-वृष्ण्यन्धक-कुरुभ्योऽण्, ङ्याप्त्यूङन्तेभ्यस्तु एयण् परत्वादाभ्यामिञ्-ञ्याभ्यां बाध्यते ।

**[ जातसेनिः, जातसेन्यः ]** जातसेनस्यापत्यम् । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्राप्तेऽनेन इञ्प्र० → इ - ञ्यश्चप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैष्वक्सेनिः, वैष्वक्सेन्यः ]** विषूची सेना यस्य सः = विष्वक्सेनः नारायणः । विष्वक्सेनस्यापत्यं = वैष्वक्सेनिः, वैष्वक्सेन्यः । अनेन इञ् - ञ्यप्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ ।

**[ औग्रसेनिः, औग्रसेन्यः ]** उग्रा सेना यस्य सः = उग्रसेनः । उग्रसेनस्यापत्यम् । अनेन इञ् - ञ्यप्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ ।

**[ भैमसेनिः, भैमसेन्यः ]** भीमा सेना यस्य सः = भीमसेनः । भीमसेनस्यापत्यम् । अनेन इञ् - ञ्यश्च । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ ।

**[ तान्तुवायिः, तान्तुवाय्यः ]** तन्तुवाय 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । तन्तुवाय्या अपत्यम् । अनेन इञ् - ञ्यश्च । 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) पुंवत् । शेषं पूर्ववत् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## सुयाम्नः सौवीरेष्वायनिञ् ॥ ६।१।१०३ ॥

**[ सुयाम्नः ]** सुयामन् पञ्चमी ङसि । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ सौवीरेषु ]** शोभनो वीरो यस्य सः = सुवीरः । सुवीरस्याऽयम् । 'तस्येदम्' (६।३।१६०) अण्प्र० । सौवीरस्यापत्यानि । 'दु-नादि०' (६।१।११८) ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । सौवीर सप्तमी सुप् । 'एद् बहुस्भोसि' (१।४।४) र० → रे० ।

**[ आयनिञ् ]** आयनिञ् प्रथमा सि ।

**[ सौयामायनिः, सौयामः ]** सुयामन् । सुयाम्नः सौवीरदेशस्थापत्यं = सौयामायनिः । अनेन आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । अन्यत्र 'ङसोऽपत्ये'

---

卐 उणादौ - 'वर्धण् छेदन-पूरणयोः' । * श० म० न्या० - वर्धकः काष्ठशिल्पी, तस्यापत्यम् ।

卐卐 अभिधानचिन्तामणिनाममालायाम् - वर्धयति- छिनत्ति = वर्धकिः ।

(६।१।२८) अण्प्र० → अ । 'अवर्मणो मनोऽपत्ये' (७।४।९) अन्त्यस्वरादिलोपः । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ ॥छ॥

### पाण्टाहृति-मिमताण्णश्च ॥ ६।१।१०४ ॥

**[ पाण्टाहृतिमिमतात् ]** पुण्टा(पाण्टा)हृतिश्च मिमतश्च = पाण्टाहृतिमिमतम्, तस्मात् ।

**[ णश्च ]** ण प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ पाण्टाहृतः, पाण्टाहृतायनिर्वा ]** पुण्ट(पाण्ट) 'हृंग् हरणे' (८८५) हृ, आङ्पूर्व० । पुण्टेन(पाण्टेन) आह्रियते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । पाण्टाहृतस्यापत्यं = पाण्टाहृतिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पाण्टाहृतेरपत्यं युवा सौवीरगोत्रः । अनेन णप्र० → अकारः । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ मैमतः, मैमतायनिर्वा ]** मिमत । मिमतस्यापत्यं सौवीरगोत्रः । अनेन णप्र० → अ - आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पाण्टाहृतायनः ]** पण्टेनाह्रियते स्म । शाकटस्तु पाण्टेनानायाससाध्येनाह्रियते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । तस्यापत्यम् । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पाण्टाहृतेरपत्यं वृद्धम् । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ मैमतायनः ]** 'मांङ्क् मान-शब्दयोः' (११३७) मा । मीयते-परिच्छिद्यते ऋषित्वेन । 'पुत-पित्त-निमित्तोत-शुक्त-तिक्त-लिप्त-सूरत-मुहूर्तादयः' (उणा० २०४) कित् तप्र० निपातः । मा बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । मया-लक्ष्म्या मन्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि०' (४।२।५५) नलोपः । 'पृषोदरादयः' (३।२।१५५) मिमतनिपातो वा । मिमतस्यापत्यं वृद्धम् । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मैमतिः ]** मिमत । मिमतस्यापत्यमनन्तरं = मैमतिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

### भागवित्ति-तार्णविन्दवा-ऽऽकशापेयान्निन्दायामिकण् वा ॥ ६।१।१०५ ॥

**[ भागवित्तितार्णविन्दवाऽऽकशापेयात् ]** भागवित्तिश्च तार्णविन्दवश्च आकशापेयश्च = भागवित्तितार्णविन्दवाऽऽकशा-पेयम्, तस्मात् ।

**[ निन्दायाम् ]** निन्दा सप्तमी ङि ।

**[ इकण् ]** इकण् प्रथमा सि

**[ वा ]** वा प्रथमा सि ।

**[ भागवित्तिकः, भागवित्तायनो वा जाल्मः ]** भगेन-ज्ञानेन वित्तः-प्रसिद्धः, तस्यापत्यं वृद्धम् । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अथवा भग 'विद्लृंती लाभे' (१३२२) विद् । भगेन-ज्ञानेन विद्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'अघोषे

प्रथमोऽशिटः' (१।३।५०) द० → त०, तस्यापत्यम् । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । भागवित्तेरपत्यं युवा निन्दितः = भागवित्तिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'अन्यत्र 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ तार्णविन्दविकः, तार्णविन्दविर्वा ]** तृणविन्दु । तृणविन्दोरपत्यं वृद्धम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'तार्णविन्दवस्यापत्यं युवा निन्दितः । अनेन इकण्प्र० → इक । अन्यत्र 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आकशापेयिकः, आकशापेयिर्वा ]** अकं = दुःखं शपति = अकशापः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । अकशापस्यापत्यं वृद्धम् = आकशापेयः । 'शुभ्रादिभ्यः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आकशापेयस्यापत्यं युवा निन्दितः = आकशापेयिकः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्यत्र 'अत इञ्' (६।१।३१) इञ्प्र० → इ ।

**[ भागवित्तायनः ]** भागवित्तेरपत्यं वृद्धं = भागवित्तायनः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन ।

**[ तार्णविन्दविः ]** तार्णविन्दवस्यापत्यं = तार्णविन्दविः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आकशापेयिः ]** आकशापेयस्यापत्यम् = आकशापेयिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

### सौयामायनि-यामुन्दायनि-वार्ष्यायणेरीयश्च वा ॥ ६।१।१०६ ॥

**[ सौयामायनियामुन्दायनिवार्ष्यायणेः ]** सौयामायनिश्च यामुन्दायनिश्च वार्ष्यायणिश्च = सौयामायनियामुन्दायनिवार्ष्यायणि, तस्मात् ।

**[ ईयश्च ]** ईय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ सौयामायनीयः, सौयामायनिकः, सौयामायनिर्वा ]** सुयामन् । सुयाम्नोऽपत्यं = सौयामायनिः । 'सुयाम्नः सौवीरेष्वायनिञ्' (६।१।१०३) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । सौयामायनेरपत्यं युवा निन्दितः = सौयामायनीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । अनेन इकण्प्र० → इक । एवम्-सौयामायनिः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'ञिदार्षादणिञोः' (६।१।१४०) अण्लुप् ।

**[ यामुन्दायनीयः, यामुन्दायनिकः, यामुन्दायनिर्वा ]** यमुन्द । यमुन्दस्यापत्यं वृद्धं = यामुन्दायनिः । 'तिकादेरायनिञ्' (६।१।१०७) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यामुन्दायनेरपत्यं युवा निन्दितः । अनेन ईय-इकण्प्र० → इक । एवम्-यामुन्दायनिः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) अण्लुप् ।

**[ वार्ष्यायणीयः, वार्ष्यायणिकः, वार्ष्यायणिर्वा ]** वृषस्यापत्यं वृद्धं = वार्ष्यायणिः । 'दगु-कोशल-कर्मार-च्छाग-वृषाद् यादिः' (६।१।१०८) यकारादिरायनिञ्प्र० → यायनि । 'वृद्धिः स्वरे०' (७।४।१) वृ० आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वार्ष्यायणेरपत्यं युवा निन्दितः । अनेन ईय-इकण्प्र० → इक । एवम्-वार्ष्यायणिः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) अण्लुप् ।

**[ तैकायनीयः ]** तिक । तिकस्यापत्यं = तैकायनिः । 'तिकादेरायनिञ्' (६।१।१०७) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तैकायनेरपत्यं युवा = तैकायनीयः । मतान्तरे अनेनैव ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ सौयामायनिः ]** सौयामायनेरपत्यम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) अण्लुप् ।

**[ यामुन्दायनिः ]** यामुन्दायनेरपत्यम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) अण्लुप् ।

**[ वार्ष्यायणिः ]** वार्ष्यायणेरपत्यम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) अण्लुप् ॥छ॥

## तिकादेरायनिञ् ॥ ६।१।१०७ ॥

**[ तिकादेः ]**卐 तिक आदिर्यस्य सः=तिकादिः, तस्मात् ।

**[ आयनिञ् ]** आयनिञ् प्रथमा सि ।

**[ तैकायनिः ]** तिकस्यापत्यं = तैकायनिः । अनेन आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कैतवायनिः ]** कितव । कितवस्यापत्यं = कैतवायनिः । अनेन आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सैन्धव ]** सिन्धु । सिन्धुषु भवः = सैन्धवः । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० । नृ-नृस्थाभ्यामन्यः नृ(नरि)-नृस्थे तु विशेषविधानात् कच्छादित्वादकञ् स्यात् । सिन्धुराभिजनो निवासोऽस्य । 'सिन्ध्वादेरञ्' (६।३।२१६) अञ् वा ।

**[ आरथ्य ]** रथाय हिता = रथ्या । 'तस्मै हिते' (७।१।३५) - 'प्राण्यङ्ग०' (७।१।३७) यप्र० । रथ्याया आगतः ।

**[ शाट्यायनिः ]** शट । शटस्यापत्यं वृद्धम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । अथवा 'शट रुजाविशरणगत्यवशातनेषु' (१७५) शट् । शट्यते = शाट्यः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । शाट्यस्यापत्यं = शाट्यायनिः । अनेन आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शाट्यायनः ]** 'शट रुजाविशरणगत्यवशातनेषु' (१७५) शट् । शटते(ति)=शटः । 'अच्' (५।१।४९) अच्प्र० → अ । शटस्यापत्यं वृद्धम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शाट्यस्यापत्यं=शाट्यायनः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

---

卐 श० म० न्या० - तिकशब्द आदौ यस्य, तस्मात् ।

**[ औरश ]** 'उरिः सौत्रो धातुर्गत्यर्थः'-उर् । उरति प्रतिष्ठाम् = उरशः । 'उरेरशक्' (उणा० ५३१) अशक्प्र० → अश । उरशस्यापत्यम् = औरशः । 'राष्ट्र-क्षत्रियात्०' (६।१।११४) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कौरव्यशब्दः ]** कुरु । कुरूणां राजा-कुरो राज्ञोऽपत्यं वा = कौरव्यः । 'दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः' (६।१।११८) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । शब्दः । क्षत्रियप्रत्ययान्त एव गृह्यते, अन्यस्मात् ब्राह्मणवाचिनः इञेव तस्य च 'ञिदार्षादणिञोः' (६।१।१४०) इति लुप् ।

**[ कौरव्यः पिता, कौरव्यः पुत्रः ]** कुरोर्ब्राह्मणस्यापत्यं वृद्धं = कौरव्यः । 'कुर्वादेर्ञ्यः' (६।१।१००) ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव्, तस्यापत्यं युवा । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लुप् । अनेन विहितस्य आयनिञस्तु 'अब्राह्मणात्' (६।१।१४१) इति सूत्रेण प्राप्तापि लुप् न भवति विधानसामर्थ्याद् । लुपि हि सति अक्षत्रियवचनस्य कौरव्यशब्दस्य परिहारे फलं न स्यात् । नहीञ आयनिञो वा लुपि कश्चिद्विशेषः—

**[ कौरव्यः पिता, कौरव्यायणिः पुत्रः ]** कुरोरपत्यं = कौरव्यः । 'दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः' (६।१।११८) ञ्यप्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव्, तस्यापत्यं युवा । 'तिकादेरायनिञ्' (६।१।१०७) आयनिञ्प्र० → आयनि । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## दगु-कोशल-कर्मार-च्छाग-वृषाद् यादिः ॥ ६।१।१०८ ॥

**[ दगुकोशलकर्मारच्छागवृषात् ]** दगुश्च कोशलश्च कर्मारश्च छागश्च वृषश्च = दगुकोशलकर्मारच्छागवृषम्, तस्मात् ।

**[ यादिः ]** य आदिर्यस्य सः = यादिः ।

**[ दागव्यायनिः ]** दगु । दगोरपत्यं = दागव्यायनिः । अनेन आयनिञ्प्र० - यकारादिः । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ कौशल्यायनिः ]** कोशलस्यापत्यं = कौशल्यायनिः । अनेन आयनिञ्प्र० - यकारादिः । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कौशल्यः ]** येन केनैव शब्देन देशा राजानश्च उच्यन्ते तेभ्यो 'दु-नादि०' (६।१।११८) इत्यादिना ञ्यः । कोस(श)लानां देशानां राजा, कोशलराज्ञोऽपत्यं वा । 'दु-नादि-कुर्वित्०' (६।१।११८) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कार्मार्यायणिः ]** कर्मार । कर्मारस्यापत्यं = कार्मार्यायणिः । अनेन आयनिञ्प्र० - यकारादिः । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ छाग्यायनिः ]** छाग । छागस्यापत्यं = छाग्यायनिः । अनेन आयनिञ्प्र० - यकारादिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वार्ष्यायणिः ]** वृष । वृषस्यापत्यं = वार्ष्यायणिः । अनेन आयनिञ्प्र० - यकारादिः । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## द्विस्वरादणः ॥ ६।१।१०९ ॥

**[ द्विस्वरात् ]** द्वौ स्वरौ यत्र तत् = द्विस्वरम्, तस्मात् ।

**[ अणः ]** अण् पञ्चमी ङसि ।

**[ कार्त्रायणिः ]** कर्तृ । कर्तुरपत्यं वृद्धं = कार्त्रः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'इवर्णादेरस्वे०' (१।२।२१) र० । कार्त्रस्यापत्यं युवा = कार्त्रायणिः । अनेन आयनिञ्प्र० → आयनि । ब्राह्मणत्वात् सर्वेषु 'अब्राह्मणात्' (६।१।१४१) इति न लुप् ।

**[ हार्त्रायणिः ]** हर्तृ । हर्तुरपत्यं वृद्धम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् । हार्त्रस्यापत्यं = हार्त्रायणिः । अनेन आयनिञ्प्र० → आयनि ।

**[ पौत्रायणिः ]** पोतृ । 卐पोतुरपत्यं वृद्धं = पौत्रम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् । पौत्रस्यापत्यं युवा = पौत्रायणिः । अनेन आयनिञ्प्र० → आयनि । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) सर्वत्र णत्वम् ।

**[ यास्कायनिः ]** यस्क । यस्कस्यापत्यं वृद्धम् । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यास्कस्यापत्यं युवा = यास्कायनिः । अनेन आयनिञ्प्र० → आयनि । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औपगविः ]** औपगव । औपगवस्यापत्यम् = औपगविः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ब्राह्मणत्वात् इञ् न लुप् ।

**[ दाक्षायणः ]** दक्ष । दक्षस्यापत्यं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षेरपत्यं वृद्धम् । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ आङ्गिः, आङ्गायनिर्वा ]** अङ्ग । अङ्गानां राजा = आङ्गः । 'पुरु-मगध०' (६।१।११६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आङ्गस्यापत्यम् = आङ्गिः, आङ्गायनिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवृद्धाद् दोर्नवा' (६।१।११०) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा॥

### अवृद्धाद् दोर्नवा ॥ ६।१।११० ॥

**[ अवृद्धात् ]** न वृद्धम् = अवृद्धम्, तस्मात् ।

**[ दोः ]** दु पञ्चमी ङसि ।

**[ नवा ]** नवा प्रथमा सि ।

**[ आम्रगुप्तायनिः, आम्रगुप्तिः ]** आम्रगुप्तस्यापत्यम् = आम्रगुप्तायनिः । अनेन आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । एवम्-आम्रगुप्तिः । 'अत इञ्' (६।१।३१) इञ्प्र० ।

**[ शालगुप्तायनिः, शालगुप्तिः ]** सा(शा)लगुप्तस्यापत्यं = सा(शा)लगुप्तायनिः । अनेन आयनिञ्प्र० → आयनि । एवम्-सा(शा)लगुप्तिः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ वायुरथायनिः, वायुरथिः ]** वायुरथ । वायुरथस्यापत्यं = वायुरथायनिः । अनेन आयनिञ्प्र० → आयनि । एवम् - वायुरथिः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।६८) वृद्धिः ।

---

卐 श० म० न्या० - पुत्रस्यापत्यं पौत्रः ।

**[ पाञ्चालायनिः, पाञ्चालिः ]** पञ्चाल । पञ्चालानां राजा = पाञ्चालः । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पाञ्चालस्यापत्यं = पाञ्चालायनिः । अनेन आयनिञ्प्र० → आयनि । एवम्-पाञ्चालिः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ नापितायनिः, नापित्यः ]** नापित । नापितस्यापत्यं = नापितायनिः । अनेन आयनिञ्प्र० → आयनि । एवम् - नापित्यः । 'कुर्वादेर्ञ्यः' (६।१।१००) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दाक्षायणः ]** दक्षस्यापत्यं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षेरपत्यम् । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ प्लाक्षायणः ]** प्लक्षस्यापत्यं = प्लाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्लाक्षेरपत्यम् । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ आकम्पनिः ]** अकम्पन । अकम्पनस्यापत्यम् = आकम्पनिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा।

**पुत्रान्तात्** ॥ ६।१।१११ ॥

**[ पुत्रान्तात् ]** पुत्रोऽन्ते यस्य तत् = पुत्रान्तम्, तस्मात् ।

**[ गार्गीपुत्रायणिः, गार्गीपुत्रिः ]** गर्ग । गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'यञो डायन् च वा' (२।४।६७) ङी० → ई० । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । गार्ग्याः पुत्रः = गार्गीपुत्रः । गार्गीपुत्रस्यापत्यं = गार्गीपुत्रायणिः । अनेन आयनिञ्प्र० → आयनि । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम् - गार्गीपुत्रिः । 'अत इञ्' (६।१।३१) इञ्प्र० ।

**[ वासवदत्तापुत्रायणिः, वासवदत्तापुत्रिः ]** वासवदत्तायाः पुत्रः = वासवदत्तापुत्रः । वासवदत्तापुत्रस्यापत्यं = वासवदत्तापुत्रायणिः । अनेन आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृ० । एवम् - वासवदत्तापुत्रिः । 'अत इञ्' (६।१।३१) इञ्प्र० ।

पूर्वेणायनिञि सिद्धे वचनमिदमुत्तरसूत्रप्राप्तकागमाभावार्थम् ।

**[ गार्गीपुत्रकायणिः ]** गार्गीपुत्रस्यापत्यं = गार्गीपुत्रकायणिः । 'चर्मि-वर्मि-गारेट-कार्कट्य-काक-लङ्का-वाकिनाच्च कश्चान्तोऽन्त्यस्वरात्' (६।१।११२) आयनिञ्प्र० - अन्त्यस्वरात् परः क गच्छति । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

इति **तार्तीयीकमपि** रूपं भवति

**[ तार्तीयीकम् ]** तृतीय । तृतीयमेव = तार्तीयीकम् । 'तीयाट्टीकण्, न विद्या चेत्' (७।२।१५३) टीकण्प्र० → ईक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा।

**चर्मि-वर्मि-गारेट-कार्कट्य-काक-लङ्का-वाकिनाच्च कश्चान्तोऽन्त्यस्वरात्** ॥ ६।१।११२ ॥

**[ चर्मिवर्मिगारेटकार्कट्यकाकलङ्कावाकिनात् ]** चर्मी च वर्मी च गारेटश्च कार्कट्यश्च काकश्च लङ्का च वाकिनश्च = चर्मिवर्मिगारेटकार्कट्यकाकलङ्कावाकिनम्, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ कश्च ]** क प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ अन्तः ]** अन्त प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अन्त्यस्वरात् ]** अन्त(न्त्य)श्चासौ स्वरश्च = अन्त्यस्वरम्, तस्मात् ।

**[ चार्मिकायणिः, चार्मिणः ]** चर्मन् । चर्म अस्यास्ति = चर्मिन् । 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । 'चर्मिणोऽपत्यं = चार्मिकायणिः । अनेन आयनिञ्प्र०- नात् पूर्वं कागमे सति 'नोऽपदस्य तद्धिते' (७।४।६१) अन्त्यस्वरलुक् वर्त्तते । एवम् = चार्मिणः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः । 'संयोगादिनः' (७।४।५३) अन्त्यस्वरादिलोपाभावः ।

**[ वार्मिकायणिः, वार्मिणः ]** वर्मन् । वर्म अस्यास्ति = वर्मिन् । 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । वर्मिणोऽपत्यं = वार्मिकायणिः । अनेन आयनिञ्प्र० → आयनि-कश्च । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्त्यस्वरलुक् वर्त्तते । एवम्-वार्मिणः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः । 'संयोगादिनः' (७।४।५३) अन्त्यस्वरादिलोपाभावः ।

**[ गारेटकायनिः, गारेटिः ]** 'गॄश् शब्दे' (१५३८) गॄ । गृणाति तत्त्वमिति गारेटः । 'ग्रो णित्' (उणा० १५९) णित् एटप्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । गारेटस्यापत्यं = गारेटकायनिः । अनेन आयनिञ्प्र० → आयनि-कश्चान्ते । एवम्-गारेटिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कार्कट्यकायनिः, कार्कट्यायनः ]** कर्कट । कर्कटस्यापत्यं वृद्धं = कार्कट्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । कार्कट्यस्यापत्यं = कार्कट्यकायनिः । अनेन आयनिञ्प्र० - कश्च । एवम्-कार्कट्यायनः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

यदा त्वव्युत्पन्नः कार्कट्यशब्दस्तदा पक्षे-

**[ कार्कट्यिः ]** कार्कट्यस्यापत्यं = कार्कट्यिः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ काककायनिः, काकिः ]** काक ऋषिविशेषः । काकस्यापत्यं = काककायनिः । अनेन आयनिञ्प्र० - कश्च । एवम् - काकिः । 'बाह्वादिभ्यो गोत्रे (६।१।३२) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वृद्धिः ।

**[ लाङ्ककायनिः, लाङ्केयः ]** लङ्काया अपत्यं = लाङ्ककायनिः । अनेन आयनिञ्प्र० - कश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम्-लाङ्केयः । 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ लाङ्ककायनिः, लाङ्किः ]** लङ्क । लङ्कस्यापत्यम् । मतान्तरेऽनेनैव आयनिञ्प्र० - कश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । एवम् - लाङ्किः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वाकिनकायनिः, वाकिनिः ]** 'वचंक् भाषणे' (१०९६) वच् । वक्तीति । 'विपिना०' (उणा० २८४) वाकिननिपात्यते । वाकिनस्यापत्यं = वाकिनकायनिः । अनेन आयनिञ्प्र० - कश्च । एवम्-वाकिनिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः ।

**[ गार्गीपुत्रकायणिः ]** पूर्ववत् (६।१।१११) ।

**[ गार्गीपुत्रिः ]** पूर्ववत् (६।१।१११) ।

ककारस्यान्त्यस्वरात् परतो विधानं चर्मि- वर्मिणोर्नकारस्य लोपार्थम् । यद्येवं परादिरेव क्रियेत । नैवम् । तथा सति प्रत्ययस्य व्यञ्जनादित्वात् पुंवद्भावो न सिध्येत् ।

**[ चार्मिकायणिः ]** चर्मिण्या अपत्यं = चार्मिकायणिः ।

**[ वार्मिकायणिः ]** वर्मिण्या अपत्यं = वार्मिकायणिः ॥छ॥

## अदोरायनिः प्रायः ॥ ६।१।११३ ॥

**[ अदोः ]** न दुरदुः, तस्मात् ।

**[ आयनिः ]** आयनि प्रथमा सि ।

**[ प्रायः ]** प्रायस् तृतीया टा । 'अव्ययस्य' (३।२।७) टालुप् ।

**[ ग्लुचुकायनिः, ग्लौचुकिः ]** ग्लुचुक । ग्लुचुकस्यापत्यं = ग्लुचुकायनिः । अनेन आयनिप्र० । एवम् - ग्लौचुकिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ म्लुचुकायनिः, म्लौचुकिः ]** म्लुचुक । म्लुचुकस्यापत्यं = म्लुचुकायनिः । अनेन आयनिप्र० । एवम् - म्लौचुकिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अहिचुम्बकायनिः, आहिचुम्बकिः ]** अहीनां चुम्बकः = अहिचुम्बकः, तस्यापत्यम् = अहिचुम्बकायनिः । अनेन आयनिप्र० । एवम् - आहिचुम्बकिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ त्रिपृष्ठायनिः, त्रैपृष्ठिः ]** त्रीणि पृष्ठानि यस्य सः = त्रिपृष्ठः, तस्यापत्यं = त्रिपृष्ठायनिः । अनेन आयनिप्र० । एवम् - त्रैपृष्ठिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्रीविजयायनिः, श्रैविजयिः ]** श्रिया विजयः = श्रीविजयः, तस्यापत्यं = श्रीविजयायनिः । अनेन आयनिप्र० । एवम् - श्रैविजयिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औपगविः ]** उपगोरपत्यम् = औपगव इति वाक्येऽनेन प्रत्ययो न भवति प्रायोग्रहणात् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । औपगवस्यापत्यं युवा । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ रामदत्तिः ]** रामदत्तस्यापत्यम् । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ रामदत्तायनिः पिता-पुत्रः ]** रामदत्तस्यापत्यम् । 'अवृद्धाद् दोर्नवा' (६।१।११०) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । रामदत्तायनेरपत्यं युवा = रामदत्तायनिः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) अण्लुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दाक्षिः ]** दक्षस्यापत्यम् । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षेरपत्यम् । प्रायोग्रहणादत्र प्रत्ययो न भवति ।

**[ प्लाक्षिः ]** प्लक्षस्यापत्यम् । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्लाक्षेरपत्यम् । प्रायोग्रहणादत्र प्रत्ययो न भवति ॥छ॥

### राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ् ॥ ६।१।११४ ॥

**[ राष्ट्रक्षत्रियात् ]** राष्ट्रं च क्षत्रियश्च = राष्ट्रक्षत्रियम्, तस्मात् ।

**[ सरूपात् ]** समानं रूपं यस्य तत् = सरूपम्, तस्मात् । 'समानस्य धर्माऽऽदिषु' (३।२।१४९) समानस्य सभावः । स इति क्रियते इत्यर्थः ।

**[ राजाऽपत्ये ]** राजा च अपत्यं च, राजानश्च अपत्यानि च वा = राजाऽपत्यम्, तस्मिन् ।

**[ द्रिः ]** द्रि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अञ् ]** अञ् प्रथमा सि ।

वेति निवृत्तम् । अपत्य इत्यनुवर्त्तमाने राजेत्यधिकार्थस्य भणनात् ।

**[ वैदेहः, वैदेहौ, विदेहाः ]** विदेह । विदेहानां राष्ट्रस्य राजा = वैदेहः । विदेहानां राष्ट्रस्य राजानौ = वैदेहौ । विदेहानां राष्ट्रस्य राजानः = विदेहाः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ-जस् । बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् ।

**[ वैदेहः, वैदेहौ, विदेहाः ]** विदेहस्य राज्ञोऽपत्यं = वैदेहः । विदेहस्य राज्ञोऽपत्ये = वैदेहौ । विदेहस्य राज्ञोऽपत्यानि = विदेहाः । अनेन अञ्प्र० → अ । सि-औ-जस् । 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् ।

**[ ऐक्ष्वाकः, ऐक्ष्वाकौ, इक्ष्वाकवः ]** इक्ष्वाकु । इक्ष्वाकूणां राष्ट्रस्य राजा, इक्ष्वाकोरपत्यं वा = ऐक्ष्वाकः । इक्ष्वाकूणां राष्ट्रस्य राजानौ, इक्ष्वाकोरपत्ये वा = ऐक्ष्वाकौ । इक्ष्वाकूणां राष्ट्रस्य राजानः, इक्ष्वाकोरपत्यानि वा = इक्ष्वाकवः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'सारवैक्ष्वाक-मैत्रेय-भ्रौणहत्य-धैवत्य-हिरण्मयम्' (७।४।३०) उलोपः । बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् । सि-औ-जस् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ पाञ्चालः, पाञ्चालौ, पञ्चालाः ]** पञ्चालानां राष्ट्रस्य राजा, पञ्चालस्यापत्यं वा । अनेन अञ्प्र० । यत्र जस् तत्र 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् । अन्यत्र वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ-जस् ।

**[ पाञ्चालः ]** पञ्चालस्य ब्राह्मणस्य राजा ।

**[ सौराष्ट्रकः ]** सुराष्ट्राणां राजा = सौराष्ट्रकः । 'राष्ट्रेभ्यः' (६।३।४४) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आदर्शकः ]** आदर्शस्य राष्ट्रस्य राजा = आदर्शकः । 'राष्ट्रेभ्यः' (६।३।४४) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

सुराष्ट्र-आदर्शशब्दौ देश एव वर्त्तेते ।

**[ दाशरथिः ]** दशरथस्य क्षत्रियस्यापत्यं = दाशरथिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ त्रैपृष्टिः ]** त्रिपृष्टस्य क्षत्रियस्यापत्यं = त्रैपृष्टिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

नात्र राष्ट्रस्या(स्य)वाचिनौ दशरथ-त्रिपृष्टशब्दौ किन्तु राजन्येव वर्त्तेते ॥छ॥

**गान्धारि-साल्वेयाभ्याम्** ॥ ६।१।११५ ॥

**[ गान्धारिसाल्वेयाभ्याम् ]** गान्धारिश्च साल्वेयश्च = गान्धारिसाल्वेयौ, ताभ्याम् ।

**[ गान्धारः, गान्धारौ, गान्धारयः ]** गन्धारस्यापत्यं वृद्धं = गान्धारिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गान्धारीणां राजा, गान्धारे राज्ञोऽपत्यं वा । अनेन अञ्प्र० । गान्धारीणां राजानौ, गान्धारे राज्ञोऽपत्ये वा । गान्धारीणां राष्ट्रस्य राजानः, गान्धारे राज्ञोऽपत्यानि वा = गान्धारयः । अनेन अञ्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् । सि-औ-जस् । 'जस्येदोत्' (१।४।२२) इ० → ए० । एदैतोऽयाय्' (१।२।२३) अय् ।

ननु दुलक्षणञ्यस्य बाधनेन विधानमिदं चरितार्थमिति कुतो विधानसामर्थ्यादित्युक्तम् ? ग(गा)न्धारे राज्ञोऽपत्यमिति पूर्वेणाञ् तथा च सति 'अब्राह्मणात्' (६।१।१४१) इति लोपो न भवति विधानसामर्थ्यादिति विशेषः । ननु गान्धार इत्यत्र लुग(ब)भावे फलमस्ति, लुप्ते गान्धारिरिति स्यात्, स्थिते तु गान्धारः । साल्वेयस्य किं फलम् ? उच्यते-अत्र तु किं कृते अकञ्स्थिते सङ्घादिविवक्षायां 'सङ्घ-घोषा-ऽङ्क०' (६।३।१७२) इति अण् भवति इति विशेषः ।

**[ साल्वेयः, साल्वेयौ, साल्वेयाः ]** साल्वा । साल्वाया अपत्यम् । 'द्विस्वरादनद्याः' (६।१।७१) एयणप्र० → एय । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । साल्वेयानां राजा, साल्वेयस्यापत्यं युवा वा । अनेन अञ्प्र० → अ । साल्वेयानां राष्ट्रस्य राजानौ, साल्वेयस्याऽपत्ये वा = साल्वेयौ । साल्वेयानां राष्ट्रस्य राजानः, साल्वेयस्याऽपत्यानि वा । अनेन अञ्प्र० । यत्र जस् तत्र 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् ।

एकत्वद्वित्वयोस्त्वपत्यार्थविवक्षायां 'अब्राह्मणात्' (६।१।१४१) इति लुप् न भवति विधानसामर्थ्यात् । अन्यथा ञ्यविधावेवानयोः प्रतिषेधः क्रियेत, तथा च पूर्वेणैवाञ् सिध्यति ॥छ॥

## पुरु-मगध-कलिङ्ग-सूरमस-द्विस्वरादण् ॥ ६।१।११६ ॥

**[ पुरुमगधकलिङ्गसूरमसद्विस्वरात् ]** द्वौ स्वरौ यस्य सः = द्विस्वरः । पुरुश्च मगधश्च कलिङ्गश्च सूरमसश्च द्विस्वरश्च = पुरुमगधकलिङ्गसूरमसद्विस्वरम्, तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

पुरोरन्यत्र अञोऽपवादोऽयमण् सः पुरुशब्दो न राष्ट्रक्षत्रियस्वरूपः किन्तु क्षत्रियवाची ।

**[ पौरवः, पौरवौ, पुरवः ]** पुरु । पुरोरपत्यं = पौरवः । पुरोरपत्ये = पौरवौ । पुरोरपत्यानि = पुरवः । अनेन अण्प्र० → अ । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । यत्र जस् तत्र 'बहुष्वस्त्रियाम्' (६।१।१२४) सर्वत्र अण्लुप् । सि–औ–जस् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

गन्धारशब्दोऽपि राष्ट्रक्षत्रियवचनो विद्यते ततः परेणेञ् पूर्वेणाञा बाधितत्वात्, अञ् तु गन्धमियर्त्ति इति व्युत्पत्तिप्रधानादेवापत्येऽञ्, उपचारात् निवासोऽपि गान्धारयः ।

**[ मागधः, मागधौ, मगधाः ]** मगधानां राजा, मगधस्यापत्यं वा = मागधः । मगधानां राजानौ, मगधस्यापत्ये वा । मगधानां राजानः, मगधस्यापत्यानि वा । अनेन अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यत्र जस् तत्र 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । सि–औ–जस् ।

**[ कालिङ्गः, कालिङ्गौ, कलिङ्गाः ]** कलिङ्गानां राष्ट्रस्य राजा, कलिङ्गस्य राज्ञोऽपत्यं वा = कालिङ्गः । कलिङ्गानां राष्ट्रस्य राजानौ, कलिङ्गस्य राज्ञोऽपत्ये वा = कालिङ्गौ । कलिङ्गानां राष्ट्रस्य राजानः, कलिङ्गस्य राज्ञोऽपत्यानि वा = कलिङ्गाः । अनेन अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यत्र जस् तत्र 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । सि–औ–जस् ।

**[ सौरमसः, सौरमसौ, सूरमसाः ]** सूरमसानां राष्ट्रस्य राजा, सूरमसस्य राज्ञोऽपत्यं वा = सौरमसः । सूरमसानां राष्ट्रस्य राजानौ, सूरमसस्य राज्ञोऽपत्ये वा = सौरमसौ । सूरमसानां राष्ट्रस्य राजानः, सूरमसस्य राज्ञोऽपत्यानि वा । सुरमसाः । अनेन अण्प्र० → अ । वृद्धिः । यत्र जस् तत्र 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् ।

**[ आङ्गः ]** अङ्गानां राष्ट्रस्य राजा, अङ्गस्य राज्ञोऽपत्यं वा = आङ्गः ।

**[ अङ्गाः ]** अङ्गानां राष्ट्रस्य राजानः, अङ्गस्य राज्ञोऽपत्यानि वा = अङ्गाः ।

**[ वाङ्गः ]** वङ्गानां राष्ट्रस्य राजा, वङ्गस्य राज्ञोऽपत्यं वा = वाङ्गः ।

**[ वङ्गाः ]** वङ्गानां राष्ट्रस्य राजानः, वङ्गस्य राज्ञोऽपत्यानि वा = वङ्गाः ।

**[ सौह्मः ]** सुह्मानां राष्ट्रस्य राजा, सुह्मस्य राज्ञोऽपत्यं वा = सौह्मः ।

**[ सुह्माः ]** सुह्मानां राष्ट्रस्य राजानः, सुह्मस्य राज्ञोऽपत्यानि वा = सुह्माः ।

**[ पौण्ड्रः ]** पुण्ड्रानां राष्ट्रस्य राजा, पुण्ड्रस्य राज्ञोऽपत्यं वा = पौण्ड्रः ।

**[ पुण्ड्राः ]** पुण्ड्रानां राष्ट्रस्य राजानः, पुण्ड्रस्य राज्ञोऽपत्यानि वा = पुण्ड्राः ।

**[ दारदः ]** दरदानां राष्ट्रस्य राजा, दरदस्य राज्ञोऽपत्यं वा = दारदः ।

**[ दरदाः ]** दरदानां राष्ट्रस्य राजानः, दरदस्य राज्ञोऽपत्यानि वा = दरदाः ।

**[ भार्गः ]** भर्गाणां राष्ट्रस्य राजा, भर्गस्य राज्ञोऽपत्यं वा = भार्गः ।

**[ भर्गाः ]** भर्गस्य राज्ञोऽपत्यानि, भर्गाणां राष्ट्रस्य राजानो वा = भर्गाः ।

**[ साल्वः ]** साल्वानां राष्ट्रस्य राजा, साल्वस्य राज्ञोऽपत्यं वा = साल्वः ।

**[ साल्वाः ]** साल्वानां राष्ट्रस्य राजानः, साल्वस्य राज्ञोऽपत्यानि वा = साल्वाः । सर्वत्र अनेन अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । यत्र जस् तत्र 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप्।

पुरुग्रहणमराष्ट्रसरूपार्थम् । अस्ति राजा पुरुर्नाम न तु राष्ट्रम् । तस्यौत्सर्गिकेणैवाणा सिद्धे बहुषु लुबर्थमिदमण्विधानम् । अत्रैव सिद्धेऽण्विधानं सङ्घाद्यण्बाधनार्थम् । तेनाकञ् भवति-

**[ पौरवकम् ]** पुरोरपत्यानि = पुरवः । अनेन अण्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । पुरूणां सङ्घादिः । 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) अकञ्प्र० विषये 'न प्राग्जितीये स्वरे' (६।१।१३५) इति लुप्तस्यापि निवृत्तिः । अकप्र० । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ मागधकम् ]** मगधस्यापत्यानि = मगधाः । अनेन अण्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । मगधानां सङ्घादिः । 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) अकञ्प्र० विषये 'न प्राग्जितीये स्वरे' (६।१।१३५) लुप्तस्यापि निवृत्तिः । अकप्र० । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कालिङ्गकम् ]** कलिङ्गस्य अपत्यानि । अनेन अण्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । कलिङ्गानां सङ्घादिः । 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ सौरमसकम् ]** सूरमसस्य अपत्यानि । अनेन अण्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । सूरमसानां सङ्घादिः । 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ आङ्गकम् ]** अङ्गस्य अपत्यानि । अनेन अण्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । अङ्गानां सङ्घादिः । 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ वाङ्गकम् ]** वङ्गस्य अपत्यानि । अनेन अण्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । वङ्गानां सङ्घादिः । 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

अञन्ताद्धि गोत्रात् अञ्यञिञः (६।३।१७२) इत्यण्बाधकः स्यात् । अयमर्थः - 'गोत्राददण्ड०' (६।३।१६९) इति विहितस्य अकञो बाधकः 'सङ्घ-घोषा-ऽङ्क०' (६।३।१७२) इत्यण् स्यात् ॥छ॥

**साल्वांश-प्रत्यग्रथ-कलकूटाऽश्मकादिञ्** ॥ ६।१।११७ ॥

**[ साल्वांशप्रत्यग्रथकलकूटाऽश्मकात् ]** साल्वानामंशाः = साल्वांशाः । साल्वांशाश्च प्रत्यग्रथश्च कलकूटश्च अश्मकश्च = साल्वांशप्रत्यग्रथकलकूटाऽश्मकम, तस्मात् ।

**[ इञ् ]** इञ् प्रथमा सि ।

**[ औदुम्बरिः ]** उदुम्बराणां राजा, उदुम्बरस्य राज्ञोऽपत्यं वा = औदुम्बरिः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ उदुम्बराः ]** उदुम्बराणां राजानः, उदुम्बरस्य राज्ञोऽपत्यानि वा = उदुम्बराः । अनेन इञ्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) इञ्लुप् । प्र० जस् ।

**[ तैलखलिः ]** तिलखलानां राष्ट्रस्य राजा, तिलखलस्य राज्ञोऽपत्यं वा = तैलखलिः । अनेन इञ्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ ।

**[ तिलखलाः ]** तिलखलानां राष्ट्रस्य राजानः, तिलखलस्य राज्ञोऽपत्यानि वा = तिलखलाः । अनेन इञ्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) इञ्लुप् ।

**[ माद्रकारिः ]** मद्रकाराणां राष्ट्रस्य राजा, मद्रकारस्य राज्ञोऽपत्यं वा = माद्रकारिः ।

**[ मद्रकाराः ]** मद्रकाराणां राष्ट्रस्य राजानः, मद्रकारस्य राज्ञोऽपत्यानि वा = मद्रकाराः ।

**[ यौगन्धरिः ]** युग 'धृंग् धारणे' (८८७) धृ । धरन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । युगं धारयतीति युगन्धरः । 'धारेर्धर्च' (५।१।११३) खप्र० → अ - धारि० → धर्० । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोऽन्तः । युगन्धराणां राष्ट्रस्य राजा, युगन्धरस्य राज्ञोऽपत्यं वा = यौगन्धरिः ।

**[ युगन्धराः ]** युगन्धराणां राष्ट्रस्य राजानः, युगन्धरस्य राज्ञोऽपत्यानि वा = युगन्धराः ।

**[ भौलिङ्गिः ]** भुलिङ्गानां राष्ट्रस्य राजा, भुलिङ्गस्य राज्ञोऽपत्यं वा = भौलिङ्गिः ।

**[ भुलिङ्गाः ]** भुलिङ्गानां राष्ट्रस्य राजानः, भुलिङ्गस्य राज्ञोऽपत्यानि वा = भुलिङ्गाः ।

**[ शारदण्डिः ]** 'दण्डण् दण्डनिपातने' (१८६८) दण्ड् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । शरैर्दण्डयति = शरदण्डः । 'अच्' (५।१।४९) अच्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । शरदण्डानां राष्ट्रस्य राजा, शरदण्डस्य राज्ञोऽपत्यं वा = शारदण्डिः ।

**[ शरदण्डाः ]** शरदण्डानां राष्ट्रस्य राजानः, शरदण्डस्य राज्ञोऽपत्यानि वा = शरदण्डाः ।

**[ आजमीढिः ]** अजेन मिह्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः-पूर्वस्वरश्च दीर्घः । अजमीढानां राष्ट्रस्य राजा, अजमीढस्य राज्ञोऽपत्यं वा = आजमीढिः ।

**[ अजमीढाः ]** अजमीढानां राष्ट्रस्य राजानः, अजमीढस्य राज्ञोऽपत्यानि वा = अजमीढाः ।

**[ आजकुन्दिः ]** अजानां कुन्दा येषु तानि । अजकुन्दानां राष्ट्रस्य राजा, अजकुन्दस्य राज्ञोऽपत्यं वा = आजकुन्दिः ।

**[ अजकुन्दाः ]** अजकुन्दानां राष्ट्रस्य राजानः, अजकुन्दस्य राज्ञोऽपत्यानि वा = अजकुन्दाः ।

**[ बौधिः ]** 'बुधिं ज्ञाने' (१२६२) बुध् । बुध्यते इति बुधः । 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० → अ । बुधानां राष्ट्रस्य राजा, बुधस्य राज्ञोऽपत्यं वा = बौधिः ।

**[ बुधाः ]** बुधानां राष्ट्रस्य राजानः, बुधस्य राज्ञोऽपत्यानि वा = बुधाः । सर्वत्र अनेन इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यत्र जस् तत्र 'बहुष्वस्त्रियाम्' (६।१।१२४) इञ्लुप् ।

**[ प्रात्यग्रथिः ]** प्रत्यग्रथानां राष्ट्रस्य राजा, प्रत्यग्रथस्य राज्ञोऽपत्यं वा = प्रात्यग्रथिः ।

**[ प्रत्यग्रथाः ]** प्रत्यग्रथानां राष्ट्रस्य राजानः, प्रत्यग्रथस्य राज्ञोऽपत्यानि वा = प्रत्यग्रथाः ।

**[ कालकूटिः ]** 'कूटिण् अप्रमादे' (१८२०) कूट् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । कूटयन्ति(न्ते) = कूटाः । 'अच्' (५।१।४९) अच्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । कला मनोज्ञा(:) कूटा राशयो यत्र । का(क)लकूटानां राष्ट्रस्य राजा, का(क)लकूटस्य राज्ञोऽपत्यं वा = कालकूटिः ।

**[ कलकूटाः ]** कलकूटानां राष्ट्रस्य राजानः, कलकूटस्य राज्ञोऽपत्यानि वा = कलकूटाः ।

**[ आश्मकिः ]** अश्मन् 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) का । अश्मानं कायतीति अश्मकः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अश्मकानां राष्ट्रस्य राजा, अश्मकस्य राज्ञोऽपत्यं वा = आश्मकिः ।

**[ अश्मकाः ]** अश्मकानां राष्ट्रस्य राजानः, अश्मकस्य राज्ञोऽपत्यानि वा = अश्मकाः । अनेन इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यत्र जस् तत्र 'बहुष्वस्त्रियाम्' (६।१।१२४) इञ्लुप् । सर्वत्र प्र० जस् ।

अजमीढाजकुन्द-बुधास्तूदुम्बरादिविशेषाः, तेऽपि साल्वांशा एव । **प्रत्यग्रथादिग्रहणमसाल्वांशार्थम्** ।।छा।

**दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ज्यः ॥ ६।१।११८ ॥**

**[ दुनादिकुर्वित्कोशलाऽजादात् ]** 卐 न आदिर्येषां ते = नादयः । दुश्च नादयश्च कुरवश्च इच्च कोस(श)लश्च अजादश्च = दुनादिकुर्वित्कोस(श)लाऽजादम्, तस्मात् ।

**[ ञ्यः ]** ञ्य प्रथमा सि ।

**[ आम्बष्ठ्यः ]** अम्बायां भवः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । आम्ब 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै०' (२।३।९८) स्था । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (न्या० सं० वक्ष०(१)/सूत्र(२९) स्था । आम्बे तिष्ठन्तीति आम्बष्ठाः । 'स्था-पा-स्ना-त्रः कः' (५।१।१४२) कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । आम्बष्ठानां राष्ट्रस्य राजा, आम्बष्ठस्य राज्ञोऽपत्यं वा । अनेन ञ्यप्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आम्बष्ठाः ]** आम्बष्ठानां राष्ट्रस्य राजानः, आम्बष्ठस्य राज्ञोऽपत्यानि वा = आम्बष्ठाः । अनेन ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् ।

**[ सौवीर्यः ]** सुवीर । सुवीरा अत्र सन्ति = सौवीराः । 'तदत्राऽस्ति' (६।२।७०) अण्प्र० । सुवीराणामिमे = सौवीराः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सौवीराणां राष्ट्रस्य राजा, सौवीरस्य राज्ञोऽपत्यं वा = सौवीर्यः ।

**[ सौवीराः ]** सौवीराणां राष्ट्रस्य राजानः, सौवीरस्य राज्ञोऽपत्यानि वा = सौवीराः ।

---

卐 श० म० न्या० - नकार आदौ येषां राष्ट्राणां क्षत्रियाणां च ते = नकारादयः ।

**[ काम्बव्यः ]** कम्बु । कम्बुर्देवता एषाम् । कम्बोरिमे वा । कम्बुरेवात्रास्ति । 'तदत्राऽस्ति' (६।२।७०) अण्प्र० । 'देवता' (६।२।१०१) अण्प्र० । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । काम्बवानां राष्ट्रस्य राजा, काम्बवस्य राज्ञोऽपत्यं वा = काम्बव्यः ।

**[ काम्बवाः ]** काम्बवानां राष्ट्रस्य राजानः, काम्बवस्य राज्ञोऽपत्यानि वा = काम्बवाः ।

**[ दार्व्यः ]** 'दृश् विदारणे' (१५३५) दृ । दृणन्तीति । 'प्रह्वा-ह्वाय-ह्वा०' (उणा० ५१४) दार्वनिपातः । दार्वाणां राष्ट्रस्य राजा, दार्वस्य राज्ञोऽपत्यं वा = दार्व्यः ।

**[ दार्वाः ]** दार्वाणां राष्ट्रस्य राजानः, दार्वस्य राज्ञोऽपत्यानि वा = दार्वाः । अनेन ञ्यप्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यत्र जस् तत्र 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् ।

द्विस्वरलक्षणोऽण् परत्वादनेन बाध्यते ।

**[ नैषध्यः ]** 'षोंच् अन्तकर्मणि' (११५०) षो । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सो । 'आत् सन्ध्यक्षरस्य' (४।२।१) सा, निपूर्व० । निष्यन्ति अरिवर्गं = निषधः । 'नेः स्यतेरधक्' (उणा० २५२) अधक्प्र० → अध । निषधानां राष्ट्रस्य राजा, निषधस्य राज्ञोऽपत्यं वा = नैषध्यः ।

**[ निषधाः ]** निषधानां राष्ट्रस्य राजानः, निषधस्य राज्ञोऽपत्यानि वा = निषधाः । अनेन ञ्यप्र० ।

**[ नैचक्यः ]** नि 'चकि तृप्ति-प्रतीघातयोः' (६२१) चक् । निचकन्ते = निचकाः । 'अच्' (५।१।४९) अच्प्र० । निचकानां राष्ट्रस्य राजा, निचकस्य राज्ञोऽपत्यं वा = नैचक्यः ।

**[ निचकाः ]** निचकानां राष्ट्रस्य राजानः, निचकस्य राज्ञोऽपत्यानि वा = निचकाः ।

**[ नैप्यः ]** नियतां आपो यत्र तत् = नीपः(पम्) । 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७)नी । नयन्ति प्राणिगणमाश्वसनमिति । 'नियो वा' (उणा० ३०२) कित् पप्र० । नीपानां राष्ट्रस्य राजा, नीपस्य राज्ञोऽपत्यं वा = नैप्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ नीपाः ]** नीपानां राष्ट्रस्य राजानः, नीपस्य राज्ञोऽपत्यानि वा = नीपाः । अनेन ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । प्र० जस् ।

**[ कौरव्यः ]** कुरु । कुरूणां राष्ट्रस्य राजा, कुरोः राज्ञोऽपत्यं वा = कौरव्यः । अनेन ञ्यप्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ कुरवः ]** कुरूणां राष्ट्रस्य राजानः, कुरोः राज्ञोऽपत्यानि वा = कुरवः । अनेन ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् ।

इत् दर्शयति—

**[ आवन्त्यः ]** अवन्तीनां राष्ट्रस्य राजा, अवन्तेः राज्ञोऽपत्यं वा = आवन्त्यः । अनेन ञ्यप्र० । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् ।

**[ अवन्तयः ]** अवन्तीनां राष्ट्रस्य राजानः, अवन्तेः राज्ञोऽपत्यानि वा = अवन्तयः ।

**[ कौन्त्यः ]** 'कुङ्त् शब्दे' (१४६२) कु । कूयते उपादेयतया = कुन्तिः । 'कु-च्योर्नोऽन्तश्च' (उणा० ६५२) कुन्तिनिपातः । कुन्तीनां राष्ट्रस्य राजा, कुन्तेः राज्ञोऽपत्यं वा = कौन्त्यः ।

**[ कुन्तयः ]** कुन्तीनां राष्ट्रस्य राजानः, कुन्तेः राज्ञोऽपत्यानि वा = कुन्तयः ।

**[ वासात्यः ]** 'वसं निवासे' (९९९) वस् । वसतीति । 'वस्यर्तिभ्यामातिः' (उणा० ६६२) आतिप्र० । वसातीनां राष्ट्रस्य राजा, वसातेः राज्ञोऽपत्यं वा = वासात्यः ।

**[ वसातयः ]** वसातीनां राष्ट्रस्य राजानः, वसातेः राज्ञोऽपत्यानि वा = वसातयः ।

**[ चैद्यः ]** 'चदु दीप्त्याह्लादयोः' (३१३) चद् । चन्द्यते व्यवहारिभिः = चेदयः । 'पदि-पठि-पचि०' (उणा० ६०७) इप्र० । बाहुलकात् अस्य एत् । चेदीनां राष्ट्रस्य राजा, चेदेः राज्ञोऽपत्यं वा = चैद्यः ।

**[ चेदयः ]** चेदीनां राष्ट्रस्य राजानः, चेदेः राज्ञोऽपत्यानि वा = चेदयः ।

**[ काश्यः ]** 'काशृङ् दीप्तौ' (८३०) काश् । काश्यन्ते व्यवहारिभिः । 'पदि-पठि-पचि-स्थलि-हलि-कलि-बलि-वलि-वल्लि-पल्लि-कटि-चटि-वटि-वधि-गाध्यर्चि-वन्दि-नन्द्यवि-वशि-वाशि-काशि-छर्दि-तन्त्रि-मन्त्रि-खण्डि-मण्डि-चण्डि-यत्यञ्जि-मस्यसि-वनि-ध्वनि-सनि-गमि-तमि-ग्रन्थि-श्रन्थि-जनि-मण्यादिभ्यः' (उणा० ६०७) इप्र० । काशीनां राष्ट्रस्य राजा, काशेः राज्ञोऽपत्यं वा = काश्यः ।

**[ काशयः ]** काशीनां राष्ट्रस्य राजानः, काशेः राज्ञोऽपत्यानि वा = काशयः ।

**[ कौशल्यः ]** कोशल । कोशलानां राष्ट्रस्य राजा, कोशलस्य राज्ञोऽपत्यं वा = कौशल्यः ।

**[ कोशलाः ]** कोशलानां राष्ट्रस्य राजानः, कोशलस्य राज्ञोऽपत्यानि वा = कोशलाः ।

**[ आजाद्यः ]** अजा 'दोंच् छेदने' (११४८) दो । 'आत् सन्ध्यक्षरस्य' (४।२।१) दा । अजां द्यन्ति(ति) = अजादः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अजादानां राष्ट्रस्य राजा, अजादस्य राज्ञोऽपत्यं वा = आजाद्यः ।

**[ अजादाः ]** अजादानां राष्ट्रस्य राजानः, अजादस्य राज्ञोऽपत्यानि वा = अजादाः । सर्वेषु अनेन ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्ण-इवर्णलुक् । यत्र जस् तत्र 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । प्र० जस् ।

**[ कौमारः ]** कुमार 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी० → ई० । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । कुमारीणां राष्ट्रस्य राजा, कुमार्या राज्ञोऽपत्यं वा = कौमारः । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (न्या० सं० वक्ष० (१) / सूत्र (१६)) इति न्यायात् क्षत्रियासरूपस्यापि परिग्रहः ॥छ॥

## पाण्डोर्ड्यण् ॥ ६।१।११९ ॥

**[ पाण्डोः ]** पाण्डु पञ्चमी ङसि ।

**[ ड्यण् ]** ड्यण् प्रथमा सि ।

**[ पाण्ड्यः ]** 'पनि स्तुतौ' (७४८) पन् । पन्यन्ते । 'पनेर्दीर्घश्च' (उणा० ७६६) डुप्र० - दीर्घश्च । पाण्डूनां राष्ट्रस्य राजा, पाण्डोः राज्ञोऽपत्यं वा = पाण्ड्यः । अनेन ड्यण्प्र० → य । 'डित्यन्त्यस्वरादेः' (२।१।११४) उलोपः ।

**[ पाण्ड्यौ ]** पाण्डूनां राष्ट्रस्य राजानौ, पाण्डोः राज्ञोऽपत्ये वा = पाण्ड्यौ ।

**[ पाण्डवः ]** पाण्डूनां राष्ट्रस्य राजानः, पाण्डोः राज्ञोऽपत्यानि वा = पाण्डवः । अनेन ड्यण्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) ड्यण्लुप् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ पाण्डवाः यस्य दासाः ]** पाण्डोरपत्यानि = पाण्डवाः । 'शुभ्रादिभ्यः' (६।१।७३) एयण्बाधकः 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्र० जस् ।

अत्र तु कुरवो जनपदस्तस्य राजा पाण्डुरिति शिवाद्यण् भवति ।

अयमर्थः - पाण्डुदेशस्तस्यैव देशस्य सम्बन्धीनि राज्ञि वाच्ये ड्यण् भवति । यत्रान्यदेशसम्बन्धी राजा भवति पाण्डुर्नाम अन्यत्र च देशोऽप्यस्ति पाण्डुर्नाम तत्र न भवतीति भावार्थः । यदि स एव राजा स एव देशः स्यात् तदैव स्यादित्याशयः ।

**डकारोऽन्त्यस्वरादिलोपार्थः । णकारो वृद्धिनिमित्तपुंवद्भावनिषेधार्थः ।**

**[ पाण्ड्याभार्यः ]** पाण्डूनां राज्ञी = पाण्ड्या । पूर्ववत् आप् । पाण्ड्या भार्या यस्य सः = पाण्ड्याभार्यः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वः । 'परतः स्त्री०' (३।२।४९) पुंवद्भावे प्राप्ते 'तद्धित०' (३।२।५५) इति निषेधः ॥छ॥

**शकादिभ्यो द्रेर्लुप्** ॥ ६।१।१२० ॥

**[ शकादिभ्यः ]** शक आदिर्येषां ते = शकादयः, तेभ्यः = शकादिभ्यः । पञ्चमी भ्यस् ।

**[ द्रेः ]** द्रि षष्ठी ङस् ।

**[ लुप् ]** लुप् प्रथमा सि ।

**[ शकः ]** शक । शकानां राष्ट्रस्य राजा, शकस्य राज्ञोऽपत्यं वा = शकः । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । अनेन लुप् ।

**[ यवनः ]** यवनानां राष्ट्रस्य राजा, यवनस्य राज्ञोऽपत्यं वा = यवनः ।

**[ जर्त्तः ]** जर्त्तानां राष्ट्रस्य राजा, जर्त्तस्य राज्ञोऽपत्यं वा = जर्त्तः ।

**[ कम्बोजः ]** कम्बोजानां राष्ट्रस्य राजा, कम्बोजस्य राज्ञोऽपत्यं वा = कम्बोजः ।

**[ चोलः ]** चोलानां राष्ट्रस्य राजा, चोलस्य राज्ञोऽपत्यं वा = चोलः । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । अनेन लुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ केरलः ]** 'कॄत् विक्षेपे' (१३३४) कॄ । किरन्ति सदाचारमिति केरलः । 'मुरलोरल-विरल-केरल-कपिञ्जल-कज्जलेज्जल-कोमल-भृमल-सिंहल-काहल-शूकल-पाकल-युगल-भगल-विदल-कुन्तलोत्पलादयः' (उणा० ४७४) केरलनिपातः । केरलानां राष्ट्रस्य राजा, केरलस्य राज्ञोऽपत्यं वा = केरलः ।

**[ आधारयः ]** आधार 'यांक् प्रापणे' (१०६२) या । आधारं यातीति । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । आधारयाणां राजा, आधारयस्य राज्ञोऽपत्यं वा = आधारयः । 'दु-नादि-कुर्वित्०' (६।१।११८) ञ्यप्र० । अनेन लुप् ।

**[ विधारयः ]** 'धृंग् धारणे' (८८७) धृ । धरन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । धारयतीति धारयः । 'साहि-साति-वेद्युदेजि-धारि-पारि-चेतेरनुपसर्गात्'

(५।१।५९) शप्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । विशिष्टा धारया येषु ते = विधारयाः । विधारयाणां राष्ट्रस्य राजा, विधारयस्य राज्ञोऽपत्यं वा = विधारयः ।

**[ उपधारयः ]** उपगता धारया यैः = उपधारयाः । उपधारयाणां राष्ट्रस्य राजा, उपधारयस्य राज्ञोऽपत्यं वा = उपधारयः ।

**[ अपधारयः ]** अपगता धारयात् = अपधारयः । अपधारयाणां राष्ट्रस्य राजा, अपधारयस्य राज्ञोऽपत्यं वा = अपधारयः ।

**[ मुरलः ]** मुरलानां राष्ट्रस्य राजा, मुरलस्य राज्ञोऽपत्यं वा = मुरलः ।

**[ खसः ]** ख 'षोंच् अन्तकर्मणि' (११५०) षो । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सो । 'आत् सन्ध्यक्षरस्य' (४।२।१) सा । खं स्यति = खसः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । यद्वा खेन स्यति = खसः । खसानां राष्ट्रस्य राजा, खसस्य राज्ञोऽपत्यं वा = खसः । सर्वत्र 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । अनेन लुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ॥छ॥

**कुन्त्यवन्तेः स्त्रियाम्** ॥ ६।१।१२१ ॥

**[ कुन्त्यवन्तेः ]** कुन्तिश्च अवन्तिश्च = कुन्त्यवन्ति, तस्मात् ।

**[ स्त्रियाम् ]** स्त्री सप्तमी ङि । 'स्त्रीदूतः' (१।४।२९) ङि० → दाम्० → आम्० । 'स्त्रियाः' (२।१।५४) इय् ।

**[ कुन्ती ]** कुन्ति । कुन्तेरपत्यं स्त्री = कुन्ती । 'दु-नादि-कुर्वित्०' (६।१।११८) ञ्यप्र० । अनेन लुप् । 'नुर्जातेः' (२।४।७२) ङी । 'समानानां०' (१।२।१) दीर्घः ।

**[ अवन्ती ]** अवन्ति । अवन्तेरपत्यं स्त्री = अवन्ती । 'दु-नादि-कुर्वित्०' (६।१।११८) ञ्यप्र० । अनेन लुप् । 'नुर्जातेः' (२।४।७२) ङी ।

**[ कौन्त्यः ]** कुन्तेरपत्यं = कौन्त्यः । 'दु - नादि - कुर्वित्०' (६।१।११८) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ आवन्त्यः ]** अवन्तेरपत्यम् = आवन्त्यः । 'दु - नादि - कुर्वित्०' (६।१।११८) ञ्यप्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ कौन्ती ]** कौन्तीति कुन्तेरपत्यानि बहवो माणवकाः । 'दु - नादि - कुर्वित्०' (६।१।६८) ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२८) लुप् । ते एव शस्त्रजीविसङ्घः स्त्रीत्वविशिष्टो विवक्षितः । 'पूगादमुख्यकाञ्ञ्यो द्रिः' (७।३।६०) इत्यधिकारे 'शस्त्रजीविसङ्घाञ्ञ्यड् वा' (७।३।६२) ञ्यट्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् । ततो 'अणञेयेकण् - नञ् - स्नञ् - टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जानात् तद्धितस्य' (२।४।८८) यलुक् । यद्वा कुन्तेरपत्यं बहवो माणवकास्ते शस्त्रजीविसङ्घः स्त्रीत्वविशिष्टो विवक्षितः । 'दु - नादि - कुर्वित्०' (६।१।११८) ञ्यप्र० । अनेन लुप् । 'नुर्जातेः' (२।४।७२) ङी । ततः 'शस्त्रजीविसङ्घाञ्ञ्यड् वा' (७।३।६२) ञ्यट्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः । 'वृद्धिः स्वरेः' (७।४।१) । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् ॥छ॥

## कुरोर्वा ॥ ६।१।१२२ ॥

**[ कुरोः ]** कुरु पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ कुरूः,कौरव्यायणी ]** कुरु । कुरोरपत्यं स्त्री । 'दु - नादि - कुर्वित्०' (६।१।११८) ञ्यप्र० । अनेन लुप् । 'उतोऽप्राणिनश्चाऽयु - रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ्प्र० → ऊ । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । कुरूणां राष्ट्रस्य राज्ञी, कुरोः राज्ञोऽपत्यं स्त्री वा = कौरव्यायणी । 'दु - नादि - कुर्वित्०' (६।१।११८) ञ्यप्र० → य । यत्र न लुप् तत्र 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'कौरव्य - माण्डूका - ऽऽसुरेः' (२।४।७०) ङी० - डायन्० → आयन्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ॥छ॥

## द्रेरञणोऽप्राच्य-भर्गादेः ॥ ६।१।१२३ ॥

**[ द्रेः ]** द्रि षष्ठी ङस् ।

**[ अञणः ]** अञ् च अण् च = अञण्, तस्य ।

**[ अप्राच्यभर्गादेः ]** प्राच्याश्च भर्गादयश्च = प्राच्यभर्गादि, न प्राच्यभर्गादि = अप्राच्यभर्गादि, तस्मात् ।

卐**[ सूरसेनी ]** सूरसेन । सूराः सेना यस्य सः = सूरसेनः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । सूरसेनस्याऽपत्यं स्त्री = सूरसेनी । 'राष्ट्र-क्षत्रियात्०' (६।१।११४) अञ्प्र० । अनेन लुप् । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । 'अस्य ङ्यां०' (२।४।८६) अलुक् ।

**[ अपाच्या ]** 'अञ्चूग् गतौ च' (८९०) अञ्च्, अपपूर्व० । अपाञ्चतीति अपाच्(क्) । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अपाचि भवः = अपाच्यः । 'द्यु-प्रागपागुदक्-प्रतीचो यः' (६।३।८) यप्र० । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य अकारस्य दीर्घः । अपाच्यस्य राज्ञोऽपत्यं स्त्री । 'राष्ट्र-क्षत्रियात् सरूपाद्०' (६।१।११४) अञ्प्र० । अनेन लुप् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ मद्री ]** मद्राणां राष्ट्रस्य राज्ञी = मद्री । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । अनेन लुप् । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । ('जाते०' (२।४।५४) ङी) ।

**[ दरत् ]** दरदानां(दां) राष्ट्रस्य राजा, दरदस्य(दा) राज्ञोऽपत्यं वा = दरदः । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । अनेन लुप् ।

**[ मत्सी ]** मत्स्य । मत्स्यस्यापत्यं स्त्री = मत्सी । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । अनेन लुप् । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'मत्स्यस्य यः' (२।४।८७) यलोपः ।

**[ औत्सी ]** उत्स । उत्सस्यापत्यं स्त्री । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

**[ औपगवी ]** उपगोरपत्यं स्त्री = औपगवी । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

---

卐 बृहद्वृत्तौ - शूरसेनी ।

द्रावनुवर्त्तमाने पुनर्द्रिग्रहणं भिन्नप्रकरणस्यापि द्रेर्लुबर्थम् । यथा–

**[ पर्शूः ]** पर्शु । पर्शोरपत्यं बहवो माणवकाः । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । 'शकादिभ्यो द्रेर्लुप्' (६।१।१२०) अण्लुप् । ते एव शस्त्रजीव(वि)सङ्घः स्त्रीत्वविशिष्टो विवक्षितः । 'पर्श्वादिरण्' (७।३।६६) अण्प्र० । अनेन लुप् । 'उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ् । 'समानानां तेन०' (१।२।१) दीर्घः ।

**[ रक्षाः ]** रक्षस् । रक्षसोऽपत्यं बहवो माणवकाः । 'पुरु - मगध - कलिङ्ग०' (६।१।११६) अण्प्र० । 'शकादिभ्यो द्रेर्लुप्' (६।१।१२०) अण्लुप् । ते एव शस्त्रभाव(जीवि)सङ्घः स्त्रीत्वविशिष्टो विवक्षितः । 'पर्श्वादिरण्' (७।३।६६) अण्प्र० → अ । अनेन लुप् । प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ असुरी ]** असुरस्यापत्यं बहवो माणवकाः । 'पुरु - मगध - कलिङ्ग०' (६।१।११६) अण्प्र० । 'शकादिभ्यो द्रेर्लुप्' (६।१।१२०) अण्लुप् । ते एव शस्त्रजीव(वि)सङ्घः स्त्रीत्वविशिष्टो विवक्षितः । 'पर्श्वादिरण्'(७।३।६६) अण्प्र० । अनेन लुप् । 'जातेरयान्त०' (२।४।५४) ङीप्र० → ई । 'अस्य ङ्यां लुक् (२।४।८६) अलुक् ।

**[ औदुम्बरी ]** उदुम्बराणां राष्ट्रस्य राज्ञी । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'इञ इतः' (२।४।७१) ङी । उदुम्बरस्य राज्ञोऽपत्यं स्त्री । 'साल्वांश - प्रत्यग्रथ - कलकूटाश्मकादिञ्' (६।१।११७) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'नुर्जातेः' (२।४।७२) ङी । 'समानानां०' (१।२।१) दीर्घः ।

**[ पाञ्चाली ]** पञ्चाल । पञ्चालस्य राज्ञोऽपत्यं स्त्री = पाञ्चाली । 'राष्ट्र - क्षत्रियात्०' (६।१।११४) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैदेही ]** विदेह । विदेहस्य राज्ञोऽपत्यं स्त्री = वैदेही । 'राष्ट्र - क्षत्रियात्०' (६।१।११४) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पैप्पली ]** पिप्पल । पिप्पलस्य राज्ञोऽपत्यं स्त्री = पैप्पली । 'राष्ट्र - क्षत्रियात्०' (६।१।११४) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मागधी ]** मगधस्य राज्ञोऽपत्यं स्त्री = मागधी । 'पुरु - मगध - कलिङ्ग०' (६।१।११६) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य०' (२।४।८६) अलुक् ।

**[ कालिङ्गी ]** कलिङ्ग । कलिङ्गस्य राज्ञोऽपत्यं स्त्री = कालिङ्गी । 'पुरु - मगध - कलिङ्ग०' (६।१।११६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैदर्भी ]** विदर्भस्य राज्ञोऽपत्यं स्त्री = वैदर्भी । 'राष्ट्र - क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आङ्गी ]** अङ्गस्य राज्ञोऽपत्यं स्त्री = आङ्गी ।

**[ वाङ्गी ]** वङ्गस्य राज्ञोऽपत्यं स्त्री = वाङ्गी ।

**[ सौह्मी ]** सुह्मस्य राज्ञोऽपत्यं स्त्री = सौह्मी ।

**[ पौण्ड्री ]** पुण्ड्रस्य राज्ञोऽपत्यं स्त्री = पौण्ड्री ।

**[ सौरमसी ]** सूरमसस्य राज्ञोऽपत्यं स्त्री = सौरमसी । सर्वत्र 'पुरु - मगध - कलिङ्ग - सूरमस - द्विस्वरादण्' (६।१।११६) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक । 'अणञेयेकण् - नञ्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

प(पा)ञ्चालादयः प्राच्या राष्ट्रसरूपा क्षत्रियाः । भर्गादिः -

**[ भार्गी ]** भर्गाणां राष्ट्रस्य राज्ञी, भर्गस्य राज्ञोऽपत्यं वा स्त्री = भार्गी ।

**[ कारूपी ]** करूपाणां राष्ट्रस्य राज्ञी, करूपस्य राज्ञोऽपत्यं वा स्त्री । 'राष्ट्र - क्षत्रियात् सरूपाद्०' (६।१।११४) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'नुर्जातेः' (२।४।७२) ङी ।

**[ यौधेयी ]** युधा । युधाया अपत्यं = यौधेयः । 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । ते एव शस्त्रजीव(वि)सङ्घः स्त्रीत्वविशिष्टो विवक्षितः । यौधेयादेरञ्' (७।३।६५) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

भरतोशीनरशब्दौ उत्सादिषु पठ्येते , तयोरिहोपादानात् सत्यप्यणपवादे चेत्यस्मिन् उत्साद्यञं बाधित्वा द्रिसंज्ञक एवाञ् भवतीति ज्ञाप्यते, तेन -

**[ भरताः ]** भरतानां राष्ट्रस्य राजानः = भरताः ।

**[ उशीनराः ]** उशीनराणां राष्ट्रस्य राजानः = उशीनराः । 'राष्ट्र - क्षत्रियात्०' (६।१।११४) अञ्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् । प्र० जस् ।

उत्साद्यञस्तु द्रिसंज्ञाया अभावान्न स्यात् । नापि 'यञञोऽश्यापर्णान्त - गोपवनादेः' (६।१।१२६) इत्यादिना प्राप्तिः , राज्ञामगोत्रत्वात् ॥छ॥

## बहुष्वस्त्रियाम् ॥ ६।१।१२४ ॥

**[ बहुषु ]** बहु सप्तमी सुप् ।

**[ अस्त्रियाम् ]** न स्त्री = अस्त्री, तस्याम् । 'नञत्' (३।२।१२५) न० → अ० । 'स्त्रीदूतः' (१।४।२९) ङि० → दाम्० → आम्० । 'स्त्रियाः' (२।१।५४) इय् ।

**[ पञ्चालाः ]** पञ्चालानां राष्ट्रस्य राजानः, पञ्चालस्य राज्ञोऽपत्यानि वा = पञ्चालाः । 'राष्ट्र - क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । अनेन अञ्लुप् । प्र० जस् ।

**[ पुरवः ]** पुरूणां राष्ट्रस्य राजानः, पुरो राज्ञोऽपत्यानि वा = पुरवः । 'पुरु - मगध - कलिङ्ग - सूरमस - द्विस्वरादण्' (६।१।११६) अण्प्र० । अनेन अण्लुप् । प्र० जस् ।

**[ अङ्गाः ]** अङ्गानां राष्ट्रस्य राजानः, अङ्गस्य राज्ञोऽपत्यानि वा = अङ्गाः । 'पुरु - मगध - कलिङ्ग - सूरमस - द्विस्वरादण्' (६।१।११६) अण्प्र० । अनेन अण्लुप् । प्र० जस् ।

**[ लौहध्वज्यः ]** लोहध्वज । लोहध्वज एव = लौहध्वज्यः । 'पूगादमुख्यकाञ्ज्यो द्रिः' (७।३।६०) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ लौहध्वज्यौ ]** लोहध्वजावेव = लौहध्वज्यौ । 'पूगादमुख्यकाञ्ज्यो द्रिः' (७।३।६०) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औ ।

**[ लोहध्वजाः ]** लोहध्वजा एव = लोहध्वजाः । 'पूगादमुख्यकाञ्ज्यो द्रिः' (७।३।६०) ञ्यप्र० → य । अनेन ञ्यलुप् । प्र० जस् ।

**[ पञ्चालनिवासः ]** पञ्चालस्य राज्ञोऽपत्यानि = पञ्चालाः , तेषाम् । 'राष्ट्र - क्षत्रियात्०' (६।१।११४) अञ्प्र० । अनेन अञ्लुप् । पञ्चालानां निवासः = पञ्चालनिवासः ।

**[ प्रियवङ्गः ]** वङ्ग । वङ्गस्य राज्ञोऽपत्यानि = वङ्गाः । 'पुरु - मगध०' (६।१।११६) अण्प्र० । अनेन अण्लुप् । प्रिया वङ्गा यस्य सः = प्रियवङ्गः ।

**[ अत्यङ्गः ]** अङ्गानतिक्रान्तः ।

बहुषु वर्त्तमानोऽञ्प्रत्ययान्तः पञ्चालशब्दः ज्ञातव्यः -

**[ पञ्चालमयम् ]** पञ्चालेभ्य आगतं = पञ्चालमयम् । 'नृ - हेतुभ्यो रूप्य - मयटौ वा' (६।३।१५६) मयट्प्र० → मय । सि - अम् ।

**[ पञ्चालरूप्यम् ]** पञ्चालेभ्य आगतं = पञ्चालरूप्यम् । 'नृ - हेतुभ्यो०' (६।३।१५६) रूप्यप्र० । सि - अम् ।

**[ लोहध्वजमयम् ]** लोहध्वजा एव = लोहध्वजाः । 'पूगादमुख्यकाञ्ज्यो द्रिः' (७।३।६०) ञ्यप्र० । अनेन ञ्यलुप् । लोहध्वजेभ्य आगतं = लोहध्वजमयम् । 'नृ - हेतुभ्यो रूप्य - मयटौ वा' (६।३।१५६) मयट्प्र० → मय । सि - अम् ।

**[ लोहध्वजरूप्यम् ]** लोहध्वजेभ्य आगतं = लोहध्वजरूप्यम् । 'नृ - हेतुभ्यो रूप्य०' (६।३।१५६) रूप्यप्र० । सि - अम् । इत्यादौ अनुक्रमेण अञ् आम् निवास इत्यादि स्थिते अन्तरङ्गानपि विधीन् बहिरङ्गा लुग्(प्) बाधते इति बहुवचनस्य लुपि द्रेर्लुप् न स्यात् । यदि बहुवचनं निमित्तं तदा द्रेर्लुप् स्यात्, परं अत्र बहुवचनं निमित्तं ज्ञेयम् -

**[ पाञ्चालः ]** पञ्चालस्य राज्ञोऽपत्यं = पाञ्चालः । 'राष्ट्र - क्षत्रियात्०' (६।१।११४) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ लौहध्वज्यः ]** लोहध्वज एव = लौहध्वज्यः । 'पूगादमुख्यकाञ्ज्यो द्रिः' (७।३।६०) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रियवाङ्गाः ]** वङ्गस्य राज्ञोऽपत्यं = वाङ्गः । 'पुरु - मगध०' (६।१।११६) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रियो वाङ्गो येषां ते = प्रियवाङ्गाः इत्यत्र न द्र्यन्तं बहुषु किन्तु समास इति लुप् न भवति ।

**[ पाञ्चाल्यः ]** पञ्चालस्यापत्यानि स्त्रियः = पाञ्चाल्यः । 'राष्ट्र - क्षत्रियात्०' (६।१।११४) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । प्रथमा जस् ।

**[ लौहध्वज्याः स्त्रियः ]** लोहध्वज एव स्त्रीविशिष्टाः सङ्घाः = लौहध्वज्याः । 'पूगादमु०' (७।३।६०) ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा जस् ।

**[ पञ्चपाञ्चालः ]** पञ्चभिः पाञ्चालीभिः क्रीतः = पञ्चपाञ्चालः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इकण्लुप् । 'क्यङ् - मानि - पित्तद्धिते' (३।२।५०) पुवंद्भावः - ङीनिवृत्तिरित्यर्थः ॥छ॥

**यस्कादेर्गोत्रे** ॥ ६।१।१२५ ॥

**[ यस्कादेः ]** यस्क आदिर्यस्य सः = यस्कादिः , तस्मात् ।

**[ गोत्रे ]** गोत्र सप्तमी ङि ।

**[ यास्कः, यास्कौ, यस्काः ]** यस्क । यस्कस्यापत्यं = यास्कः । यस्कस्यापत्ये वृद्धे = यास्कौ । यस्कस्यापत्यानि वृद्धानि = यस्काः । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यत्र जस् तत्र अनेन अण्लुप् ।

**[ लाह्यः, लाह्यौ, लह्याः ]** लहिः सौत्रो धातुः । लह्यते = लह्यः । 'शिक्यास्याढ्य - मध्य - विन्ध्य - धिष्ण्याघ्न्य - हर्म्य - सत्य - नित्यादयः' (उणा० ३६४) यप्र० । लह्यस्यापत्यं = लाह्यः । लह्यस्यापत्ये = लाह्यौ । लह्यस्यापत्यानि = लह्याः । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अनेन यत्र जस् तत्र अण्लुप् ।

**[ औपगवः, औपगवौ, औपगवाः ]** उपगोरपत्यम् = औपगवः । उपगोरपत्ये = औपगवौ । उपगोरपत्यानि = औपगवाः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि - औ - जस् ।

**[ यास्कायनयः ]** यस्कस्यापत्यं वृद्धं = यास्कः । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यास्कस्यापत्यानि युवानः । शिवाद्यणन्तत्वात् 'द्विस्वरादणः' (६।१।१०९) आयनिञ्प्र० → आयनि । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ लाह्यायनयः ]** लह्यस्यापत्यं = लाह्यः । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । लाह्यस्यापत्यानि युवानः । 'द्विस्वरादणः' (६।१।१०९) आयनिञ्प्र० → आयनि । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ यास्काश्छात्राः ]** यस्कस्य इमे = यास्काः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । छात्र प्र० जस् ।

**[ यस्काः ]** यस्कस्यापत्यानि = यस्काः । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । अनेन अण्लुप् । अण्प्रत्ययस्य अलोपे तु तत्प्रतिकृतयो यास्का इत्यत्र गोत्रे उत्पन्नस्यापि प्रत्ययस्यासांप्रतं न गोत्रे वर्त्तमानः किन्तु प्रतिकृतिषु वर्त्तमानं इति लुप् न भवति । अत्र यदि गोत्रे उत्पन्नस्य प्रत्ययस्य लुबिति व्याख्यायते तदाऽत्रापि प्राप्नोति गोत्रे प्रत्ययस्योत्पन्नत्वात्, न त्वेवं व्याख्यायतेऽपि तु प्रत्ययान्तस्य गोत्रे बहुषु वर्तमानस्येति, ततश्च नेहं प्रत्ययान्तं गोत्रबहुत्वे, किं तर्हि प्रकृतिबहुत्व इति ॥छा॥

**यञञोऽश्यापर्णान्त - गोपवनादेः** ॥ ६।१।१२६ ॥

**[ यञञः ]** यञ् च अञ् च = यञञ् , तस्य ।

**[ अश्यापर्णान्तगोपवनादेः ]** श्यापर्णो अन्ते यस्य सः = श्यापर्णान्तः । गोपवन आदिर्यस्य सः = गोपवनादिः । श्यापर्णान्तश्चासौ गोपवनादिश्च = श्यापर्णान्तगोपवनादि, न श्यापर्णान्तगोपवनादि = अश्यापर्णान्तगोपवनादि, तस्मात् ।

गोपवनादिर्विदाद्यन्तर्गणः ।

**[ गार्ग्यः, गार्ग्यौ, गर्गाः ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । गर्गस्यापत्ये वृद्धे = गार्ग्यौ । गर्गस्यापत्यानि वृद्धानि = गर्गाः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - औ । यत्र बहुवचनं जस् दृश्यते तत्र अनेन यञ्लोपः । प्र० जस् ।

**[ वात्स्यः, वात्स्यौ, वत्साः ]** वत्स । वत्सस्यापत्यं वृद्धं = वात्स्यः । वत्सस्यापत्ये वृद्धे = वात्स्यौ । वत्सस्यापत्यानि वृद्धानि = वत्साः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - औ । बहुत्वे अनेन यञ्लुप् । प्र० जस् ।

**[ वैदः, वैदौ, विदाः ]** विदस्यापत्यं वृद्धं = वैदः । विदस्यापत्ये वृद्धे = वैदौ । विदस्यापत्यानि वृद्धानि = विदाः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - औ । बहुत्वे अनेन अञ्लुप् । प्र० जस् ।

**[ और्वः, और्वौ, उर्वाः ]** उर्व । उर्वस्यापत्यं वृद्धम् = और्वः । उर्वस्यापत्ये वृद्धे = और्वौ । उर्वस्यापत्यानि वृद्धानि = उर्वाः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - औ । बहुत्वे अनेन अञ्लुप् । प्र० जस् ।

**[ गर्गमयम् ]** गर्ग । गर्गस्यापत्यानि वृद्धानि = गर्गाः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । अनेन यञ्लुप् । गर्गेभ्य आगतम् । 'नृ - हेतुभ्यो रूप्य - मयटौ वा' (६।३।१५६) मयट्प्र० → मय । सि - अम् ।

**[ गर्गरूप्यम् ]** गर्ग । गर्गस्यापत्यानि वृद्धानि = गर्गाः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । अनेन यञ्लुप् । गर्गेभ्य आगतम् । 'नृ - हेतुभ्यो रूप्य - मयटौ वा' (६।३।१५६) रूप्यप्र० । सि - अम् ।

**[ गौपवनाः ]** गोपवनस्यापत्यानि वृद्धानि = गौपवनाः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् ।

**[ शैग्रवाः ]** शिग्रु । शिग्रोरपत्यानि वृद्धानि = शैग्रवाः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्र० जस् ।

**[ बैन्दवाः ]** बिन्दु । बिन्दोरपत्यानि वृद्धानि । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अस्वयम्भुवोऽव् (७।४।७०) अव् । प्र० जस् ।

**[ ताजमाः ]** ताजम । ताजमस्यापत्यानि वृद्धानि । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् ।

**[ श्यामाकाः ]** श्यामाकस्यापत्यानि वृद्धानि = श्यामाकाः ।

**[ श्यापर्णाः ]** श्यापर्णस्यापत्यानि वृद्धानि = श्यापर्णाः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् ।

**[ माठराः ]** मठरस्यापत्यानि वृद्धानि । मतान्तरे 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् ।

**[ आश्वाः ]** अश्वस्यापत्यानि वृद्धानि । मतान्तरे 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् ।

**[ आवतानाः ]** अवतानस्यापत्यानि वृद्धानि । मतान्तरे 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् ।

**[ हारितः, हारितौ, हरिताः ]** हरितस्यापत्यं वृद्धं = हारितः । हरितस्यापत्ये वृद्धे = हारितौ । हरितस्यापत्यानि = हरिताः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । बहुत्वे अनेन अञ्लुप् । प्र० जस् ।

**[ धैनवः, धैनवौ, धेनवः ]** धेनु । धेनोरपत्यं वृद्धं = धैनवः । धेनोरपत्ये वृद्धे = धैनवौ । धेनोरपत्यानि = धेनवः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । यत्र जस् तत्र अनेन अञ्लुप् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । प्र० जस् ।

**[ गार्ग्यः ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैदः ]** विदस्यापत्यं वृद्धं = वैदः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ विदाः ]** वैद मण्ड्यते । वैदस्य वैदयोर्वाऽपत्यानि युवानः = विदाः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लुप् । अनेन अञ्प्रत्ययलुप् । प्र० जस् ।

**[ विदाः ]** विद । विदस्यापत्यानि वृद्धानि = विदाः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । अनेन अञ्लुप् ।

**[ वैदौ ]** विदानामपत्ये युवानौ = वैदो । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लुप । न च बहुषु इति लुप् न भवति । इञ्प्रत्ययविषयेऽप्यञो लुप् न भवति । 'न प्राग्जितीये स्वरे' (६।१।१३५) इति निषेधात् ।

**[ विदाः ]** विदस्यापत्यानि = विदाः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । अनेन अञ्लुप् । प्र० जस् ।

**[ विदाः ]** विदानामपत्यं युवानो माणवकाः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लुप् ततो 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । बहुत्वे अनेन अञ्लुप् । प्र० जस् ।

**[ गार्ग्यः स्त्रियः ]** गर्ग । गर्गस्यापत्यानि स्त्रियः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'यञो डायन् च वा' (२।४।६७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । प्र० जस् ।

**[ वैद्यः स्त्रियः ]** विदस्यापत्यानि वृद्धानि स्त्रियः = वैद्यः । 'विदादेर्वृद्धे' (६।४।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक् '(२।४।८६) अलुक् । प्र० जस् ।

**[ पञ्चगर्गः पटः ]** गर्गस्यापत्यानि वृद्धानि स्त्रियः = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'यञो डायन् च वा' (२।४।६७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । पञ्चभिर्गार्गीभिः क्रीतः = पञ्चगा(ग)र्गः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इकण्लुप् । 'क्यङ् - मानि - पित्तद्धिते' (३।२।५०) पुंवद्भावः - ङीनिवृत्तिरित्यर्थः । यञ् पुनरेवागतः सो यञ् अनेन लुप् ।

**[ दशगर्गः पटः ]** गर्गस्यापत्यानि वृद्धानि स्त्रियः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'यञो डायन्०' (२।४।६७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । दशभिर्गार्गीभिः क्रीतः = दशगा(ग)र्गः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इकण्लुप् । 'क्यङ् - मानि०' (३।२।५०) पुंवद्भावः - ङीनिवृत्तिरित्यर्थः । यञ् पुनरेवागतः सो यञ् अनेन लुप् ।

**[ औत्साच्छात्राः ]** उत्सस्य इमे छात्राः = औत्साच्छात्राः । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । छात्र प्र० जस् ।

**[ पौनर्भवाः ]** पुनर्भू । पुनर्भ्वा अपत्यानि अनन्तराणि = पौनर्भवाः । 'पुनर्भू - पुत्र - दुहितृ - ननान्दुरनन्तरेऽञ्' (६।१।३९) अञ्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्र० जस् ।

**[ पौत्राः ]** पुत्र । पुत्रस्यापत्यानि अनन्तराणि = पौत्राः । 'पुनर्भू - पुत्र०' (६।१।३९) अञ्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् ।

**[ दौहित्राः ]** दुहितृ । दुहितुरपत्यानि अनन्तराणि = दौहित्राः । 'पुनर्भू - पुत्र - दुहितृ०' ((६।१।३९) अञ्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'इवर्णादिरस्वे०' (१।२।२१) तृ० → त्र० । प्र० जस् ।

**[ नानान्द्राः ]** ननान्दृ । ननान्दुरपत्यानि अनन्तराणि = नानान्द्राः । 'पुनर्भू-पुत्र-दुहितृ-ननान्दु०' (६।१।३९) अञ्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आ । 'इवर्णादिरस्वे०' (१।२।२१) दृ० → द्र० । प्र० जस् ।

**[ पारशवाः ]** पर-स्त्री । परात् = परपुरुषाद्भिन्ना स्त्री = परस्त्री । परस्त्रिया अनन्तरापत्यानि = पारशवः(वाः) । 'परस्त्रियाः परशुश्चाऽसावर्ण्ये' (६।१।४०) अञ्प्र० - परस्त्रीशब्दस्य परशुदेशश्च । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा सि(जस्) । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ प्रियगार्ग्याः ]** प्रिय-गर्ग । गर्गस्यापत्यं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्यत्र स्त्रियश्चेत् गार्ग्यः' । 'यञो डायन् च वा' (२।४।६७) ङी । 'अस्य०' (२।४।८६) अलुक् । 'व्यञ्जनात्०' (२।४।८८) यलोपः । प्र० जस् । 'इवर्णादिरस्वे०' (१।२।२१) य० । सांप्रतं वाक्यम्-प्रियो गार्ग्यो गार्ग्यो वा येषां ते = प्रियगार्ग्याः । प्र० जस् । अत्र हि यञन्तस्य बहुविषयत्वात् लुप् प्राप्नोति ? नैवम् - न यञन्तं बहुषु, किं तर्हि समासः ? स च 'प्रत्ययः प्रकृत्यादेः' (७।४।११५) इति नियमात् यञन्तो न भवतीति लुप् न भवति ।

**[ प्रियगर्गाः ]** गर्गस्यापत्यानि वृद्धानि = गर्गाः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । अनेन यञ्लुप् । प्रिया गर्गा यस्य सः = प्रियगर्गः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

**कौण्डिन्या-ऽऽगस्त्ययोः कुण्डिना-ऽगस्ती च** ॥ ६।१।१२७ ॥

**[ कौण्डिन्याऽऽगस्त्ययोः ]** कौण्डिन्यश्च आगस्त्यश्च = कौण्डिन्याऽऽगस्त्यौ, तयोः = कौण्डिन्याऽऽगस्त्ययोः । षष्ठी ओस् ।

**[कुण्डिनाऽगस्ती]** कुण्डिनश्च अगस्तिश्च = कुण्डिनाऽगस्ती । प्रथमा औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) औ० → ई० ।

**[ च ]** च प्रथमा सि ।

**[ कौण्डिन्यः, कौण्डिन्यौ, कुण्डिनाः ]** कुण्ड । कुण्डमस्यास्ति । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी । कुण्डिन्या अपत्यानि वृद्धानि =

कुण्डिनाः । 'गर्गादिर्यञ्' (६।१।४२) यञ्प्र० → य । अत एव निर्देशात् 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) इत्यनेन पुंवद्भावाभावः । अन्यथा पुंवद्भावे सति ङीनिवृत्तौ यञि 'नोऽपदस्य तद्धिते' (७।४।६१) इत्यादिना इन्लोपे कौण्ड्य इति स्यात् । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । यत्र जस् दृश्यते तत्र अनेन यञ्लुप्-कुण्डिनी० → कुण्डिनदेशश्च । कुण्डिन्या अपत्यं वृद्धं = कौण्डिन्यः । कुण्डिन्या अपत्ये वृद्धे = कौण्डिन्यौ । एकवचने द्विवचने च अयं समासो ज्ञेयः ।

**[ आगस्त्यः, आगस्त्यौ, अगस्तयः ]** अग 'स्तम्भू सौत्रो धातुः' (१९८५) स्तम्भ् । अगं-पर्वतं स्तभ्नाति = अगस्त्यः । 'अग-पुलाभ्यां स्तम्भेर्डित्' (उणा० ३६३) डित् यप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अगस्त(स्त्य)स्यापत्यम् = आगस्त्यः । अगस्त(स्त्य)स्यापत्ये = आगस्त्यौ । अगस्त(स्त्य)स्यापत्यानि = अगस्तयः । अपत्ये 'ङसोऽपत्ये' (६।१।२८) अण्प्राप्तः, तद्बाधकः 'अत इञ्' (६।१।३१) इञ्, तस्यापि बाधकः 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण् आगच्छति अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ । यत्र जस् तत्र अनेन अण्लुप् - अगस्तिरादेशश्च । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ आगस्तीयाः ]** अगस्त(स्त्य)स्यापत्यानि । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अगस्तीनामिमे = आगस्तीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'सूर्या-ऽऽगस्त्ययोरीये च' (२।४।८९) यलुक् ।

कुण्डिनीशब्दे प्रत्ययलुके(पि) आदेशविधाने न कश्चिद्विशेषः । प्रत्ययान्तादेशे हि कुण्डिनशब्दात् अदुसंज्ञकात् 'तस्येदम्' (६।३।१६०) इत्यणा भवितव्यम् । प्रत्ययस्य तु लुपि आदेशविधाने 'न प्राग्जितीये स्वरे' (६।१।१३५) इति लुप्प्रतिषेधे सत्यामपि दुसंज्ञायामीयप्रत्ययापवादः ।

**[ कौण्डिन्यः स्त्रियः ]** कुण्डिन्या अपत्यानि स्त्रियः = कौण्डिन्यः । 'गर्गादिर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । 'यञो डायन्०' (२।४।६७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात्०' (२।४।८८) यलुक् । प्र० जस् । 'इवर्णादेरस्वे०' (१।२।२१) य० ।

**[ आगस्त्यः स्त्रियः ]** अगस्त्य । अगस्त्यस्यापत्यानि स्त्रियः = आगस्त्यः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'सूर्या-ऽऽगस्त्ययोरीये च' (२।४।८९) यलोपः । प्र० जस् । 'इवर्णादेरस्वे०' (१।२।२१) य० ॥छा॥

### भृग्वङ्गिरस्-कुत्स-वसिष्ठ-गोतमा-ऽत्रेः ॥ ६।१।१२८ ॥

**[ भृग्वङ्गिरस्कुत्सवसिष्ठगोतमाऽत्रेः ]** भृगुश्च अङ्गिराश्च कुत्सश्च वसिष्ठश्च गौ(गो)तमश्च अत्रिश्च = भृग्वङ्गिरस्कुत्सवसिष्ठगोतमाऽत्रि, तस्मात् ।

**[ भार्गवः, भार्गवौ, भृगवः ]** भृगु । भृगोरपत्यं = भार्गवः । भृगोरपत्ये = भार्गवौ । भृगोरपत्यानि = भृगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'ऋषि-वृष्ण्य०' (६।१।६१) अण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । यत्र जस् तत्र अनेन अण्लुप् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ अङ्गिरसः ]** अङ्गिरस् । अङ्गिरसोऽपत्यानि = अङ्गिरसः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० । अनेन अण्लुप् । प्र० जस् ।

**[ कुत्साः ]** कुत्सस्यापत्यानि = कुत्साः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० । अनेन अण्लुप् । प्र० जस् ।

**[ वसिष्ठाः ]** वसिष्ठस्यापत्यानि = वसिष्ठाः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० । अनेन अण्लुप् । प्र० जस् ।

**[ गोतमाः ]** गोतमस्यापत्यानि = गोतमाः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० । अनेन अण्लुप् । प्र० जस् ।

**[ अत्रयः ]** अत्रि । अत्रेरपत्यानि = अत्रयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० । अनेन एयण्लुप् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ भार्गव्यः स्त्रियः ]** भृगोरपत्यानि स्त्रियः = भार्गव्यः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'ऋषि-वृष्ण्य०' (६।१।६१) अण्प्र० । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी । प्र० जस् । 'इवर्णादेरस्वे०' (१।२।२१) य० ।

**[ आङ्गिरस्यः स्त्रियः ]** अङ्गिरसोऽपत्यानि स्त्रियः = आङ्गिरस्यः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'ऋषि-वृष्ण्य०' (६।१।६१) अण्प्र० । वृद्धिः । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी । प्र० जस् । 'इवर्णादेरस्वे०' (१।२।२१) य० ।

**[ आत्रेय्यः स्त्रियः ]** अत्रेरपत्यानि स्त्रियः = आत्रेय्यः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी । प्र० जस् । 'इवर्णादेरस्वे०' (१।२।२१) य० ।

**[ भार्गवः ]** भृगोरपत्यं = भार्गवः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० । शेषं पूर्ववत् ।

**[ आत्रेयः ]** अत्रेरपत्यम् = आत्रेयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ भार्गवाश्छात्राः ]** भृगोरिमे = भार्गवाः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्र० जस् ।

**[ भृगुकुलम्, भार्गवकुलम् ]** भृगु । भृगोरपत्यमपत्ये वा = भार्गवः - भार्गवौ । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० → अ । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । भार्गवस्य भार्गवयोर्वा कुलं = भृगुकुलम् - भार्गवकुलम् । 'द्व्येकेषु षष्ठ्यास्तत्पुरुषे यञादेर्वा' (६।१।१३४) विकल्पेन अण्लोपः । सि-अम् ॥छ॥

**प्राग्भरते बहुस्वरादिञः** ॥ ६।१।१२९ ॥

**[ प्राग्भरते ]** प्राक्(ङ्) च भरतश्च = प्राक्(ग्)भरतम्, तस्मिन् ।

**[ बहुस्वरात् ]** बहवः स्वरा यत्र तत् = बहुस्वरम्, तस्मात् ।

**[ इञः ]** इञ् षष्ठी ङस् ।

**[ क्षैरकलम्भिः, क्षैरकलम्भी, क्षीरकलम्भाः ]** क्षीरमिश्रं कं लम्भयति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लोपः । यद्वा **करम्भो दधिसक्तवः** (अमरकोषे-१८०२) ततः क्षीरप्रधानः करम्भः । ऋफिडात् 'ऋफिडादीनां डश्च लः' (२।३।१०४) लत्वम् । क्षीरं कमिव लम्भयति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । लभ्यं क्षीरं = क्षीरकम्, तत् लम्भयति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । क्षीरकलम्भस्यापत्यं-अपत्ये-अपत्यानि वा । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ । बहुवचने अनेन इञ्लुप् । प्र० जस् ।

**[ पान्नागारिः, पान्नागारी, पन्नागाराः ]** पन्नं-पतितमगारं-गृहं यस्य सः = पन्नागारः । पन्नागारस्यापत्यं-अपत्ये-अपत्यानि वा । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ । यत्र जस् तत्र अनेन इञ्लुप् । प्र० जस् ।

**[ मान्थरेषणिः, मान्थरेषणी, मन्थरेषणाः ]** मन्थरेषणस्यापत्यं-अपत्ये-अपत्यानि वा = मान्थरेषणिः, मान्थरेषणी, मन्थरेषणाः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'सि-औ । यत्र जस् तत्र अनेन इञ्लुप् । प्र० जस् ।

भरत-**[ यौधिष्ठिरिः, यौधिष्ठिरी, युधिष्ठिराः ]** युधिष्ठिरस्यापत्यं-अपत्ये-अपत्यानि वा = यौधिष्ठिरिः, यौधिष्ठिरी, युधिष्ठिराः । 'बाह्वादि०' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'सि-औ । यत्र जस् तत्र अनेन इञ्लुप् । प्र० जस् ।

**[ आर्जुनिः, आर्जुनी, अर्जुनाः ]** अर्जुन । अर्जुनस्यापत्यं-अपत्ये-अपत्यानि वा = आर्जुनिः, आर्जुनी, अर्जुनाः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'सि-औ । यत्र जस् तत्र अनेन इञ्लुप् । प्र० जस् ।

**[ औद्दालकिः, औद्दालकी, उद्दालकाः ]** उद्दालकस्यापत्यम् । उद्दालकस्यापत्ये । उद्दालकस्यापत्यानि वा । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ । यत्र जस् तत्र अनेन इञ्लुप् । प्र० जस् ।

**[ बालाकयः ]** बलाकाया अपत्यानि = बालाकयः । 'बाह्वादिभ्यो०' (६।१।३२) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ हास्तिदासयः ]** हस्तिदासस्यापत्यानि = हास्तिदासयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ तौल्वलयः ]** तुल्वलस्यापत्यानि = तौल्वलयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ तैल्वलयः ]** तिल्वलस्यापत्यानि = तैल्वलयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ तैल्वकयः ]** तिल्वकस्यापत्यानि = तैल्वकयः । 'अत इञ्' (६।१।३१) । इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ यौधिष्ठिरायणः पुत्रः ]** युधिष्ठिरस्यापत्यं = यौधिष्ठिरिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यौधिष्ठिरेरपत्यं = यौधिष्ठिरायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । पुत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र०, इत्यत्र 'प्राच्येजोऽतोल्वल्यादेः' (६।१।१४३) इति लुप् न भवति । प्राच्या भरता द्वेधा-वैश्या राजानश्च । ततो वैश्येषु वाच्येषु लुप् भवति, न राजसु । उदीच्यभरता राजान एवोच्यन्ते, तेषु प्राग्ग्रहणान्न लुप् ।

**[ मारसम्बन्धयः ]** 'मृंत् प्राणत्यागे' (१३३३) मृ । मरणं = मारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । सम् 'बन्धंश् बन्धने' (१५५२) बन्ध् । मारं सम्बध्नाति = मारसम्बन्धः ।

'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । मारसम्बन्धस्यापत्यानि = मारसम्बन्धयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ भागवित्तयः ]** भाग 'विद्लृंती लाभे' (१३२२) विद् । भागेन विद्यते-प्रतीयते स्म = भागवित्तः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'अघोषे०' (१।३।५०) द० → त० । भागवित्तस्यापत्यानि = भागवित्तयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ चैङ्कयः ]** चिङ्कस्य चिङ्काया वा अपत्यानि = चैङ्कयः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अ-आलुक् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ पौष्पयः ]** पुष्पस्य पुष्पाया वा अपत्यानि = पौष्पयः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अ-आलुक् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ काशयः ]** काशस्यापत्यानि = काशयः । 'बाह्वादि०' (६।१।३२) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ शा( सा )न्तनवाः ]** सान्तनु । सान्तनोरपत्यानि = सान्तनवाः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्र० जस् ।।छा।

## **वोपकादेः** ॥ ६।१।१३० ॥

**[ वा ]** वा प्रथमा सि ।

**[ उपकादेः ]** उपक आदिर्यस्य सः = उपकादिः, तस्मात् ।

**[ उपकाः, औपकायनाः ]** उपकस्यापत्यानि वृद्धानि = उपकाः - औपकायनाः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । प्रथमे अनेन विकल्पेन आयनण्लुप् । अन्यत्र वृद्धिः । प्र० जस् ।

**[ लमकाः, लामकायनाः ]** लमकस्यापत्यानि वृद्धानि = लमकाः - लामकायनाः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । प्रथमे अनेन विकल्पेन आयनण्लुप् । अन्यत्र वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् ।

**[ औपकायन्यः स्त्रियः ]** उपकस्यापत्यानि वृद्धानि स्त्रियः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'जातेरयान्त०' (२।४।५४) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । प्र० जस् । 'इवर्णादेरस्वे स्वरे०' (१।२।२१) य० ।

**[ पर्णक ]** पर्णकशब्दस्य ऋषिवचनस्य शिवादौ पाठात् क्रियावचनादिञेवेत्याह-अत एव पर्णानि करोतीति । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः । यद्वा 'पर्णण् हरितभावे' (१८७१) पर्ण् । 'चुरादिभ्यो०' (३।४।१७) णिच्प्र० । पर्णयतीति पर्णकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'णेरनिटि' (४।३।८३) णिच्लोपः ।।छा।

## **तिककितवाऽऽदौ द्वन्द्वे** ॥ ६।१।१३१ ॥

**[ तिककितवाऽऽदौ ]** तिककितव आदिर्यस्य सः = तिककितवाऽऽदिः, तस्मिन् ।

**[ द्वन्द्वे ]** द्वन्द्व सप्तमी ङि ।

**[ तिककितवाः ]** तिक । तिकस्यापत्यानि = तैकायनयः । 'तिकादेरायनिञ्' (६।१।१०७) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कितवस्यापत्यानि = कैतवायनयः । 'तिकादेरायनिञ्' (६।१।१०७) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तैकायनयश्च कैतवायनयश्च = तिककितवाः । अनेन द्वयोरायनिञोः लोपः ।

**[ उब्जककुभाः ]** उब्जस्यापत्यानि = औब्जयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (६।१।३१) वृ० औ । ककुभस्यापत्यानि = काकुभाः । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औब्जयश्च काकुभाश्च = उब्जककुभाः । अनेन इञ्-अणोर्लोपः । प्र० जस् ।

**[ उरशलङ्कटाः ]** उरशस्यापत्यानि = औरशायनयः । 'तिकादेरायनिञ्' (६।१।१०७) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । लङ्कटस्यापत्यानि = लाङ्कटयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औरशायनयश्च लाङ्कटयश्च = उरशलङ्कटाः । अनेन आयनिञ्-इञोर्लोपः । प्र० जस् ।

**[ अग्निवेशदशेरकाः ]** अग्निवेशस्यापत्यानि वृद्धानि । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'यञञोऽश्या०' (६।१।१२६) यञ्लुप् । दशेरकस्यापत्यानि = दाशेरकयः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । समाससाधनीकृताः । अग्निवेशाश्च दाशेरकयश्च = अग्निवेशदशेरकाः । अनेन इञ्लोपः । प्र० जस् ।

**[ शण्डिलकशकृत्स्नाः( साः ) ]** शण्डिलस्यापत्यानि = शण्डिलाः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'यञञोऽश्या०' (६।१।१२६) यञ्लुप् । प्र० जस् । कस(श) 'कृतैत् छेदने' (१३२५) कृत् । कशाः कृन्तति(न्ति) । 'ऋजि-रिषि-कुषि-कृति-व्रश्च्युन्दि-शृभ्यः कित्' (उणा० ५६७) कित् सप्र० । कस(श)कृत्सस्यापत्यानि = काशकृत्सयः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । शण्डिलाश्च काशकृत्सयश्च = शण्डिलकस(श)कृत्साः । अनेन इञ्लोपः । प्र० जस् ।

**[ उपकलमकाः ]** उपकस्यापत्यानि वृद्धानि = औपकायनाः । लमकस्यापत्यानि वृद्धानि = लामकायनाः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ-आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औपकायनाश्च लामकायनाश्च = उपकलमकाः । अनेन उभयत्र आयनण्लोपः । प्र० जस् ।

**[ भ्रष्ट्रककपिष्ठलाः ]** भ्रा(भ्र)ष्ट्रकस्यापत्यानि = भ्राष्ट्रकयः । कपिष्ठलस्यापत्यानि = कापिष्ठलयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । भ्राष्ट्रकयश्च कापिष्ठलयश्च = भ्रा(भ्र)ष्टककपिष्ठलाः । अनेन इञ्लुप् । प्र० जस् ।

**[ कृष्णाजिनकृष्णसुन्दराः ]** कृष्णाजिनस्यापत्यानि = कार्ष्णाजिनयः । कृष्णसुन्दरस्यापत्यानि = कार्ष्णसुन्दरयः । उभयत्र 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कार्ष्णाजिनयश्च कार्ष्णसुन्दरयश्च = कृष्णाजिनकृष्णसुन्दराः । अनेन इञ्लोपः । प्र० जस् ।

**[ वङ्खरभण्डीरथाः ]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) बण (२६३) - 'भण शब्दे' (२६४) भण् । भणति यदपि तदपि भण्डी । 'पञ्चमात् डः' (उणा० १६८) डप्र० । तद्वत् रथो यस्य सः = भण्डीरथः । वङ्खरस्यापत्यानि = वाङ्खरयः । भण्डीरथस्यापत्यानि = भाण्डीरथयः । 'अत इञ्' (६।१।३१)

इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । वाङ्खरयश्च भाण्डीरथयश्च = वङ्खरभण्डीरथाः । अनेन इञ्लुप् । प्र० जस् ।

**[ पहकनरकाः ]** पहकस्यापत्यानि = पाहकयः । नरकस्यापत्यानि = नारकयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । पाहकयश्च नारकयश्च = पहकनरकाः । अनेन इञ्लोपः । प्र० जस् ।

**[ वकनखस्वगुदपरिणद्धाः ]** वकनखस्यापत्यानि = वाकनखयः । स्वगुदपरिणद्धस्यापत्यानि = स्वागुदपारिणद्धयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 卐वाकनखयश्च स्वागुदप(पा)-रिणद्धयश्च = वकनखस्वगुदपरिणद्धाः । अनेन इञ्लोपः । प्र० जस् ।

**[ लङ्कशान्तमुखाः ]** लङ्कस्यापत्यानि = लाङ्कयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शान्तमुखस्यापत्यानि = शान्तमुखयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । लाङ्कयश्च शान्तमुखयश्च = लङ्कशान्तमुखाः । अनेन इञ्लोपः । प्र० जस् ।

इति तिककितवादिः ॥छ॥

## द्व्यादेस्तथा ॥ ६।१।१३२ ॥

**[ द्व्यादेः ]** द्विरादिर्यस्य सः = द्व्यादिः, तस्य ।

**[ तथा ]** तथा प्रथमा सि ।

'बहुष्वस्त्रियाम्' (६।१।१२४) इत्यारभ्य ये केचन लोपनीयाः प्रत्ययास्ते द्व्यादयो ज्ञेयाः ।

**[ वृकलोहध्वजकुण्डीवृशाः ]** वृक एव = वार्केण्यः । 'वृकाट्टेण्यण्' (७।३।६४) टेण्यण्प्र० → एण्य । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । लोहध्वज एव = लौहध्वज्यः । 'पूगादमुख्यकाञ्ञ्यो द्रिः' (७।३।६०) ञ्यप्र० → य । वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । कुण्डीवृस(श) एव = कौण्डीवृस्यः(श्यः) । 'वाहीकेष्वब्राह्मण-राजन्येभ्यः' (७।३।६३) ञ्यट्प्र० → य । वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । वार्केण्यश्च लौहध्वज्यश्च कौण्डीवृश्यश्च = वृकलोहध्वजकुण्डीवृशाः । अनेन त्रयाणां प्रत्ययानां लुप् । प्र० जस् ।

**[ अङ्गवङ्गसुह्माः ]** अङ्गानां राजा, अङ्गस्य राज्ञोऽपत्यं वा = आङ्गः । वङ्गस्यापत्यं-वङ्गानां राजा वा । सुह्मानां राष्ट्रस्य राजा, सुह्मस्य राज्ञोऽपत्यं वा । 'पुरु-मगध-कलिङ्ग-सूरमस-द्विस्वरादण्' (६।१।११६) अण्प्र० → अ । वृद्धिः आ-औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । आङ्गश्च वाङ्गश्च सौह्मश्च = अङ्गवङ्गसुह्माः । अनेन अण्लोपः । प्र० जस्।

**[ गर्गवत्सवाजाः ]** गर्गस्य वत्सस्य वाजस्य वाऽपत्यं = गार्ग्यः-वात्स्यः-वाज्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । गार्ग्यश्च वात्स्यश्च वाज्यश्च = गर्गवत्सवाजाः । अनेन यञ्लोपः । प्र० जस् ।

**[ विदगर्गयस्काः ]** विदस्यापत्यं वृद्धम् । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । गार्ग्यः पूर्ववत् । यस्कस्यापत्यं = यास्कः । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । वैदश्च गार्ग्यश्च यास्कश्च = विदगर्गयस्काः । अनेन त्रयाणां प्रत्ययानां लुप् । प्र० जस् ।

---

卐 श० म० न्या० - वाकनखयश्च स्वागुदपारिणद्धयश्चेति - अत्र स्वमते द्विपदो द्वन्द्वोऽन्येषां मते त्रिपद इत्यग्रे उक्तम् । तथा च वाकनखयश्च स्वागुदपरिणद्धयश्चेति रूपेण विग्रह उचितः स्वागुदपरिणद्धय इति - उभयपदादिवृद्धियुक्तः पाठः प्रामादिको वाऽनुशतिकादित्वकल्पनया वेति न निश्चिनुमः । त्रिपदे द्वन्द्वे च न कोऽपि सन्देहः ।

**[ यास्कलाह्याश्छात्राः ]** यस्कस्य इमे छात्राः = यास्काः । लह्यस्य इमे छात्राः = लाह्याः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यास्काश्च लाह्याश्च = यास्कलाह्याः । प्र० जस् । अत्र अणो लुप् न भवति । 'यस्कोदेर्गोत्रे' (६।१।१२५) इत्यत्र गोत्रे उत्पन्नस्येति प्रत्ययस्य विशेषणात् ।

**[ गार्गीवत्सवाजाः ]** गर्गस्यापत्यं वृद्धं स्त्री = गार्गी । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'यञो डायन् च वा' (२।४।६७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । वत्सस्य वाजस्य वाऽपत्यम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । गार्गी च वात्स्यश्च वाज्यश्च = गार्गीवत्सवाजाः । अनेन वत्स-वाजयोरेव यञो लुप्, न गार्गी इत्यत्र, तत्रास्त्रियामिति प्रतिषेधात् ।

**[ शैग्रवगौपवनाः ]** शिग्रु । शिग्रोरपत्यं वृद्धं = शैग्रवः । गोपवनस्यापत्यं वृद्धं = गौपवनः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ-औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शैग्रवश्च गौपवनश्च = शैग्रवगौपवनाः । प्र० जस् । अत्र अश्यापर्णान्त-गोपवनादेरिति प्रतिषेधात् अञो लुप् न भवति ।

**[ बालाकिहास्तिदासयः ]** बलाकाया अपत्यं = बालाकिः । हस्तिदासस्यापत्यं = हास्तिदासिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आ-अलुक् । बालाकिश्च हास्तिदासिश्च = बालाकिहास्तिदासयः । प्र० जस् । अत्र प्राग्भरतेति वचनात् अप्राग्भरते न भवति ।

ह्यादिग्रहणमगोत्रेऽपि यथा स्यादित्येवमर्थम् । अबह्वर्थं वचनम् । पूर्वसूत्रेषु बहुत्वे उत्पन्नस्य प्रत्ययस्य लुब् भवति । अत्र तु द्वन्द्वश्चेद्बहुत्वे वर्त्तते तदा प्रत्ययस्यैकत्वेऽप्युत्पन्नस्य लुप् न भवतीत्यर्थः ॥छ॥

### वाऽन्येन ॥ ६।१।१३३ ॥

**[ वा ]** वा प्रथमा सि ।

**[ अन्येन ]** अन्य तृतीया टा ।

**[ अङ्गवङ्गदाक्षयः, आङ्गवाङ्गदाक्षयः ]** आङ्ग-वाङ्ग पूर्ववत् । दक्षस्यापत्यं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आङ्गश्च वाङ्गश्च दाक्षिश्च = अङ्गवङ्गदाक्षयः - आङ्गवाङ्गदाक्षयः । अनेन विकल्पेन अण्लोपः, न तु इञो द्रिसंज्ञाकरणाभावात् । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ गर्गवत्सौपगवाः, गार्ग्यवात्स्यौपगवाः ]** गार्ग्यश्च वात्स्यश्च औपगवश्च = गर्गवत्सौपगवाः - गार्ग्यवात्स्यौपगवाः । अनेन विकल्पेन यञ्लुप् । प्र० जस् ।

**[ भृगुवत्साग्रायणाः, भार्गववात्स्याग्रायणाः ]** भृगोरपत्यं = भार्गवः । भार्गवश्च वात्स्यश्च आग्रायणश्च = भृगुवत्साग्रायणाः - भार्गववात्स्याग्रायणाः । अनेन विकल्पेन अण्-यञ्लुप् । प्र० जस् ।

**[ गर्गकश्यपगालवाः, गार्ग्यकाश्यपगालवाः ]** कश्यपस्यापत्यं वृद्धं = काश्यपः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गलव । गलवस्यापत्यानि = गालवाः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यश्च काश्यपश्च गालवाश्च = गर्गकश्यपगालवाः - गार्ग्यकाश्यपगालवाः । अनेन यञ्-अञ्लुप् ।

पूर्वेण नित्यं प्राप्ते विकल्पार्थं वचनम् ॥छ॥

**द्व्येकेषु षष्ठ्यास्तत्पुरुषे यञादेर्वा** ॥ ६।१।१३४ ॥

**[ द्व्येकेषु ]** द्वौ च एकश्च = द्व्येके, तेषु = द्व्येकेषु ।

**[ षष्ठ्याः ]** षष्ठी षष्ठी ङस् ।

**[ तत्पुरुषे ]** स चासौ पुरुषश्च = तत्पुरुषः, तस्मिन् ।

**[ यञादेः ]** यञ् आदिर्यस्य सः = यञादिः, तस्य ।

**[ वा ]** वा प्रथमा सि ।

**[ गर्गकुलम्, गार्ग्यकुलम् ]** गर्गस्यापत्यं वृद्धं, गर्गस्यापत्ये वृद्धे वा । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यस्य गार्ग्ययोर्वा कुलं = गर्गकुलम्, गार्ग्यकुलम् । अनेन विकल्पेन यञ्लुप् ।

**[ विदकुलम्, वैदकुलम् ]** विदस्यापत्यं वृद्धं, विदस्यापत्ये वृद्धे वा । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वैदस्य वैदयोर्वा कुलं = विदकुलम् - वैदकुलम् । अनेन विकल्पेन अञ्लुप् ।

**[ अगस्तिकुलम्, आगस्त्यकुलम् ]** अगस्त्यस्यापत्यं-अपत्ये वा । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । आगस्त्यस्य आगस्त्ययोर्वा कुलमिति समासे सति 'कौण्डिन्या-ऽऽगस्त्ययोः कुण्डिनाऽगस्ती च' (६।१।१२७) इत्यणो लुप् - अगस्तिरादेशश्च ।

**[ भृगुकुलम्, भार्गवकुलम् ]** भृगोरपत्यं = भार्गवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'ऋषि-वृष्ण्य०' (६।१।६१) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । भार्गवस्य भार्गवयोर्वा कुलं = भृगुकुलम् - भार्गवकुलम् । अनेन वा अण्लुप् ।

**[ गर्गकुलम् ]** गर्गाणां कुलं = गर्गकुलम् ।

**[ गार्ग्यहितम् ]** गार्ग्याय गार्ग्याभ्यां वा हितं = गार्ग्यहितम् । सर्वत्र सि-अम् । 'समानादमोऽतः' (१।४।४६) अम्सम्बन्धिनोऽस्य लुक् ।

**[ अन्तर्गार्ग्यः ]** गार्गस्य(गार्ग्यस्य) गार्ग्ययोर्वा अन्तर्गतः = अन्तर्गार्ग्यः । 'प्रात्यव-परि-निरादयो गत-क्रान्त-क्रुष्ट-ग्लान-क्रान्ताद्यर्थाः प्रथमाद्यन्तैः' (३।१।४७) इत्यादिना बाहुलकात् समासः ।

**[ देवदत्तगार्ग्यः ]** देवदत्तस्य गार्ग्यः = देवदत्तगार्ग्यः ।

**[ देवदत्तगार्ग्यौ ]** देवदत्तस्य गार्ग्यौ = देवदत्तगार्ग्यौ ।

**[ उपगार्ग्यम् ]** गार्ग्यस्य समीपमुपगार्ग्यम् । सि-अम् ।

**[ आङ्गकुलम् ]** अङ्गानां राष्ट्रस्य राजा, अङ्गस्य राज्ञोऽपत्यं वा = आङ्गः । 'पुरु-मगध-कलिङ्ग-सूरमस०' (६।१।११६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आङ्गस्य कुलम् = आङ्गकुलम् । सि-अम् ।

**[ यास्ककुलम् ]** यस्कस्यापत्यं = यास्कः । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यास्कस्य कुलं = यास्ककुलम् । सि-अम् ॥छा॥

## न प्राग्जितीये स्वरे ॥ ६।१।१३५ ॥

**[ न ]** न प्रथमा सि ।

**[ प्राग्जितीये ]** जितात् प्राक् = प्राग्जितम्, तत्र भवः = प्राग्जितीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः, तस्मिन् ।

**[ स्वरे ]** स्वर सप्तमी ङि ।

**[ गार्गीयाः ]** गर्ग । गर्गस्यापत्यानि वृद्धानि = गर्गाः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गर्गाणामिमे छात्राः = गार्गीयाः । 'यञञोऽश्यापर्णान्त-गोपवनादेः' (६।१।१२६) इत्यादिना यञ्लुप्प्राप्ताऽनेन निषिध्यते । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलोपः । प्र० जस् । यदि अत्र इदमर्थविवक्षैव क्रियते तच्छात्रविवक्षा तदा 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) इत्यकञेव स्यात् ।

**[ वात्सीयाः ]** वत्सस्यापत्यानि वृद्धानि = वत्साः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वत्सानामिमे छात्राः = वात्सीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलोपः । प्र० जस् ।

**[ आत्रेयीयाः ]** अत्रि । अत्रेरपत्यानि । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । अत्रेया(अत्री)णामिमे छात्राः = आत्रेयीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । 'भृग्वङ्गिरस्-कुत्स-वसिष्ठ-गोतमा-ऽत्रेः' (६।१।१२८) इत्यनेन एयण्लोपप्राप्तावनेन प्रतिषिध्यते ।

**[ आगस्तीयाः ]** अगस्त्य । 卐अगस्त्यस्यापत्यानि । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अगस्तीनामिमे छात्राः = आगस्तीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । कौण्डिन्या-ऽऽगस्त्ययोः कुण्डिना-ऽगस्ती च' (६।१।१२७) इत्यादिना अण्लुप्प्राप्ताऽनेन निषेधः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'सूर्या-ऽऽगस्त्ययोरीये च' (२।४।८६) यलोपः ।

**[ खारपायणीयाः ]** खरपस्यापत्यानि = खारपायणः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । खरपायाणामिमे छात्राः = खारपायणीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'यस्कादेर्गोत्रे' (६।१।१२५) इत्यनेन आयनण्लुप्प्राप्ताऽनेन निषिध्यते ।

**[ हारितीयाः ]** हरितस्यापत्यानि वृद्धानि । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । हरितानामिमे छात्राः = हारितीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'यञञोऽश्यापर्णान्त-गोपवनादेः' (६।१।१२६) इत्यादिना अञ्लुप्प्राप्ताऽनेन निषिध्यते । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् सर्वत्र ।

**[ अत्रीयः ]** अत्रि । अत्रेरपत्यानि = अत्रेयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० । 'भृग्वङ्गिरस्-कुत्स-वसिष्ठ-गोतमा-ऽत्रेः' (६।१।१२८) इत्यादिना एयण्लोपः । अत्रिभ्यो हितः = अत्रीयः । 'तस्मै हिते' (७।१।३५) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

**[ अगस्तीयः ]** अगस्त्यस्यापत्यानि = अगस्तयः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० । 'कौण्डिन्या-ऽऽगस्त्ययोः कुण्डिना-ऽगस्ती च' (६।१।१२७) अण्लोपः-अगस्तिरादेशश्च । अगस्तिभ्यो हितः । 'तस्मै हिते' (७।१।३५) ईयप्र० । 'समानानां०' (१।२।१) दीर्घः ।

---

卐 मध्यमवृत्तौ - अगस्तेरपत्यानि ।

**[ गर्गीयः ]** गर्गस्यापत्यानि वृद्धानि = गर्गाः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'यञञोऽश्यापर्णान्त०' (६।१।१२६) यञ्लुप् । गर्गेभ्यो हितः = गा(ग)र्गीयः । 'तस्मै हिते' (७।१।३५) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वत्सीयः ]** वत्सस्यापत्यानि वृद्धानि = वत्साः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'यञञोऽश्यापर्णान्त०' (६।१।१२६) यञ्लुप् । वत्सेभ्यो हितः = वा(व)त्सीयः । 'तस्मै हिते' (७।१।३५) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वैदः, वैदौ ]** विदस्यापत्यानि वृद्धानि । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । 'यञञोऽश्यापर्णान्त०' (६।१।१२६) अञ्लुप् । विदानामपत्यं - अपत्ये युवा । यदि(दा) अञ् गच्छति तदा अञ्(इञ्) विषये भूतेऽनेन प्रतिषेधः । पुनरेव अञ् वर्त्तते - अप्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ विदाः ]** विदस्यापत्यानि वृद्धानि । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'यञञोऽश्यापर्णान्त०' (६।१।१२६) अञ्लुप् । विदानामपत्यानि = विदाः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लोपः ।

**अथेह कस्मान्न भवति** आशङ्का । उच्यते-प्रत्यासत्तेर्यस्य प्रत्ययस्य लुप् प्रतिषिध्यते तल्लोपिप्रत्ययान्तादेव विधीयमाने स्वरादौ प्रतिषेधः । अत्र तु द्वन्द्वात् विधीयते न तल्लोपिप्रत्ययान्तादिति प्रतिषेधो न भवति ।

**[ अत्रिभरद्वाजिका ]** अत्रि । अत्रेरपत्यानि वृद्धानि । 'इतोऽनिञः' (६।१।७२) एयण्प्र० । अत्रीणामपत्यानि युवानः । 'भृग्वङ्गिरस्-कुत्स-वसिष्ठ-गोतमा-ऽत्रेः' (६।१।१२८) एयण्लोपः - ततो द्वितीयवाक्यः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लुप् । अत्रीणां भरद्वाजानां च विवाहः = अत्रिभरद्वाजिका । 'विवाहे द्वन्द्वादकल्' (६।३।१६३) अकल्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ० । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ वसिष्ठकश्यपिका ]** वसिष्ठस्यापत्यानि । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० । 'भृग्वङ्गिरस्-कुत्स-वसिष्ठ-गोतमा-ऽत्रेः' (६।१।१२८) इत्यादिना अण्लुप् । कश्यपस्यापत्यानि वृद्धानि । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । 'यञञोऽश्यापर्णान्त०' (६।१।१२६) अञ्लुप् । कश्यपानामपत्यानि युवानः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लुप् । वसिष्ठानां कश्यपानां च विवाहः । 'विवाहे द्वन्द्वादकल्' (६।३।१६३) अकल्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ० । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ भृग्वङ्गिरसिका ]** भृगोरपत्यानि । अङ्गिरसोऽपत्यानि । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'भृग्वङ्गिरस्०' (६।१।१२८) इत्यादिना अण्लुप् । भृगूणां अङ्गिरसां च विवाहः । 'विवाहे द्वन्द्वादकल्' (६।३।१६३) अकल्प्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ० । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ कुत्सकुशिकिका ]** कुत्सस्यापत्यानि वृद्धानि । कुशिकस्यापत्यानि वृद्धानि । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । 'यञञोऽश्यापर्णान्त-गोपवनादेः' (६।१।१२६) अञ्लोपः । कुत्सानां कुशिकानां च विवाहः । 'विवाहे द्वन्द्वादकल्' (६।३।१६३) अकल्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ० । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ गर्गभार्गविका ]** गर्गस्यापत्यानि वृद्धानि । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'यञञोऽश्यापर्णान्त०' (६।१।१२६) यञ्लुप् । भृगोरपत्यानि वृद्धानि । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० । गर्गाणां वृद्धानां-भृगूणां वृद्धानां यूनां च विवाहः = गर्गभार्गविका । 'विवाहे द्वन्द्वादकल्' (६।३।१६३) अकल्प्र० → अक । 'भृग्वङ्गिरस्-कुत्स०' (६।१।१२८) अण्लोपप्राप्तिर्निषिध्यते 'गर्ग-भार्गविका' (६।१।१३६) इत्यनेन ।

गर्गभार्गविकाया अन्यत्र द्वन्द्वे वृद्धे यूनि वा प्रतिषेधो न भवति ।

**[ कौवलम् ]** कुवल 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । कुवल्याः फलं = कुवलम् । 'हेमादिभ्योऽञ्' (६।२।४५) अञ्प्र० । 'फले' (६।२।५८) अञ्लुप् । 'ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणी-सूच्योः' (२।४।९५) ङीनिवृत्तिः । कुवलस्य इदं = कौवलम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## गर्गभार्गविका ॥ ६।१।१३६ ॥

**[ गर्गभार्गविका ]** गर्गभार्गविका प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ गर्गभार्गविका ]** गर्गस्यापत्यानि वृद्धानि = गर्गाः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'यञञोऽश्यापर्णान्त०' (६।१।१२६) यञ्लोपः । भृगोरपत्यानि = भार्गवः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । गर्गाणां वृद्धानां - भृगूणां च वृद्धानां यूनां च विवाहः = गर्गभार्गविका । 'विवाहे द्वन्द्वादकल्' (६।३।१६३) अकल्प्र० → अक । अनेन 'भृग्वङ्गिर०' (६।१।१२८) इत्यस्याण्लोपप्राप्तिर्निषिध्यते निपातनात् । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ० ॥छ॥

## यूनि लुप् ॥ ६।१।१३७ ॥

**[ यूनि ]** युवन् सप्तमी ङि । 'श्वन्-युवन्-मघोनो ङी-स्याद्यघुट्स्वरे व उः' (२।१।१०६) व० → उ० । 'समानानां तेन०' (१।२।१) दीर्घः ।

**[ लुप् ]** लुप् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ पाण्टाहृताः ]** पण्ट 'हृंग् हरणे' (८८५) हृ, आङ्पूर्व० । पण्टेनाह्रियते स्म = पण्टाहृतः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । पण्टाहृतस्यापत्यं वृद्धं = पाण्टाहृतिः । 'अत इञ्' (६।१।३१) इञ्प्र० । पाण्टाहृतेरपत्यं युवा सौवीरगोत्रः । 'पाण्टाहृति-मिमताण्णश्च' (६।१।१०४) णप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । पाण्टाहृतस्य इमे छात्राः = पाण्टाहृताः । 'दोरीयः' (६।३।३२) इत्यस्य विषये 'वृद्धेञः' (६।३।२८) इति अञ्प्र० । अनेन णलोपः । प्र० जस् ।

**[ भागवित्ताः ]** भगवित्तस्यापत्यं = भागवित्तिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । भागवित्तेरपत्यं युवा = भागवित्तिकः । 'भागवित्ति-तार्णविन्दवाऽऽकशापेयान्निन्दायामिकण् वा' (६।१।१०५) इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । भागवित्ताः । 'वृद्धेञः' (६।३।२८) अञ्प्र० । अनेन इकण्लोपः । प्र० जस् ।

**[ वार्ष्यायणीयाः ]** वृष । वृषस्यापत्यं = वार्ष्यायणिः । 'दगु-कोशल-कर्मार-च्छाग-वृषाद् यादिः' (६।१।१०८) यकारादिरायनिञ्प्र० → यायनि । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आर् । वार्ष्यायणेरपत्यं युवा =

वार्ष्यायणीयः । 'सौयामायनि-यामुन्दायनि-वार्ष्यायणेरीयश्च वा' (६।१।१०६) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । वार्ष्यायणीयस्य इमे छात्राः । अनेन ईयलुप् । 'दोरीयः' (६।३।३२) ईयप्र० । प्र० जस् ।

**[ कापिञ्जलादाः ]** कपिञ्जलानादत्ते । 'दश्चाऽऽङः' (५।१।७८) डप्र० । कपिञ्जल 'अदंक् भक्षणे' (१०५९) अद् । कपिञ्जलमत्ति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।२।५०) उपान्त्यवृद्धिः आ । कपिञ्जलादस्यापत्यं = कापिञ्जलादिः । 'अत इञ्' (६।१।३१) इञ्प्र० । कापिञ्जलादेरपत्यं युवा = कापिञ्जलाद्यः । 'कुर्वादेर्ञ्यः' (६।१।१००) ञ्यप्र० । कापिञ्जलाद्यस्य इमे छात्राः । ञ्यस्य लुपि 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । प्रथमा जस् ।

अञन्तं प्रकृतिरूपं ततो 'अवर्णेव०' (७।४।६८) इति भावार्थः ।

**[ ग्लौचुकायनाः ]** ग्लुचुकस्यापत्यं = ग्लुचुकायनिः । 'अदोरायनिः प्रायः' (६।१।११३) आयनिप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ग्लुचुकायनेरपत्यं युवा = ग्लौचुकायनः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ। 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । ग्लौचुकायनस्य इमे छात्राः = ग्लौचुकायनाः । अनेन अणो लुपि आयनि अन्तं संपन्नं शेषे अण्प्र० → अ । वृद्धिः औ । प्रथमा जस् ।

**[ पाण्टाहृतमयम् ]** पण्टाहृतस्यापत्यं = पाण्टाहृतिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । पाण्टाहृतेरपत्यं युवा = पाण्टाहृतः । 'पाण्टाहृति-मिमताण्णश्च' (६।१।१०४) णप्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । पाण्टाहृतादागतम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय । सि-अम् ।

**[ वार्ष्यायणीयरूप्यम् ]** वृषस्यापत्यं = वार्ष्यायणिः । 'दगु-कोशल-कर्मार-च्छाग-वृषाद् यादिः' (६।१।१०८) आयनिञ्प्र० यकारादिः । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आर् । वार्ष्यायणेरपत्यं युवा = वार्ष्यायणीयः । 'सौयामायनि-यामुन्दायनि०' (६।१।१०६) ईयप्र० । 'समानानां तेन०' (१।२।१) दीर्घः । वार्ष्यायणीयादागतं = वार्ष्यायणीयरूप्यम् । 'नृ-हेतुभ्यो०' (६।३।१५६) रूप्यप्र० । सि-अम् ।

**[ भागवित्तिकीयम् ]** भगवित्तस्यापत्यं = भागवित्तिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । भागवित्तेरपत्यं युवा = भागवित्तिकः । 'भागवित्ति-तार्णविन्दवा-ऽऽकशापेयान्निन्दायामिकण् वा' (६।१।१०५) इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । वृद्धिः । भागवित्तिकाय हितं = भागवित्तिकीयम् । 'दोरीयः' (६।३।३२) ईयप्र० । ('तस्मै हिते' (७।१।३५) ईयप्र०) । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## वायनणायनिञोः ॥ ६।१।१३८ ॥

**[ वा ]** वा प्रथमा सि ।

**[ आयनणायनिञोः ]** आयनण् च आयनिञ् च = आयनणायनिञौ, तयोः ।

**[ गार्गीयाः, गार्ग्यायणीया वा ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । गार्ग्यस्यापत्यं युवा = गार्ग्यायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यायणस्य इमे छात्राः । अनेन विकल्पेन आयनण्लोपः । 'दोरीयः' (६।३।३२) ईयप्र० । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलोपः ।

**[ चैङ्कीयाः, चैङ्कायनीया वा ]** चिङ्कस्य चिङ्काया वा अपत्यं = चैङ्किः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । चैङ्केरपत्यं युवा = चैङ्कायनः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । चैङ्कायनस्य इमे छात्राः । अनेन विकल्पेन आयनण्लोपः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ हौत्रीयाः, हौत्रायणीया वा ]** होतृ । होतुरपत्यं = हौत्रः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् । हौत्रस्यापत्यं युवा = हौत्रायणिः । 'द्विस्वरादणः' (६।१।१०९) आयनिञ्प्र० → आयनि । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । हौत्रायणेरिमे च्छात्राः = हौत्रीयाः - हौत्रायणीयाः । 'दोरीयः' (६।३।३२) ईयप्रत्ययविषये अनेन आयनिञ् विकल्पेन लोपः । प्र० जस् ।

**[ आत्रेयीयाः ]** अत्रि । अत्रेरपत्यं वृद्धम् = आत्रेयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । आत्रेयस्यापत्यं भारद्वाजो युवा = आत्रेयायणः । 'आत्रेयाद्भारद्वाजे' (६।१।५२) आयनञ्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आत्रेयायणस्य इमे च्छात्राः । 'दोरीयः' (६।३।३२) इत्यस्य विषये 'यूनि लुप्' (६।१।१३७) आयनञ्लुप् । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् ॥छ॥

**द्रीञो वा** ॥ ६।१।१३९ ॥

**[ द्रीञः ]** द्रिश्चासौ इञ् च = द्रीञ्, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

प्रागजितीये स्वर इति निवृत्तम्, अस्य सूत्रस्य करणात् । द्रीञः पञ्चम्यन्तोपादानाव(त्) वा ।

**[ औदुम्बरिः, औदुम्बरायणो वा ]** उदुम्बरस्यापत्यं वृद्धम् । 'साल्वांश-प्रत्यग्रथ-कलकूटाऽश्मकादिञ्' (६।१।११७) इञ्प्र० → इ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औदुम्बरेरपत्यं युवा = औदुम्बरायणः । 'यञिञः' (६।१।५४) आयनण्प्र० । अनेन लोपो विकल्पेन औदुम्बरि इति स्थितम्, औदुम्बरायणः ।

**[ दाक्षायणः ]** दक्षस्यापत्यं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । दाक्षेरपत्यं = दाक्षायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ आङ्गः पिता-पुत्रः ]** अङ्गस्यापत्यम् = आङ्गः । 'पुरु-मगध-कलिङ्ग-सूरमस-'द्विस्वरादण्' (६।१।११६) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आङ्गस्यापत्यम् । 'द्विस्वरादणः' (६।१।१०९) आयनिञ्प्र० । 'अब्राह्मणात्' (६।१।१४१) आयनिञ्लुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

'अब्राह्मणात्' (६।१।१४१) इति नित्यं लुपि प्राप्तायां विकल्पार्थं वचनम् ॥छ॥

**ञिदार्षादणिञोः** ॥ ६।१।१४० ॥

**[ ञिदार्षात् ]** ञिच्च आर्षश्च = ञिदार्षम्, तस्मात् ।

**[ अणिञोः ]** अण् च इञ् च = अणिञौ, तयोः ।

ञित् - **[ तैकायनिः पिता-पुत्रः ]** तिकस्यापत्यं वृद्धं = तैकायनिः । 'तिकादेरायनिञ्' (६।१।१०७) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तैकायनेरपत्यं युवा = तैकायनिः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । अनेन अण्लुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वैदः पिता-पुत्रः ]** विदस्यापत्यं वृद्धं = वैदः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वैदस्यापत्यं युवा । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

**[ कौरव्यः पिता-पुत्रः ]** कुरोः ब्राह्मणस्यापत्यं = कौरव्यः । 'कुर्वादेर्ञ्यः' (६।१।१००) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । कौरव्यस्यापत्यं = कौरव्यः । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् । अत्र ब्राह्मणगोत्रत्वात् आयनिञ् न भवति । क्षत्रियगोत्रवृत्तौ आयनिञ् भवत्येव ।

आर्षात् - **[ वासिष्ठः पिता-पुत्रः ]** वसिष्ठस्यापत्यं = वासिष्ठः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैश्वामित्रः पिता-पुत्रः ]** विश्वं मित्रमस्य = विश्वामित्रः । 'ऋषौ विश्वस्य मित्रे' (३।२।७९) दीर्घः । विश्वामित्रस्यापत्यं = वैश्वामित्रः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वैश्वामित्रस्यापत्यं = वैश्वामित्रः । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

**[ आत्रेयः पिता-पुत्रः ]** अत्रेरपत्यम् = आत्रेयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । आत्रेयस्यापत्यम् = आत्रेयः । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

**[ औपगवः पिता, औपगविः पुत्रः ]** उपगोरपत्यम् = औपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । औपगवस्यापत्यम् = औपगविः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ कौहडः पिता, कौहडिः पुत्रः ]** 卐कुहर(ड) । कुहर(ड)स्यापत्यं = कौहरः(डः) । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कौहर(ड)स्यापत्यं = कौहरिः(डिः) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ ।

**[ दाक्षायणः ]** पूर्ववत् (६।१।१३९) ॥छ॥

### अब्राह्मणात् ॥ ६।१।१४१ ॥

**[ अब्राह्मणात् ]** न ब्राह्मणः = अब्राह्मणस्तस्मात् । 'नञत्' (३।२।१२५) न० → अ० ।

**[ आङ्गः पिता-पुत्रः ]** अङ्गस्यापत्यं वृद्धम् = आङ्गः । 'पुरु-मगध-कलिङ्ग-सूरमस-द्विस्वरादण्' (६।१।११६) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । पितुः आङ्गस्यापत्यं युवा = आङ्गः पुत्रः । 'द्विस्वरादणः' (६।१।१०९) आयनिञ्प्र० । अनेन आयनिञ्लुप् ।

**[ सौह्मः पिता-पुत्रः ]** सुह्मस्यापत्यं वृद्धं = सौह्मः । 'पुरु-मगध०' (६।१।११६) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सौह्मस्यापत्यं = सौह्मः । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

---

卐 शिवादिगणे - कोहड ।

**[ मागधः पिता-पुत्रः ]** मगधस्यापत्यं = मागधः । 'पुरु-मगध०' (६।१।११६) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मागधस्यापत्यं युवा = मागधः । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

**[ कालिङ्गः पिता-पुत्रः ]** कलिङ्गस्यापत्यं वृद्धं = कालिङ्गः । 'पुरु-मगध-कलिङ्ग-सूरमस०' (६।१।११६) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।८) अलुक् । कालिङ्गस्यापत्यं युवा = कालिङ्गः । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

**[ सौरमसः पिता-पुत्रः ]** सूरमसस्यापत्यं वृद्धं = सौरमसः । 'पुरु-मगध-कलिङ्ग-सूरमस०' (६।१।११६) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । सौरमसस्यापत्यं युवा = सौरमसः । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

**[ नाकुलः पिता-पुत्रः ]** नकुलस्यापत्यं वृद्धं = नाकुलः । कुरुत्वात् 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । नाकुलस्यापत्यं युवा = नाकुलः । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

**[ साहदेवः पिता-पुत्रः ]** नकुलेन (सह) दीव्यतीति = सहदेवः । 'अच्' (५।१।४९) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'सहदेवस्यापत्यं वृद्धं = साहदेवः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । साहदेवस्यापत्यं युवा । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

**[ वासुदेवः पिता-पुत्रः ]** वसुदेवस्यापत्यं वृद्धं = वासुदेवः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वासुदेवस्यापत्यं युवा । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् । पुत्र प्रथमा सि ।

**[ आनिरुद्धः पिता-पुत्रः ]** अनिरुद्धस्यापत्यं वृद्धम् = आनिरुद्धः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आनिरुद्धस्यापत्यं युवा । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् । पुत्र प्रथमा सि ।

**[ रान्ध्रसः पिता-पुत्रः ]** रन्ध्रसस्यापत्यं वृद्धं = रान्ध्रसः । 'पुरु-मगध०' (६।१।११६) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । रान्ध्रसस्यापत्यं युवा पुत्रः = रान्ध्रसः । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

**[ श्वाफल्कः पिता-पुत्रः ]** श्वफल्कस्यापत्यं = श्वाफल्कः । 'पुरु-मगध०' (६।१।११६) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । श्वाफल्कस्यापत्यं = श्वाफल्कः पुत्रः । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

卐**[ भाण्डिजङ्घिः पिता-पुत्रः ]** भण्ड । भण्डस्यापत्यं = भाण्डिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । नुर्जातेः' (२।४।७२) ङी । अण (२५९) रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) - 'भण शब्दे' (२६४) भण् । भणति यत् किञ्चित् = भण्डम्(ण्डः) । 'पञ्चमात् डः' (उणा० १६८) डप्र० । भण्डस्य भार्या = भण्डी । 'धवाद् योगादपालकान्तात्' (२।४।५९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । भण्ड्या इव जङ्घे यस्य सः । भाण्ड्या इव जङ्घे यस्य सः ।

卐 हैमप्रकाशे - भाण्डिजाङ्घिः ।

भाण्डीजङ्घस्यापत्यं वृद्धं = भाण्डीजङ्घिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । भाण्डीजङ्घेरपत्यं युवा = भाण्डिजङ्घिः । 'यञिञः' (६।१।५४) आयनण्प्र० । अनेन आयनण्लुप् ।

**[ कार्णखारिः पिता-पुत्रः ]** खरस्येदं = खारं ध्वन्यादिः । कर्णे खारं यस्य सः । कर्णस्य खम् । 'ऋंक् गतौ' (११३५) ऋ । कर्णखमियर्त्ति = कर्णखारः । द्वारशृङ्गारे निपातः । कर्णखारस्यापत्यं = कार्णखारिः । 'अत इञ्' (६।१।३१) इञ्प्र० । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कार्णखारेरपत्यं = कार्णखारिः । 'यञिञः' (६।१।५४) आयनण्प्र० । अनेन आयनण्लुप् । पुत्र प्रथमा सि ।

**[ श्वशुर्यः पिता-पुत्रः ]** श्वशुरस्यापत्यं वृद्धं = श्वशुर्यः । 'श्वशुराद् यः' (६।१।९१) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । श्वशुर्यस्यापत्यं युवा = श्वशुर्यः । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

**[ कुलीनः पिता-पुत्रः ]** कुलस्यापत्यं वृद्धम् । 'कुलादीनः' (६।१।९६) ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कुलीनस्यापत्यं युवा = कुलीनः । 'अत इञ्' (६।१।३१) इञ्प्र० । अनेन इञ्लुप् ।

**[ गार्ग्यः पिता, गार्ग्यायणः पुत्रः ]** गर्गस्यापत्यं वृद्धम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यस्यापत्यं युवा = गार्ग्यायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## पैलादेः ॥ ६।१।१४२ ॥

**[ पैलादेः ]** पैल आदिर्यस्य सः = पैलादिः, तस्मात् ।

**[ पैलः पिता-पुत्रः ]** पीलाया अपत्यं = पैलः । 'पीला-साल्वा-मण्डूकाद् वा' (६।१।६८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । पैलस्यापत्यं युवा । 'द्विस्वरादणः' (६।१।१०९) आयनिञ्प्र० । अनेन आयनिञ्लुप् । पुत्र प्रथमा सि ।

**[ शालङ्किः पिता-पुत्रः ]** शलङ्कु । शलङ्कोरपत्यं = शालङ्किः । 'शालङ्क्यौदि-षाडि-वाड्वलि' (६।१।३७) शालङ्किनिपातः । शालङ्केरपत्यं युवा पुत्रः = शालङ्किः । 'यञिञः' (६।१।५४) आयनण्प्र० । अनेन आयनण्लुप् ।

**[ औदन्यि ]** उदकमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्षुत्-तृड्-गर्द्धेऽशनायोदन्य-धनायम्' (४।३।११३) उदक० → उदन्यनिपातः । उदन्यतीति । 'अच्' (५।१।४९) अच्प्र० → अ । 'अतः' (४।३।८२) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । उदन्याया भावः = औदन्यि । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । उदन्यशब्दः पुल्लिङ्गः तदा सत्यपि तिकादित्वे अपवादविषये क्वचिदुत्सर्गोऽपीति इञेव ।

**[ औज्जिहानि ]** 'ओहांङ्क् गतौ' (११३६) हा, उत्पूर्व० । उज्जिहीते = उज्जिहानः । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । 'हवः शिति' (४।१।१२) ''हा''द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'पृ-भृ-मा-हाङामिः' (४।१।५८) इत्यादिना इकारः । 'ग-होर्जः' (४।१।४०) ह० → ज० । उज्जिहानस्यापत्यम् = औज्जिहानिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ औज्जहानि ]** 'ओहांक् त्यागे' (११३१) हा, उत्पूर्व० । उज्जहाति = उज्जहानः । 'वयः-शक्ति-शीले' (५।२।२४) शानप्र० → आन । 'हवः शिति' (४।१।१२) ''हा''द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । उज्जहानस्यापत्यम् = औज्जहानिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृ० औ । 'अवर्णेवर्णस्य (७।४।६८) अलुक् ।

इति पैलादिगणः ॥छ॥

**प्राच्येञोऽतौल्वल्यादेः** ॥ ६।१।१४३ ॥

**[ प्राच्येञः ]** प्राच्ये प्राच्याद्वा इञ् = पाच्येञ्, तस्मात् ।

**[ अतौल्वल्यादेः ]** तौल्वलिरादिर्यस्य सः = तौल्वल्यादिः । न तौल्वल्यादिः = अतौल्वल्यादिः, तस्मात् ।

ब्राह्मणार्थं वचनम् ।

**[ पान्नागारिः पिता-पुत्रः ]** पन्नं-पतितमगारं यस्य सः = पन्नागारः । पन्नागारस्यापत्यं वृद्धं = पान्नागारिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पितुः पान्नागारेरपत्यं युवा = पान्नागारिः पुत्रः । 'यञिञः' (६।१।५४) आयनण्प्र० । अनेन आयनण्लुप् ।

**[ मान्थरेषणिः पिता-पुत्रः ]** मन्थो रेषणं-हिंसोपगरणं यस्य सः । मन्थरेषणस्यापत्यं वृद्धं = मान्थरेषणिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पितुः मान्थरेषणेरपत्यं युवा = मान्थरेषणिः पुत्रः । 'यञिञः' (६।१।५४) आयनण्प्र० । अनेन आयनण्लुप् ।

**[ क्षैरकलम्भिः पिता-पुत्रः ]** क्षीरकलम्भस्यापत्यं वृद्धं = क्षैरकलम्भिः । पितुः क्षैरकलम्भेरपत्यं युवा = क्षैरकलम्भिः पुत्रः । 'यञिञः' (६।१।५४) आयनण्प्र० । अनेन आयनण्लुप् ।

**[ दाक्षिः पिता, दाक्षायणः पुत्रः ]** दक्षस्यापत्यं वृद्धं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षेरपत्यं युवा = दाक्षायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ राघवः पिता, राघविः पुत्रः ]** रघु । रघोरपत्यं = राघवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । राघवस्यापत्यम् । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ तौल्वलिः पिता, तौल्वलायनः पुत्रः ]** तुल्वलस्यापत्यं = तौल्वलिः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पितुः तौल्वलेरपत्यं युवा = तौल्वलायनः पुत्रः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ तैल्वलिः पिता, तैल्वलायनः पुत्रः ]** तिल्वलस्यापत्यं = तैल्वलिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तैल्वलेरपत्यं युवा = तैल्वलायनः पुत्रः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ दालीपिः पिता, दालीपायनः पुत्रः ]** दिलीप । दिलीपस्यापत्यं = दालीपिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । अत एव गणनिपातनात् इलोपः - वृ० आकारः । दालीपेरपत्यं युवा = दालीपिः - दालीपायनः पुत्रः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

अपरे दलीप इति प्रकृत्यन्तरमाहुः । इति तौल्वला(ल्या)दिः ॥छ॥

**इत्याचार्यश्रीहेमचन्द्रविरचितायां तद्धितबृहद्वृत्तौ षष्ठस्याध्यायस्य**
**प्रथमः पादः ॥छ॥**

• • •

॥ अर्हम् ॥

## ॥ अथ षष्ठाध्यायस्य द्वितीयः पादः ॥

### रागाट्टो रक्ते ॥ ६।२।१ ॥

**[ रागात् ]** 'रञ्जीं रागे' (८९६) रञ्ज् । रज्यतेऽनेनेति रागस्तस्मात् । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'घञि भाव-करणे' (४।२।५२) नलोपः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० ।

**[ टः ]** टा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[ रक्ते ]** रज्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क०, तस्मिन् ।

**[ कौसुम्भम् ]** कुसुम्भ । कुसुम्भेन रक्तं वस्त्रं = कौसुम्भम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ काषायम् ]** कषायेण रक्तं वस्त्रं = काषायम् । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ कौङ्कुमम् ]** कुङ्कुमेन रक्तं वस्त्रं = कौङ्कुमम् । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ माञ्जिष्ठम् ]** मञ्जिष्ठया रक्तं वस्त्रं = माञ्जिष्ठम् । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ हारिद्रम् ]** हरिद्रया रक्तं वस्त्रं = हारिद्रम् । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ माहारजनम् ]** महत्-रजन । महच्च तद् रजनं च = महारजनम् । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डाच् (डा) । 'डित्यन्त्यस्वरादेः' (२।१।११४) अल्लोपः । महारजनेन रक्तं वस्त्रं = माहारजनम् । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**वाधिकारात्** पक्षे **कुसुम्भेन रक्तमिति** वाक्यम् । **कुसुम्भरक्तमिति** समासः । रागशब्देन प्रसिद्धा एव कुसुम्भादयो रागा गृह्यन्ते,तेनेह न भवति - **कृष्णेन रक्तमित्यादि** । एते हि वर्णं(र्णा) द्रव्यवृत्तयो न तु रागाख्याः । कथं **काषायाविव काषायौ, हारिद्राविव हारिद्रौ** इत्युपमानोपमेयभावेन तद्गुणाध्यारोपाद्भविष्यति ॥छ॥

## लाक्षा-रोचनादिकण् ॥ ६।२।२ ॥

**[ लाक्षारोचनात् ]** लाक्षा च रोचना च = लाक्षारोचनम् । 'क्लीबे' (२।४।९७) ह्रस्वः, तस्मात् ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ लाक्षिकम् ]** लाक्षया रक्तं = लाक्षिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ रौचनिकम् ]** रोचनया रक्तं = रौचनिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ॥छ॥

## शकल-कर्दमाद् वा ॥ ६।२।३ ॥

**[ शकलकर्दमात् ]** शकलश्च कर्दमश्च = शकलकर्दमम्, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ शाकलिकम्, शाकलम् ]** शकलेन रक्तं = शाकलिकम् । अनेन इकण्प्र० → इक विकल्पेन । अन्यत्र 'रागाट्टो रक्ते' (६।२।१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कार्दमिकम्, कार्दमम् ]** कर्दमेन रक्तं = कार्दमिकम् । अनेन इकण्प्र० → इक । पक्षे - 'रागाट्टो रक्ते' (६।२।१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । **कर्दमो मृद्विकारः,** पाण्डुमण्डले प्रसिद्ध इति **विश्रान्तविद्याधरव्याकरणं** वक्ति ॥छ॥

## नील-पीताद-कम् ॥ ६।२।४ ॥

**[ नीलपीतात् ]** नीलश्च पीतं च = नीलपीतम्, तस्मात् ।

**[ अकम् ]** अश्च कश्च = अकम् ।

**[ नीलम् ]** नील इति नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् नील 'क्ताच्च नाम्नि वा' (२।४।२८) विकल्पेन ङी → ई० । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । नीलेन नील्या वा रक्तं वस्त्रं = नीलम् । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अ-ईलुक् । सि-अम् ।

**[ पीतकम् ]** पीतेन रक्तं = पीतकम् । अनेन कप्र० । सि-अम् ।

**[ पीतकम् ]** पीतं करोति = पीतयति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'अतः' (४।३।८२) अलोपः । पीतयतीति पीतकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'णेरनिटि' (४।३।८३) णिच्लुक् । पीतकेन कुसुम्भप्रथमनिर्यासेन रक्तं = पीतकम् । ते हि मतान्तरिणः आचार्याः **नीलपीतादः पीतात्क** इति द्वे सूत्रे रचयन्ति । तन्मते अप्र० - अकप्र० गुणवचनत्वात् । गुणवचनविचारे नीलगुणयोगात् नीलं पीतं पीतगुणः । केन सिद्धे अणपवादार्थं वचनम् ॥छ॥

### उदितगुरोर्भाद् युक्तेऽब्दे ॥ ६।२।५ ॥

**[ उदितगुरोः ]** उदितो गुरुर्बृहस्पतिर्यस्मिन् तत् = उदितगुरु, तस्मात् ।

**[ भात् ]** भ पञ्चमी ङसि ।

**[ युक्ते ]** युक्त सप्तमी ङि ।

**[ अब्दे ]** अब्द सप्तमी ङि ।

**[ पौषं वर्षम् ]** पुष्येण उदितगुरुणा युक्तं वर्षं = पौषम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तिष्य-पुष्ययोर्भाऽणि' (२।४।९०) यलुक् । जिषू (५२२) - विषू (५२३) - मिषू (५२४) - निषू (५२५) - पृषू (५२६) - 'वृषू सेचने' (५२७) वृष् । वर्षणं = वर्षः(म्) । 'वर्षादयः क्लीबे' (५।३।२९) अल्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ फाल्गुनः संवत्सरः ]** फल्गुन 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । फल्गुनीभिरुदितगुरुभिर्युक्तः = फाल्गुनः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । संवच्छर प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[ उदितगुरुणा पूर्वरात्रेण युक्तं वर्षम् ]** उदितगुरु तृतीया टा । पूर्व-रात्रि । पूर्वो रात्रः(त्रेः), तेन । 'सङ्ख्यातैक-पुण्य-वर्षा-दीर्घाच्च रात्रेरत्' (७।३।११९) अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'पूर्वा-ऽपरा-ऽधरोत्तरमभिन्नेनांशिना' (३।१।५२) समासः । युक्तं वर्षम् ॥छा॥

### चन्द्रयुक्तात् काले, लुप् त्वप्रयुक्ते ॥ ६।२।६ ॥

**[ चन्द्रयुक्तात् ]** चन्द्रेण युक्तं = चन्द्रयुक्तम्, तस्मात् ।

**[ काले ]** काल सप्तमी ङि ।

**[ लुप् ]** लुप् प्रथमा सि ।

**[ तु ]** तु प्रथमा सि ।

**[ अप्रयुक्ते ]** न प्रयुक्तोऽप्रयुक्तस्तस्मिन् = अप्रयुक्ते । 'नञत्' (३।२।१२५) न० → अ० ।

**[ पौषमहः ]** पुष्य । पुष्येण चन्द्रयुक्तेन युक्तमहः = पौषमहः । अनेन अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'तिष्य-पुष्ययोर्भाऽणि' (२।४।९०) यलुक् । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । अहन् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । 'रो लुप्यरि' (२।१।७५) न० → रेफः ।

**[ पौषी रात्रिः ]** पुष्येण चन्द्रयुक्तेन युक्ता रात्रिः = पौषी रात्रिः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तिष्य-पुष्ययोर्भाऽणि' (२।४।९०) यलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । रात्रि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ पौषोऽहोरात्रः ]** पुष्येण चन्द्रयुक्तेन युक्तोऽहोरात्रः = पौषोऽहोरात्रः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तिष्य-पुष्ययोर्भाऽणि' (२।४।९०) यलुक् । प्रथमा सि । अहन्-रात्रि । अहश्च रात्रिश्च = अहोरात्रः । 'ऋक्सामर्ग्यजुष-धेन्वनडुह-वाङ्मनसा-ऽहोरात्र-रात्रिंदिव-नक्तंदिवा-ऽहर्दिवोर्वष्ठीव-पदष्ठीवा-ऽक्षिभ्रुव-दारगवम्' (७।३।९७) अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । 'अह्नः' (२।१।७४) न० → र० । 'घोषवति' (१।३।२१) र० → उ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ ।

**[ पौषः कालः ]** पुष्येण चन्द्रयुक्तेन युक्तः कालोऽपि पौषः कालः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तिष्य-पुष्य०' (२।४।९०) यलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ माघमहः ]** मघाभिश्चन्द्रयुक्ताभिर्युक्तमहः = माघमहः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् । अहः पूर्ववत् ।

**[ माघी रात्रिः ]** मघाभिश्चन्द्रयुक्ताभिर्युक्ता रात्रिः = माघी रात्रिः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ माघोऽहोरात्रः ]** मघाभिश्चन्द्रयुक्ताभिर्युक्तोऽहोरात्रः = माघोऽहोरात्रः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ माघः कालः ]** मघाभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि माघः कालः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

अद्येत्यस्याधारत्वमेव न सामानाधिकरण्यं मुहूर्त्तादिरप्रयोगः ।

**[ अद्य पुष्यः ]** पुष्येण चन्द्रयुक्तेन युक्तः कालोऽपि पुष्यः । अनेन अण्प्र० - लुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अद्य मघाः ]** मघाभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि मघाः । अनेन अण्प्र० - लुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दिवा कृत्तिकाः ]** दिवा इत्यत्र प्रथमा सप्तमी वा । 'अव्ययस्य' (३।२।७) लुप् । कृत्तिकाभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि कृत्तिकाः । अनेन अण्प्र० - लुप् च । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ रात्रौ फल्गुन्यः ]** रात्रि सप्तमी ङि । 'ङिर्डौ' (१।४।२५) ङि० → डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् । फल्गुनीभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि फल्गुन्यः । अनेन अण्प्र०-लुप् । 'फल्गुनी-प्रोष्ठपदस्य भे' (२।२।१२३) इत्यादिना बहुवद्भावः । प्र० जस् ।

**[पुष्ये पायसमश्नीयात् मघासु पललौदनम्]** पुष्येण चन्द्रयुक्तेन युक्तः कालोऽपि पुष्यः । अनेन अण्प्र०-लुप् । सप्तमी ङि । पयस् । पयसि संस्कृतं = पायसम् । 'संस्कृते भक्ष्ये' (६।२।१४०) अण्प्र० → अ । वृ० आ । द्वितीया अम् । पयसा संस्कृतमिति तु कृते 'संस्कृते' (६।४।३) इत्यनेन इकण् स्यात् । मघाभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि मघाः । अनेन अण्प्र०-लुप् । सप्तमी सुप् । पललं च ओदनं च = पललौदनम् । अम् ।

**[ पौषमहः ]** पुष्य । पुष्येण चन्द्रयुक्तेन युक्तमहः = पौषमहः । अनेन अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तिष्य-पुष्ययोर्भाऽणि' (२।४।९०) यलुक् । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । अहन् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । 'रो लुप्यरि' (२।१।७५) न० → रेफः ।

**[ पौषी रात्रिः ]** पुष्येण चन्द्रयुक्तेन युक्ता रात्रिः = पौषी रात्रिः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तिष्य-पुष्ययोर्भाऽणि' (२।४।९०) यलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । रात्रि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ पौषोऽहोरात्रः ]** पुष्येण चन्द्रयुक्तेन युक्तोऽहोरात्रः = पौषोऽहोरात्रः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तिष्य-पुष्ययोर्भाऽणि' (२।४।९०) यलुक् । प्रथमा सि । अहन्-रात्रि । अहश्च रात्रिश्च = अहोरात्रः । 'ऋक्सामर्ग्यजुष-धेन्वनडुह-वाङ्मनसा-ऽहोरात्र०' (७।३।९७) अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'अह्नः' (२।१।७४) न० → र० । 'घोषवति' (१।३।२१) र० → उ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ ।

**[ पौषः कालः ]** पुष्येण चन्द्रयुक्तेन युक्तः कालोऽपि पौषः कालः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तिष्य-पुष्य०' (२।४।९०) यलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## द्वन्द्वादीयः ॥ ६।२।७ ॥

**[ द्वन्द्वात् ]** द्वन्द्व पञ्चमी ङसि ।

**[ ईयः ]** ईय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ राधानुराधीयमहः ]** 卐राधाश्च अनुराधाश्च = राधानुराधाः । राधानुराधाभिश्चन्द्रयुक्ताभिर्युक्तमहः = राधानुराधीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् । विशाखानक्षत्रम् । अहः ।

**[ अद्य राधानुराधीयम् ]** राधानुराधाभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि राधानुराधीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् । अद्य सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलुप् ।

**[ तिष्यपुनर्वसवीया रात्रिः ]** तिष्यश्च पुनर्वसू च = तिष्यपुनर्वसू । 'पुष्यार्थाद् भे पुनर्वसुः' (३।१।१२९) इत्येकत्वम् । ताभ्यां = चन्द्रयुक्ताभ्यां युक्ता रात्रिः = तिष्यपुनर्वसवीया रात्रिः । अनेन ईयप्र० । 'अस्वभम्भुवोऽव्' (७।४।७०) अव् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अद्य तिष्यपुनर्वसवीयम् ]** तिष्यपुनर्वसूभ्यां चन्द्रयुक्ताभ्यां युक्तः कालः = तिष्यपुनर्वसवीयः । अनेन ईयप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् । अद्य प्र० सि । 'अव्ययस्य' (३।२।७) सिलुप् ॥छ॥

---

卐 श० म० न्या० - राधानुराधाभिरिति - राधा चानुराधे चेति विग्रहे द्वन्द्वे सति राधाऽनुराधा इति । अत्र चान्ये राधाभिश्चन्द्रयुक्ताभिर्युक्तः काल इत्यर्थेऽणि तस्य लुपि च राधाः, एवमनुराधा इति संसाध्य ततो द्वन्द्वं कृत्वा, तत ईयप्रत्ययेन राधाऽनुराधीयमिति साधयन्ति । तथा च द्विधा प्रत्ययं विदधति, तन्नावश्यकम्, केवलं नक्षत्रवाचकयोरेव द्वन्द्वे, तस्यैव चन्द्रयुक्तत्वविवक्षायाः, राधाऽनुराधाभिश्चन्द्रयुक्ताभिरिति प्रदर्शित-विग्रहवाक्यतोऽवगमात् ।

**श्रवणा-ऽश्वत्थान्नाम्न्यः** ॥ ६।२।८ ॥

**[ श्रवणाऽश्वत्थात् ]** श्रवणश्च अश्वत्थश्च = श्रवणाऽश्वत्थम्, तस्मात् ।

**[ नाम्नि ]** नामन् सप्तमी ङि ।

**[ अः ]** अ प्रथमा सि । सो रुः' (२।१।७२) स० → र० ।

**[ श्रवणा रात्रिः ]** श्रवणेन चन्द्रयुक्तेन युक्ता रात्रिः = श्रवणा रात्रिः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आत्' (२।४।१८) आप्प्र० → आ ।

**[ श्रवणा पौर्णमासी ]** कस्याश्चित् पूर्णमास्याः श्रवणेति नाम । पूर्ण 'मांक् माने' (१०७३) मा । 'मांङ्क् मान-शब्दयोः' (११३७) मा । माति मिमीते वा = मास् । 'अस्' (उणा० ९५२) इत्यस्प्र० । 'पूर्णो माश्चन्द्रोऽस्यामस्ति । 'पूर्णमासोऽण्' (७।२।५५) अण्प्र० । पूर्णो मासोऽस्यां, पूर्णमासा वा युक्ता । 'साऽस्य पौर्णमासी' (६।२।९८) पौर्णमासीनिपातः ।

**[ श्रवणो मुहूर्त्तः ]** श्रवणेन चन्द्रयुक्तेन युक्तोऽपि मुहूर्त्तः = श्रवणो मुहूर्त्तः । अनेन अप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । मुहूर्त्त प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अश्वत्था रात्रिः ]** अश्वत्थेन चन्द्रयुक्तेन युक्ता रात्रिः = अश्वत्था रात्रिः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अश्वत्था पौर्णमासी ]** अश्वत्थेन चन्द्रयुक्तेन युक्ता पौर्णमासी = अश्वत्था पौर्णमासी । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अश्वत्थो मुहूर्त्तः ]** अश्वत्थेन चन्द्रयुक्तेन युक्तोऽपि मुहूर्त्तः = अश्वत्थो मुहूर्त्तः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

सत्यपि अन्वर्थयोगे न कालमात्रमेव उच्यते, कालविशेष एवेति नामत्वम् ।

**[ श्रावणमहः ]** श्रवणेन चन्द्रयुक्तेन युक्तमहः = श्रावणमहः ।

**[ श्रावणी रात्रिः ]** श्रवणेन चन्द्रयुक्तेन युक्ता रात्रिः = श्रावणी रात्रिः ।

**[ आश्वत्थमहः ]** अश्वत्थेन चन्द्रयुक्तेन युक्तमहः = आश्वत्थमहः ।

**[ आश्वत्थी रात्रिः ]** अश्वत्थेन चन्द्रयुक्तेन युक्ता रात्रिः = आश्वत्थी रात्रिः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ॥छा॥

**षष्ठ्याः समूहे** ॥ ६।२।९ ॥

**[ षष्ठ्याः ]** षष्ठी पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० ।

**[ समूहे ]** समूह सप्तमी ङि ।

**[ चाषम् ]** चाषाणां पक्षिणां समूहः = चाषम् ।

**[ काकम् ]** काकानां समूहः = काकम् ।

**[ बाकम् ]** बकानां समूहः = बाकम् ।

**[ शौकम् ]** शुकानां समूहः = शौकम् । सर्वत्र अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ-औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ भैक्षुकम् ]** भिक्षुक । भिक्षुकाणां समूहः = भैक्षुकम् । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वाडवम् ]** वडवा । वडवानां समूहः = वाडवम् । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । वाडवशब्दाच्च 'ब्राह्मण-माणव-वाडवाद् यः' (६।२।१६) इत्यादिना यः आगच्छति ।

**[ वानस्पत्यम् ]** वनस्पति । वनस्पतीनां समूहः = वानस्पत्यम् । 'अनिदम्यणपवादे च दित्यदित्यादित्य-यमपत्युत्तरपदाञ्ञ्यः' (६।१।१५) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ स्त्रैणम् ]** स्त्री । स्त्रीणां समूहः = स्त्रैणम् । 'प्राग्वतः स्त्री-पुंसात् नञ्-स्नञ्' (६।१।२५) नञ्प्र० → न । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ ।

**[ पौंस्नम् ]** पुम्स् । पुंसां समूहः = पौंस्नम् । 'प्राग्वतः स्त्री-पुंसात् नञ्-स्नञ्' (६।१।२५) स्नञ्प्र० → स्न । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः । सर्वत्र सि-अम् ।

'तस्येदम्' (६।३।१६०) इत्येवाणादिसिद्धौ समूहविवक्षायां तस्य अणोपवादो 'दोरीयः' (६।३।३२) इत्यादि तदपवादबाधनार्थो योगः ।।छ।।

## भिक्षाऽऽदेः ॥ ६।२।१० ॥

**[ भिक्षाऽऽदेः ]** भिक्षा आदिर्यस्य सः = भिक्षाऽऽदिः, तस्मात् ।

**[ भैक्षम् ]** भिक्षाणां समूहः = भैक्षम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ गार्भिणम् ]** गर्भिनां(णां) समूहः । अनेन अण्प्र० । यदा शालिपङ्क्त्यादिवचनो गर्भिणीशब्दस्तदा अचित्तेकणः प्राप्तौ गर्भिणीना समूहः = गार्भिणम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) पुंवद्भावः । 'संयोगादिनः' (७।४।५३) इत्यन्त्यस्वरादिलोपप्रतिषेधः ।

**[ यौवतम् ]** युवन् स्त्री चेत्-युवति । 'यूनस्तिः' (२।४।७७) तिप्र० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । युवतीनां समूहः = यौवतम् । अनेन अण्प्र० → अ । वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

**[ यौवनम् ]** युवतीनां समूहः = यौवनम् । मतान्तरे अनेन अण्प्र० → अ । 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) पुंवद्भावः । वृ० औ । सि-अम् ।

**[ सुरूपमतिनेपथ्यं कलाकुशलयौवनम्, यस्य पुण्यकृतः प्रैष्यं, सफलं तस्य यौवनम् ]** ।।१।। अतिशायिने पथ्यं यस्य तदतिनेपथ्यम् । यौवनं पूर्ववत् । यस्य पुण्यकृतः प्रैष्यं आज्ञाकारीभूतं । यूनो भावः = यौवनम् । 'युवादेरण्' (७।१।६७) अण्प्र० → अ । वृ० औ । सि-अम् ।

भिक्षादिगणः ।।छ।।

## क्षुद्रकमालवात् सेनानाम्नि ॥ ६।२।११ ॥

**[क्षुद्रकमालवात्]** 'मलि धारणे' (८१०) मल् । मल्यते = मालः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । मालोऽस्यास्ति = मालवः । 'मण्यादिभ्यः' (७।२।४४) वप्र० । क्षुद्रकमालव इत्यखण्डं पञ्चम्यन्तम् ।

**[सेनानाम्नि]** सेनाया नाम = सेनानाम, तस्मिन् ।

**[क्षौद्रकमालवी एवंनामा काचित्सेना]** क्षुद्रक । क्षुद्रकस्यापत्यं(त्यानि) । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । मालव । मालवस्यापत्यं(त्यानि) । 'दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः' (६।१।११८) ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) द्वयोरपि लुप् । क्षुद्रकाश्च मालवाश्च = क्षुद्रकमालवास्तेषां समूहः = क्षौद्रकमालवी । अनेन अण्प्र० → अ । वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । एवंनामा काचित् सेना ।

**[क्षौद्रकमालवकमन्यत्]** क्षुद्रकमालवानां समूहः = क्षौद्रकमालवकम् । 'गोत्रोक्ष-वत्सोष्ट्र-वृद्धाजोरभ्र-मनुष्य-राज-राजन्य-राजपुत्रादकञ्' (६।२।१२) अकञ्प्र० → अक । वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**गोत्राकञ्बाधनार्थं वचनम्** ॥छ॥

## गोत्रोक्ष-वत्सोष्ट्र-वृद्धा-ऽजोरभ्र-मनुष्य-राज-राजन्य-राजपुत्रादकञ् ॥ ६।२।१२ ॥

**[गोत्रोक्षवत्सोष्ट्रवृद्धाऽजोरभ्रमनुष्यराजराजन्यराजपुत्रात्]** गोत्रं च उक्षा च वत्सश्च उष्ट्रश्च वृद्धश्च अजश्च उरभ्रश्च मनुष्यश्च राजा च राजन्यश्च राजपुत्रश्च = गोत्रोक्षवत्सोष्ट्रवृद्धाऽजोरभ्रमनुष्यराजराजन्यराजपुत्रम्, तस्मात् ।

**[अकञ्]** अकञ् प्रथमा सि ।

**स्वापत्यसन्तानस्य स्वव्यपदेशकारिणः प्रथमपुरुषस्यापत्यं गोत्रम् ।**

**[औपगवकम्]** उप-गो । गोः समीपमुपगुः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वः । उपगोरपत्यमौपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । औपगवानां समूहः = औपगवकम् । अनेन अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[कापटवकम्]** कपटु । कपटोरपत्यं = कापटवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । कापटवानां समूहः = कापटवकम् । अनेन अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।८) अलुक् ।

**[गार्गकम्]** 卐गर्गस्यापत्यानि वृद्धानि । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । गर्गाणां समूहः = गार्गकम् । अनेन अकञ्प्र० → अक । 'न प्राग्जितीये स्वरे' (६।१।१३५) इत्यादिना यञो न लुप् । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् ।

---

卐 मध्यमवृत्तौ - गर्गस्यापत्यानि । 'गगादेर्यञ्' (६।१।४२) - 'यञञोऽश्यापर्णा०' (६।१।१२६) इति यञ् लुप्यते, ततो गर्गाणां समूहः = गार्गकमिति लघुवृत्त्यभिप्रायः । बृहद्वृत्तौ त्वेवम् - गार्ग्याणां समूहो गार्गकम् । 'गोत्रोक्ष०' इति अकञ् । 'न प्राग्जितीये०' (६।१।१३५) इति प्रतिषेधाद् यञो न लुप्, ततः 'तद्धितयस्वरेऽनाति' (२।४।९२) इत्यनेन यकारो लुप्यते ।

**[ वात्सकम् ]** वत्सस्यापत्यानि वृद्धानि । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वत्सानां समूहः = वात्सकम् । अनेन अकञ्प्र० → अक । 'न प्राग्जितीये स्वरे' (६।१।१३५) इत्यादिना यञो न लुप् । 'अवर्णेवर्णस्य' (७।४।८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् ।

**[ गार्ग्यायणकम् ]** गार्ग्य । गार्ग्यस्यापत्यं युवा = गार्ग्यायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । अग्रे पूर्ववत् ।

**[ वात्स्यायनकम् ]** वात्स्य । वात्स्यस्यापत्यं युवा = वात्स्यायनः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । अग्रे पूर्ववत् ।

**[ औक्षकम् ]** उक्षन् । उक्ष्णां समूहः = औक्षकम् । अनेन अकञ्प्र० → अक । वृद्धिः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः ।

**[ वात्सकम् ]** वत्स । वत्सानां समूहः = वात्सकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औष्ट्रकम् ]** उष्ट्र । उष्ट्राणां समूहः = औष्ट्रकम् । अनेन अकञ्प्र० → अक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वार्द्धकम् ]** वृद्ध । वृद्धानां समूहः = वार्द्धकम् । अनेन अकञ्प्र० → अक । वृ० आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आजकम् ]** अज । अजानां समूहः = आजकम् । अनेन अकञ्प्र० → अक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औरभ्रकम् ]** उरभ्र । उरभ्राणां समूहः = औरभ्रकम् । अनेन अकञ्प्र० → अक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मानुष्यकम् ]** मनुष्याणां समूहः = मानुष्यकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'न राजन्य-मनुष्ययोरके' (२।४।९४) यलोपाभावः ।

**[ राजकम् ]** राज्ञां समूहः = राजकम् । अनेन अकञ्प्र० → अक । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ राजन्यकम् ]** राजन्यानां समूहः = राजन्यकम् । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'न राजन्य-मनुष्ययोरके' (२।४।९४) यलोपाभावः ।

मनुष्य-राजन्यशब्दौ औणादिकौ इति पृथगुपादानम् ।

**[ राजपुत्रकम् ]** राजपुत्राणां समूहः = राजपुत्रकम् । अनेन अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।।छा।

**केदाराण्ण्यश्च** ॥ ६।२।१३ ॥

**[ केदारात् ]** केदार पञ्चमी ङसि ।

**[ ण्यः ]** ण्य प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ कैदार्यम्, कैदारकम् ]** केदाराणां समूहः = कैदार्यम्, कैदारकम् । अनेन ण्यप्र० → य - अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ॥छ॥

**कवचि-हस्त्यचित्ताच्चेकण्** ॥ ६।२।१४ ॥

**[ कवचिहस्त्यचित्तात् ]** कवची च हस्ती च अचित्तं च = कवचिहस्त्यचित्तम्, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ कावचिकम् ]** कवच । कवचान्येषां सन्तीति कवचिनः । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कवचिनां समूहः = कावचिकम् । अनेन इकण्प्र० → इक । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः ।

**[ हास्तिकम् ]** हस्तिन् । हस्तिनां हस्तिनीनां वा समूहः । 'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (न्या० सं० वक्ष०(१) / सूत्र (१६)) इति न्यायात् स्त्रीलिङ्गवर्त्तमानहस्तिनीशब्दस्यात्र ग्रहणम् । अनेन इकण्प्र० → इक । 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) इत्यादिना पुंवद्भावः । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः ।

**[ आपूपिकम् ]** अपूपानां समूहः = आपूपिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शाष्कुलिकम् ]** 卐शष्कुलानां समूहः = शाष्कुलिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कैदारिकम् ]** केदाराणां समूहः = कैदारिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

केदारस्य त्रैरूप्यं भवति । **ण्याकञ्भ्यां बाधा मा भूदिति केदारादिकण्विधानम्, अन्यथा अचित्तद्वारेणैव सिध्यन्ति** ॥छ॥

**धेनोरनञः** ॥ ६।२।१५ ॥

**[ धेनोः ]** धेनु पञ्चमी ङसि ।

**[ अनञः ]** न नञ् = अनञ्, तस्मात् ।

**[ धैनुकम् ]** 'ट्धें पाने' (२८) धे । धे(ध)यन्ति = धेनवः । 'धेः शित्' (उणा० ७८७) नुप्र० । धेनूनां समूहः = धैनुकम् । अनेन इकण्प्र० → इक । 'ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त इकस्येतो लुक्' (७।४।७१) इलुक् । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ ।

**[ आधैनवम् ]** न धेनवोऽधेनवः । अधेनूनां समूहः = आधैवनम् । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः ।

**[ क्षौद्रकमालवकम् ]** क्षुद्रकाश्च मालवाश्च = क्षुद्रकमालवास्तेषां समूहः = क्षौद्रकमालवकम् । 'गोत्रोक्ष-वत्सोष्ट्र-वृद्धा-ऽजोरभ्र-मनुष्य-राज-राजन्य-राजपुत्रादकञ्' (६।२।१२) अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

卐 श० म० न्या० - शष्कुलीनां समूहः ।

**[ ब्राह्मणराजन्यकम् ]** ब्राह्मणाश्च राजन्याश्च = ब्राह्मणराजन्याः, तेषां समूहः = ब्राह्मणराजन्यकम् । 'गोत्रोक्ष-वत्सोष्ट्र-वृद्धा-ऽजोरभ्र०' (६।२।१२) अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

卐**[ वानहस्तिकम् ]** वनस्य हस्ती = वनहस्ती । वनहस्तिनां समूहः = वानहा(ह)स्तिकम् । इकण्प्र० → इक । 'नोऽपदस्य०' (७।४।६१) इन्लोपः ।

**[ गौधेनुकम् ]** गावश्च धेनवश्च = गोधेनवः । गोधेनूनां समूहः = गौधेनुकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त इकस्येतो लुक्' (७।४।७१) इलुक् । सि-अम् ।।छा।

## ब्राह्मण-माणव-वाडवाद् यः ।। ६।२।१६ ।।

**[ ब्राह्मणमाणववाडवात् ]** ब्राह्मणश्च माणवश्च वाडवश्च = ब्राह्मणमाणववाडवम्, तस्मात् ।

**[ यः ]** य प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[ ब्राह्मण्यम् ]** ब्राह्मणानां समूहः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ माणव्यम् ]** माणवानां समूहः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ वाडव्यम् ]** वाडवानां समूहः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।।छा।

## गणिकाया ण्यः ।। ६।२।१७ ।।

**[ गणिकायाः ]** गणिका पञ्चमी ङसि । 'आपो ङितां यै०' (१।४।१७) ङसि० → यास्० ।

**[ ण्यः ]** ण्य प्रथमा सि ।

**[ गाणिक्यम् ]** 'गणण् सङ्ख्याने' (१८७४) गण । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । अतः (४।३।८२) अलोपः । **गणयति धनागममिति गणिका** । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ० । गणिकानां समूहः = गाणिक्यम् । अनेन ण्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ ब्राह्मण्ययात्रः ]** ब्राह्मणाः प्रकृता अस्यां यात्रायाम् । 'तयोः समूहवच्च बहुषु' (७।३।३) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ब्राह्मण्य 'आत्' (२।४।१८) आप्प्र० → आ । ब्राह्मण्या यात्रा यस्य सः = ब्राह्मण्ययात्रः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) सर्वेषु पुंवद्भावः ।

**[ माणव्ययात्रः ]** माणव्या यात्रा यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[ वाडव्ययात्रः ]** वाडव्या यात्रा यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

ण्ये हि पुंवद्भावो न स्यात् यथा-

**[ गाणिक्यायात्रः ]** गाणिक्या यात्रा यस्य सः = गाणिक्यायात्रः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छा।

---

卐 बृहद्वृत्तौ - वानरहस्तिकम् ।

## केशाद्वा ॥ ६।२।१८ ॥

**[ केशात् ]** केश पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ कैश्यम्, कैशिकम् ]** केशानां समूहः = कैश्यम्-कैशिकम् । अनेन ण्यप्र० → य - अचित्तेकण् इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## वाऽश्वादीयः ॥ ६।२।१९ ॥

**[ वा ]** वा प्रथमा सि ।

**[ अश्वात् ]** अश्व पञ्चमी ङसि ।

**[ ईयः ]** ईय प्रथमा सि ।

**[ अश्वीयम्, आश्वम् ]** अश्वानां समूहः = अश्वीयम् । अनेन वा ईयप्र० । एवम् - आश्वम् । 'षष्ठ्याः समूहे' (६।२।९) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ॥छ॥

## पर्श्वा ड्वण् ॥ ६।२।२० ॥

**[ पर्श्वाः ]** पर्शू पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० । 'इवर्णा०' (१।२।२१) व० ।

**[ ड्वण् ]** ड्वण् प्रथमा सि ।

**[ पार्श्वम् ]** पर्शु । पर्शोरपत्यानि शस्त्रजीव(वि)सङ्घाः स्त्रीत्वविशिष्टा विवक्षिताः । 'पुरु-मगध-कलिङ्ग-सूरमस-द्विस्वरादण्' (६।१।११६) अण्प्र० । 'शकादिभ्यो द्रेर्लुप्' (६।१।१२०) अण्लुप् । 'उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ् ततः स्वार्थे 'पर्श्वादिरण्' (७।३।६६) अण्प्र० । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अण्लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ऊङ्निवृत्तौ पुनः ऊङ् । पर्शूनां समूहः = पार्श्वम् । अनेन ड्वण्प्र० → व । वृद्धिः आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऊलोपः ॥छ॥

## ईनोऽह्नः क्रतौ ॥ ६।२।२१ ॥

**[ ईनः ]** ईन प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अह्नः ]** अहन् पञ्चमी ङसि ।

**[ क्रतौ ]** क्रतु सप्तमी ङि ।

**[ अहीनः क्रतुः, आह्नमन्यत् ]** अहन् । अह्नां समूहेन निर्वर्त्त्यः । अनेन ईनप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । ऋ(क्र)तुनामत्वात् पुंस्त्वम् । एवम्-आह्नम् । 'श्वादिभ्योऽञ्' (६।२।२६) अञ्प्र० → अ । 'अनीनाऽदट्यह्नोऽतः' (७।४।६६) अलोपः । सि-अम् ॥छ॥

## पृष्ठाद् यः ॥ ६।२।२२ ॥

**[ पृष्ठात् ]** पृष्ठ पञ्चमी ङसि ।

**[ यः ]** य प्रथमा सि ।

**[ पृष्ठ्यः ऋतुः ]** पृष्ठानां समूहः = पृष्ठ्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ऋतु प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । पृष्ठशब्दोऽहःपर्यायः ।

**[ पार्ष्ठिकम् ]** पृष्ठानां समूहः = पार्ष्ठिकम् । 'कवचि-हस्त्यचित्ताच्चेकण्' (६।२।१४) इकण्प्र० → इक । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा॥

## **चरणाद्धर्मवत्** ॥ ६।२।२३ ॥

**[ चरणात् ]** चरण पञ्चमी ङसि ।

**[ धर्मवत् ]** धर्म इव = धर्मवत् । 'तत्र' (७।१।५३) वत्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**चरणं कठका( क )लापादिः ।**

**[ काठकम् ]** कठेन प्रोक्तं वेदं विदन्त्यधीयते वा = कठाः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । अस्य च 'प्रोक्तात्' (६।२।१२९) लुप् पूर्वस्य । 'कठादिभ्यो वेदे लुप्' (६।३।१८३) द्वितीयअण्लुप् । कठानां धर्मः = काठकम् । अनेन अकञ्प्र० → अक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कालापकम् ]** कलाप । कलापोऽस्यास्तीति कलापी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कलापिना प्रोक्तं वेदं विदन्त्यधीयते वा । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । तस्य 'प्रोक्तात्' (६।२।१२९) पूर्वस्य तु लुप् । 'कलापि०' (७।४।६२) इत्यनेन इन्लुप् । कलापानां धर्मः = कालापकम् । अनेन अकञ्प्र० → अक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ छान्दोग्यम् ]** छन्दस् कैं (३६)-'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । छन्दोगायन्ति = छन्दोगाः । 'गायोऽनुपसर्गाट्टक्' (५।१।७४) टक्प्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । छन्दोगानां धर्मः । 'छान्दोगौक्थिक-याज्ञिक-बह्वृचाच्च धर्माऽऽम्नाय-सङ्घे' (६।३।१६६) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णे०' (७।४।६८) अलुक् ।

**[ औक्थिक्यम् ]** उक्थ । उक्थमधीते = औक्थिकम् । 'याज्ञिकौक्थिक-लौकायितिकम्' (६।२।१२२) इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औक्थिकानां धर्मः । 'छान्दोगौक्थिक-याज्ञिक-बह्वृचाच्च धर्मा-ऽऽम्नाय-सङ्घे' (६।३।१६६) ञ्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ बाह्वृच्यम् ]** बहु-ऋच् । बह्व्य ऋचोऽस्य = बह्वृचः । 'नञ्-बहोर्ऋचो माणव-चरणे' (७।३।१३५) अत्(प्)-समासान्तः । बह्वृचानां धर्मः । अनेन अण्प्र०(?) । 'छान्दोगौक्थिक-याज्ञिक-बह्वृचाच्च०' (६।३।१६६) ञ्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आथर्वणम् ]** अथर्वण् - अथर्वन् इति वा प्रकृतिः । अथर्वणं - अथर्वाणं वा विदन्ति । 'न्यायादेरिकण्' (६।२।११८) इकण्प्र० । इकण्यथर्वणः (७।४।४९) इति निषेधात् नान्त्यस्वरादिलोपः । वृद्धिः आ । आथर्वणिकानां धर्मः । 'आथर्वणिकादणिकलुक् च' (६।३।१६७) अण्प्र० → अ - इकण्लुक् ।

**[ काठकम् ]** कठः पूर्ववत् साध्यः । कठानां धर्मः समूहो वा = काठकम् । 'चरणादकञ्' (६।३।१६८) अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा॥

**गो-रथ-वातात् त्रल्-कट्यलूलम्** ॥ ६।२।२४ ॥

**[ गोरथवातात् ]** गो(गौ)श्च रथश्च वातश्च = गोरथवातम्, तस्मात् ।

**[ त्रल्कट्यलूलम् ]** त्रल् च कट्यल् च ऊलश्च = त्रल्कट्यलूलम् ।

**[ गोत्रा ]** गो । गवां समूहः = गोत्रा । अनेन त्रल्प्र० → त्र । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ रथकट्या ]** रथानां समूहः = रथकट्यः(ट्या) । अनेन कट्यल्प्र० → कट्य । 'आत्' (२।४।१८) आप्प्र० → आ । लकारौ स्त्रीत्वार्थौ ।

**[ वातूलः ]** वात । वातानां समूहः = वातूलः । अनेन ऊलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

समूहत्वात् क्लीबत्वे प्राप्ते **वातूलतालेति** पदपाठात् पुंस्त्वम् (लिङ्गानुशासने पुल्लिङ्गे - ॥१३॥) ॥छ॥

**पाशाऽऽदेश्च ल्यः** ॥ ६।२।२५ ॥

**[ पाशाऽऽदेः ]** पाश आदिर्यस्य सः = पाशाऽऽदिः, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ ल्यः ]** ल्य प्रथमा सि ।

**[ पाश्या ]** 'पश बन्धने' (१७५२) पश् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । पाश्यते-बध्यते एभिः प्राणिनः इति पाशः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । पाशानां समूहः = पाश्या । अनेन ल्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ तृण्या ]** तृणानां समूहः = तृण्या । अनेन ल्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ खल्या ]** खलानां समूहः = खल्या । अनेन ल्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ गव्या ]** गो । गव्यानां(गवां) समूहः = गव्या । अनेन ल्यप्र० → य । 'य्यक्ये' (१।२।२५) अव् । 'आत्' (२।४।१८) आप्प्र० → आ ।

लकारः स्त्रीत्वार्थः ॥छ॥

**श्वादिभ्योऽञ्** ॥ ६।२।२६ ॥

**[ श्वादिभ्यः ]** श्वन् । श्वा आदिर्येषां ते = श्वादयः, तेभ्यः ।

**[ अञ् ]** अञ् प्रथमा सि ।

**[ शौवम् ]** श्वन् । शुनां समूहः = शौवम् । अनेन अञ्प्र० → अ । 'लोकात्' (१।१।३) श् पाठउ विश्लेषियइ । 'द्वारादेः' (७।४।६) औ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः ।

**[ आह्नम् ]** अहन् । अह्नां समूहः = आह्नम् । अनेन अञ्प्र० → अ । 'अनीनाऽदट्यह्नोऽतः' (७।४।६६) अलोपः । सि-अम् ।

**[ दाण्डम् ]** दण्डिन् । दण्डिनां समूहः = दाण्डम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः ।

**[ चाक्रम् ]** चक्रमस्यास्ति = चक्री । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । चक्रिणां समूहः = चाक्रम् । अनेन अञ्प्र० → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः । सि-अम् ।

अणैव सिद्धे 'नोऽपदस्य तद्धिते' (७।४।६१) इत्यन्त्यस्वरादिलोपार्थमञ्वचनम् । अन्यथा 'अणि' (७।४।५२) इत्यादिभिः सूत्रैरन्त्यस्वरादिलोपनिषेधः स्यात् । अणपवाद(:) अचित्तेकण् इत्यस्य बाधनार्थं च ॥छ॥

## खलाऽऽदिभ्यो लिन् ॥ ६।२।२७ ॥

**[ खलाऽऽदिभ्यः ]** खल आदिर्येषां ते = खलादयः, तेभ्यः ।

**[ लिन् ]** लिन् प्रथमा सि ।

लकारः स्त्रीत्वार्थः ।

**[ खलिनी, खल्या ]** खल । खलानां समूहः = खलिनी । अनेन लिन्प्र० → इन् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी । एवम्-खल्या । 'पाशाऽऽदेश्च ल्यः' (६।२।२५) ल्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । धान्यराशिः ।

**[ ऊकिनी ]** ऊकानां समूहः = ऊकिनी । अनेन लिन्प्र० → इन् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ कुटुम्बिनी ]** कुटुम्बानां समूहः = कुटुम्बिनी । अनेन लिन्प्र० → इन् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ॥छ॥

## ग्राम-जन-बन्धु-गज-सहायात् तल् ॥ ६।२।२८ ॥

**[ ग्रामजनबन्धुगजसहायात् ]** ग्रामश्च जनश्च बन्धुश्च गजश्च सहायश्च = ग्रामजनबन्धुगजसहायम्, तस्मात् ।

**[ तल् ]** तल् प्रथमा सि ।

**[ ग्रामता ]** ग्रामाणां समूहः ।

**[ जनता ]** जनानां समूहः ।

**[ बन्धुता ]** बन्धूनां समूहः ।

**[ गजता ]** गजानां समूहः ।

**[ सहायता ]** सहायानां समूहः ।

सर्वत्र अनेन तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

लकारः स्त्रीत्वार्थः ॥छ॥

## पुरुषात् कृत-हित-वध-विकारे चैयञ् ॥ ६।२।२९ ॥

**[ पुरुषात् ]** पुरुष पञ्चमी ङसि ।

**[ कृतहितवधविकारे ]** कृतश्च हितश्च वधश्च विकारश्च = कृतहितवधविकारम्, तस्मिन् ।

**[ च ]** च प्रथमा सि ।

**[ एयञ् ]** एयञ् प्रथमा सि ।

**[ पौरुषेयो ग्रन्थः ]** पुरुषेण कृतः = पौरुषेयः । अनेन एयञ्प्र० → एय । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पौरुषेयमार्हतं शासनम् ]** पुरुषाय हितं = पौरुषेयम् । अनेन एयञ्प्र० → एय । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।८) अलुक् । सि-अम् । आर्हतं शासनम् ।

**[ पौरुषेयो वधः ]** पुरुषस्य वधः = पौरुषेयो वधः । अनेन एयञ्प्र० → एय ।

**[ पौरुषेयो विकारः ]** पुरुषस्य विकारः = पौरुषेयो विकारः । अनेन एयञ्प्र० → एय । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पौरुषेयम् ]** पुरुषाणां समूहः = पौरुषेयम् । अनेन एयञ्प्र० → एय । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा॥

### विकारे ॥ ६।२।३० ॥

**[ विकारे ]** विकार सप्तमी ङि ।

**प्रत्यया भवन्ति** इत्यत्र बहुवचनात् कलेर्विकारः = कालेयः । 'कल्यग्नेरेयण्' (६।१।१७) । उत्सस्य विकारः = औत्सः । 'उत्सादेरञ्' (६।१।१९) । स्त्रीणां पुंसां वा विकारः । 'प्राग्वतः स्त्री-पुंसा०' (६।१।२५) स्त्रैणः, पौंस्न इत्याद्यपि ज्ञेयम् ।

**द्रव्यस्यावस्थान्तरं विकारः ।**

**[ आश्मनः, आश्मः ]** अश्मन् । अश्मनो विकारः = आश्मनः-आश्मः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'वाऽश्मनो विकारे' (७।४।६३) इत्यनेन विकल्पेन अनो लुप् ।

**[ भास्मनः ]** 'भसक् भर्त्सन-दीप्त्योः' सौत्रः । भसितं तत्रेति । 'मन्' (उणा० ९११) मन्प्र० । भस्मन् । भस्मनो विकारः = भास्मनः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० । 'अणि' (७।४।५२) इत्यन्त्यस्वरादिलोपाभावः । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ ।

**[ मार्त्तिकः ]** मृत् । मृदेव = मृत्तिका । 'मृदस्तिकः' (७।२।१७१) तिकप्र० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । 'आत्' (२।४।१८) आप्प्र० → आ । मृत्तिकाया विकारः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आर्धः ]** अर्धस्य विकारः = आर्धः । 'अर्धाद् यः' (६।३।६९) यप्र० प्राप्तौ अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ हालः ]** हलस्य विकारः । 'हल-सीरादिकण्' (६।३।१६१) इत्यस्य प्राप्तौ अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ ।

**[ सैरः ]** सीरस्य विकारः । 'हल-सीरादिकण्' (६।३।१६१) इत्यस्य प्राप्तौ अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ ।

卐**[ चैदः ]** चेदि । चेदीनां विकारः । राष्ट्र-क्षत्रियवाची चेदिशब्दोऽस्मात् 'काश्यादेः' (६।३।३५) इति णिकेकणोः प्राप्तौ अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ वार्जः ]** वृजि । वृजीनां विकारः = वार्जः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'वृजि-मद्राद् देशात् कः' (६।३।३८) इत्यस्य प्राप्तिः ।

**[ त्रैगर्त्तः ]** त्रिगर्त्तानां विकारः = त्रैगर्त्तः । बहुविषयत्वे 'बहुविषयेभ्यः' (६।३।४५) अकञ् । अन्यथा 'गर्त्तोत्तरपदादीयः' (६।३।५७) इत्यनयोः प्राप्तौ अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ राङ्कवः ]** 'रमिं क्रीडायाम्' (९८९) रम् । रमन्ते व्यवहारिणोऽत्र । 'कै-शी-शमि-रमिभ्यः कुः' (उणा० ७४९) कुप्र० । रङ्कूणां विकारः = राङ्कवः । 'रङ्कोः प्राणिनि वा' (६।३।१५) इत्यनेन टायनण्प्राप्तौ अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः सर्वत्र ।

'तस्येदम्' (६।३।१६०) इत्येवाणादिसिद्धावार्धादिषु विकारे अणपवादबाधनार्थं वचनम् ॥छा॥

**प्राण्यौषधि-वृक्षेभ्योऽवयवे च** ॥ ६।२।३१ ॥

**[ प्राण्यौषधिवृक्षेभ्यः ]** प्राणी च औषधिश्च वृक्षश्च = प्राण्यौषधिवृक्षाः, तेभ्यः ।

**[ अवयवे ]** अवयव सप्तमी ङि ।

**[ च ]** च प्रथमा सि ।

प्राणिभ्यः - **[ कापोतं सक्थि, कापोतं मांसम् ]** कपोतस्यावयवः = कापोतम् । कपोतस्य विकारः = कापोतम् । अनेन अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मायूरं सक्थि, मायूरं मांसम् ]** मयूरस्य विकारः = मायूरं सक्थि-मांसम् । मयूरस्यावयवः = मायूरम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । सि-अम् ।

**[ आविकं सक्थि, आविकं मांसम् ]** अवि । अवे(वि)रेव = अविकम् । 'यावादिभ्यः कः' (७।३।१५) कप्र० । अविकस्यावयवः = आविकं सक्थि । अविकस्य विकारः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । सि-अम् । मांसम् ।

औषधिभ्यः - **[ दौर्वं काण्डम्, दौर्वं भस्म ]** दूर्वा । दूर्वाया अवयवो विकारो वा = दौर्वं काण्डं - भस्म च । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ मौर्वं काण्डम्, मौर्वं भस्म ]** मूर्वन्ति ज्यां कर्तुरिति मूर्वा । 'अच्' (५।१।४९) अच्प्र० → अ । 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) दीर्घः । 'आत्' (२।४।१८) आप्प्र० → आ । मूर्वाया अवयवो विकारो

---

卐 हैमप्रकाशे - वैदः ।

वा = मौर्वं काण्डं-भस्म च । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

वृक्षेभ्यः - **[ कारीरं काण्डम्, कारीरं भस्म ]** करीरवृक्षस्यावयवो विकारो वा = कारीरं काण्डं-भस्म च । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बैल्वं काण्डम्, बैल्वं भस्म ]** बिल्वस्यावयवो विकारो वा = बैल्वं काण्डं-भस्म च । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पाटलिपुत्रकः प्राकारः ]** पाटलिपुत्रस्यावयवः = पाटलिपुत्रकः । 'रोपान्त्यात्' (६।३।४२) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तस्येदम्' (६।३।१६०) इति विवक्षायामत्र अवयवोऽपि इदमथे विवक्षितः इति भावार्थः ।

**[ पाटलिपुत्रकः( काः ) प्रासादः( दाः ) ]** पाटलिपुत्रस्य नगरस्यावयवाः = पाटलिपुत्रकाः । 'रोपान्त्यात्' (६।३।४२) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । प्रासाद प्रथमा जस् ।

इतः परं विकारे प्राण्यौषधिवृक्षेभ्योऽवयवे चेति द्वयमप्यधिक्रियते । तेनोत्तरे[ण ?] प्रत्ययाः प्राण्यौषधिवृक्षेभ्यो-ऽवयवविकारयोः अन्येभ्यस्तु विकारमात्रे भवन्तीति वेदितव्यम् । प्राणिनश्चेतनावन्तः । औषधयः फलपाकान्ताः । वृक्षाः फालवन्तः(पुष्पवन्तः) फलवन्तश्च । वृक्षविशेषत्वाद् वनस्पतिवीरुधामपि लता तामपि वृक्षग्रहणेन ग्रहणम् । **बहुवचनप्रदानात् सूत्रे प्राणिग्रहणेनैव चेतनावत्त्वेन वृक्षौषधिग्रहणे सिद्धे तदुपादानमिह शास्त्रे प्राणिग्रहणेन त्रसा एव गृह्यन्ते, न स्थावरा इति ज्ञापनार्थम्** ॥छ॥

## तालाद् धनुषि ॥ ६।२।३२ ॥

**[ तालात् ]** ताल पञ्चमी ङसि ।

**[ धनुषि ]** धनुष्(स्) सप्तमी ङि ।

दुलक्षणस्य 'दोरप्राणिनः' (६।२।४९) इत्यस्य मयटोऽपवादः ।

**[ तालं धनुः ]** तालस्य विकारः = तालम् । अनेन अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । धनुस् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ तालमयं काण्डम् ]** तालस्य विकारस्तालमयम् । 'दोरप्राणिनः' (६।२।४९) मयट्प्र० → मय । सि-अम् ॥छ॥

## त्रपु-जतोः षोऽन्तश्च ॥ ६।२।३३ ॥

**[ त्रपुजतोः ]** त्रपुश्च जतुश्च = त्रपुजतु, तस्मात् ।

**[ षः ]** ष प्रथमा सि ।

**[ अन्तश्च ]** अन्त प्रथमा सि । च प्रथमा सि ।

**[ त्रापुषम् ]** त्रपुणो विकारः = त्रापुषम् । अनेन अण्प्र० → अ - षोऽन्तश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ ।

**[ जातुषम् ]** जतुनो विकारः = जातुषम् । अनेन अण्प्र० → अ - षोऽन्तश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ ।

**अण् सिद्ध एव षागमार्थं वचनम्** ॥छ॥

**शम्या लः** ॥ ६।२।३४ ॥

**[ शम्याः ]** शमी पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० । यत्वम् ।

**[ लः ]** ल प्रथमा सि ।

**[ शामीलं भस्म, शामीली शाखा ]** 'शमू उपशमे' (१२३०) शम् । शाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'शमोऽदर्शने' (४।२।२८) ह्रस्वत्वम् । शमयति पित्तमिति शमी । 'अच्' (५।१।४९) अच्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी० → इ० । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । शम्या विकारोऽवयवो वा = शामीलम् । अनेन अण्प्र० → अ - लोऽन्तश्च । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । अग्रेतने 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छ॥

**पयो-द्रोर्यः** ॥ ६।२।३५ ॥

**[ पयोद्रोः ]** पयश्च द्रुश्च = पयोद्रु, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

पयसो विकारेऽणोऽपवादः । द्रोरेकस्वरमयटश्च ।

**[ पयस्यम् ]** पयसो विकारः = पयस्यम् । अनेन यप्र० । सि-अम् ।

**[ द्रव्यम् ]** द्रु । द्रोर्दारुणो विकारः = द्रव्यम् । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् ।

दारुशब्दस्य नपुंसकत्वात् द्रु इत्यस्यापि नपुंसकत्वं प्राप्नोति, कथं न भवति ? उच्यते-बाहुलकात् ॥छ॥

**उष्ट्रादकञ्** ॥ ६।२।३६ ॥

**[ उष्ट्रात् ]** उष्ट्र पञ्चमी ङसि ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

**[ औष्ट्रकं मांसम्, औष्ट्रिका जङ्घा ]** उष्ट्र 'जातेरयान्त-नित्यस्त्रीशूद्रात्' (२।४।५४) ङी० → ई० । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । उष्ट्रस्य उष्ट्र्या वा विकारोऽवयवो वा = औष्ट्रकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मांसम् । 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) यत्र ङी तत्र पुंवद्भावः । 'आत्' (२।४।१८) आप्प्र० → आ । जङ्घा ॥छ॥

**उमोर्णाद्वा** ॥ ६।२।३७ ॥

**[ उमोर्णात् ]** उमा च ऊर्णा च = उमोर्णम् । 'क्लीबे' (२।४।९७) ह्रस्वः । तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ औमकम्, औमम् ]** उमा - अतसी तस्या विकारोऽवयवो वा = औमकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः । एवम्-औमम् । 'प्राण्यौषधि-वृक्षेभ्यो०' (६।२।३१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

卐**[ और्णकम्, और्णः कम्बलः ]** ऊर्णाया विकारः = और्णकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । एवम् - और्णः । 'विकारे' (६।२।३०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ॥छ॥

## एण्या एयञ् ॥ ६।२।३८ ॥

**[ एण्याः ]** एणी पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० ।

**[ एयञ् ]** एयञ् प्रथमा सि ।

'प्राण्यौषधि-वृक्ष०' (६।२।३१) इत्यादिना अणोऽपवादः ।

**[ ऐणेयं मांसम्, ऐणेयी जङ्घा ]** एणी । एण्या विकारोऽवयवो वा = ऐणेयं मांसम्, ऐणेयी जङ्घा । अनेन एयञ्प्र० → एय । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् । 'अणञेयेकण्०' (२।४।२०) ङी ।

स्त्रीलिङ्गनिर्देशात् पुल्लिङ्गादणेव-

**[ ऐणं मांसम्, ऐणी जङ्घा ]** एणस्य विकारोऽवयवो वा = ऐणं मांसम्, ऐणी जङ्घा । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ॥छ॥

## कौशेयम् ॥ ६।२।३९ ॥

**[ कौशेयम् ]** कौशेय सि-अम् ।

**[ कौशेयं वस्त्रं सूत्रं वा ]** कोशस्य विकारः = कौशेयम् । अनेन एयञ्प्र० → एय । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दुकूलं वस्त्रं तस्य सूत्रं च ।

**निपातनं रूढ्यर्थम् । तेन वस्त्रसूत्राभ्यामन्यत्र भस्मादौ न भवति** ॥छ॥

## परशव्याद् यलुक् च ॥ ६।२।४० ॥

**[ परशव्यात् ]** परशव्य पञ्चमी ङसि ।

**[ यलुक् ]** यस्य लुक् = यलुक् । प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[पारशवम्]** पर 'श्रुंट् श्रवणे' (१२९६) श्रु । ('शृश् हिंसायाम्' (१५३१) शृ) । परान् शृणाति = परशवि(शुः) । 'पराङ्भ्यां शृ-खनिभ्यां डित्' (उणा० ७४२) डिद् उप्र० । परशवे इदं = परशव्यम् । 'उवर्ण-युगादेर्यः' (७।१।३०) यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । परशव्यस्यायसो विकारः = पारशवम् । अनेन अण्प्र० → अ - सस्वरो यलोपश्च । वृद्धिः । सि-अम् ।

卐 हैमप्रकाशे - और्णकः ।

अण् सिद्ध एव, यलुगर्थं वचनम् । अथेह यग्रहणं किमर्थम् ? तदभावेऽपि 'अवर्णेवर्णस्य' (७।४।६८) इत्यन्तलुक्सिद्धौ लुग्ग्रहणात् अन्त्याभावेऽन्त्यसदेशस्यापि यकारस्य लुग् भविष्यति । सत्यम् - यग्रहणं यशब्दस्य समुदायस्यैव लोपार्थम् । तेनोत्तरसूत्रे 'स्वरस्य परे प्राग्विधौ' (७।४।११०) इत्यस्यानुपस्थानाद्यकारलोपे 'अवर्णेवर्णस्य' (७।४।६८) इतीकारलोपो भवति ॥छ॥

**कंसीयाञ्ञ्यः** ॥ ६।२।४१ ॥

**[ कंसीयाञ्ञ्यः ]** कंसीय पञ्चमी ङसि । ञ्य प्रथमा सि । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'तृतीयस्य०' (१।३।१) द० → न० । 'तवर्गस्य०' (१।३।६०) न० → ञ० ।

**[ कांस्यम् ]** कंस । कंसाय इदं = कंसीयम् । 'परिणामिनि तदर्थे' (७।१।४४) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कंसीयस्य विकारः = कांस्यम् । अनेन ञ्यप्र० - ईयस्य यलोपश्च सस्वरः । 'अवर्णेवर्णस्य' (७।४।६८) ईकारलोपः । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । सि-अम् ॥छ॥

**हेमार्थान्माने** ॥ ६।२।४२ ॥

**[ हेमार्थात् ]** हेम हेमो हेमं वा अर्थो यस्य सः = हेमार्थः, तस्मात् ।

**[ माने ]** मान सप्तमी ङि ।

'दोरप्राणिनः' (६।२।४९) इत्यनेन दुसंज्ञकस्य मयटोऽपवादः ।

**[ हाटको निष्कः, हाटकं कार्षापणम् ]** 'हट दीप्तौ' (१८८) हट् । हटतीति हाटकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । हाटकस्य विकारः = हाटकः । अनेन अञ्(ण्)प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अष्टोत्तरपलशतं निष्क उच्यते । एवम्-हाटकं कार्षापणम् ।

**[ जातरूपो निष्कः, जातरूपं कार्षापणम् ]** जातरूपस्य विकारः = जातरूपः । अनेन अण्प्र० → अ । वृद्धिः । निष्कः ।

**[ हैमो निष्कः, हैमं कार्षापणम् ]** हेमन् । हेम्नो विकारः = हैमः । 'हेमाऽऽदिभ्योऽञ्' (६।२।४५) अञ्प्र० → अ । वृद्धिः ऐ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः ।

यद्यनेकाण् स्यात् तदा 'अणि' (७।४।५२) इत्यन्त्यस्वरादिलुगभावः स्यात् । **अर्थग्रहणं स्वरूपविधिव्युदासार्थम् ।**

**[ हाटकमयी यष्टिः ]** हाटकस्य विकारोऽवयवो वा = हाटकमयी । 'दोरप्राणिनः' (६।२।४९) मयट्प्र० → मय । 'अणञेयेकण्०' (२।४।२०) ङी । यष्टि प्रथमा सि ॥छ॥

**द्रोर्वयः** ॥ ६।२।४३ ॥

**[ द्रोः ]** द्रु पञ्चमी ङसि ।

**[ वयः ]** वय प्रथमा सि ।

'पयो-द्रोर्यः' (६।२।३५) इत्यस्यापवादः ।

**[ द्रुवयं मानम् ]** द्रु । द्रोर्विकारः = द्रुवयम् । अनेन वयप्र० । सि-अम् । मानम् ॥छ॥

## मानात् क्रीतवत् ॥ ६।२।४४ ॥

**[ मानात् ]** मान पञ्चमी ङसि ।

**[ क्रीतवत् ]** क्रीत इव = क्रीतवत् । 'तत्र' (७।१।५३) वत्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**मीयते-परिच्छिद्यते येन तन्मानम् ।** 'अनट्' (५।३।१२४) अनट्प्र० → अन । इयत्तापरिच्छित्तिहेतुः संख्यादिरुच्यते ।

**[ शत्यम्, शतिकम् ]** शतेन क्रीतं = शत्यम् । एवम्-शतिकम् । 'शतात् केवलादतस्मिन् येकौ' (६।४।१३१) य-इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शत्यः, शतिकः ]** शतस्य विकारः = शत्यः । एवम्-शतिकः । 'शतात् केवलादतस्मिन् येकौ' (६।४।१३१) य-इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ साहस्रः ]** सहस्र । सहस्रेण क्रीतः = साहस्रः । 'सहस्र-शतमानादण्' (६।४।१३६) अण्प्र० → अ । वृद्धिः ।

**[ नैष्किकः ]** निष्केण क्रीतः = नैष्किकः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ द्विशतः, त्रिशतः ]** द्वाभ्यां शताभ्यां क्रीतः = द्विशतः । त्रिभिः शतैः क्रीतः = त्रिशतः । 'शताद् यः' (६।४।१४५) इति विकल्पेन यः तस्य विधानसामर्थ्यान्न लुप् । पक्षे-'सङ्ख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) कलुप् । एवम्-द्वयोः शतयोर्विकारः । शेषं पूर्ववत् ।

**[ द्विसहस्रः, द्विसाहस्रः ]** द्वाभ्यां सहस्राभ्यां क्रीतः । यद्वा द्वयोः सहस्रयोर्विकारः । 'सहस्र-शतमानादण्' (६।४।१३६) अण्प्र० । 'नवाऽणः' (६।४।१४२) विकल्पेन अण्लुप् । यत्र अण् तिष्ठति तत्र 'मान-संवत्सरस्याशाण-कुलिजस्याऽनाम्नि' (७।४।१९) उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्विनिष्कः, द्विनैष्किकः ]** द्वाभ्यां निष्काभ्यां क्रीतः । यद्वा द्वयोर्निष्कयोर्विकारः = द्विनिष्कः - द्विनैष्किकः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'द्वि-त्रि-बहोर्निष्क-विस्तात्' (६।४।१४४) विकल्पेन इकण्लुप् । यत्र तिष्ठति तत्र 'मान-संवत्सरस्याशाण-कुलिजस्याऽनाम्नि' (७।४।१९) इति उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।।छ।।

## हेमाऽऽदिभ्योऽञ् ॥ ६।२।४५ ॥

**[ हेमाऽऽदिभ्यः ]** हेम आदिर्येषां ते = हेमाऽऽदयः, तेभ्यः ।

**[ अञ् ]** अञ् प्रथमा सि ।

**[ हैमं शरासनम्, हैमी यष्टिः ]** हेम्नो विकारः = हैमम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । सि-अम् । धनुः । हैमीत्यत्र 'अणञेयेकण्-नञ्०' (२।४।२०) ङी । यष्टि प्रथमा सि ।

**[ राजतः ]** रजत । रजतस्य विकारः = राजतः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बार्हिण ]** 'बृहू शब्दे च' (५५९) बृह् । बर्हतीति । 'फल-बर्हाच्चेनः' (७।२।१३) इनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । बर्ही एव = बार्हिणः । स्वार्थे अण्प्र० → अ । वृद्धिः आ । 'र-षृवर्णान्नो ण एकपदेऽनन्त्यस्या-ऽल-च-ट-तवर्ग-श-सान्तरे' (२।३।६३) न० → ण० ।

बहुवचनमाकृतिगणार्थम्-तेन **काञ्चनी वासयष्टि**रित्यादि सिद्धम् । 'हेमार्थान्माने' (६।२।४२) इत्यस्याणो बाधनार्थं वचनम् ॥छ॥

**अभक्ष्या-ऽऽच्छादने वा मयट्** ॥ ६।२।४६ ॥

**[ अभक्ष्याऽऽच्छादने ]** भक्ष्यश्च आच्छादनं च = भक्ष्याऽऽच्छादनम् । न भक्ष्याऽऽच्छादनम् = अभक्ष्याऽऽच्छादनम्, तस्मिन् ।

**[ वा ]** वा प्रथमा सि ।

**[ मयट् ]** मयट् प्रथमा सि ।

**[ भस्ममयम्, भास्मनम् ]** भस्मन् । भस्मनो विकारः = भस्ममयम् । अनेन मयट्प्र० → मय । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । एवम्-भास्मनम् । 'विकारे' (६।२।३०) अण्प्र० → अ । वृद्धिः ।

**[ अश्ममयम्, आश्मम् ]** अश्मन् । अश्मनो विकारः = अश्ममयम् । अनेन मयट्प्र० → य । एवम्-आश्मम् । 'विकारे' (६।२।३०) अण्प्र० → अ । 'वाऽश्मनो विकारे' (७।४।६३) अन्त्यस्वरादिलोपः - अन्लुबित्यर्थः ।

**[ कपोतमयम्, कापोतम् ]** कपोतस्य विकारोऽवयवो वा = कपोतमयम् । अनेन मयट्प्र० → मय । एवम्-कापोतम् । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ दूर्वामयम्, दौर्वम् ]** दूर्वाया विकारोऽवयवो वा = दूर्वामयम् । अनेन मयट्प्र० → मय । एवम्-दौर्वम् । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ मूर्वामयम्, मौर्वम् ]** मूर्वाया विकारोऽवयवो वा = मूर्वामयम् । अनेन मयट्प्र० → मय । एवम्-मौर्वम् । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ करीरमयम्, कारीरम् ]** करीरस्य विकारोऽवयवो वा = करीरमयम् । अनेन मयट्प्र० → मय । एवम्-कारीरम् । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शिरीषमयम्, शैरीषम् ]** शिरीषस्य विकारोऽवयवो वा = शिरीषमयम् । अनेन मयट्प्र० → मय । एवम्-शैरीषम् । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मौद्गः सूपः ]** मुद्गस्य विकारोऽवयवो वा = मौद्गः सूपः - दालिरुच्यते । 'विकारे' (६।२।३०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कार्पासः पटः ]** कर्पासस्य विकारोऽवयवो वा = कार्पासः पटः । 'विकारे' (६।२।३०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ तालमयं धनुः ]** तालस्य विकारः = तालमयं धनुः ।

**[ त्रपुमयम् ]** त्रपुणो विकारः = त्रपुमयम् ।

**[ जतुमयम् ]** जतुनो विकारः = जतुमयम् ।

**[ शमीमयम् ]** शम्याः विकारः = शमीमयम् ।

**[ पयोमयम् ]** पयसो विकारः = पयोमयम् ।

**[ द्रुमयम् ]** द्रोर्दारुणो विकारः = द्रुमयम् ।

**[ उष्ट्रमयम् ]** उष्ट्रस्य विकारः = उष्ट्रमयम् ।

**[ उमामयम् ]** उमाया विकारः = उमामयम् ।

**[ ऊर्णामयम् ]** ऊर्णाया विकारः = ऊर्णामयम् ।

**[ एणीमयम् ]** एण्या विकारः = एणीमयम् ।

**[ कोशमयम् ]** कोशस्य विकारः = कोशमयम् ।

**[ परशव्यमयम् ]** परशव्य । परशव्यस्यायसो विकारः = परशव्यमयम् ।

**[ कंसीयमयम् ]** कंसीयस्य विकारः = कंसीयमयम् ।

**[ शतमयम् ]** शतस्य विकारः = शतमयम् । अनेन मयट्प्र० → मय सर्वत्र । सि-अम् ॥छा॥

**शर-दर्भ-कूदी-तृण-सोम-वल्वजात्** ॥ ६।२।४७ ॥

**[ शरदर्भकूदीतृणसोमवल्वजात् ]** शरश्च दर्भश्च कूदी च तृणं च सोमश्च वल्वजश्च = शरदर्भकूदीतृणसोमवल्वजम्, तस्मात् ।

ननूत्तरेण सह एकयोगः कथं न क्रियते ? उच्यते - एकयोगे शरदर्भादीनामदुसंज्ञकानां साहचर्यादेकस्वराणामपि अदुसंज्ञकानां स्यात्, ततो वाङ्मयमित्यादि न स्यात् ।

**[ शरमयम् ]** शरस्य विकारः = शरमयम् ।

**[ दर्भमयम् ]** दर्भस्य विकारः = दर्भमयम् ।

**[ कूदीमयम् ]** कु 'डुदांग्क् दाने' (११३८) दा । कुवं शब्दं ददाति पाट्यमाना । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । कूद्यास्तृणविशेषस्य विकारोऽवयवो वा = कूदीमयम् ।

**[ तृणमयम् ]** तृणस्य विकारोऽवयवो वा = तृणमयम् ।

**[ सोममयम् ]** सोमस्य विकारोऽवयवो वा = सोममयम् ।

**[ वल्वजमयम् ]** वल्वजस्य विकारोऽवयवो वा = वल्वजमयम् । अनेन मयट्प्र० → मय सर्वत्र । सि-अम् ॥छा॥

**एकस्वरात्** ॥ ६।२।४८ ॥

**[ एकस्वरात् ]** एकः स्वरो यस्य सः = एकस्वरस्तस्मात् ।

**[ वाङ्मयम् ]** वाच् । वाचो विकारोऽवयवो वा = वाङ्मयम् । अनेन मयट्प्र० → मय । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । 'प्रत्यये च' (१।३।२) ग० → ङ० ।

**[ त्वङ्मयम् ]** त्वचो विकारोऽवयवो वा = त्वङ्मयम् । अनेन मयट्प्र० → मय । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । 'प्रत्यये च' (१।३।२) ग० → ङ० ।

**[ मृन्मयम् ]** मृत् । मृदो विकारोऽवयवो वा = मृन्मयम् । अनेन मयट्प्र० → मय । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'प्रत्यये च' (१।३।२) द० → न० ।

**[ स्रुङ्मयम् ]** स्रुचो विकारोऽवयवो वा = स्रुङ्मयम् । अनेन मयट्प्र० → मय । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । 'प्रत्यये च' (१।३।२) ग० → ङ० ।

**[ गीर्मयम् ]** गिर् मांडणी । गिरो विकारोऽवयवो वा = गीर्मयम् । अनेन मयट्प्र० → मय । 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) दीर्घः । ('पदान्ते' (२।१।६४) दीर्घः) । सि-अम् ।

**[ धूर्मयम् ]** धुर् मांडणी । धुरो विकारोऽवयवो वा = धूर्मयम् । अनेन मयट्प्र० → मय । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । ('पदान्ते' (२।१।६४) दीर्घः) । सि-अम् ॥छ॥

## दोरप्राणिनः ॥ ६।२।४९ ॥

**[ दोः ]** दु पञ्चमी ङसि ।

**[ अप्राणिनः ]** न प्राणी = अप्राणी, तस्य (तस्मात्) ।

**[ आम्रमयम् ]** आम्रस्य विकारोऽवयवो वा = आम्रमयम् ।

**[ शा( सा )लमयम् ]** सालस्य विकारोऽवयवो वा = सालमयम् ।

**[ शाकमयम् ]** शाकस्य विकारोऽवयवो वा = शाकमयम् ।

**[ काशमयम् ]** काशस्य विकारोऽवयवो वा = काशमयम् ।

अमीषु उदाहरणेषु 'वृद्धिर्यस्य स्वरेष्वादिः' (६।१।८) इत्यनेन दुसंज्ञा, तस्याः फलमनेन मयट्प्र० → मय ।

**[ तन्मयम् ]** तस्य विकारोऽवयवो वा = तन्मयम् ।

**[ यन्मयम् ]** यस्य विकारोऽवयवो वा = यन्मयम् । अमुयोरुदाहरणयोः 'त्यदादिः' (६।१।७) इत्यनेन दुसंज्ञा, तस्याः फलमनेन मयट्प्र० → मय । 'धुटस्तृतीयः' (२।१।७६) द० → द० । 'प्रत्यये च' (१।३।२) द० → न० ।

**[ शौवाविधम्, श्वाविन्मयम् ]** श्वन् 'व्यधंच् ताडने' (११५७) व्यध् । श्वानं विध्यति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ज्या-व्यधः क्ङिति' (४।१।८१) य्वृत् य० → इ० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । 'गति-कारकस्य नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनौ क्वौ' (३।२।५८) दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । श्वाविधो विकारोऽवयवो वा = शौवाविधम् । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० → अ । 'लोकात्' (१।१।३) श् पाठउ विश्लेषियइ । 'द्वारादेः' (७।४।६) औ । एवम्-श्वाविन्मयम् । 'अभक्ष्या-ऽऽच्छादने वा मयट्' (६।२।४६) मयट्प्र० → मय ।

**[ चाषम्, चाषमयम् ]** चाषस्य विकारोऽवयवो वा = चाषम् । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० → अ । 'वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-चाषमयम् । 'अभक्ष्या०' (६।२।४६) मयट्प्र० → मय ।

**[ भासम्, भासमयम् ]** भासस्य विकारोऽवयवो वा भासम् । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० → अ । 'वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-भासमयम् । 'अभक्ष्या०' (६।२।४६) मयट्प्र० → मय ॥छ॥

**गोः पुरीषे** ॥६।२।५० ॥

**[ गोः ]** गो पञ्चमी ङसि । 'एदोद्भ्यां०' (१।४।३५) ङसि० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ पुरीषे ]** पुरीष सप्तमी ङि ।

**[ गोमयम् ]** गोः पुरीषं = गोमयम् । अनेन मयट्प्र० → मय । सि-अम् ।

**[ गव्यं पयः, गव्यं सक्थि ]** गोर्विकारोऽवयवो वा = गव्यं पयः, गव्यं सक्थि । 'गोः स्वरे यः' (६।१।२७) यप्र० । 'य्यक्ये' (१।२।२५) अव । सि-अम् ।

यद्यपि पुरीषं गोविकारत्वेन न प्रसिद्धं तथापि **दोष-धातु-मलमूलं**-दोषाः-वात-पित्त-कफाः, धातवः-रस-रक्त-मज्जादयः, मलानि-मूत्र-पुरीषादीनि तेषां समाहारात् दोषधातुमलम् । मूलं शरीरमिति विवक्षायां तत्र तिष्ठति । 'स्था-पा०' (५।१।१४२) कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । तत्स्थस्य भावः = तात्स्थ्यम् । 'पति-राजान्त-गुणाङ्ग-राजादिभ्यः कर्मणि च' (७।४।६०) ट्यण्प्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तस्मात् - शरीरवत् व्यवहारः = **तात्स्थ्यात् तद्वदुपचार** इति गोः पुरीषं पयश्च विकारो भवति ।

'एकस्वरात्' (६।२।४८) इत्येव सिद्धे पुरीषे नियमार्थं वचनम् ॥छ॥

**व्रीहेः पुरोडाशे** ॥ ६।२।५१ ॥

**[ व्रीहेः ]** व्रीहि पञ्चमी ङसि ।

**[ पुरोडाशे ]** पुरोडाश सप्तमी ङि ।

**[ व्रीहिमयः पुरोडाशः ]** व्रीहि । व्रीहेर्विकारः = व्रीहिमयः । अनेन मयट्प्र० → मय । प्रथमा सि । पुरोडाशः - पृष्टपिण्ड इत्यर्थः । पुरस् 'दाशृग् दाने' (९२२) दाश् । पुरो दाश्यते = पुरोडाशः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'पृषोदरादयः' (३।२।१५५) पुरोडाशनिपातः ।

**[ व्रैह ओदनः, व्रैहं भस्म ]** व्रीहेर्विकारोऽवयवो वा = व्रैह ओदनः, व्रैहं भस्म । 'विकारे' (६।२।३०) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ॥छ॥

**तिल-यवादनाम्नि** ॥ ६।२।५२ ॥

**[ तिलयवात् ]** तिलश्च यवश्च = तिलयवम्, तस्मात् ।

**[ अनाम्नि ]** न नाम = अनाम, तस्मिन् ।

**[ तिलमयम् ]** तिलानां विकारोऽवयवो वा = तिलमयम् । अनेन मयट्प्र० → मय । सि-अम् ।

**[ यवमयम् ]** यवानां विकारोऽवयवो वा = यवमयम् । अनेन मयट्प्र० → मय । सि-अम् ।

**[ तैलम् ]** तिलानां विकारः = तैलम् । 'विकारे' (६।२।३०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ यावकः ]** यवानां विकारः = यावः । 'विकारे' (६।२।३०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । याव एव = यावकः । स्वार्थे कप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छ।।

**पिष्टात्** ।। ६।२।५३ ।।

**[ पिष्टात् ]** पिष्ट पञ्चमी ङसि ।

**[ पिष्टमयम् ]** पिष्टस्य विकारः = पिष्टमयम् । अनेन मयट्प्र० → मय । सि-अम् ।।छ।।

**नाम्नि कः** ।। ६।२।५४ ।।

**[ नाम्नि ]** नामन् सप्तमी ङि ।

**[ कः ]** क प्रथमा सि ।

**[ पिष्टिका ]** पिष्टस्य विकारः = पिष्टिका । अनेन कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ० ।।छ।।

**ह्योगोदोहादीनञ् हियङ्गुश्चास्य** ।। ६।२।५५ ।।

**[ ह्योगोदोहात् ]** गवां दोहः = गोदोहः । ह्योऽनन्तरातीते दिने गोदोहः = ह्योगोदोहस्तस्मात् ।

**[ ईनञ् ]** ईनञ् प्रथमा सि ।

**[ हियङ्गुः ]** हियङ्गु प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ अस्य ]** इदम् षष्ठी ङस् ।

**[ हैयङ्गवीनं नवनीतं घृतं वा ]** 'दुहींक् क्षरणे' (११२७) दुह् । दुह्यते = दोहः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । ह्योगोदोहस्य विकारः = हैयङ्गवीनम् । अनेन ईनञ्प्र० → ईन- ''हियङ्गु'' आदेशश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् । नवनीतं घृतं वा ।

**[ ह्यौगोदोहं तक्रम् ]** ह्योगोदोहस्य विकार इदमुदश्वित् तक्रं = ह्यौगोदोहं तक्रम् । 'विकारे' (६।२।३०) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । उदक 'ट्वोश्वि गति-वृद्ध्योः' (९९७) श्वि । उदकेन श्वयति-वर्धते = उदश्वित् । उदकात् 'श्वेर्डित्' (उणा० ८८८) डिद् इत्प्र० - उदश्वित् निपातः ।।छ।।

**अपो यञ् वा** ।। ६।२।५६ ।।

**[ अपः ]** अप् पञ्चमी ङसि ।

**[ यञ् ]** यञ् प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ आप्यम्, अम्मयम् ]** 'आप्लृंट् व्याप्तौ' (१३०७) आप् । आप्यन्ते तृषार्त्तैरित्यापः । 'आपः क्विप् ह्रस्वश्च' (उणा० ९३१) क्विप्प्र० - अप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अपां विकारः = आप्यम् । अनेन यञ्प्र० →

य । एवम्-अम्मयम् । 'एकस्वरात्' (६।२।४८) मयट्प्र० → मय । 'धुटस्तृतीयः' (२।१।७६) प० → ब० । 'प्रत्यये च' (१।३।२) ब० → म० । सि-अम् ।।छ।।

## लुब्बहुलं पुष्प-मूले ॥ ६।२।५७ ॥

**[ लुप् ]** लुप् प्रथमा सि ।

**[ बहुलम् ]** बहुल 'क्रियाविशेषणात्' (२।२।४१) अम् ।

**[ पुष्पमूले ]** पुष्पं च मूलं च = पुष्पमूलम्, तस्मिन् ।

**[ मल्लिका ]** मल्लिकाया विकारोऽवयवो वा पुष्पं = मल्लिका । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० । अनेन लुप् ।

**[ यूथिका ]** यूथिकाया विकारोऽवयवो वा पुष्पं = यूथिका । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० । 'अभक्ष्या-ऽऽच्छादने वा मयट्' (६।२।४६) मयट्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) आप्निवृत्तौ पुनरेव आप् ।

**[ नवमालिका ]** पुष्पजातिः ।

**[ मालती ]** मालत्या विकारोऽवयवो वा = मालती । 'दोरप्राणिनः' (६।२।४९) मयट्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तौ पुनरेव 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी ।

**[ पाटलम्, पाटला वा ]** पाटल 'नवा शोणादेः' (२।४।३१) ङी । पाटल्या पाटलाया वा विकारोऽवयवो वा पुष्पं = पाटलम् । 'दोरप्राणिनः' (६।२।४९) मयट्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः । सि-अम् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कुन्दम् ]** कुन्दस्य विकारोऽवयवो वा पुष्पं = कुन्दम् ।

**[ सिन्दुवारम् ]** सिन्दुवारस्य विकारोऽवयवो वा पुष्पं = सिन्दुवारम् ।

**[ करीरम् ]** करीरस्य विकारोऽवयवो वा पुष्पं = करीरम् ।

**[ अशोकम् ]** अशोकस्य विकारोऽवयवो वा पुष्पम् = अशोकम् ।

**[ चम्पकम् ]** चम्पकस्य विकारोऽवयवो वा पुष्पं = चम्पकम् ।

**[ कर्णिकारम् ]** कर्णिकारस्य विकारोऽवयवो वा पुष्पं = कर्णिकारम् ।

**[ कोविदारम् ]** कोविदारस्य विकारोऽवयवो वा पुष्पं = कोविदारम् ।

**[ विदारी ]** विदार 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । विदार्या विकारोऽवयवो वा मूलं = विदार(री) । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तौ 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी ।

**[ अंशुमती ]** अंशु । अंशु विद्यते (अंशुर्विद्यते) यस्यां सा = अंशुमती । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'नोर्म्यादिभ्यः' (२।१।९९) म० → व० न भवति । अंशुमत् 'अधातूदृदितः' (२।४।२) ङी । अंशुमत्या विकारोऽवयवो वा = अंशुमती । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः । 'अधातूदृदितः' (२।४।२) ङी ।

**[ बृहती ]** बृहत् 'अधातूदृदितः' (२।४।२) ङी । बृहत्या विकारोऽवयवो वा । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः । 'अधातूदृदितः' (२।४।२) ङी ।

**[ हरिद्रा ]** हरिद्राया विकारोऽवयवो वा = हरिद्रा । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) आप्निवृत्तिः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ माधवी ]** मधु । मधौ पुष्यति = माधवी । 'साधु-पुष्यत्-पच्यमाने' (६।३।११७) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी । माधव्या विकारः = माधवी । 'दोरप्राणिनः' (६।२।४९) मयट्प्र० → मय । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः । पुनरेव 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

**[ मुस्ता ]** मुस्ताया विकारः । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० । अनेन लुप् ।

**[ वारणानि ]** वरु(र)णस्य पुष्पाणि = वारणानि । 'विकारे' (६।२।३०) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ ऐरण्डानि ]** एरण्डस्य मूलानि = ऐरण्डानि । अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ बैल्वानि ]** बिल्वस्य मूलानि = बैल्वानि । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ शिरीषाणि, शैरीषाणि ]** शिरीषस्य विकारोऽवयवो वा पुष्पाणि = शिरीषाणि-शैरीषाणि । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० । अनेन विकल्पेन लुप् । द्वितीये 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ ह्रीबेराणि, ह्रैबेराणि ]** ह्रीबेरस्य विकारोऽवयवो वा = ह्रीबेराणि । 'विकारे' (६।२।३०) अण्प्र० → अ । अनेन विकल्पेन लुप् । द्वितीये 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ आमलकी ]** आमलकस्य विकारो वृक्षः = आमलकी । 'दोरप्राणिनः' (६।२।४९) मयट्प्र० । अनेन लुप् । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी ।

**[ बदरी ]** बदरस्य विकारो वृक्षः = बदरी । 'दोरप्राणिनः' (६।२।४९) मयट्प्र० । अनेन लुप् । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी ।

**[ व्रीहिः ]** व्रीहेर्विकारः स्तम्बः = व्रीहिः । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० । अनेन लुप् ॥छ॥

**फले** ॥ ६।२।५८ ॥

**[ फले ]** फल सप्तमी ङि ।

**[ आमलकम् ]** वृक्षेऽर्थे नित्यस्त्रीलिङ्गोऽतो 'जातेरयान्त०' (२।४।५४) इति ङी न प्राप्नोति, अतो गौरादौ पाठादेषां ङी । आमलक 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । आमलक्या विकारोऽवयवो वा फलम् = आमलकम् । विकारे अण्प्र० (मयट्प्र०) । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः । सि-अम् ।

**[ बदरम् ]** वि(ब)दर्या विकारः फलं = बदरम् । विकारे अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विपस्तद्धित-लुक्यगोणी-सूच्योः' (२।४।९५) ङीनिवृत्तिः । सि-अम् ।

**[ कुवलम् ]** कुवल 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । कुवल्या विकारः फलं = कुवलम् । विकारे अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः । सि-अम् ।

**[ भल्लातकम् ]** भलि (८१२) - 'भल्लि परिभाषण-हिंसा-दानेषु' (८१३) भल्ल् । भल्लते इति । 'चण्डि-भल्लिभ्यामातकः' (उणा० ८२) आतकप्र० । भल्लातकनिपात्यते । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । भल्लातक्या विकारोऽवयवो वा = भल्लातकम् । 'दोरप्राणिनः' (६।२।४९) मयट्प्र० । अनेन लुप् ।

**[ व्रीहिः ]** व्रीहेर्विकारः स्तम्बः = व्रीहिः । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० । अनेन लुप् ।

**[ यवः ]** यवानां विकारः स्तम्बः = यवः । 'तिल-यवादनाम्नि' (६।२।५२) मयट्प्र० । अनेन लुप् ।

**[ मुद्गः ]** मुद्गानां विकारः । 'दोरप्राणिनः' (६।२।४९) मयट्प्र० । अनेन लुप् ।

**[ माषः ]** माषाणां विकारः । 'दोरप्राणिनः' (६।२।४९) मयट्प्र० । अनेन लुप् ।

**[ गोधूमः ]** गोधूमानां विकारः । 'दोरप्राणिनः' (६।२।४९) मयट्प्र० । अनेन लुप् ।

**[ निष्पावः ]** निष्पावस्य विकारः = निष्पावः । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० । अनेन लुप् ।

**[ तिलः ]** तिलानां विकारः = तिलः । 'तिल-यवादनाम्नि' (६।२।५२) मयट्प्र० । अनेन लुप् ।

**[ कुलत्थः ]** कुलत्थस्य विकारः = कुलत्थः । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० । अनेन लुप् ।

**[ हरीतकी ]** हरीतक्या विकारोऽवयवो वा फलं = हरीतकी ।

**[ पिप्पली ]** पिप्पली । पिप्पल्या विकारोऽवयवो वा फलं = पिप्पली ।

**[ कोशातकी ]** कोशातक्या विकारोऽवयवो वा फलं = कोशातकी ।

**[ श्वेतपाकी ]** श्वेतपाक्या विकारोऽवयवो वा फलं = श्वेतपाकी ।

**[ अर्जुनपाकी ]** अर्जुनपाक्या विकारोऽवयवो वा फलं = अर्जुनपाकी ।

**[ कर्कटी ]** कर्कट्या विकारोऽवयवो वा फलं = कर्कटी ।

**[ नखरजनी ]** नख 'रञ्जीं रागे' (८९६) रञ्ज् । नखा रज्यन्ते यया = नखरजनी । 'तुदादि-वृजि-रञ्जि-निधाभ्यः कित्' (उणा० २७३) किद्० अनप्र० । हरीतक्यादिसर्वेषु 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । नखरजन्या विकारोऽवयवो वा = नखरजनी ।

**[ शष्कण्डी ]** शष्कण्ड्या विकारोऽवयवो वा = शष्कण्डी ।

**[ दण्डी ]** दण्ड्या विकारोऽवयवो वा फलं = दण्डी ।

**[ दोडी ]** दोड्या विकारोऽवयवो वा फलं = दोडी ।

**[ दाडी ]** दाड्या विकारोऽवयवो वा फलं = दाडी । 'प्राण्यौषधि-वृक्षेभ्यो०' (६।२।३१) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः । पुनरेव ङी । एतेषु उदाहरणेषु हरीतक्यादिशब्दः फले वर्त्तमानः नित्यं स्त्री गौरादित्वात्, दाडी वृक्षे तु त्रिलिङ्गः । सर्वेषु 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी ।

**[ पथ्या ]** पथ्याया विकारोऽवयवो वा = पथ्या ।

**[ अम्लिका ]** अम्लिकाया विकारोऽवयवो वा = अम्लिका ।

**[ चिञ्चा ]** चिञ्चाया विकारोऽवयवो वा = चिञ्चा ।

**[ द्राक्षा ]** द्राक्षाया विकारोऽवयवो वा = द्राक्षा ।

**[ मृद्वीका ]** मृद्वीकाया विकारोऽवयवो वा फलं = मृद्वीका ।

**[ कणा ]** कणाया विकारोऽवयवो वा = कणा ।

**[ वला ]** वलाया विकारोऽवयवो वा फलं = वला ।

**[ एला ]** एलाया विकारोऽवयवो वा = एला ।

**[ शाला ]** शालाया विकारोऽवयवो वा फलं = शाला ।

**[ काला ]** कालाया विकारोऽवयवो वा फलं = काला ।

**[ गर्गरिका ]** गर्गरिकाया विकारोऽवयवो वा फलं = गर्गरिका ।

**[ कण्टकारिका ]** कण्टकारिकाया विकारोऽवयवो वा फलं = कण्टकारिका ।

**[ शेफालिका ]** शेफालिकाया विकारोऽवयवो वा फलं = शेफालिका । 'विकारे' (६।२।३०) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) आप्निवृत्तिः । पुनरेव 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ ओषधिः ]** ओषधेर्विकारः फलम् = ओषधिः ।

**[ कर्कारुः ]** कर्कारोर्विकारः फलं = कर्कारुः । विकारे अण्प्र० । अनेन लुप् ॥छा॥

**प्लक्षाऽऽदेरण्** ॥ ६।२।५९ ॥

**[ प्लक्षाऽऽदेः ]** प्लक्ष आदिर्यस्य सः = प्लक्षाऽऽदिः, तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ प्लाक्षम् ]** प्लक्षस्य विकारोऽवयवो वा फलं = प्लाक्षम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ नैयग्रोधम् ]** न्यग्रोध । न्यग्रोधस्य विकारोऽवयवो वा फलं = नैयग्रोधम् । अनेन अण्प्र० । 'लोकात्' (१।१।३) न् पाठउ विश्लेषियइ । 'न्यग्रोधस्य केवलस्य' (७।४।७) इति ऐ - न्य० → नैय० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा॥

**जम्ब्वा वा** ॥ ६।२।६० ॥

**[ जम्ब्वाः ]** जम्बू पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० । 'इवर्णादेरस्वे स्वरे०' (१।२।२१) व० ।

**[ वा ]** वा प्रथमा सि ।

**[ जाम्बवम्, जम्बु, जम्बूः ]** जम्बू । जम्ब्वा विकारोऽवयवो वा फलं = जाम्बवम् । अनेन अण्प्र० । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् । पक्षे-'क्लीबे' (२।४।९७) ह्रस्वत्वम्-जम्बु । जम्बू 'प्राण्यौषधि०' (६।२।३१) अण्प्र० । अथवा 'अभक्ष्या-ऽऽच्छादने वा मयट्' (६।२।४६) मयट्प्र० । 'फले' (६।२।५८) लुप् । लुपि स्त्री-नपुंसकते च ॥छ॥

**न द्विरद्रुवय-गोमय-फलात्** ॥ ६।२।६१ ॥

**[ न ]** न प्रथमा सि ।

**[ द्विः ]** द्वि । द्वौ वारावस्येति द्विः । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र० ।

**[ अद्रुवयगोमयफलात् ]** द्रुवयश्च गोमयश्च फलं च = द्रुवयगोमयफलम् । न द्रुवयगोमयफलम् = अद्रुवयगोमयफलम्, तस्मात् ।

**[ कापोतः ]** कपोतस्य विकारोऽवयवो वा = कापोतः । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कापोतस्य विकारोऽवयवो वा इति 'दोरप्राणिनः' (६।२।४९) इति मयट् न भवति ।

**[ बैल्वः ]** बिल्वस्य विकारोऽवयवो वा = बैल्वः । 'प्राण्यौषधि०' (६।२।३१) अण्प्र० । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । बैल्वस्य विकारोऽवयवो वा । 'दोर०' (६।२।४९) मयट् प्राप्तौ अनेन न भवति ।

**[ ऐणेयः ]** एण । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । एण्या विकारोऽवयवो वा = ऐणेयः । 'एण्या एयञ्' (६।२।३८) एयञ्प्र० → एय । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । ऐणेयस्य विकारोऽवयवो वा । 'दोरप्राणिनः' (६।२।४९) मयट्प्राप्तौ अनेन निषिध्यते ।

**[ शामीलः ]** शमी । शम्या विकारोऽवयवो वा = शामीलः । 'शम्या लः' (६।२।३४) अण्प्र० - लोऽन्तः । वृद्धिः । शामीलस्य विकारोऽवयवो वा = शामीलः । 'दोरप्राणिनः' (६।२।४९) मयट्प्राप्तिरनेन निषिध्यते ।

**[ औष्ट्रकः ]** उष्ट्रस्य विकारोऽवयवो वा = औष्ट्रकः । 'उष्ट्रादकञ्' (६।२।३६) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औष्ट्रकस्य विकारोऽवयवो वा = औष्ट्रकः । 'दोरप्राणिनः' (६।२।४९) मयट् नात्र ।

**[ कांस्यः ]** कंसाय इदं = कंसीयम् । 'परिणामिनि तदर्थे' (७।१।४४) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कंसीयस्य विकारः = कांस्यः । 'कंसीयाञ्ञ्यः' (६।२।४१) ञ्यप्र० → य - ईयस्य यलोपश्च । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । कांस्यस्य विकारोऽवयवो वा = कांस्यः । अनेन मयट्निषिध्यते ।

**[ पारशवः ]** परशवे इदं = परशव्यम् । 'उवर्ण-युगादेर्यः' (७।१।३०) यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । परशव्यस्यायसो विकारः = पारशवः । 'परशव्याद् यलुक् च' (६।२।४०) अण्प्र० → अ - यलुक् च । वृद्धिः । पारशवस्य विकारोऽवयवो वा = पारशवः । अनेन मयट्निषिध्यते । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ द्रौवयं खण्डम् ]** द्रु । द्रोर्विकारः = द्रुवयम् । 'द्रोर्वयः' (६।२।४३) वयप्र० । द्रुवयस्य विकारः । 'विकारे' (६।२।३०) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

तार्त्तीयिकोऽपि प्रत्ययः-**द्रौवयमयमि**त्यादि ।

**[ गौमयं भस्म ]** गोर्विकारः पुरीषं = गोमयम् । 'गोः पुरीषे' (६।२।५०) मयट्प्र० → मय । गोमयस्य विकारः = गौमयं भस्म । 'विकारे' (६।२।३०) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ कापित्थो रसः ]** कपित्थस्य विकारोऽवयवो वा फलं = कपित्थः । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० । 'फले' (६।२।५८) अण्लुप् । कपित्थस्य विकारः = कापित्थः । विकारे अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । रसः ।

यदा कपोतशब्दो मांसे वर्त्तते तदा विकारवृत्तित्वं, कपोत इति प्रकृते । यदा पलाशशब्दः शाखारूपेऽवयवे वर्त्तते तदा अवयववृत्तित्वं, पलाशावयविनः । ततो विकारे मांसेऽवयवे च पलाशसमिद्रूपेऽण्प्रत्ययवशाद्वर्त्तते, न तु द्वितीयप्रत्यय इत्यर्थः ॥छ॥

## पितृ-मातुर्व्य-डुलं भ्रातरि ॥ ६।२।६२ ॥

**[ पितृमातुः ]** पिता च माता च = पितृमातु(ता) तस्मात् । शब्दप्राधान्यात् ऋकारस्य 'आ द्वन्द्वे' (३।२।३९) न आकारोऽत्र । 'ऋतो डुर्' (१।४।३७) ङसि० → डुर्० → उर्० ।

**[ व्यडुलम् ]** व्यश्च डुलश्च = व्यडुलम् ।

**[ भ्रातरि ]** भ्रातृ सप्तमी ङि । 'अर्डौ च' (१।४।३९) अर् ।

**[ पितृव्यः ]** पितृ । पितुर्भ्राता = पितृव्यः । अनेन व्यप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मातुलः ]** मातृ । मातुर्भ्राता = मातुलः । अनेन डुलप्र० → उल । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## पित्रोर्डामहट् ॥ ६।२।६३ ॥

**[ पित्रोः ]** पिता च माता च = पितरौ, तयोः = पित्रोः । 'पिता मात्रा वा' (३।१।१२२) एकशेषः । सप्तमी द्विवचनमोस् ।

**[ डामहट् ]** डामहट् प्रथमा सि ।

**[ पितामहः ]** पितुः पिता = पितामहः । अनेन डामहट्प्र० → आमह । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

**[ पितामही ]** पितुर्माता = पितामही । अनेन डामहट्प्र० → आमह । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ मातामहः ]** मातृ । मातुः पिता = मातामहः । अनेन डामहट्प्र० → आमह । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

**[ मातामही ]** मातुर्माता = मातामही । अनेन डामहट्प्र० → आमह । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

द्विवचनटित्त्वाभ्यां मातापित्रोरिति विज्ञायते ॥छा।

## अवेर्दुग्धे सोढ-दूस-मरीसम् ॥ ६।२।६४ ॥

**[ अवेः ]** अवि पञ्चमी ङसि ।

**[ दुग्धे ]** दुग्ध सप्तमी ङि ।

**[ सोढदूसमरीसम् ]** सोढश्च दूसश्च मरीसश्च = सोढदूसमरीसम् ।

**[ अविसोढम्, अविदूसम्, अविमरीसम् ]** अवि । अवेर्दुग्धम् । अनेन सोढ-दूस-मरीसप्र० । सि-अम् । विधानसामर्थ्यादिषु षत्वं न भवति ॥छा।

## राष्ट्रेऽनङ्गाऽऽदिभ्यः ॥ ६।२।६५ ॥

**[ राष्ट्रे ]** राष्ट्र सप्तमी ङि ।

**[ अनङ्गाऽऽदिभ्यः ]** अङ्ग आदिर्येषां ते = अङ्गादयः, न अङ्गादयः = अनङ्गादयः, तेभ्यः = अनङ्गाऽऽदिभ्यः । पञ्चमी भ्यस् ।

**[ शैबम् ]** शिबि । शिबे राज्ञोऽपत्यानि । 'दु-नादि०' (६।१।११८) ञ्यप्र० । 'बहुष्व०' (६।१।१२४) ञ्यलुप् । शिबीनां राष्ट्रं = शैबम् । अनेन अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । सि-अम् ।

**[ औषुष्ट्रम् ]** उषुष्ट्रानां राष्ट्रम् = औषुष्ट्रम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ गान्धारम् ]** गन्धार । गन्धारस्यापत्यं = गान्धारिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । गान्धारे राज्ञोऽपत्यानि गान्धारि(गान्धारयः) । 'गान्धारि-साल्वेयाभ्याम्' (६।१।११५) अञ्प्र० । 'अब्राह्मणात्' (६।१।१४१) लुप् । गान्धारीणां राष्ट्रं = गान्धारम् । अनेन अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । वृद्धिः । सि-अम् ॥छा।

## राजन्याऽऽदिभ्योऽकञ् ॥ ६।२।६६ ॥

**[ राजन्याऽऽदिभ्यः ]** राजन्य आदिर्येषां ते = राजन्याऽऽदयः, तेभ्यः = राजन्याऽऽदिभ्यः । पञ्चमी भ्यस् ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

**[ राजन्यकम् ]** राजन् । राज्ञोऽपत्यं = राजन्यः । 'जातौ राज्ञः' (६।१।९२) यप्र० । राजन्यानां राष्ट्रं = राजन्यकम् । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । सि-अम् ।

**[ दैवयातवकम् ]** देव-यातु । देवानां यातुः = देवयातुः - रक्षस्तस्यापत्यानि = दैवयातवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । दैवयातवानां राष्ट्रं = दैवयातवकम् । अनेन अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । सि-अम् ।

**[ शालङ्कायन ]** शलङ्कु । शलङ्कोरपत्यं = शालङ्कायनः(शालङ्किः) । 'शालङ्क्यौदि-षाडि-वाड्वलि' (६।१।३७) इञ्प्र० । वृद्धिः । शालङ्केरपत्यं = शालङ्कायनः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ बाभ्रव्य ]** बभ्रु । बभ्रोरपत्यं कौशिकः = बाभ्रव्यः । 'मधु-बभ्रोर्ब्राह्मण-कौशिके' (६।१।४३) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ जालन्धरायण ]** जलन्धरस्यापत्यं = जालन्धरायणः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ जानन्धरायण ]** जनन्धरस्यापत्यं = जानन्धरायणः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कौन्ताल ]** टुक्षु (१०८४) - रु (१०८५) - 'कुंक् शब्दे' (१०८६) कु । कौतीति कुत् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । कुतं तालयति = कुन्तालः । 'पृषोदरादयः' (३।२।१५५) कुन्तालनिपात्यते । कुन्तालानां राष्ट्रस्य राजा, कुन्तालस्य राज्ञोऽपत्यं वा । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आम्बरीपुत्र ]** अम्बरस्यापत्यं स्त्री । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । पुत्र प्रथमा सि ।

**[ बैल्ववन ]** बिल्व । बिल्वानामिदं = बैल्वम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । बैल्वं वनमस्य = बैल्ववनः ।

**[ शैलूषज ]** शैलूष 'जनैचि प्रादुर्भावे' (१२६५) जन् । शैलूषाज्जातः = शैलूषजः । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लोपः ।

**[ औदुम्बर ]** उदुम्बरस्येदम् = औदुम्बरम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।८) अलुक् ।

**[ तैतल ]** तितलो देवताऽस्य । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ॥छ॥

## **वसातेर्वा** ॥ ६।२।६७ ॥

**[ वसातेः ]** वसाति पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ वासातकम्, वासातम् ]** 'वसं निवासे' (९९९) वस् । वसतीति । 'वस्यर्तिभ्यामातिः' (उणा० ६६२) आतिप्र० । वसाते राज्ञोऽपत्यानि । 'दु-नादि०' (६।१।११८) ञ्यप्र० । 'बहुष्व०' (६।१।१२४) ञ्यलुप् । वसातीनां राष्ट्रं = वासातकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । एवम्-वासातम् । 'राष्ट्रेऽनङ्गाऽऽदिभ्यः' (६।२।६५) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ॥छ॥

## **भौरिक्यैषुकार्यादेर्विध-भक्तम्** ॥ ६।२।६८ ॥

**[ भौरिक्यैषुकार्यादेः ]** भौरिकिश्च ऐषुकारिश्च = भौरिक्यैषुकारी । भौरिक्यैषुकारी आदी यस्य सः = भौरिक्यैषुकार्यादिः, तस्मात् ।

**[ विधभक्तम् ]** विधश्च भक्तश्च = विधभक्तम् ।

'राष्ट्रेऽनङ्गाऽऽदिभ्यः' (६।२।६५) इत्यस्यापवादः ।

**[ भौरिकिविधम् ]** 'टुडुभृंग्क् पोषणे च' (११४०) भृ । बिभर्तीति । 'भूरि कुशिक-हृदिक-मक्षिकेतिक-पिपीलिकादयः' (उणा० ४५) इत्यनेन भूरिनिपात्यते । भूरि 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) का । भूरि कायतीति भूरिक(ः) । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । भुरिकशब्दोऽप्यस्ति । भुरिकस्य भूरिकस्य वा अपत्यानि = भौरिकयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । भौरिकीणां राष्ट्रं = भौरिकिविधम् । अनेन विधप्र० । सि-अम् । स्वभावान्नपुंसकता ।

**[ ऐषुकारिभक्तम् ]** इषुकारस्यापत्यानि = ऐषुकारि(रयः) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । कारुविवक्षायां 'सेनान्त-कारु०' (६।१।१०२) इञ्प्र० → इ । ऐषुकारीणां राष्ट्रम् = ऐषुकारिभक्तम् । अनेन भक्तप्र० । सि-अम् ।

卐**[ सारस्यायनभक्तम् ]** सरस् । सरसि साधुः = सरस्यः । 'तत्र साधौ' (७।१।३५) यप्र० । सरस्यस्यापत्यं = सारस्यायनः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । वृद्धिः । यद्वा सरसि साधुः = सरस्यः । सरस्यमयनमस्य = सारस्यायनः । बाहुलकाद्दीर्घः । सारस्यायनानां राष्ट्रं = सारस्यायनभक्तम् । अनेन भक्तप्र० । सि-अम् ।

**[ चौपयत ]** 'चुप मन्दायाम्' (३४२) चुप् । चोपन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । चोपयतीति । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । चोपयतोऽपत्यं = चौपयतः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः औ ।

**[ चौदयत ]** 'चुदण् संचोदने' (१६५६) चुद् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । चोदयतीति चोदयत् । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । चोदयतोऽपत्यं = चौदयतः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः औ ।

**[ चैटयत ]** 'चिट प्रैष्ये' (१९१) चिट् । चेटन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० → इ । चेटयतीति चेटयत् । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । चेटयतोऽपत्यं = चैटयतः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः ऐ ।

**[ चैकयत ]** 'चीक आमर्षणे' (१९४८) चीक् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । चीकयतीति । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । चे(ची)कयतोऽपत्यं = चैकयतः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः ऐ ।

**[ सैकयत ]** 'सेकृङ् गतौ' (६३५) सेक् । सेकमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । सेकयत इति । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०'

卐 बृहद्वृत्तौ - सारसायनभक्तम् । ऐषुकारिगणे - सारसायन ।

(४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । सेकयतोऽपत्यं = सैकयतः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः ऐ ।

**[ क्षैतयत ]** क्षित । क्षितं करोति = क्षितयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः । क्षितयतीति । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । क्षितयतोऽपत्यं = क्षैतयतः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः ऐ ।

**[ वालिकाज्य ]** वालिका 'ज्यांश् हानौ' (१५२४) ज्या । वालिकां जिनाति = वालिकाज्यः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

卐**[ वाणिजक ]** वणिज् । वणिजे(गे)व = वाणिजः । स्वार्थेऽण्प्र० → अ । वृद्धिः आ । वाणिज एव = वाणिजकः । स्वार्थे कप्र० ।

**[ तार्क्ष्यायण ]** तार्क्ष । तार्क्षस्यापत्यं वृद्धम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तार्क्ष्यस्यापत्यं युवा = तार्क्ष्यायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

卐卐**[ द्व्याक्ष्यायण ]** द्वे अक्षिणी यस्य सः = द्व्यक्षिः । द्वा(द्व्य)क्षेरपत्यं वृद्धं = द्व्याक्ष्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । द्व्याक्ष्यस्यापत्यं युवा = द्व्याक्ष्यायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

++**[ त्र्याक्ष्यायण ]** त्रीणि अक्षीणि यस्य सः = त्र्यक्षिः । त्र्यक्षेरपत्यं वृद्धं = त्र्याक्ष्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । त्र्याक्ष्यस्यापत्यं युवा = त्र्याक्ष्यायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । यद्वा—

**[ ]** तार्क्ष्य 'अयि गतौ' (७९०) अय् । तार्क्ष्याय्यते । अनेन ।

*__[ द्व्यक्ष्यायण ]__ द्व्यक्षेण अय्यते । 'भुजि-पत्यादिभ्यः कर्मा-ऽपादाने' (५।३।१२८) अनट्प्र० → अन । बाहुलकाद्दीर्घः । द्व्यक्षे साधुः = द्व्यक्ष्यः । 'तत्र साधौ' (७।४।१५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अग्रे अयनमण्ड्यते । द्व्यक्ष्यमयनमस्य सः = द्व्यक्ष्यायणः ।

**__[ त्र्यक्ष्यायण ]__ त्र्यक्षेण अय्यते । 'भुजि-पत्यादिभ्यः०' (५।३।१२८) अनट्प्र० → अन । बाहुलकाद्दीर्घः । त्र्यक्षे साधुः = त्र्यक्ष्यः । 'तत्र साधौ' (७।१।१५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अग्रे अयनमण्ड्यते । त्र्यक्ष्यमयनमस्य सः = त्र्यक्ष्यायणः ।

**[ औलायन ]** ओल । ओलस्यापत्यम् = औलायनः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ सौवीर ]** सुवीरा । सुवीरा देवता अस्य = सौवीरः । 'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

---

卐 भौरिकिगणे वाणिजका । 卐卐 बृहद्वृत्तौ - द्व्यक्षायण । ++ बृहद्वृत्तौ - त्र्याक्षायण । ***** इदमुदाहरणं बृहद्वृत्तौ नास्ति । ****** इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

**[ दासमित्रि ]** दासमित्रस्यापत्यं = दासमित्रि । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ दासमित्रायण ]** दासमित्रस्यापत्यं = दासमित्रायणः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ शौद्रकायण ]** शूद्रकस्यापत्यं युवा(वृद्धम्) । 'अश्वादेः' (६।१।४९) आयनण्प्र० → आयन । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

卐**[ शयाण्ड ]** शये अण्डोऽस्य स = शयाण्ड(:) ।

卐卐**[ धैनव ]** धेनु । धेनोरपत्यं = धैनवः । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ तुण्डदेव ]** तुण्डप्रधानो देवः = तुण्डदेवः ।

**[ वायौविद ]** वायु सप्तमी ङि । 'विदक् ज्ञाने' (१०९९) विद् । वायौ वेत्तीति वायौविद । 'मूलविभुजादयः' (५।१।१४४) कप्र० → अ । गणपाठादलुप्समासः ॥छ॥

## निवासा-ऽदूरभवे इति देशे नाम्नि ॥ ६।२।६९ ॥

**[ निवासाऽदूरभवे ]** निवासश्च अदूरभवश्च = निवासाऽदूरभवम्, तस्मिन् ।

**[ इति ]** इति सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलुप् । इतिशब्दो विवक्षार्थः, तेन रुढेन नाम्नि वा प्रत्ययो भवतीत्यर्थः ।

**[ देशे ]** देश सप्तमी ङि ।

**[ नाम्नि ]** नामन् सप्तमी ङि ।

क्रियतेऽर्थप्रतीतिरनेनेति करणः शब्दो विवक्षार्थः । तेनानुवृत्ते व्यवहारमनुपतिते-अनुगते नाम्नि विज्ञेयम्, न स्वयं कृते ।

**[ आर्जुनावः ]** ऋजुनौ । ऋजुनाव ऋजुनावानां वा निवासः = आर्जुनावः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आर् । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ शैबः ]** शिबि । शिबीनां निवासः = शैबः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ औषुष्टः ]** उषुष्टस्य निवासः = औषुष्टः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुकु ।

**[ शाकलः ]** शकला । शकलाया निवासः = शाकलः ।

**[ वैदिशं नगरम् ]** 'दिशींत् अतिसर्जने' (१३१८) दिश्, विपूर्व० । विविधं दिश्यतेऽसाविति विदिशा । 'स्थाऽऽदिभ्यः कः' (५।३।८२) कप्र० → अ । विविधं दिशन्ति फलं वा । 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० → अ । विविधा दिशो यस्यां सा = विदिशा । 'अजादेः' (२।४।१६) आप्प्र० । 'विदिशाया अदूरभवं =

---

卐 बृहद्वृत्तौ - शयण्ड । 卐卐 बृहद्वृत्तौ - वैश्वधेनव ।

वैदिशम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् । नगरं जनपदो वा ।

**[ वाराणसी ]** ह्रदे वर्त्तमानः वरणाशब्दः स्त्रीलिङ्गः । वरणा च असिश्च = वरणासी । वरणास्योरदूरभवा । पृषोदरादित्वात् रस्य दीर्घो णस्य तु ह्रस्वः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ व्रैहिमतम् ]** व्रीहिमती । व्रीहिमत्या अदूरभवं = व्रैहिमतम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् ।

**[ यावमतम् ]** यवमती । यवमत्या अदूरभवं = यावमतम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् ।

मतान्तरेऽनेन विहितः अग्रेतनेषु उदाहरणेषु प्रत्ययो ज्ञेयः ।

**[ अङ्गाः ]** अङ्गानां निवासः ।

**[ वङ्गाः ]** वङ्गानां निवासः ।

**[ कलिङ्गाः ]** कलिङ्गानां निवासः ।

**[ सुह्याः ]** सुह्यानां निवासः । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । 'पुरु-मगध-कलिङ्ग-सूरमस-द्विस्वरादण्' (६।१।११६) अनेन विहितः अण्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) लुप् उभयप्रत्ययस्य ।

**[ मगधाः ]** मगधानां निवासः ।

卐**[ शुण्डाः ]** शुण्डानां निवासः = शुण्डाः । 'पुरु-मगध०' (६।१।११६) अण्प्र० । 'बहुष्वस्त्रियाम्' (६।१।११४) अण्लुप् ।

**[कुरवः]** कुरूणां निवासः । अनेन विहितः 'कुर्वादेर्ञ्यः' (६।१।१००) ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् ।

**[ पञ्चालाः ]** पञ्चालानां निवासः ।

**[ मत्स्याः ]** मत्स्यानां निवासः । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् ।

**[ वरणा नगरम् ]** वरणानामवृक्षविशेषस्यादूरभवम् । अनेन अण्प्र० । 'लुप् बहुलं०' (६।२।५७) अण्लोपः । जस् । नगरे वर्त्तमानः बहुवचनान्तः पुल्लिङ्गः लुप् बहुलमित्यत्र बहुलवचनस्येति भणनात् पुंस्त्वं निनीयते ।

**[ शृङ्गशाल्मलयो ग्रामः ]** शृङ्गशाल्मलीनां निवासः = शृङ्गशाल्मलयौ(यो) ग्रामः । अनेन अण्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् ।

**[ गोदौ ग्रामः ]** गोदयोर्ह्रदयोर्निवासः = गोदौ । अनेन अण्प्र० । लुप् । औ । ग्रामः ।

卐卐**[ आलण्ड्यायनपर्णा ग्रामः ]** आलण्ड्यायनपर्णानां निवासः = आलण्ड्यायनपर्णा । मतान्तरे अनेन अण्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । ग्राम प्रथमा सि । 'ओलडुण् उत्क्षेपे' (१६२४) लड् । केचिदुकारान्तं पठन्ति ।

---

卐 बृहद्वृत्तौ-पुण्ड्राः । 卐卐 बृहद्वृत्तौ - आलन्यायनपर्णा ग्रामः ।

'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः-लण्ड्, आङ्पूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । आलण्ड्यते = आलण्ड्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'णेरनिटि' (४।३।८३) णिच्लोपः । आलण्ड्यस्यापत्यं वृद्धम् = आलण्डियः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । आलण्ड्येरपत्यं युवा = आलण्ड्यायनः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । आलण्ड्यायनश्च पर्णाश्च = आलण्ड्यायनपर्णाः । आलण्ड्यायनपर्णानां निवासः = आलण्ड्यायनपर्णाः ।

**[ शफण्डी ]** शफण्ड । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । शफण्ड्या निवासः = शफण्डी । अनेन अण्प्र० । बहुलं लुप् ।

**[ जालपदा ]** भट्टारिका जालपदाया अभावः = जालपदा । अनेन अण्प्र० । बहुलं लुप् ।

**[ मथुरा ]** भट्टारिका मथुराया निवासः = मथुरा । अनेन अण्प्र० । लुप् ।

**[ उज्जयनी ]** भट्टारिका उज्जयन्या निवासः = उज्जयनी । अनेन अण्प्र० । बहुलं लुप् ।

**[ गया ]** भट्टारिका गयानां निवासः = गया । अनेन अण्प्र० । लुप् ।

**[ उरशा ]** उरशा नाम भट्टारिकाया निवासः = उरशा । अनेन अण्प्र० । बहुलं लुप् ।

**[ तक्षशिला ]** तक्षशिला नाम भट्टारिकाया निवासः = तक्षशिला । अनेन अण्प्र० । लुप् ।

**[ कटुकबदरी ]** कटुकबदर्या निवासः = कटुकबदरी । अनेन अण्प्र० । लुप् ।

**[ खलतिकं वनानि ]** खल 'तिकट् हिंसायाम्' (१३०१) तिक् । खलांस्तिक्नोति । अच्प्र० । खलति 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) का । खलति कायन्ति कायति वा = खलतिकः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । खलतिकस्य पर्वतस्य निवासः = खलतिकम् । अनेन अण्प्र० । बहुलं लुप् । सि-अम् ।

अमूनि मतान्तरे उदाहरणानि । स्वमतमेव द्रढयन्नाह आचार्यः - **अङ्गवरणादीनामित्यादि** ॥छ॥

### तदत्राऽस्ति ॥ ६।२।७० ॥

**[ तद् ]** तद् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् ।

**[ अत्र ]** अत्र सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलुप् ।

**[ अस्ति ]** अस्ति प्रथमा सि । सूत्रत्वाल्लुप् ।

**प्रथमान्तं चेदस्तीति कोऽर्थः ? प्रथमान्तस्य नाम्नोऽस्तिक्रियया सहैक्यं भवति यदा तदा प्रत्ययो भवतीत्यर्थः ।**

**[ भूमा ]** बहु । बहोर्भावः = भूमा । भूमिनिन्दा - प्रशंसादौ । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । 'भूर्लुक् चेवर्णस्य' (७।४।४१) बहुस्थाने भूरादेशः - इवर्णस्य च लुक् ।

**[ औदुम्बरं नगरम्, औदुम्बरो जनपदः, औदुम्बरः पर्वतः ]** उदुम्बर । उदुम्बरा अस्मिन् देशे सन्ति = औदुम्बरम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् । नगरम् । एवम् - औदुम्बरो जनपदः पर्वतश्च ॥छ॥

**卐卐तेन निवृत्ते च** ॥ ६।२।७१ ॥

**[ तेन ]** तेन पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ निवृत्ते ]** 'वृतूङ् वर्त्तने' (९५५) वृत्, निपूर्व० । निवृत्यते स्म । 'क्त - क्तवतू' (५।१।१७४) क्तप्र० → त, तस्मिन् ।

**[ च ]** च प्रथमा सि ।

यदा अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्तीति कर्मणि निवृत्तशब्दो व्युत्पाद्यते तदा तेनेति कर्त्तरि करणे वा तृतीया । यदा त्वकर्मकविवक्षया कर्त्तरि निवृत्तशब्दस्तदा हेतौ तृतीया ।

**[ कौशाम्बी ]** कुश - अम्ब । कुशेन अम्बोऽम्बनं यस्य सः = कुशाम्बः । कुशाम्बेन निवृत्ता = कौशाम्बी । अनेन अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ काकन्दी ]** ककन्देन निवृत्ता = काकन्दी । अनेन अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ माकन्दी ]** मकन्देन निवृत्ता = माकन्दी । अनेन अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ सागरः ]** सगरैर्निवृत्तः = सागरः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ साहस्त्री परिखा ]** सहस्त्रेण निवृत्ता = साहस्त्री । अनेन अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । परिखा ।

**चकारश्चतुर्ण्णां योगानामुत्तरत्रानुवृत्त्यर्थः, तेनोत्तरे प्रत्यया यथायोगं चतुर्ष्वर्थेषु भवन्ति** ॥छ॥

**नद्यां मतुः** ॥ ६।२।७२ ॥

**[ नद्याम् ]** नदी सप्तमी ङि ।

**[ मतुः ]** मतु प्रथमा सि ।

**[ उदुम्बरावती ]** उदुम्बर । उदुम्बराणां निवासः - अदूरभवः । उदुम्बराः सन्त्यस्याम् । उदुम्बरैर्निवृत्ता = उदुम्बरावती । अनेन मतुप्र० → मत् । 'नाम्नि' (२।१।९५) म० → व० । 'अनजिरादिबहुस्वर-शरादीनां मतौ' (३।२।७८) दीर्घः । 'अधातूदृदितः' (२।४।२) ङी ।

**[ मशकावती ]** मशकानां निवासः अदूरभवो वा । मशकाः सन्त्यस्याम् । मशकैर्निवृत्ता = मशकावती । अनेन मतुप्र० → मत् । 'नाम्नि' (२।१।९५) म० → व० । 'अनजिरादि०' (३।२।७८) दीर्घः । 'अधातूदृदितः' (२।४।२) ङी ।

**[ वीरणावती ]** वि अण (२५९) - 'रण शब्दे' (२६०) रण् । वियं रणन्ति । 'मूलविभुजादयः' (५।१।१४४) कप्र० → अ । 'पृषोदरादयः' (३।२।१५५) वीरणनिपात्यते । वीरणानां निवासः - अदूरभवो वा । वीरणाः सन्त्यस्याम् । वीरणैर्निवृत्ता । अनेन मतुप्र० → मत् ।

**[ पुष्करावती ]** पुष्कराणां निवासः - अदूरभवो वा । पुष्कराणि सन्त्यस्याम् । यदुक्तं लिङ्गानुशासने - ''शुङ्गवेरमजिराभ्रपुष्करं'' इति नपुंसकः卐 । पुष्करैर्निवृत्ता = पुष्करावती । अनेन मतुप्र० → मत् । 'नाम्नि' (२।१।९५) म० → व० । 'अनजिरादि०' (३।२।७८) दीर्घः । 'अधातूदृदितः' (२।४।२) ङी ।

---

卐 श्लोकाङ्कः - २१ 卐卐 ढुण्ढिकाकारेण सर्वत्र **निवृत्ते** इत्येव लिखितम् । रूपप्रक्रियापि तदनुसारमेव प्रदर्शिता, परं बृहद्वृत्त्यादिषु प्रायः सर्वेषु स्थानेषु **निर्वृत्ते** इति प्रदर्शितं, रूपप्रक्रियापि तदनुसारं प्रदर्शिता, तद्विद्वद्भिर्ध्येयम् ।

**[ इक्षुमती ]** इक्षूणां निवासः - अदूरभवो वा । इक्षवोऽस्यां सन्ति । इक्षुभिर्निवृत्ता = इक्षुमती ।

**[ द्रुममती ]** द्रुमाणां निवासोऽदूरभवो वा । द्रुमाः सन्त्यस्याम् । द्रुमैर्निवृत्ता = द्रुममती । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ।

**[ शरावती ]** शर(रा)णां निवासोऽदूरभवो वा । शराः सन्त्यस्याम् । शराभिर्निवृत्ता । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'नाम्नि' (२।१।९५) म० → व० । 'अधातूदृदितः' (२।४।२) ङी ।

**[ इरावती ]** इराणां निवासः - अदूरभवो वा । इराः सन्त्यस्याम् । इराभिर्निवृत्ता । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'नाम्नि' (२।१।९५) म० → व० । 'अधातूदृदितः' (२।४।२) ङी ।

**[ भागीरथी ]** भग । भगोऽस्यास्ति = भगी इन्प्रत्ययान्तः । भगी रथोऽस्य = भगीरथः । पृषोदरादित्वात् भगीरथः । भगीरथेन निवृता । 'तेन निवृत्ते च' (६।२।७१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ जाह्नवी ]** जह्नुना निवृत्ता = जाह्नवी । 'तेन निवृत्ते च' (६।२।७१) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ सौवास्तवी ]** सुवास्तु । शोभनं वास्तु - वस्त्रं अस्य । सुवास्तुना निवृत्ता = सौवास्तवी । 'तेन निवृत्ते च' (६।२।७१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'अणञेयेकण्०' (२।४।२०) ङी ॥छ॥

**मध्वादेः** ॥ ६।२।७३ ॥

**[ मध्वादेः ]** मधु आदिर्यस्य सः = मध्वादिः, तस्मात् ।

अनद्यर्थ आरम्भः ।

**[ मधुमान् ]** मधुनि सन्त्यत्र = मधुमान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादे०' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

**[ बिसवान् ]** बिसानि सन्त्यत्र = बिसवान् । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तो०' (२।१।९४) म० → व० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

**[ स्थाणुमान् ]** स्थाणूनि सन्त्यत्र = स्थाणुमान् । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

**[ कर्कन्धु, कर्कन्धू ]** कर्कन्धु उभयलिङ्गः ।

**[ किसर ]** किसर - गन्धद्रव्य उच्यते ।

**[ सार्पण ]** सह अर्पणेन वर्त्तते = सार्पणः - वृक्ष उच्यते ।

**[ पार्दा ]** 'पांक् रक्षणे' (१०६७) पा । पातीति पा । 'मन् - वन् - क्वनिप् - विच् क्वचित्' (५।१।१४७) विच्प्र० । 'अप्रयोगीत्' (१।१।३७) विच्लोपः । 'अर्द गति-याचनयोः' (३०१) अर्द् । पामर्दति = पार्दा । अच्प्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कीशरु ]** कुत्सितः शरुः = कीशरुः । 'पृषोदरादयः' (३।२।१५५) किम्० → की० ।

**[ पार्दाकी ]** पार्दा 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) का । पार्दां कायति = पार्दाकी । 'आतो डोऽह्वा - वा - मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ आसन्दी ]** आसन्दयते = आसन्दी । योगविभागान्मोऽन्तः । अच्प्र० ।

**[ शकली ]** शकल 'गौरादिभ्यो०' (२।४।१९) ङी ।

**[ आमिषी ]** आ जिषू (५२२) - विषू (५२३) - 'मिषू सेचने' (५२४) मिष् । आमिषति = आमिषी । अच्प्र० । 'गौरादिभ्यो०' (२।४।१९) ङी ॥छा॥

## नड - कुमुद - वेतस - महिषाड्डित् ॥ ६।२।७४ ॥

**[ नडकुमुदवेतसमहिषात् ]** नडश्च कुमुदश्च वेतसश्च महिषश्च = नडकुमुदवेतसमहिषम्, तस्मात् ।

**[ डित् ]** ड् इदनुबन्धो यस्य सः = डित् । प्रथमा सि ।

**[ चातुरर्थिकः ]** चतुर्ष्वर्थेषु भवः = चातुरर्थिकः । 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तस्य इकणः 'द्विगोरनपत्ये०' (६।१।२४) इति न लुप्, पाठसामर्थ्यात् ।

अणाद्यपवादः । आदिशब्दात् नडशब्दात् 'नड - शादाद् वलः' (६।२।७५) - कुमुदशब्दात् 'कुमुदादेरिकः' (६।२।९६) - इत्यादीनामपवादः ।

**[ नड्वान ]** नडानां निवासः - अदूरभवो वा । नडाः सन्त्यस्याम् । नडैर्निवृत्तः = नड्वान् । अनेन मतुप्र० → मत् - स च डित् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'मावर्णान्तो०' (२।१।९४) म० → व० । 'पदस्य' (२।१।८९) तलोपः ।

**[ कुमुद्वान् ]** कुमुदानां निवासः - अदूरभवो वा । कुमुदानि सन्त्यस्याम् । कुमुदैर्निवृत्ता । अनेन मतुप्र० → मत् - स च डित् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'मावर्णान्तो०' (२।१।९४) म० → व० । 'पदस्य' (२।१।८९) तलोपः ।

**[ वेतस्वान् ]** वेतस । वेतसानां निवासः - अदूरभवो वा । वेतसाः सन्त्यस्याम् । वेतसैर्निवृतः = वेतस्वान् । अनेन मतुप्र० → मत् - डित् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न स्तं मत्वर्थे' (१।१।२३) पदत्वनिषेधान्न रुत्वम् ।

**[ महिष्मान् देशः ]** महिषाणां निवासः - अदूरभवो वा । महिषाः सन्त्यस्याम् । महिषैर्निवृत्तः = महिष्मान् । अनेन मतुप्र० → मत् - डित् । 'डित्यन्त्यस्वरादेः' (२।१।१४) अलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

ननु अलोपे षकारस्य पदान्तसद्भावात् 'धुटस्तृतीयः' (२।१।७६) इति डत्वं कथं न भवति ? उच्यते - 'स्वरस्य०' (७।४।११०) इति अलोपस्य स्थानित्वात् पदान्तत्वं नास्ति, नैवम् - 'न सन्धि०' (७।४।१११) इत्यनेन असद्विधित्वान्न स्थानी भविष्यति, इति प्राप्नोत्येवं तर्हि 'असिद्धं बहिरङ्गमन्तरङ्गे' (न्या० सं० वक्ष० (१)/सूत्र-(२०)) इति न्यायाद्भविष्यति ।

**[ माहिष्मती नगरी ]** महिष्मान् देशः, तत्र भवा = माहिष्मती । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः आ । 'अणञेयेकण्०' (२।४।२०) ङी । नगरी ॥छा॥

**नड - शादाद् वलः** ॥ ६।२।७५ ॥

**[ नडशादात् ]** नडश्च शादश्च = नडशादम्, तस्मात् ।

**[ वलः ]** वल प्रथमा सि ।

मत्वणाद्यपवादः । आदिशब्दात् 'नडादेः कीयः' (६।२।९२) इत्यस्यापि ।

**[ नड्वलम् ]** नडानां निवासः - अदूरभवो वा । नडाः सन्त्यत्र । नडैर्निवृत्तः = नड्वलम् । अनेन वलप्र० - स च डित् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः । सि - अम् ।

**[ शाद्वलम् ]** 'शोंच् तक्षणे' (११४७) शो । 'आत् सन्ध्यक्षरस्य' (४।२।१) शा । श्यति पुरुषसौत्सुक्यम् । 'शा - शपि - मनि - कनिभ्यो दः' (उणा० २३७) दप्र० । 'शद्लृं शातने (९६७) शद् । शद्यते आतपेन वा । 'भावा - ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । शादः - कर्दमः, तस्य निवासः - अदूरभवो वा । शादा अत्रास्ति । शादेन निवृत्तः = शाद्वलम् ।अनेन वलप्र० - स च डित् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः । सि - अम् ॥छ॥

**शिखायाः** ॥ ६।२।७६ ॥

**[ शिखायाः ]** शिखा पञ्चमी ङसि ।

पृथग्योगात् डिदिति निवृत्तम् ।

**[ शिखावलं नाम नगरम् ]** शिखा अत्रास्ति । शिखया निवृत्तः । अनेन वलप्र० । सि - अम् । नगरम् ।

मतुप्रकरणे शिखाया वलचं वक्ष्यति 'कृष्यादिभ्यो वलच्' (७।२।२७) तदादेशार्थं च वचनम् ॥छ॥

**शिरीषादिक - कणौ** ॥ ६।२।७७ ॥

**[ शिरीषात् ]** शिरीष पञ्चमी ङसि ।

**[ इककणौ ]** इकश्च कण् च = इककणौ ।

**[ शिरीषिकः, शैरीषकः ]** शिरीषाणां वृक्षाणां निवासः - अदूरभवो वा । शिरीषाः सन्त्यस्याम् । शिरीषैर्निवृत्तः = शिरीषिकः, शैरीषकः । अनेन इक - कण्प्र० → क । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**शर्कराया इकणीयाऽण् च** ॥ ६।२।७८ ॥

**[ शर्करायाः ]** शर्करा पञ्चमी ङसि ।

**[ इकणीयाऽण् ]** इकण् च ईयश्च अण् च = इकणीयाऽण् ।

**[ च ]** च प्रथमा सि ।

**[ शार्करिकः, शर्करीयः, शार्करः, शर्करिकः, शार्करकः ]** शर्करा । शर्कराणां निवासः - अदूरभवो वा । शर्करा देशेऽस्मिन् सन्ति । शर्कराभिर्निवृत्तः = शार्करिकः, शर्करीयः, शार्करः, शर्करिकः, शार्करकः । अनेन इकण् - ईय अण्प्र० - चकारात् इक - कण्प्र० । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**रोऽश्मादेः** ॥ ६।२।७९ ॥

**[ रः ]** र प्रथमा सि ।

**[ अश्मादेः ]** अश्मन् - आदि । अश्मा आदिर्यस्य सः = अश्मादिः, तस्मात् ।

**[ अश्मरः ]** अश्मनां निवासः = अश्मरः । अनेन रप्र० ।

**[ यूषरः ]** 'युक् मिश्रणे' (१०८०) यु । यूयतेऽत्र कटुकादिना = यूषा । 'योरूच्च वा' (उणा० ५४१) यूषनिपातः । यूषानां(णां) निवासः - अदूरभवो वा । यूषाः सन्त्यस्याम् । यूषैर्निवृत्तः । अनेन रप्र० ।

**[ गुहा ]** 'गुहौग् संवरणे' (९३५) गुह् । गुहनं = गुहा । 'भिदादयः' (५।३।१०८) अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पामन् ]** 'पां पाने' (२) पा । पिबतीति पामन् । 'मन्' (उणा० ९११) मन्प्र० ॥छ॥

**प्रेक्षादेरिन्** ॥ ६।२।८० ॥

**[ प्रेक्षादेः ]** प्रेक्षा आदिर्यस्य सः = प्रेक्षादिः, तस्मात् ।

**[ इन् ]** इन् प्रथमा सि ।

**[ प्रेक्षी ]** प्रेक्षाणां निवासः । प्रेक्षाणामदूरभवा । प्रेक्षा(क्ष)या निवृत्ता = प्रेक्षी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'इन् - हन् - यूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[ फलकी ]** फलकया निवृत्ता = फलकी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'इन् - हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ॥छ॥

**तृणादेः सल्** ॥ ६।२।८१ ॥

**[ तृणादेः ]** तृणमादिर्यस्य सः = तृणादिः, तस्मात् ।

**[ सल् ]** सल् प्रथमा सि ।

**[ तृणसा ]** तृणानां निवासः = तृणसा । अनेन सल्प्र० → स । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ नदसा ]** नदानां निवासः = नदसा । अनेन सल्प्र० → स । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

**काशाऽऽदेरिलः** ॥ ६।२।८२ ॥

**[ काशाऽऽदेः ]** काश आदिर्यस्य सः = काशाऽऽदिः, तस्मात् ।

**[ इलः ]** इल प्रथमा सि ।

**[ काशिलम् ]** काशानां निवासः । अनेन इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् ।

**[ वाशिलम् ]** वासा(शा)नां निवासः । अनेन इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् ।

**[ पीयुक्षा ]** पी(पि)यं याति । 'पी - मृग - मित्र - देव - कुमार - लोक - धर्म - विश्व - सुम्नाश्मावेभ्यो युः' (उणा० ७४१) किद् उप्र० । 'इडेत् - पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । 'क्षैं क्षये' (४२) क्षैं । 'आत् सन्ध्यक्षरस्य' (४।२।१) क्षा । पीयुं क्षायतीति । 'आतो डोऽह्वा - वा - मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

**अरीहणाऽऽदेरकण्** ॥ ६।२।८३ ॥

**[ अरीहणाऽऽदेः ]** अरीहण आदिर्यस्य सः = अरीहणाऽऽदिः, तस्मात् ।

**[ अकण् ]** अकण् प्रथमा सि ।

**[ आरीहणकम् ]** अरि 'ईहि चेष्टायाम्' (८५७) ईह् । अरिभिरीह्यते । अनट्प्र० → अन । यद्वा अरीणामीहनः = अरीहणः । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) णत्वम् । अरीहराणां निवासः - अदूरभवो वा । अरीहणानि सन्त्यत्र । अरीहणैर्निवृत्तः = आरीहणकम् । अनेन अकण्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ खाण्डवकम् ]** खण्डु । खण्डूनां निवासः - अदूरभवो वा । खण्डूनि सन्त्यत्र । खण्डुभिर्निवृत्तः = खाण्डवकम् । अनेन अकण्प्र० → अक । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

खण्डु - खण्डू इति शब्दद्वयमस्ति, तेन निवृत्तमित्यर्थे इह शब्दोद्देशे नाम्नि विहितोऽयमञ् विशेषविहितत्वात् कृतेऽर्थे 'वर्षा - कालेभ्यः' (६।३।८०) इति सामान्यविहितस्य गुणोऽपवादः ।

卐**[ चित्रायणि ]** चित्रस्यापत्यं = चित्रायणिः । 'अदोरायनि प्रायः' (६।१।११३) आयनिप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र - षृवर्णान्नो ण०' (२।३।६३) न० → ण० ॥छ॥

**सुपन्थ्यादेर्ञ्यः** ॥ ६।२।८४ ॥

**[ सुपन्थ्यादेः ]** सुपथी(सुपन्थाः) आदिर्यस्य सः, तस्मात् ।

**[ ञ्यः ]** ञ्य प्रथमा सि ।

**[ सौपन्थ्यम्, सौवन्थ्यम् ]** सुपथिन् । सुपथो निवासः - अदूरभवो वा । सुपथाः(न्थाः) अत्रास्ति । सुपथा निवृत्तः = सौपन्थ्यम् । अनेन ञ्यप्र० → य । वृद्धिः औ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः । अत एव निपातनात् सुपथिन्शब्दस्य नागमः पस्य च वा वकारः - सौवन्थ्यमिति निष्पन्नः ।

**[ सांकाश्यम् ]** संकाशस्य निवासः - अदूरभवो वा । संकाशोऽत्रास्ति । संकाशैर्निवृत्तः = सांकाश्यम् । अनेन ञ्यप्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । सि - अम् ।

**[ काम्पील्यम् ]** कम्पीलस्य निवासः - अदूरभवो वा । कम्पीलोऽत्रास्ति । कम्पीलेन निवृत्तः । अनेन ञ्यप्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । सि - अम् ।

**[ मगदिन् ]** मा 'गद व्यक्तायां वाचि' (२९७) गद् । मां गदति = मगदः । अच्प्र० → अ । 'पृषोदरादयः' (३।२।१५५) मगदनिपात्यते । मगदोऽस्यास्ति = मगदिन् । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आगस्त्य ]** आगस् 'त्यजं हानौ' (१७२) त्यज् । आगस्त्यक्तवान् । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ कलिव ]** कलिं वाति = कलिवः । 'आतो डोऽह्वा - वा - मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

सुपन्थ्यादिगणः ॥छ॥

---

卐 अरीहणादिगणे - श्वित्रायणि ।

**सुतङ्गमादेरिञ्** ॥ ६।२।८५ ॥

**[ सुतङ्गमादेः ]** सुतङ्गम आदिर्यस्य सः = सुतङ्गमादिः, तस्मात् ।

**[ इञ् ]** इञ् प्रथमा सि ।

**[ सौतङ्गमिः ]** सुत अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) 'गम्लृं गतौ' (३९६) गम् । सुतं गच्छतीति सुतङ्गमः । 'नाम्नो गमः खड्डौ०' (५।१।१३१) खप्र० → अ । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।९१) मोऽन्तः । सुतङ्गमस्य निवासः - अदूरभवो वा । सुतङ्गमोऽत्रास्ति । सुतङ्गमेन निवृत्तः = सौतङ्गमिः । अनेन इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मौनिचित्तिः ]** मुनेरिव चित्तं यस्य सः = मुनिचित्तः । मुनिचित्तस्य निवासः - अदूरभवो वा । मुनिचित्तोऽत्रास्ति । मुनिचित्तेन निवृत्तं = मौनिचित्तिः । अनेन इञ्प्र० → इ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

इति सुतङ्गमादिः ।।छ।।

**बलादेर्यः** ॥ ६।२।८६ ॥

**[ बलादेः ]** बल आदिर्यस्य सः = बलादिः, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

**[ बल्यम् ]** बलस्य निवासः - अदूरभवो वा । बलमत्रास्ति । बलेन निवृत्तं = बल्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

卐**[ बुल्यम् ]** बुलस्य निवासः - अदूरभवो वा । बुलमत्रास्ति । बुलेन निवृत्तं = बुल्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पुल ]** पुल पङ्गु कथ्यते ।

**[ दुल ]** 'दुलण् उत्क्षेपे' (१६९३) दुल् ।

**[ नल ]** नल तृणविशेषः ।

**[ दल ]** दल खण्डम् ।

**[ लकुल ]** 'लगे सङ्गे' (१०२४) लग् । लगतीति लकुल । 'कुमुल - तुमुल - निचुल - वञ्जुल - मञ्जुल - पृथुल - विशंस्थुलाङ्गल - मुकुल - शष्कुलादयः' (उणा० ४८७) लकुलनिपात्यते ।

इति बलादिगणः ।।छ।।

**अहरादिभ्योऽञ्** ॥ ६।२।८७ ॥

**[ अहरादिभ्यः ]** अहन् - आदि । अह आदिर्येषां ते = अहरादयः, तेभ्यः = अहरादिभ्यः । 'रो लुप्यरि' (२।१।७५) न० → र० ।

**[ अञ् ]** अञ् प्रथमा सि ।

---

卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

**[ आह्नम् ]** अह्नां निवासः - अदूरभवो वा । अहानि सन्त्यत्र । अह्ना निवृत्तम् = आह्नम् । अनेन अञ्प्र० → अ । वृद्धिः । 'अनीनादट्यह्नोऽतः' (७।४।६६) अलोपः । सि - अम् ।

**[ लौमम् ]** लोम्नां निवासः - अदूरभवो वा । लोमानि सन्त्यत्र । लोमभिर्निवृत्तं = लौमम् । अनेन अञ्प्र० → अ । वृद्धिः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । सि - अम् ।

इत्यहरादिराकृतिगणः ॥छ॥

## सख्यादेरेयण् ॥ ६।२।८८ ॥

**[ सख्यादेः ]** सखि(सखा) आदिर्यस्य सः = सख्यादिः, तस्मात् ।

**[ एयण् ]** एयण् प्रथमा सि ।

**[ साखेयः ]** सखि । सख्युर्निवासः - अदूरभवो वा । सखा अत्रास्ति । सख्या निवृत्तः = साखेयः । अनेन एयण्प्र० → एय । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ साखिदत्तेयः ]** सखि 'डुदांग्क् दाने' (११३८) दा । सख्या दीयते स्म । 'क्त - क्तवतू' (५।१।१७४) क्तप्र० → त । 'दत्' (४।४।१०) इत्यनेन दा० → दत्० । सखिदत्तस्य निवासः - अदूरभवो वा । सखिदत्तोऽत्रास्ति । सखिदत्तेन निवृत्तः = साखिदत्तेयः । अनेन एयण्प्र० → एय । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वायुदत्त ]** 'वांक् गति - गन्धनयोः' (१०६३) वा । वातीति वायुः । 'कृ - वा - पा - जि - स्वदि - साध्यशौ - दॄ - स्ना - सनि - जानि - रहीण्भ्य उण्' (उणा० १) उण्प्र० → उ । तेन = (वायुना) दीयते स्म । 'क्त - क्तवतू' (५।१।१७४) क्तप्र० → त । 'दत्' (४।४।१०) दा० → दत्देशः ।

**[ गोफिल ]** गोफिं लाति = गोफिलः । 'आतो डोऽह्वा - वा - मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ सपूल ]** सपू - पर्णानि लाति = सपूलः । 'आतो डोऽह्वा - वा - मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

इति सख्यादिगणः ॥छ॥

## पन्थ्यादेरायनण् ॥ ६।२।८९ ॥

**[ पन्थ्यादेः ]** पथिन् - आदि । पन्थाः आदिर्यस्य सः = पन्थ्यादिः, तस्मात् ।

**[ आयनण् ]** आयनण् प्रथमा सि ।

**[ पान्थायनः ]** पथो निवासः - अदूरभवो वा । पन्थाः अत्रास्ति । पथा निवृत्तः = पान्थायनः । अनेन आयनण्प्र० → आयन । वृद्धिः । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः । पथिन्शब्दस्य प्रत्यययोगे पकारात्परो नागमोऽत एव निपातनात् ।

**[ पाक्षायणः ]** पक्षस्य निवासः - अदूरभवो वा । पक्षोऽत्रास्ति । पक्षेण निवृत्तः । अनेन आयनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ तौषायणः ]** तुषाणां निवासः - अदूरभवो वा । तुषाः सन्त्यत्र । तुषैर्निवृत्तः = तौषायणः । अनेन आयनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ उलन्द ]** उलिन्द सौत्रो धातुः । ओलतीति उलन्दः । कुमुदेति साधुः । उलन्दनिपातः ।

**[ खापुरायण ]** खमिव पुरमस्य = खपुरः । खपुरस्यापत्यं = खापुरायणः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ खानुरायण ]** 'खनूग् अवदारणे' (९१३) खन् । खनतीति खनुरः । उरप्र० । खनुरस्यापत्यं = खानुरायणः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ कोष्ट ]** क 'वसं निवासे' (९९९) वस् । कं वसति स्म = कोष्ट । 'गत्यर्थाऽकर्मक - पिब - भुजेः (५।१।११) क्तप्र० → त । पृषोदरादित्वात् निपातः ।

**[ कौद्र ]** कु 'द्रांक् कुत्सितगतौ' (१०६६) द्रा । कुं द्रातीति कुद्रः । 'आतो डोऽह्वा - वा - मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । कुद्रस्यापत्यं = कौद्रः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ भास्त्रायण ]** भस्त्र । भस्त्रस्यापत्यं = भास्त्रि(ः) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । भास्त्रेरपत्यं युवा । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ रैवत ]** रै 'वनूयि याचने' (१५०६) वन् । राया वन्यते स्म । 'क्त - क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि - रमि - नमि - गमि - हनि - मनि - वनति०' (८।२।५५) नलुक् ।

**[ रायस्पोष ]** रै - पोष । रायः पोषः = रायस्पोषः । 'भ्रातुष्पुत्र - कस्कादयः' (२।३।१४) निपातः ।

**[ ऐन्द्रायण ]** इन्द्रस्यापत्यम् = ऐन्द्रायणः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ धौमतायन ]** धूमं तनोति = धूमत । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । धूमतस्यापत्यं = धू(धौ)मतायनः । 'नडादिभ्य०' (६।१।५३) आयनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ साम्बुरायण ]** अम्बु 'रांक् दाने' (१०६९) रा । अम्बु राति = अम्बुरः । 'आतो डोऽह्वा - वा - मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । अम्बुरेण सह वर्त्तते = साम्बुरः, तस्यावापनमस्य । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) णत्वम् ।

**[ सौशायन ]** सु 'शोंच् तक्षणे' (११४७) शो । 'आत् सन्ध्यक्षरस्य' (४।२।१) शा । सुष्ठु श्यति = सुशः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । सुशस्यापत्यं = शौ(सौ)शायनः । 'नडादिभ्य०' (६।१।५३) आयनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ जाम्बवत ]** जा च अम्बा च, ताभ्यां वन्यते स्म । 'क्त - क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि - रमि - नमि - गमि - हनि - मनि - वनति०' (४।१।५५) नलुक् ।

इति सुपन्थ्यादिगणः ॥छ॥

## कर्णादेरायनिञ् ॥ ६।२।९० ॥

**[ कर्णादेः ]** कर्ण आदिर्यस्य सः = कर्णादिः, तस्मात् ।

**[ आयनिञ् ]** आयनिञ् प्रथमा सि ।

**[ कार्णायनिः ]** कर्णस्य राज्ञ ऋषिर्वा(ऋषेर्वा) निवासः - अदूरभवो वा । कर्णोऽत्रास्ति । कर्णेन निवृत्तः = क(का)र्णायनिः । अनेन आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वासिष्ठायनिः ]** वसिष्ठस्य निवासः - अदूरभवो वा । वसिष्ठोऽत्रास्ति । वसिष्ठेन निवृत्तः = वासिष्ठायनिः । अनेन आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पाञ्चजन्य ]** पञ्च च ते जनाश्च = पञ्चजनाः । पञ्चजनेषु भवः = पाञ्चजन्यः । 'गम्भीर - पञ्चजन - बहिर्देवात्' (६।३।१३५) ञ्यप्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ जीवन्त ]** जीवन्त ऋषिरुच्यते ।

इति कर्णादिगणः ॥छ॥

## उत्करादेरीयः ॥ ६।२।९१ ॥

**[ उत्करादेः ]** उत्कर आदिर्यस्य सः = उत्करादिः, तस्मात् ।

**[ ईयः ]** ईय प्रथमा सि ।

**[ उत्करीयः ]** उत्करस्य निवासः - अदूरभवो वा । उत्करोऽत्रास्ति । उत्करेण निवृत्तः = उत्करीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सङ्करीयः ]** सङ्करस्य निवासः - अदूरभवो वा । सङ्करोऽत्रास्ति । सङ्करेण निवृत्तः = सङ्करीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ जन्य ]** जनी । जनीं - वधूं वहति । 'हृद्य - पद्य - तुल्य - मूल्य - वश्य - पथ्य - वयस्य - धेनुष्या - गार्हपत्य - जन्य - धर्म्यम्' (७।१।११) जन्यनिपातः ।

इति उत्करादिगणः ॥छ॥

## नडादेः कीयः ॥ ६।२।९२ ॥

**[ नडादेः ]** नड आदिर्यस्य सः = नडादिः, तस्मात् ।

**[ कीयः ]** कीय प्रथमा सि ।

**[ नडकीयः ]** नडानां निवासः - अदूरभवो वा । नडाः सन्त्यत्र । नडैर्निवृत्तः = नडकीयः । अनेन कीयप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ प्लक्षकीयः ]** प्लक्षाणां निवासः - अदूरभवो वा । प्लक्षाः सन्त्यत्र । प्लक्षैर्निवृत्तः = प्लक्षकीयः । अनेन कीयप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

इति नडादिगणः ॥छ॥

**कृशाश्वादेरीयण्** ॥ ६।२।९३ ॥

**[ कृशाश्वादेः ]** कृशाश्व आदिर्यस्य सः = कृशाश्वादिः, तस्मात् ।

**[ ईयण् ]** ईयण् प्रथमा सि ।

**[ कार्शाश्वीयः ]** कृशोऽश्वोऽस्य सः = कृशाश्वः । कृशाश्वस्य निवासः - अदूरभवो वा । कृशाश्वोऽत्रास्ति । कृशाश्वेन निवृत्तः = कार्शाश्वीयः । अनेन ईयण्प्र० → ईय । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आरिष्टीयः ]** अरिष्टस्य निवासः - अदूरभवो वा । अरिष्टोऽत्रास्ति । अरिष्टेन निवृत्तः = आरिष्टीयः । अनेन ईयण्प्र० → ईय । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अरिष्य ]** अरि 'पांक् रक्षणे' (१०६७) पा । अरीन् पाति । 'कर्म - वेषाद् यः' (६।४।१०३) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । गणपाठात् षागमः ।

**[ सायस्( स ) ]** सह अयसा वर्त्तते = सायस । गणपाठात् अत्समासान्तः → अप्र० ।

**[ अरुष्य( प ) ]** अरुस् 'पांक् रक्षणे' (१०६७) पा । अरुः पाति । 'आतो डोऽह्वा - वा - मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । 'सो रुः' (२।१।७२) स० → र० । 'रः कख - पफयोः०' (१।३।५) र० → ष० ।

**[ संदृश ]** सम्यग् दृश्यते = संदृश । 'अच्' (५।१।४९) अच्प्र० → अ ।

**[ पुरगा ]** पुरगा राक्षसी उच्यते ।

इति कृशाश्वादिगणः ॥छ॥

**ऋश्यादेः कः** ॥ ६।२।९४ ॥

**[ ऋश्यादेः ]** ऋश्य आदिर्यस्य सः = ऋश्यादिः, तस्मात् ।

**[ कः ]** क प्रथमा सि ।

**[ ऋश्यकः ]** ऋश्यस्य निवासोऽदूरभवो वा । ऋश्योऽत्रास्ति । ऋश्येन निवृत्तः = ऋश्यकः । अनेन कप्र० ।

**[ न्यग्रोधकः ]** न्यग्रोधस्य निवासः - अदूरभवो वा । न्यग्रोधोऽत्रास्ति । न्यग्रोधेन निवृत्तः = न्यग्रोधकः । अनेन कप्र० ।

इति ऋश्यादिगणः ॥छ॥

**वराहादेः कण्** ॥ ६।२।९५ ॥

**[ वराहादेः ]** वराह आदिर्यस्य सः = वराहादिः, तस्मात् ।

**[ कण् ]** कण् प्रथमा सि ।

**[ वाराहकम् ]** वराहस्य निवासः - अदूरभवो वा । वराहोऽत्रास्ति । वराहेन(ण) निवृत्तं = वाराहकम् । अनेन कण्प्र० → क । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् ।

**[ पालाशकम् ]** पलाशस्य निवासः - अदूरभवो वा । पलाशोऽत्रास्ति । पलाशेन निवृत्तं = पालाशकम् । अनेन कण्प्र० → क । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् ।

इति वराहादिगणः ॥छ॥

## कुमुदादेरिकः ॥ ६।२।९६ ॥

**[ कुमुदादेः ]** कुमुद(दं) आदिर्यस्य सः = कुमुदादिः, तस्मात् ।

**[ इकः ]** इक प्रथमा सि ।

**[ कुमुदिकम् ]** कुमुदानां निवासः - अदूरभवो वा । कुमुदानि सन्त्यत्र । कुमुदैर्निवृत्तं = कुमुदिकम् । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ इक्कटिकम् ]** 'इंण्क् गतौ' (१०७५) इ । एतीति क्विप्प्र० । 'ह्रस्वस्य०' (४।४।११३) तोऽन्तः - इत् । कटाः । पृषोदरादित्वात् तस्य कः । इक्कटाः सन्त्यत्र । अनेन इकप्र० ।

**[ बल्वजिकम् ]** बि(ब)ल्वजानां निवासः - अदूरभवो वा । बल्वजाः सन्त्यत्र । बल्वजैर्निवृत्तं = बल्वजिकम् । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

इति कुमुदादिः ॥छ॥

## अश्वत्थादेरिकण् ॥ ६।२।९७ ॥

**[ अश्वत्थादेः ]** अश्वत्थ आदिर्यस्य सः = अश्वत्थादिः, तस्मात् ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ आश्वत्थिकम् ]** अश्वत्थानां निवासः - अदूरभवो वा । अश्वत्थाः सन्त्यत्र । अश्वत्थैर्निवृत्तः(त्तम्) = आश्वत्थिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कौमुदिकम् ]** कुमुदानां निवासः - अदूरभवो वा । कुमुदानि सन्त्यत्र । कुमुदैर्निवृत्तः(त्तं) = कौमुदिकम् । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ घासकुन्द ]** घासप्रधानं कुन्दः = घासकुन्द ।

**[ मुचुकर्ण ]** मुचौ कर्णौ यस्य स । पृषोदरादित्वात् मुचुकर्णनिपातः ।

इति अश्वत्थादिगणः ॥छ॥

## साऽस्य पौर्णमासी ॥ ६।२।९८ ॥

**[ सा ]** सा प्रथमा सि । 'दीर्घङ्याब् - व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'वाद्यात्' (६।१।११) इत्यधिकारात् प्रथमान्तादिति लभ्यते, अथवा पञ्चमी दीयते ।

**[ अस्य ]** अस्य सप्तमी ङि । सूत्रत्वाल्लोपः ।

**[ पौर्णमासी ]** पौर्णमासी प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

देश इति निवृत्तम्, पौर्णमासी ग्रहणात् । इतिकरणो विवक्षार्थः । तेन मासार्द्धमासयोरेव संवच्छरपर्वणोः प्रत्ययः । मासार्द्धमासयोः किं विशिष्टयोः । संवच्छरस्य पर्वणी, संवच्छरस्य पर्वणी, संवच्छरस्य पर्वणी तयोः । अस्य इति अवयवावयविसंबन्धे षष्ठी ।

**[ पौषो मासः ]** पुष्य । पुष्येण चन्द्रयुक्तेन युक्ता पौर्णमासी = पौषी । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तिष्य - पुष्ययोर्भाणि' (२।४।९०) यलुक् ।

'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । पौषी पौर्णमासी अस्य सः = पौषः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः ।

**[ पौषोऽर्द्धमासः ]** पुष्येण चन्द्रयुक्तेन युक्ता पौर्णमासी = पौषी । शेषं पूर्ववत् । पौषी पौर्णमासी अस्य सः = पौषः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः । अर्द्धमासः ।

**[ माघः ]** मघाभिश्चन्द्रयुक्ताभिर्युक्ता पौर्णमासी = माघी । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । माघी पौर्णमासी अस्य = माघः । अनेन विहितः 'प्राग जितादण्' (६।१।१३) अण्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ वैशाखः ]** विशाखाभिश्चन्द्रक्ताभिर्युक्ता पौर्णमासी = वैशाखी । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । वैशाखी पौर्णमासी अस्य = वैशाखः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ आषाढः ]** आषाढाभिश्चन्द्रयुक्ताभिर्युक्ता पौर्णमासी = आषाढी । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । आषाढी पौर्णमासी अस्य = आषाढः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ पौर्णमासी ]** पूर्णमास । पूर्णो माश्चन्द्रोऽस्यामस्तीति पौर्णमासी । 'पूर्णमासोऽण्' (७।२।५५) अण्प्र० → अ । वृद्धिः औ । 'अणञेयेकण्०' (२।४।२०) ङी । पूर्णश्चासौ माश्च = पूर्णमाः । पूर्णमास इयमिति वा । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० औ । यद्वा पूर्णो मा मासो वा अस्याम् । पूर्णमासा वा युक्तं(क्ता) = पौर्णमासी । अत एव निपातनात् अण्प्र० → अ । वृद्धिः औ । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः ॥छ॥

## आग्रहायण्यश्वत्थादिकण् ॥ ६।२।९९ ॥

**[ आग्रहायण्यश्वत्थात् ]** आग्रहायणी च अश्वत्था च = आग्रहायण्यश्वत्थम्, तस्मात् । 'क्लीबे' (२।४।९७) ह्रस्वत्वम् ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ आग्रहायणिको मासोऽर्द्धमासो वा ]** अग्रं हायनस्येति कृते षष्ठ्यन्तस्य पूर्वनिपातः प्राप्नोति राजपुरुषवत् । 'द्वि - त्रि - चतुष्पूरणा०' (३।१।५६) इति तत्पुरुषसमासः । 'प्रथमोक्तं प्राक्' (३।१।१४८) अग्रस्य पूर्वनिपातः । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६८) णत्वम् । अग्रहायण एव = आग्रहायणी । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । ' अस्य ङ्यां लुक्' (२।४।८६) अलुक् । आग्रहायणी पौर्णमासी अस्य = आग्रहायणिको मासः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । एवम् - अर्द्धमासो वा ।

**[ आश्वत्थिको मासोऽर्द्धमासो वा ]** अश्वत्थेन चन्द्रयुक्तेन युक्ता (रात्रिः) = अश्वत्था । 'चन्द्रयुक्तात्०' (६।२।६) अणो बाधकः 'श्रवणा - ऽश्वत्थान्नाम्न्यः' (६।२।८) अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । अश्वत्था पौर्णमासी यस्य सः = आश्वत्थिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । मासोऽर्द्धमासो वा ।

**[ आग्रहायणी मार्गशीर्षी ]** आग्रहायणी मार्गशीर्षी - पूर्णमासी नाम ।

**[ अश्वत्था आश्वयुजी ]** अश्वत्था आश्वयुजी - पौर्णमासी नाम ॥छ॥

**चैत्री - कार्तिकी - फाल्गुनी - श्रवणाद् वा** ॥ ६।२।१०० ॥

**[ चैत्रीकार्तिकीफाल्गुनीश्रवणात् ]** चैत्री च कार्तिकी च फाल्गुनी च श्रवणा च = चैत्रीकार्तिकीफाल्गुनीश्रवणम् । 'क्लीबे' (२।४।९७) ह्रस्वः । तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ चैत्रिकः चैत्रो वा मासोऽर्द्धमासो वा ]** चित्राभिश्चन्द्रयुक्ताभिर्युक्ता पौर्णमासी = चैत्री । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । चैत्री पौर्णमासी अस्य सः = चैत्रिकः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । एवम् - चैत्री पौर्णमासी यस्य सः = चैत्रः । 'साऽस्य पौर्णमासी' (६।२।९८) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । मासोऽर्द्धमासो वा ।

**[ कार्त्तिकिकः, कार्त्तिकः ]** कृत्तिकाभिश्चन्द्रयुक्ताभिर्युक्ता पौर्णमासी = कार्त्तिकी । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० → अ । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । कार्त्तिकी पौर्णमासी यस्य सः = कार्त्तिकिकः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । एवम् - कार्त्तिकः । 'साऽस्य पौर्णमासी' (६।२।९८) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ फाल्गुनिकः, फाल्गुनः ]** फल्गुनी । फल्गुनीभिश्चन्द्रयुक्ताभिर्युक्ता पौर्णमासी = फाल्गुनी । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । फाल्गुनी पौर्णमासी यस्य सः = फाल्गुनिकः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । एवम् - फाल्गुनः । 'साऽस्य पौर्णमासी' (६।२।९८) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । फल्गुन 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ श्रावणिकः, श्रावणः ]** श्रवण । श्रवणेन चन्द्रक्तेन युक्ता पौर्णमासी = श्रवणा । 'श्रवणा - ऽश्वत्थान्नाम्न्यः' (६।२।८) अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । श्रवणा पौर्णमासी यस्य सः = श्रावणिकः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम् - श्रावणः । 'साऽस्य पौर्णमासी' (६।२।९८) अण्प्र० → अ ॥छ॥

**देवता** ॥ ६।२।१०१ ॥

**[ देवता ]** देवता प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ आर्हतः ]** अर्हत् । अर्हन् देवता अस्य सः = आर्हतः । अनेन अण्प्र० → अ । वृद्धिः ।

**[ जैनः ]** जिनो देवता अस्य सः = जैनः । अनेन अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आग्नेयो ब्राह्मणः ]** अग्निर्देवता अस्य सः = आग्नेयः । अनेन 'कल्यग्ने०' (६।१।१७) एयण्प्र० → एय । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । ब्राह्मणः ।

**[ ऐन्द्रं हविः ]** इन्द्रो देवता अस्य = ऐन्द्रम् । अनेन अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ऐन्द्रः पुरोडाशः ]** इन्द्रो देवता अस्य = ऐन्द्रः । अनेन अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वारुणश्चरुः ]** वरुण । वरुणो देवता अस्य = वारुणः । अनेन अण्प्र० → अ । वृद्धि आ । चरुः ।

**[ आदित्यः ]** आ(अ)दिति । आ(अ)दितिर्देवता अस्य । 'अनिदम्यणपवादे च दित्यदित्यादित्य - यम - पत्युत्तरपदाञ्यः (६।१।१५) ञ्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । वृद्धिः । 'अञ्वर्गस्यान्तस्थातः' (१।३।३३) द्वित्वम् ।

**[ बार्हस्पत्यः ]** बृहस्पति । बृहस्पतिर्देवता अस्य सः = बार्हस्पत्यः । 'अनिदम्यणपवादे च दित्यदित्यादित्य - यम - पत्युत्तरपदाञ्यः' (६।१।१५) ञ्यप्र० → य । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ गव्यम् ]** गो । गौर्देवता यस्य = गव्यम् । 'गोः स्वरे यः' (६।१।२७) यप्र० । 'य्यक्ये' (१।२।२५) अव् ।

**[ द्वीन्द्रम् ]** द्वि - इन्द्र । द्वौ इन्द्रौ देवते अस्य हविषः = द्वीन्द्रम् । अनेन अण्प्र० → अ । 'द्विगोरनपत्ये य - स्वराऽऽदेर्लुबद्विः' (६।१।२४) अण्लुप् । उभयत्र सि - अम् ॥छ॥

## पैङ्गाक्षीपुत्रादेरीयः ॥ ६।२।१०२ ॥

**[ पैङ्गाक्षीपुत्रादेः ]** पैङ्गाक्षीपुत्र आदिर्यस्य सः = पैङ्गाक्षीपुत्रादिः, तस्मात् ।

**[ ईयः ]** ईय प्रथमा सि ।

**[ पैङ्गाक्षीपुत्रीयं हविः ]** पिङ्ग - अक्षिन् । पिङ्गेऽक्षिणी यस्य सः = पिङ्गाक्षः । 'सक्थ्यक्ष्णः स्वाङ्गे' (७।३।१२६) टः समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः । पिङ्गाक्षस्यापत्यमनन्तरं स्त्री = पैङ्गाक्षी । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'नुर्जातेः' (२।४।७२) ङी । 'समानानां०' (१।२।१) दीर्घः । पैङ्गाक्ष्याः पुत्रः = पैङ्गाक्षीपुत्रः ।

यद्वा पिङ्गाक्षस्यापत्यं वृद्धं स्त्री = पैङ्गाक्षी(क्षा) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अनार्षे वृद्धेऽणिञो बहुस्वर - गुरूपान्त्यस्याऽन्तस्य ष्यः' (२।४।७८) इञ्स्थाने ष्य० । 'आत्' (२।४।१८) आप्प्र० → आ । तस्याः पुत्रः = पैङ्गाक्षीपुत्रः । 'ष्या पुत्र - पत्योः केवलयोरीच् तत्पुरुषे' (२।४।८३) इत्यादिना ष्यास्थाने ईच्देशः → ई । पैङ्गाक्षीपुत्रो देवता अस्य तत् = पैङ्गाक्षीपुत्रीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् । हविस् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ तार्णबिन्दवीयं हविः ]** तृणबिन्दु मांडणी । तृणे बिन्दवः पेया यस्य सः = तृणबिन्दुः । तृणबिन्दोरपत्यं = तार्णबिन्दवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । तार्णबिन्दवो देवता अस्य तत् = तार्णबिन्दवीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् ।

**[ पैङ्गीपुत्रीयम् ]** पिङ्गस्यापत्यं = पैङ्गी । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'नुर्जातेः' (२।४।७२) ङी । पैङ्ग्याः पुत्रः = पैङ्गीपुत्रः । पैङ्गीपुत्रो देवता अस्य तत् = पैङ्गीपुत्रीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् ॥छ॥

**शुक्रादियः** ॥ ६।२।१०३ ॥

**[ शुक्रात् ]** शुक्र पञ्चमी ङसि ।

**[ इयः ]** इय प्रथमा सि ।

**[ शुक्रियं हविः ]** शुक्रो देवता अस्य तत् = शुक्रियम् । अनेन इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् ।

**[ शुक्रियोऽध्यायः ]** शुक्रो देवता अस्य सः = शुक्रियः । अनेन इयप्र० । 'अवर्णेवर्णस्य (७।४।६८) अलुक् । अध्यायः ॥छा।

**शतरुद्रात् तौ** ॥ ६।२।१०४ ॥

**[ शतरुद्रात् ]** शतरुद्र पञ्चमी ङसि ।

**[ तौ ]** तद् । प्र० औ । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[ शतरुद्रीयम्, शतरुद्रियम् ]** शतं संख्या येषां ते = शतसंख्या(ः) । शतसंख्या रुद्रा = शतरुद्रास्ते देवता अस्य तत् = शतरुद्रीयम्, शतरुद्रियम् । अनेन ईय - इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

शतं रुद्रा देवता अस्येति द्विगावपि विधानसामर्थ्याद् लुब् न भवति ॥छा।

**अपोनपादपान्नपातस्तृ चातः** ॥ ६।२।१०५ ॥

**[ अपोनपादपान्नपातः ]** अपोनपाच्च अपान(न्न)पाच्च = अपोनपादपान्नपात्, तस्मात् ।

**[ तृ ]** तृ प्रथमा सि । सूत्रत्वात् लुप् ।

**[ च ]** च प्रथमा सि ।

**[ आतः ]** आत् षष्ठी ङस् ।

**[ अपोनप्त्रीयम्, अपोनप्त्रियम् ]** अपकृष्टे(ष्ट)मूनं यस्य तत् = अपोनम् । 'पत्लृ गतौ' (९६२) पत् । अपोनं पतत्(पतन्तं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे०' (३।४।२०) णिग्प्र० । 'ञ्णिति' (८।३।५०) उपान्त्यवृद्धिः । अपोनं पातयतीति अपोनपात् । क्विप्प्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अपोनपात् देवता यस्य तत् = अपोनप्त्रीयम् । अनेन ईयप्र० - आत्स्थाने तृदेशः । 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् । सि - अम् । एवम् - अपोनप्त्रियम् । अनेन इयप्र० - आत्स्थाने तृदेशः । 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् । सि - अम् ॥छा।

**[ अपान्नप्त्रीयम्, अपान्नप्त्रियम् ]** अपकृष्टमन्नमपान्नम् । 'पत्लृ गतौ' (९६२) पत् । अपान्नं पातयतीति = अपान्नपात् । क्विप्प्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः । अपान्नपात् देवता अस्य तत् = अपान्नप्त्रीयम्, अपान्नप्त्रियम् । अनेन ईय - इयप्र० - आत्स्थाने तृदेशः । 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् । सि - अम् ॥छा।

**महेन्द्राद् वा** ॥ ६।२।१०६ ॥

**[ महेन्द्रात् ]** महेन्द्र पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ महेन्द्रीयम्, महेन्द्रियम्, माहेन्द्रं हविः ]** महत् - इन्द्र । महांश्चासाविन्द्रश्च = महेन्द्रः । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लोपः । महेन्द्रो देवता यस्य तत् = महेन्द्रीयम्, महेन्द्रियम् । अनेन ईय - इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् ॥छा॥

## क - सोमात् ट्यण् ॥ ६।२।१०७ ॥

**[ कसोमात् ]** कश्च सोमश्च = कसोमम्, तस्मात् ।

**[ ट्यण् ]** ट्यण् प्रथमा सि ।

**[ कायं हविः, कायी इष्टिः ]** 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) का । कायति - शब्दोच्चारं करोति = कः । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । कः - प्रजापतिः - देवता अस्य = कायं हविः, कायी । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । सि - अम् । 'अणञेयेकण्०' (२।४।२०) ङी । य(इ)ष्टिः ।

कशब्दं प्रति णित्त्वस्य वैयर्थ्यादालोपो न भवति ।

**[ सौम्यं हविः, सौम्यं सूक्तम्, सौमी ऋक् ]** 'षुंग्ट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै - ष्ठिव - ष्वष्कः' (२।३।९८) सु । सुनोतीति । 'अर्तीरि - स्तु - सु - हु - सृ - घृ - धृ - शॄ - क्षि - यक्षि - भा - वा - व्या - धा - पा - या - वलि - पदिनीभ्यो मः' (उणा० ३३८) मप्र० - सोमनिपातः । सोमो देवता अस्य तत् = सौम्यम् । अनेन ट्यण्प्र० → य । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् । हविः सूक्तं वा । सौम्य 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । ऋक् प्रथमा सि ॥छा॥

## द्यावापृथिवी-शुनासीरा-ऽग्नीषोम-मरुत्वद्-वास्तोष्पति-गृहमेधादीय-यौ ॥ ६।२।१०८ ॥

**[ द्यावापृथिवीशुनासीराऽग्नीषोममरुत्वद्वास्तोष्पतिगृहमेधात् ]** द्यावापृथिवी च शुनासीरश्च अग्नीषोमश्च मरुत्वांश्च वास्तोष्पतिश्च गृहमेधा च = द्यावापृथिवीशुनासीराऽग्नीषोममरुत्वद्वास्तोष्पतिगृहमेधम्, तस्मात् ।

**[ ईययौ ]** ईयश्च यश्च = ईययौ ।

**[ द्यावापृथिवीयं हविः, द्यावापृथिव्यम् ]** दिव् - पृथिवी । द्यो(द्यौ)श्च पृथिवी च = द्यावापृथिवी(व्यौ) । 'दिवो द्यावा' (३।२।४४) द्यावादेशः । द्यावापृथिव्यौ देवते यस्य तत् = द्यावापृथिवीयम्, द्यावापृथिव्यम् । अनेन ईय - यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि - अम् ।

**[ शुनासीरीयम्, शुनासीर्यम् ]** शुनश्च वायुः, सीरश्च आदित्यः = शुनासीरौ । 'वेदसहश्रुताऽवायुदेवतानाम्' (३।२।४१) आकारः । शुनासीरौ देवते यस्य तत् = शुनासीरीयम्, शुनासीर्यम् । अनेन ईय - यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् ।

**[ अग्नीषोमीयम्, अग्नीषोम्यम् ]** अग्निश्च सोमश्च = अग्नीषोमौ । 'ईः षोम -वरुणेऽग्नेः' (३।२।४२) ईत्वम् - षत्वम् । अग्नीषोमौ देवते यस्य तत् = अग्नीषोमीयम्, अग्नीषोम्यम् । अनेन ईय - यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् ।

**[ मरुत्वतीयम्, मरुत्वत्यम् ]** मरुत्वत् । मरुत्वान् देवता अस्य तत् = मरुत्वतीयम्, मरुत्वत्यम् । अनेन ईय - यप्र० । पदसंज्ञाऽभावात् दो न भवति । पदत्वमपि कृतो न भवति ? सित्येवेति नियमात् ।

**[ वास्तोष्पतीयम्, वास्तोष्पत्यम् ]** वास्तोष्पतिर्देवता अस्य = वास्तोष्पतीयम्, वास्तोष्पत्यम् । अनेन ईय - यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि - अम् ।

**[ गृहमेधीयम्, गृहमेध्यम् ]** गृहं मेधते = गृहमेधा । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । यद्वा गृहं च मेधा च = गृहमेधे, ते देवता अस्य तत् । गृहमेधो देवता अस्य तत् = गृहमेधीयम्, गृहमेध्यम् । अनेन ईय - यप्रत्ययश्च । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । सि - अम् ॥छ॥

### वाय्वृतु - पित्रुषसो यः ॥ ६।२।१०९ ॥

**[ वाय्वृतुपित्रुषसः ]** वायुश्च ऋतुश्च पिता च उषस् च (उषश्च) = वाय्वृतुपित्रुषस्, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

**[ वायव्यम् ]** वायुर्देवता अस्य = वायव्यम् । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि - अम् ।

**[ ऋतव्यम् ]** ऋतुर्देवता अस्य = ऋतव्यम् । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि - अम् ।

**[ पित्र्यम् ]** पितृ । पिता देवता अस्य = पित्र्यम् । अनेन यप्र० । 'ऋतोरस्तद्धिते' (१।२।२६) रत्वम् । सि - अम् ।

**[ उषस्यम् ]** 'उषू दाहे' (५२९) उष् । ओषति अशिवमाराधिता = उषस् । 'मिथि-रञ्ज्युषि - तृ - पृ - शृ - भू - वष्टिभ्यः कित्' (उणा० ९७१) किद् अस्प्र० । उषस्शब्दः संध्यावाची स्त्री - क्लीबलिङ्गः । प्रभातवाची नपुंसकः । उषा देवता अस्य तत् = उषस्यम् । अनेन यप्र० । सि - अम् ॥छ॥

### महाराज - प्रोष्ठपदादिकण् ॥ ६।२।११० ॥

**[ महाराजप्रोष्ठपदात् ]** महाराजश्च प्रोष्ठपदश्च = महाराजप्रोष्ठपदम्, तस्मात् ।

**[ इकण् ]** इकण् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ माहाराजिकः, माहाराजिकी ]** महत् - राजन् । महांश्चासौ राजा च = महाराजः । 'राजन् - सखेः' (७।३।१०६) अट्समासान्तः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । जातीर्येकार्थेऽच्वेः (३।२।७०) डा० । 'डित्यन्त्य०' (२।१।११४) अत्लोपः । महाराजो देवता अस्य सः = माहाराजिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ प्रौष्ठपदिकः, प्रौष्ठपदिकी ]** प्रोष्ठो-गौस्तस्येव पादौ यस्य सः = प्रौष्ठपदः । 'सुप्रात - सुश्व - सुदिव - शारिकुक्ष - चतुरस्त्रैणीपदा - ऽजपद - प्रोष्ठपद - भद्रपदम्' (७।३।१२९) इत्यादिना प्रोष्ठपदनिपात्यते । प्रोष्ठपदो देवता अस्य सः = प्रौष्ठपदिकः । 'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (न्या० सं० वक्ष० (१) / सूत्र (१६)) इति न्यायात् स्त्रीलिङ्गोऽपि नक्षत्रवाची प्रोष्ठपदाशब्दो ग्राह्यः । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छ॥

### कालाद् भववत् ॥ ६।२।१११ ॥

**[ कालात् ]** काल पञ्चमी ङसि ।

**[ भववत् ]** भवे इव = भववत् । 'तत्र' (७।१।५३) वत्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ मासिकम् ]** मासे भवं, मासो देवता अस्येति वा = मासिकम् । 'वर्षा - कालेभ्यः' (६।३।८०) इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि - अम् ।

**[ सांवत्सरिकम् ]** संवत्सरे भवं, संवत्सरो देवता अस्येति वा = सांवच्छ(त्स)रिकम् । 'वर्षा - कालेभ्यः' (६।३।८०) इकण्प्र० → इक । वृद्धिः । सि - अम् ।

**[ हैमनम् ]** हेमन्त । हेमन्ते भवं, हेमन्तो देवता अस्येति वा = हैमनम् । 'हेमन्ताद् वा तलुक् च' (६।३।९१) अण्प्र० → अ - तस्य लुक् च । वृद्धिः ऐ ।

**[ वासन्तम् ]** वसन्ते भवं, वसन्तो देवता अस्येति वा = वासन्तम् । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रावृषेण्यम् ]** प्रावृष् । प्रावृषि भवं, प्रावृट् देवता अस्येति वा = प्रावृषेण्यम् । 'प्रावृष एण्यः' (६।३।९२) एण्यप्र० । सि - अम् ॥छा॥

## आदेः छन्दसः प्रगाथे ॥ ६।२।११२ ॥

**[ आदेः ]** आदि पञ्चमी ङसि ।

**[ छन्दसः ]** छन्दस् पञ्चमी ङसि ।

**[ प्रगाथे ]** प्रगाथ सप्तमी ङि । प्र 'ग्रन्थश् संदर्भे' (१५४८) ग्रन्थ् । प्रग्रथ्यते = प्रगाथः । 'भावा - ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । पृषोदरादित्वात् प्रगाथनिपात्यते । अथवा कैं (३६) - 'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा, प्रपूर्व० । प्रगीयते = प्रगाथः । 'कमि-प्रु-गार्तिभ्यस्थः' (उणा० २२५) थप्र०, तस्मिन् ।

**यत्र द्वे ऋचौ प्रग्रन्थनेन प्रकर्षगानेन वा तिस्रः क्रियन्ते स मन्त्रविशेषः प्रगाथः ।**

**[ पाङ्क्तः प्रगाथः ]** पङ्क्ति । पङ्क्तिरादिरस्य प्रगाथस्य = पाङ्क्तः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । प्रगाथः छन्दोविशेषः ।

**[ आनुष्टुभः ]** अनुष्टुप् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'धुटस्तृतीयः' (२।१।७६) प० → ब० । 'विरामे वा' (१।३।५१) ब० → प० । अनुष्टुप् आदिरस्य प्रगाथस्य सः = आनुष्टुभः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः ।

**[ जागतः ]** जगती । जगती आदिरस्य प्रगाथस्य सः = जागतः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ उदित्ययं शब्द आदिरस्य प्रगाथस्य ]** उदितिशब्दः सूर्योपस्थाने वर्त्तते ।

**[ पङ्क्तिरादिरस्य अनुवाकस्य ]** अनु 'वचंक् भाषणे' (१०९६) वच् । अनूच्यत इति । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'वचोऽशब्दनाम्नि' (४।१।११९) इति कत्वस्य न निषेधः शब्दनामत्वात् । 'च-जः क-गम्' (२।१।८६) च० → क० । अनुवाकः पाठविशेष इत्यर्थः ॥छा॥

## योद्धृ-प्रयोजनाद् युद्धे ॥ ६।२।११३ ॥

**[ योद्धृप्रयोजनात् ]** योद्धा च प्रयोजनं च = योद्धृप्रयोजनम्, तस्मात् ।

**[ युद्धे ]** युद्ध सप्तमी ङि ।

**[ वैद्याधरं युद्धम् ]** विद्याधरा योद्धारोऽस्य युद्धस्य = वैद्याधरम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ भारतं युद्धम् ]** भरतो योद्धारोऽस्य युद्धस्य = भारतम् । अनेन विहितः 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । युद्धम् ।

**प्रवृत्तिक्रियासाध्यफलं प्रयोजनमुच्यते ।**

**[ सौभद्रं युद्धम् ]** सुभद्रा प्रयोजनमस्य युद्धस्य = सौभद्रम् । अनेन अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । सि-अम् । युद्धम् ।

**[ सौतारं युद्धम् ]** सुतारा देवी प्रयोजनमस्य युद्धस्य = सौतारम् । अनेन अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । सि-अम् । युद्धम् ॥छ॥

**भावघञोऽस्यां णः** ॥ ६।२।११४ ॥

**[ भावघञः ]** भावे घञ् = भावघञ्, तस्मात् ।

**[ अस्याम् ]** इदम् सप्तमी ङि । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्या०' (२।१।११३) अलुक् । 'अनक्' (२।१।३६) अ० । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां०' (१।२।१) दीर्घः । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) ङि० → याम्० । 'सर्वादेर्डस्पूर्वाः' (१।४।१८) डस्पूर्व० याम् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ णः ]** ण प्रथमा सि ।

**[ प्रापाता तिथिः ]** 'पत्लृ गतौ' (९६२) पत्, प्रपूर्व० । प्रपतनं = प्रपातः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्रपातोऽस्यां वर्त्तते तिथौ = प्रापाता । अनेन णप्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ दाण्डाघाता ]** दण्डस्याघातः = दण्डाघातः । दण्डाघातोऽस्यां वर्त्तते = दाण्डाघाता । अनेन णप्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ मौसलपाता भूमिः ]** मुसलस्य पातः = मुसलपातः । मुसलपातोऽस्यां वर्त्तते = मौसलपाता । अनेन णप्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । भूमिः ।

**[ प्राकारोऽस्याम् ]** प्रकुर्वन्ति तमिति प्राकारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः ॥छ॥

**श्यैनम्पाता-तैलम्पाता** ॥ ६।२।११५ ॥

**[ श्यैनम्पातातैलम्पाता ]** श्यैनम्पाता च तैलम्पाता च = तौ । सूत्रात्वाल्लुप् ।

**[ श्यैनम्पाता तिथिः, क्रियाभूमिः, क्रीडा वा ]** श्येनपातो यस्यां तिथौ वर्त्तते सा = श्यैनम्पाता । अनेन णप्र० → अ-मकारागमश्च । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ तैलम्पाता तिथिः, क्रियाभूमिः, क्रीडा वा ]** तिलपातो यस्यां तिथौ वर्त्तते सा = तैलम्पाता । अनेन णप्र० → अ-मकारागमश्च । 'आत्' (२।४।१८) आप्प्र० → आ । तिथिः, क्रियाभूमिः, क्रीडा वा ॥छ॥

**प्रहरणात् क्रीडायां णः** ॥ ६।२।११६ ॥

**[ प्रहरणात् ]** प्रहरण पञ्चमी ङसि ।

**[ क्रीडायाम् ]** क्रीडा सप्तमी ङि ।

**[ णः ]** ण प्रथमा सि ।

**[ दाण्डा क्रीडा ]** दण्डः प्रहरणमस्यां क्रीडायां सा = दाण्डा । अनेन णप्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ मौष्टा क्रीडा ]** मुष्टौ(ष्टिः) प्रहरणमस्यां क्रीडायां सा = मौष्टा । अनेन णप्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पादा क्रीडा ]** पादः प्रहरणमस्यां क्रीडायां सा = पादा । अनेन णप्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**यत्राद्रोहेण घातप्रतिघातौ स्यातां सा क्रीडा** ॥छ॥

**तद्वेत्त्यधीते** ॥ ६।२।११७ ॥

**[ तद् ]** तद् अम् । 'अनतो लुप्' (१।४।५९) लुप् ।

**[ वेत्त्यधीते ]** वेत्तिश्च अधीते च = तत्, तस्मिन् ।

**[ मौहूर्त्तः ]** मुहूर्त्तं वेत्ति = मौहूर्त्तः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औत्पातः ]** उत्पातं वेत्ति = औत्पातः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ नैमित्तः ]** निमित्तं वेत्ति = नैमित्तः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मौहूर्त्तिकः ]** मुहूर्त्तं वेत्ति = मौहूर्त्तिकः । मतान्तरे 'न्यायादेरिकण्' (६।२।११८) इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नैमित्तिकः ]** निमित्तं वेत्ति = नैमित्तिकः । मतान्तरे 'न्यायादेरिकण्' (६।२।११८) इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ छान्दसः ]** छन्दस् । छन्दोऽधीते = छान्दसः । अनेन अण्प्र० → अ । वृद्धिः ।

**[ वैयाकरणः ]** व्याकरणं वेत्त्यधीते वा = वैयाकरणः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'लोकात्' (१।१।३) व् पाठउ विश्लेषियइ । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) ऐकारुः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नैरुक्तः ]** निरुक्तं वेत्त्यधीते वा = नैरुक्तः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा।

## न्यायादेरिकण् ॥ ६।२।११८ ॥

**[ न्यायादेः ]** न्याय आदिर्यस्य सः = न्यायादिः, तस्मात् ।

**[ इकण् ]** इकण् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ नैयायिकः ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादे०' (२।३।९७) नी । नीयते-निश्चयेन ज्ञायते । 'न्याया-ऽऽवाया०' (५।३।१३४) घञन्तनिपातः । न्यायं वेत्त्यधीते वा = नैयायिकः । अनेन इकण्प्र० → इक । 'लोकात्' (१।१।३) न् पाठउ विश्लेषियइ । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) ऐकारुः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ नैयासिकः ]** 'असूच् क्षेपणे' (१२२१) अस्, निपूर्व० । नितरां अस्यन्ते-क्षिप्यन्ते अर्था अत्रेति न्यासः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । न्यासं वेत्त्यधीते वा = नैयासिकः । अनेन इकण्प्र० → इक । 'लोकात्' (१।१।३) न् पाठउ विश्लेषियइ । 'य्वः पदान्तात्०' (७।४।५) ऐकारुः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पद ]** 'पदणि गतौ' (१९३२) पद् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । पदे-पद्यते = पदः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

**[ आयुर्वेद ]** आयुस् 'विदक् ज्ञाने' (१०९९) विद् । आयुर्विद्यतेऽनेन = आयुर्वेदः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ द्विपदा ]** द्वौ पादौ यस्याः सा = द्विपदा । 'ऋचि पादः पात्पदे' (२।४।१७) इत्यनेन आबन्तो निपात्यते ।

**[ आथर्वण ]** अथर्वन् मण्ड्यते । अथर्वाणं विदन्ति = आथर्वणिकः । 'न्यायादेरिकण्' (६।२।११८) इकण्प्र० । वृद्धिः । आथर्वणिकानामाम्नायः = आथर्वणः । 'आथर्वणिकादणिकलुक् च' (६।३।१६७) अण्प्र०-इकलुक् च । यद्वा अथर्वत्(न्) अथर्वणा वसिष्ठेन कृत इति आब्(?) कृते अण्प्र० → अ । वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । आथर्वणो वेद एव ॥छा।

## पद-कल्प-लक्षणान्त-क्रत्वाख्याना-ऽऽख्यायिकात् ॥ ६।२।११९ ॥

**[पदकल्पलक्षणान्तक्रत्वाख्यानाऽऽख्यायिकात्]** पदं च कल्पश्च लक्षणं च = पदकल्पलक्षणानि, तानि अन्ते यस्य सः = पदकल्पलक्षणान्तः, स च क्रतुश्च आख्यानं च आख्यायिका च = पदकल्पलक्षणान्तक्रत्वाख्यानाऽऽख्यायिकम्, तस्मात् । 'क्लीबे' (२।४।९७) ह्रस्वत्वम् ।

**[ पौर्वपदिकः ]** पूर्वं च तत् पदं च = पूर्वपदम् । पूर्वपदं वेत्त्यधीते वा = पौर्वपदिकः । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औत्तरपदिकः ]** उत्तरं च तत् पदं च = उत्तरपदम् । उत्तरपदं वेत्त्यधीते वा = औत्तरपदिकः । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आनुपदिकः ]** अनुगतं पदम् = अनुपदम् । 'प्रात्यव-परि-निरादयो गत-क्रान्त-क्रुष्ट-ग्लान-क्रान्ताद्यर्थाः प्रथमाद्यन्तैः' (३।१।४७) समासः । अनुपदं वेत्त्यधीते वा = आनुपदिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**पदादिसाहचर्यात् कल्पस्यापि नाम्न एव ग्रहणम्, न प्रत्ययस्य ।**

**[ मातृकल्पिकः ]** मातुः कल्पं = मातृकल्पम् । तं वेत्त्यधीते वा = मातृकल्पिकः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पैतृकल्पिकः ]** पितुः कल्पं = पितृकल्पम् । तं वेत्त्यधीते वा = पैतृकल्पिकः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पाराशरकल्पिकः ]** पाराशरस्य कल्पं = पाराशरकल्पम् । तं वेत्त्यधीते वा = पाराशरकल्पिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्राद्धकल्पिकः ]** श्राद्धस्य कल्पं = श्राद्धकल्पम् । तं वेत्त्यधीते वा = श्राद्धकल्पिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गौलक्षणिकः ]** गवां लक्षणं = गोलक्षणम् । तं वेत्त्यधीते वा = गौलक्षणिकः । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आश्वलक्षणिकः ]** अश्वानां लक्षणम् = अश्वलक्षणम् । तं वेत्त्यधीते वा = आश्वलक्षणिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ हास्तिलक्षणिकः ]** हस्तिनां लक्षणं = हस्तिलक्षणम् । तं वेत्त्यधीते वा = हास्तिलक्षणिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आनुलक्षणिकः ]** अनुगतं लक्षणम् = अनुलक्षणम् । तं वेत्त्यधीते वा = आनुलक्षणिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौलक्षणिकः ]** शोभनानि लक्षणानि यत्र तत् = सुलक्षणम् । सुलक्षणं वेत्त्यधीते वा = सौलक्षणिकः । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ लाक्षणिकः ]** लक्षणं वेत्त्यधीते वा = लाक्षणिकः । 'न्यायादेरिकण्' (६।२।११८) इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

क्रतु- **[ आग्निष्टोमिकः ]** अग्नीनां स्तोमः = अग्निष्टोमः । 'ज्योतिरायुर्भ्यां च स्तोमस्य' (२।३।१७) षत्वम् । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) त० → ट० । अग्निष्टोमं वेत्त्यधीते वा = आग्निष्टोमिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वाजपेयिकः ]** वाजं-यज्ञाङ्गं पेयं च । वाजपेयं वेत्त्यधीते वा = वाजपेयिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ज्यौतिष्टोमिकः ]** ज्योतिषां स्तोमः = ज्योतिःष्टोमः । 'ज्योतिरायुर्भ्यां च स्तोमस्य' (२।३।१७) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । ज्योतिःष्टोमं वेत्त्यधीते वा = ज्यो(ज्यौ)तिष्टोमिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ राजसूयिकः ]** राजसूयं वेत्त्यधीते वा = राजसूयिकः ।

आख्यान- **[ यावक्रीतिकः ]** यवानां क्रीतं = यवक्रीतम् । यवक्रीतं वेत्त्यधीते वा = यावक्रीतिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ यावक्रिकः ]** यवक्री । यवक्रियं वेत्त्यधीते वा = यावक्रिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**आख्यानशब्दस्य न्यायादौ पाठात् अर्थप्रधान आख्यानशब्दो ग्राह्यः । एतत् साहचर्यादेव च ऋत्वादयोऽप्यर्थप्रधाना ग्राह्याः ।**

**[ प्रैयङ्गविकः ]** प्रियङ्गव मण्ड्यते । प्रियङ्गवं वेत्त्यधीते वा = प्रैयङ्गविकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रैयङ्गुकः ]** प्रियङ्गु मण्ड्यते । प्रियङ्गुं वेत्त्यधीते वा = प्रैयङ्गुकः । अनेन इकण्प्र० → इक । 'ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त इकस्येतो लुक्' (७।४।७१) इकण इकारस्य लुक् ।

**[ आविमारकिकः ]** अविमारकं वेत्त्यधीते वा = आविमारकिकः ।

आख्यायिका बृहत्कथा- **[ वासवदत्तिकः ]** वासव 'डुदांग्क् दाने' (११३८) दा । वासव एनां देयादित्याशास्यमानेति वासवदत्ता । 'तिक्कृतौ नाम्नि' (५।१।७१) क्तप्र० → त । 'दत्' (४।४।१०) ददादेशः । 'आत्' (२।४।१८) आप्प्र० → आ । वासवदत्तां वेत्त्यधीते वा = वासवदत्तिकः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ सौमनोहरिकः ]** सुष्ठु मनोहरतीति सुमनोहरी । 'अच्' (५।१।४९) अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ । सुमनोहरां वेत्त्यधीते वा = सौमनोहरिकः । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

**अकल्पात् सूत्रात्** ॥ ६।२।१२० ॥

**[ अकल्पात् ]** न कल्पः = अकल्पस्तस्मात् ।

**[ सूत्रात् ]** सूत्र पञ्चमी ङसि ।

**[ वार्त्तिसूत्रिकः ]** वृत्तिश्च सूत्रं च = वृत्तिसूत्रम्(त्रे) । वृत्तिसूत्रं(त्रे) वेत्त्यधीते वा = वार्त्तिसूत्रिकः । अनेन इकण्प्र० → इक । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सांग्रहसूत्रिकः ]** संग्रहप्रधानं सूत्रं = संग्रहसूत्रम् । संग्रहसूत्रं वेत्त्यधीते वा = सांग्रहसूत्रिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौत्रः ]** सूत्रं वेत्त्यधीते वा = सौत्रः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अकल्पादिति पर्युदासेन पूर्वपदाभावे इकण् न भवति ।

**[ काल्पसौत्रः ]** कल्पस्य सूत्रं = कल्पसूत्रम् । कल्पसूत्रं वेत्त्यधीते वा = काल्पसौत्रः । अयमपि पर्युदासः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## अधर्म-क्षत्र-त्रि-संसर्गाऽङ्गाद् विद्यायाः ॥ ६।२।१२१ ॥

**[ अधर्मक्षत्रत्रिसंसर्गाऽङ्गात् ]** धर्मश्च क्षत्रश्च त्रिश्च संसर्गश्च अङ्गश्च = धर्मक्षत्रत्रिसंसर्गाऽङ्गम् । न धर्मक्षत्रत्रिसंसर्गाऽङ्गम् = अधर्मक्षत्रत्रिसंसर्गाङ्गम् । 'नञत्' (३।२।१२५) न० → अ०, तस्मात् ।

**[ विद्यायाः ]** विद्या पञ्चमी ङसि । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) ङसि० → यास् आदेशः ।

**[ वायसविद्यिकः ]** वाय 'षोंच् अन्तकर्मणि' (११५०) षो । 'षः सोऽष्ट्यै०' (२।३।९८) सो । 'आत् सन्ध्यक्षरस्य' (४।२।१) सा । **वायं-गतिं चटकादीनां स्यतीति वायसः ।** 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । वायसस्य विद्या = वायसविद्या, तां वेत्त्यधीते वा = वायसविद्यिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ सार्पविद्यिकः ]** सर्पस्य विद्या = सर्पविद्या, तां वेत्त्यधीते वा = सार्पविद्यिकः । अनेन इकण्प्र० । शेषं पूर्ववत् ।

**[ वैद्यः ]** विद्यां वेत्त्यधीते वा = वैद्यः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ धार्मविद्यः ]** धर्मस्य विद्या = धर्मविद्या, तां वेत्त्यधीते वा = धार्मविद्यः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ क्षात्रविद्यः ]** क्षत्रस्य विद्या = क्षत्रविद्या, तां वेत्त्यधीते वा = क्षात्रविद्यः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ त्रैविद्यः ]** त्रि अवयव विद्या मण्ड्यते । त्र्यवयवा विद्या = त्रिविद्या । मयूरव्यंसकादित्वात् मध्यमपदलोपी समासः । तां वेत्त्यधीते वा = त्रैविद्यः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । अत्र त्रिविद्याशब्दस्य कर्मधारस्यैव ग्रहणम्, न द्विगोः । तत्र लुपि सत्यामणिकणोर्विशेषाभावात् ।

**[ त्रिविद्यः ]** तिस्रो विद्याः = त्रिविद्यास्ताः अधीते वेत्ति, वा । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'द्विगोरनपत्ये य-स्वराऽऽदेर्लुबद्विः' (६।१।२४) अण्लुप् ।

**[ सांसर्गविद्यः ]** संसर्गेण विद्या = संसर्गविद्या, तां वेत्त्यधीते वा = सांसर्गविद्यः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आङ्गविद्यः ]** अङ्गस्य विद्या = अङ्गविद्या, तां वेत्त्यधीते वा = आङ्गविद्यः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## याज्ञिकौक्थिक-लौकायितिकम् ॥ ६।२।१२२ ॥

**[ याज्ञिकौक्थिकलौकायितिकम् ]** याज्ञिकश्च औक्थिकश्च लौकायितश्च (लौकायितिकश्च) = याज्ञिकौक्थिकलौकायितम् (लौकायितिकम्) ।

**[ याज्ञिकः ]** यज्ञ । यज्ञं विदन्ति = याज्ञिकाः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । याज्ञिकानां सङ्घादिः = याज्ञिक्यः । 'छान्दोगौक्थिक-याज्ञिक-बह्वृचाच्च धर्मा-ऽऽम्नाय-सङ्घे'

(६।३।१६६) ञ्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यज्ञं याज्ञिक्यं वा वेत्त्यधीते वा = याज्ञिकः । अनेन इकणन्तो याज्ञिक इति निपात्यते ।

**[ औक्थिकः ]** उक्थ । उक्थं वेत्त्यधीते वा = औक्थिकः । अनेन इकण्प्र० । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औक्थिक्यशब्दात्तु प्रत्ययो न भवत्यनभिधानात् । औक्थिकानामाम्नायः = औक्थिक्यः । 'छान्दोगौक्थिकयाज्ञिक०' (६।३।१६६) ञ्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औक्थिक्यमधीते = औक्थिकः । मतान्तरेऽनेन इकणन्त औक्थिकनिपात्यते ।

**[ लौकायितिकः ]** लोके आयतं = लोकायतम्, तद् वेत्त्यधीते वा = लौकायितिकः । अनेन इकण्प्र० । वृद्धिः औ । यकाराकारस्य च इकारो निपात्यते । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

卐**[ लौकायतिकम् ]** लोकायतं वेत्त्यधीते वा = लौकायतिकम् । 'न्यायादेरिकण्' (६।२।११८) इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## अनुब्राह्मणादिन् ॥ ६।२।१२३ ॥

**[ अनुब्राह्मणात् ]** अनुब्राह्मण पञ्चमी ङसि ।

**[ इन् ]** इन् प्रथमा सि ।

**[ अनुब्राह्मणी ]** ब्रह्मन् । ब्रह्मणा प्रोक्तो ग्रन्थः = ब्राह्मणम् । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । अत एव निर्देशात् 'ब्रह्मणः' (७।४।५७) इत्यनेन नान्त्यस्वरादिलोपः । ब्राह्मणसदृशो ग्रन्थोऽनुब्राह्मणम् । सदृगर्थे 'विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावा-ऽत्यया-ऽसंप्रति-पश्चात्-क्रम-ख्याति-युगपत्-सदृक्-सम्पत्-साकल्या-ऽन्तेऽव्ययम्' (३।१।३९) इत्यादिना समासः । अनुब्राह्मणं वेत्त्यधीते वा = अनुब्राह्मणी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[ अनुब्राह्मणिनौ ]** अनुब्राह्मणं वित्तः अधीये(या)ते वा = अनुब्राह्मणिनौ । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औ ।

**[ अनुब्राह्मणिनः ]** अनुब्राह्मणं विदन्त्यधीयन्ते(ते) वा = अनुब्राह्मणिनः । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ॥छ॥

## शत-षष्टेः पथ इकट् ॥ ६।२।१२४ ॥

**[ शतषष्टेः ]** शतं च षष्टिश्च = शतषष्टि, तस्मात् ।

**[ पथः ]** पथिन् पञ्चमी ङसि । 'इन् ङी-स्वरे लुक्' (१।४।७९) इन्लुक् ।

**[ इकट् ]** इकट् प्रथमा सि ।

**[ शतपथिकः, शतपथिकी ]** शत-पथिन् मांडणीयइ । शतं संख्याः पन्थानोऽस्य सः = शतपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः । शतपथान् वेत्त्यधीते वा = शतपथिकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य

---

卐 बृहद्वृत्तौ - हैमप्रकाशे च-लौकायतिका ।

ङ्यां लुक्' (२।४।८६) अलुक् । यद्वा शतं पन्थानोऽस्य सः = शतपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत् - समासान्तः → अ । शतपथं वेत्त्यधीते वा = शतपथिकी । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ षष्टिपथिकः, षष्टिपथिकी ]** षष्टि-पथिन् मांडणीयइ । षष्टि(ः) पन्थानोऽस्य सः = षष्टिपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) इन्लोपः । षष्टिपथान् वेत्त्यधीते वा = षष्टिपथिकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६१) अलोपः । यद्वा षष्टिः संख्याः पन्थानः = षष्टिपथाः(थः) । 'ऋक्-पूः पथ्यपोऽत्' (७।३।७६) अत्समासान्तः । षष्टिपथान् वेत्त्यधीते वा = षष्टिपथिकी । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्०' (२।४।२०) ङी ॥छ॥

## पदोत्तरपदेभ्य इकः ॥ ६।२।१२५ ॥

**[ पदोत्तरपदेभ्यः ]** पदोत्तरपदश्च पदश्च पदोत्तरपदश्च = पदोत्तरपदास्तेभ्यः । सूत्रत्वात् पद-पदोत्तरपदस्य लोपः । पञ्चमी भ्यस् ।

**[ इकः ]** इक प्रथमा सि ।

**[ पूर्वपदिकः, पूर्वपदिका ]** पूर्वं च तत् पदं च = पूर्वपदम् । पूर्वपदं वेत्त्यधीते वा = पूर्वपदिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये उदाहरणे 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ उत्तरपदिकः, उत्तरपदिका ]** उत्तरं च तत् पदं च = उत्तरपदम् । उत्तरपदं वेत्त्यधीते वा = उत्तरपदिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये उदाहरणे 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पदिकः, पदिका ]** पदं वेत्त्यधीते वा = पदिकः, पदिका । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये उदाहरणे 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पदोत्तरपदिकः, पदोत्तरपदिका ]** पदोत्तरपदं वेत्त्यधीते वा = पदोत्तरपदिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । द्वितीये उदाहरणे 'आत्' (२।४।१८) आप्प्र० → आ ।

**बहुवचनं सर्वभङ्गपरिहारार्थम्** ॥छ॥

## पद-क्रम-शिक्षा-मीमांसा-साम्नोऽकः ॥ ६।२।१२६ ॥

**[ पदक्रमशिक्षामीमांसासाम्नः ]** पदश्च (पदं च) क्रमश्च शिक्षा च मीमांसा च साम च = पदक्रमशिक्षामीमांसासाम, तस्मात् = पदक्रमशिक्षामीमांसासाम्नः । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[ अकः ]** अक प्रथमा सि ।

**[ पदकः ]** पदं वेत्त्यधीते वा = पदकः । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ क्रमकः ]** क्रमं वेत्त्यधीते वा = क्रमकः । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ शिक्षकः ]** शिक्षां वेत्त्यधीते वा = शिक्षकः । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ मीमांसकः ]** मीमांसां वेत्त्यधीते वा = मीमांसकः । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ सामकः ]** साम वेत्त्यधीते वा = सामकः । अनेन अकप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः ।

उपनिषच्छब्दादपीच्छति कश्चित्-**विश्रान्तविद्याधरः** ।

Shrenik/D/A-Shilchandrasuri/Doondhika Part-5 Folder (10-9-2012) Doondhika Part-6 (B) 1st • 30-7-2013 (2nd - 16-9-2013)
(3rd-3-10-2013) [174]

**[ उपनिषदकः ]** उपनिषदं वेत्त्यधीते वा = उपनिषदकः । मतान्तरेऽनेन अकप्र० । अकमपनीय क इति कृते-

**[ शिक्षाका, शिक्षिका, शिक्षका ]** शिक्षैव = शिक्षाका । स्वार्थे कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'इच्चाऽपुंसोऽनित्क्याप्परे' (२।४।१०७) इकारो ह्रस्वश्च विकल्पेन ।

**[ मीमांसाका, मीमांसिका, मीमांसका ]** मीमांसैव = मीमांसाका, मीमांसिका, मीमांसका । स्वार्थे कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'इच्चाऽपुंसोऽनित्यक्याप्परे' (२।४।१०७) इकारो ह्रस्वश्च विकल्पेन ।

**कप्रत्ययबाधनार्थमे( म )कवचनम्** ॥छ॥

## **स-सर्वपूर्वाल्लुप्** ॥ ६।२।१२७ ॥

**[ ससर्वपूर्वाल्लुप् ]** सश्च सर्वश्च = ससर्वौ, ससर्वौ पूर्वौ यस्य तत् = ससर्वपूर्वम्, तस्मात् । लुप् प्रथमा सि । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'लि लौ' (१।३।६५) द० → ल० ।

**[ सवार्त्तिकः ]** वृत्ति । वृत्तिरेव = वार्त्तिकम् । 'विनयादिभ्यः' (७।२।१६९) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आर् । सह वार्त्तिकेन वर्त्तते = सवार्त्तिकम् । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सह० → सभावः । सवार्त्तिकं वेत्त्यधीते वा = सवार्त्तिकः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् ।

**[ ससंग्रहः ]** सह संग्रहेण वर्त्तते = ससंग्रहः । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सह → सभावः । ससंग्रहं वेत्त्यधीते वा = ससंग्रहः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् ।

**[ सकल्पः ]** सह कल्पेन वर्त्तते = सकल्पः । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सभावः । सकल्पं वेत्त्यधीते वा = सकल्पः । 'पद-कल्प-लक्षणान्त-क्रत्वाख्यानाऽऽख्यायिकात्' (६।२।११९) इकण्प्र० । अनेन लुप् ।

**[ सर्ववेदः ]** सर्वे च ते वेदाश्च = सर्ववेदाः, तान् वेत्त्यधीते वा = सर्ववेदः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् ।

**[ सर्वतन्त्रः ]** सर्वाणि च (तानि) तन्त्राणि च = सर्वतन्त्राणि, सर्वतन्त्राणि वेत्त्यधीते वा = सर्वतन्त्रः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् ।

**[ सर्वविद्यः ]** सर्वविद्यां वेत्त्यधीते वा = सर्वविद्यः । 'अधर्म-क्षत्र-त्रि-संसर्गा-ऽङ्गाद् विद्यायाः' (६।२।१२१) इकण्प्र० । अनेन लुप् ।

**[ द्विवेदः ]** द्वौ वेदौ अधीते = द्विवेदः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) अण्लुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पञ्चव्याकरणः ]** पञ्चव्याकरणानि वेत्त्यधीते वा = पञ्चव्याकरणः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) अण्लुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## **संख्याकात् सूत्रे** ॥ ६।२।१२८ ॥

**[ संख्याकात् ]** संख्यायाः कः = संख्याकस्तस्मात् ।

**[ सूत्रे ]** सूत्र सप्तमी ङि ।

**[ अष्टकाः पाणिनीयाः, आपिशलीयाः ]** अष्टन् । अष्टावध्यायाः परिमाणमस्य तत् = अष्टकम् । 'संख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० । ('संख्यायाः सङ्घ०' (६।४।१७१) कप्र०) । अष्टकं सूत्रं विदन्त्यधीयते वा =

अष्टका: । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । जस् । 'पणि व्यवहार-स्तुत्योः' (७१०) पण् । पणनं = पण: । 'पणेर्माने' (५।३।३२) अल्प्र० → अ । पणोऽस्यास्तीति पणी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोप: । पणिनोऽपत्यं वृद्धं = पाणिन: । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'गाथि-विदथि-केशि-पणि-गणिन:' (७।४।५४) इन्लोपाभाव: । पाणिनस्यापत्यं युवा' = पाणिनि(:) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलोप: । पाणिनेरिमे च्छात्रा: = पाणिनीया: । 'दोरीय:' (६।३।३२) ईयप्रत्ययविषये 'यूनि लुप्' (६।१।१३७) इञ्लुप्, ततो 'दोरीय:' (६।३।३२) ईयप्र० । अपिशलस्यापत्यमनन्तरम् = आपिशलि(:) । 'अत इञ्' (६।१।३१) इञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । आपिशलेरिमे च्छात्रा: = आपिशलीया: । 'दोरीय:' (६।३।३२) ईयप्र० । 'समानानां०' (१।२।१) दीर्घ: । पाणिनीयाश्च आपिशलीयाश्च = पाणिनीयापिशलीया: । जस् ।

**[ त्रिका: काशकृत्स्ना: ]** त्रि । त्रयोऽध्याया: परिमाणमस्य = त्रिकम् । 'संख्याडते०' (६।४।१३०) कप्र० । ('संख्याया: सङ्घ०' (६।४।१७१) कप्र०) । त्रिकं सूत्रं वेत्त्यधीते वा = त्रिका: । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् । कश 'कृतैत् छेदने' (१३२५) कृत् । कशं कृन्तति = कशकृत्स्न: । 'कृत्यशौभ्यां स्नक्' (उणा० २९४) स्नक्प्र० । कशकृत्स्नस्येमे च्छात्रा: । 'दोरीय:' (६।३।३२) ईयप्र० । अनेन लुप् ।

**[ दशका उमास्वातीया: ]** दशन् । दश अध्याया मानमस्य = दशकम् । 'अवयवात् तयट्' (७।१।१५१) बाधक: 'संख्या-डते०' (६।४।१३०) कप्र० । ('संख्याया: सङ्घ०' (६।४।१७१) कप्र०) । दशकं विदन्त्यधीयते वा = दशका: । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् । जस् । उमा-सु 'अत सातत्यगमने' (२७९) अत् । उमां-कीर्त्तिं सुष्ठु अतति = उमास्वाति: । 'पादाच्चात्यजिभ्याम्' (उणा० ६२०) णिद् इप्र० निपात्यते । उमास्वातेरिमे च्छात्रा: = उमास्वातीया: । 'दोरीय:' (६।३।२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । जस् ।

**[ द्वादशका आर्हता: ]** द्वादश । द्वादशाङ्गानि मानमस्य = द्वादशकम् । 'संख्याडतेश्चाऽशत्०' (६।४।१३०) कप्र० । ('संख्याया: सङ्घ०' (६।४।१७१) कप्र०) । द्वादशकं-प्रवचनं तद् विदन्त्यधीयते वा = द्वादशका: । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् । जस् । अर्हत् । अर्हन् देवता एषां ते = आर्हता: । 'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धि: । जस् ।

**[ माहावार्त्तिका: ]** महद् वार्त्तिकमस्य सूत्रस्य = महावार्त्तिकम् । 'जातीयैकार्थेऽच्वे:' (३।२।७०) डा । 'डित्यन्त्यस्वरादे:' (२।१।११४) अत्लोप: । महावार्त्तिकं विदन्त्यधीयते वा = माहावार्त्तिका: । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । वृद्धि: । 'अवर्णेवर्णस्य' (७।४।६८) अलोप: । जस् ।

**[ कालापका: ]** 'कल क्षेपे' (१६९६) कल । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अत:' (४।३।८२) अलोप: । कल्यन्ते विविधवर्णा अत्र । 'कलेराप:' (उणा० ३०८) आपप्र० । कलापोऽस्यास्ति = कलापी । 'अतोऽनेकस्वरात्' (७।२।६), इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कलापिना प्रोक्तम् । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । वृद्धि: । 'कलापि-कुथुमि-तैतलि-जाजलि०' (७।४।६२) अन्त्यस्वरादिलोप: । कुत्सितोऽल्पोऽज्ञातो वा कालाप: = क(का)लापक: । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्र० । क(का)लापकं विदन्त्यधीयते वा = कालापका: । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । वृद्धि: । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ।

**[ चातुष्टया: ]** चतुर् । चत्वारोऽवयवा यस्य तत् = चतुष्टयम् । 'अवयवात् तयट्' (७।१।१५१) तयट्प्र० → तय । 'च-ट-ते सद्वितीये' (१।३।७) र० → स० । 'ह्रस्वान्नाम्नस्ति' (२।३।३४) स० → ष० । 'तवर्गस्य०' (१।३।६०) त० → ट० । चतुष्टयं सूत्रमधीयते = चातुष्टया: । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । वृद्धि: । जस् ।।छ।।

## **प्रोक्तात्** ॥ ६।२।१२९ ॥

**[ प्रोक्तात् ]** प्रोक्त पञ्चमी ङसि ।

**[ गौतमः ]** गोतमेन प्रोक्तं = गौतमम् । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । गौतमं वेत्त्यधीते वा = गौतमः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् ।

**[ सौधर्मः ]** सुधर्मेण प्रोक्तं = सौधर्मम् । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । सौधर्मं वेत्त्यधीते वा = सौधर्मः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् ।

**[ सौधर्मणः ]** शोभनो धर्मोऽस्य सः = सुधर्मा । 'द्विपदाद् धर्मादन्' (७।३।१४१) अन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । सुधर्मणा प्रोक्तं = सौधर्मणम् । मतान्तरे 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । वृद्धिः औ । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । सौधर्माणं वेत्त्यधीते वा = सौधर्मणः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् ।

**[ भाद्रबाहवः ]** भद्रबाहुणा प्रोक्तं = भाद्रबाहवम् । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । भाद्रबाहवं वेत्त्यधीते वा = भाद्रबाहवः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् ।

**[ पाणिनीयः ]** पाणिनिना प्रोक्तं = पाणिनीयम् । 'दोरीयः' (६।३।३२) ईयप्र० । 'समानानां०' (१।२।१) दीर्घः । पाणिनीयं वेत्त्यधीते वा = पाणिनीयः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् ।

**[ आपिशलः ]** आपिशलस्यापत्यं वृद्धम् = आपिशलि(:) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । आपिशलिना प्रोक्तम् = आपिशलम् । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । आपिशलं वेत्त्यधीते वा = आपिशलः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् ।

**[ गौतमा ]** गो 'तमूच् काङ्क्षायाम्' (१२३२) तम् । गास्ताम्यति = गोतमः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । गोतमेन प्रोक्ता । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । गौतमीमधीते । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ सौधर्मा ]** सुधर्मेण प्रोक्ता । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । वृद्धिः औ । 'अणञेयेकण्०' (२।४।२०) ङी । सौधर्मीमधीते । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणीसूच्योः' (२।४।९५) ङीनिवृत्तिः । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां०' (१।२।१) दीर्घः ।

**[ सौधर्मणा ]** सुधर्मणा प्रोक्ता । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । वृद्धिः औ । 'अणञेयेकण्०' (२।४।२०) ङी । सौधर्मणीमधीते । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां०' (१।२।१) दीर्घः ॥छ॥

## **वेदेन्ब्राह्मणमत्रैव** ॥ ६।२।१३० ॥

**[ वेदेन्ब्राह्मणम् ]** इन् च तद् ब्राह्मणं च = इन्ब्राह्मणम् । वि(वे)दश्च इन्ब्राह्मणं च = वेदेन्ब्राह्मणम् । प्रथमा सि ।

**[ अत्र ]** एतस्मिन्नत्र । 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र । 'क्व-कुत्रा-ऽत्रेह' (७।२।९३) अत्र निपात्यते । प्रथमा सि ।

**[ एव ]** एव प्रथमा सि

स्वातन्त्र्यमिति वेत्त्यधीते वेत्यर्थरहितं न प्रयुज्यते इत्यर्थः । उपाध्यन्तरेति कठेन प्रोक्तं शोभनं वेदं विदन्त्यधीयते वा इति विशेषयोगो नेत्यर्थः ।

**[ कठाः ]** कठेन प्रोक्तं वेदं विदन्त्यधीयते वा = कठाः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) द्वितीयअणो लुप् । 'कठादिभ्यो वेदे लुप्' (६।३।१८३) इत्यनेन प्रथमस्याप्यणो लुप् । जस् ।

**[ कालापाः ]** कलापिन् । कलापिना प्रोक्तं वेदं विदन्त्यधीयते वा । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) द्वितीयअणो लुप् । अस्य कलादित्वाभावात् प्रथमस्य न लुप् । जस् । कलापेन प्रोक्तं वेदं विदन्त्यधीयते वा = कालापाः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण् । 'प्रोक्तात्' (६।२।१२९) द्वितीयअणो लुप् । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । जस् ।

**[ मौदाः ]** मौदेन प्रोक्तं वेदं विदन्त्यधीयते = मौदाः । 'मौदादिभ्यः' (६।३।१८२) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) द्वितीयअणो लुप् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ।

**[ पैष्पलादाः ]** पिष्पलादस्यापत्यं = पैष्पलादः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । वृद्धिः ऐ । पैष्पलादेन प्रोक्तं वेदं विदन्त्यधीयते वा = पैष्पलादाः । 'मौदादिभ्यः' (६।३।१८२) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण् । 'प्रोक्तात्' (६।२।१२९) द्वि० अणो लुप् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ।

**[ आर्चाभिनः ]** ऋचाभेन प्रोक्तं ग्रन्थं विदन्त्यधीयते वा = आर्चाभिनः । 'शौनकादिभ्यो णिन्' (६।३।१८६) णिन्प्र० → इन् । 'तद् वेत्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ।

**[ वाजसनेयिनः ]** वाजसनाया अपत्यं = वाजसनेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । वाजसनेयेन प्रोक्तं वेदं विदन्त्यधीयते वा = वाजसनेयिनः । 'शौनकादिभ्यो णिन्' (६।३।१८६) णिन्प्र० → इन् । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ।

**[ ताण्डिनः ]** तण्डोऽस्यास्ति = तण्डी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तण्डिनोऽपत्यं वृद्धं = ताण्ड्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'नोऽपदस्य तद्धिते' (७।४।६१) इन् - लोपः । ताण्ड्येन प्रोक्तं ब्राह्मणं नामेति ग्रन्थविशेषं विदन्त्यधीयते वा = ताण्डिनः । 'शौनकादिभ्यो णिन्' (६।३।१८६) णिन्प्र० → इन् । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'तद्धितयस्वरेऽनाति' (२।४।९३) यलुक् । जस् ।

**[ भाल्लविनः ]** भल्ल 'वांक् गति-गन्धनयोः' (१०६३) वा । 'भल्लं वाति = भल्लवः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । भल्लवस्यापत्यं = भाल्लविः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । भाल्लविना प्रोक्तं ब्राह्मणं विदन्त्यधीयते

वा = भाल्लविनः । 'शौनकादिभ्यो णिन्' (६।३।१८६) णिन्प्र० → इन् । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । जस् ।

**[ शाट्यायनिनः ]** शट्यते = शाट्यः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । शाट्यस्यापत्यं = शाट्यायनिः । 'तिकादेरायनिञ्' (६।१।१०७) आयनिञ्प्र० → आयनि । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शाट्यायनिना शाट्यायनेन प्रोक्तं ब्राह्मणं विदन्त्यधीयते वा = शाट्यायनिनः । 'शौनकादिभ्यो०' (६।३।१८६) णिन्प्र० → इन् । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इ-अलुक् । जस् ।

**[ ऐतरेयिणः ]** इतरस्यापत्यम् = ऐतरेयः । 'शुभ्राऽऽदिभ्यः' (६।१।७३) एयण्प्र० → एय । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ऐतरेयेण प्रोक्तं ब्राह्मणं विदन्त्यधीयते वा = ऐतरेयिणः । 'शौनकादिभ्यो णिन्' (६।३।१८६) णिन्प्र० → इन् । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । जस् ।

**[ याज्ञवल्क्या( का )नि ]** यज्ञवल्क । यज्ञवल्कस्यापत्यं वृद्धं = याज्ञवल्क्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि = याज्ञवल्कानि । 'शकलादेर्यञः' (६।३।२७) अञ्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलोपः । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ सौलाभानि ]** सुलाभस्यापत्यं = सौलाभः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सौलाभेन प्रोक्तानि = सौलाभानि । 'मौदादिभ्यः' (६।३।१८२) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ पैङ्गी कल्पः ]** पिङ्गेन प्रोक्तः = पैङ्गी । 'पुराणे कल्पे' (६।३।१८७) णिन्प्र० → इन् । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन् पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । कल्प । प्रथमा सि ।

ब्राह्मणं वेद एव तत्र वेद इत्येव सिद्धे अनिनन्तस्य नियमनिवृत्त्यर्थमिन्ब्राह्मणग्रहणम् । प्रोक्तप्रत्ययान्तमेव वेत्त्यधीते इति विषये प्रयुज्यते नान्यत् । ऋच इत्यादीनां पर्यायो वेद एते प्रोक्तप्रत्ययान्ताः संभवति(न्ति) इति प्रोक्तग्रहणम् ।

**[ आर्हतं शास्त्रम् ]** अर्हता प्रोक्तम् = आर्हतम् । आर्हतं वेत्ति । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् ।

**[ कठाः ]** कठेन प्रोक्तं वेदमधीयते । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) द्वितीयअणो लुप् । 'कठादिभ्यो वेदे लुप्' (६।३।१८३) अण्लुप् । जस् ॥छ॥

### तेन छन्ने रथे ॥ ६।२।१३१ ॥

**[ तेन ]** तेन पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ छन्ने ]** छन्न सप्तमी ङि ।

**[ रथे ]** रथ सप्तमी ङि ।

**[ वास्त्रः ]** वस्त्र । वस्त्रेण छन्नो रथः = वास्त्रः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ काम्बलः ]** कम्बलेन छन्नो रथः = काम्बलः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ चार्मणः ]** चर्मन् । चर्मणा छन्नो रथः = चार्मणः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अणि' (७।४।५२) इत्यन्त्यस्वरादिलोपनिषेधः ।

**[ द्वैपः ]** द्वीपिन् । द्विपिनो विकारः = द्वैपः । 'हेमादिभ्योऽञ्' (६।२।४५) अञ्प्र० → अ । वृद्धिः ऐ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः । द्वैपेन-चर्मणा छन्नो रथः = द्वैपः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ वैयाघ्रः ]** व्याघ्र । व्याघ्रस्य विकारः = वैयाघ्रः । विकारे अण्प्र० → अ । 'लोकात्' (१।१।३) व् पाठउ विश्लेषियइ । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । वैयाघ्रेण चर्मणा छन्नो रथः = वैयाघ्रो रथः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कौमारः पतिः ]** न विद्यते पूर्वः पतिर्यस्याः सा = अपूर्वा कुमारी, तादृशीं कुमारीमुपपन्नः = कौमारः पतिः ।

**[ कौमारी भार्या ]** कुमार्यां भवः = कौमारः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः । कौमारस्य भार्या-कौमारी । 'धवाद् योगादपालकान्तात्' (२।४।५९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । भार्या प्रथमा सि ॥छ॥

## पाण्डुकम्बलादिन् ॥ ६।२।१३२ ॥

**[ पाण्डुकम्बलात् ]** पाण्डुश्चासौ कम्बलश्च, तस्मात् ।

**[ इन् ]** इन् प्रथमा सि ।

**[ पाण्डुकम्बली रथः ]** पाण्डुकम्बलेन छन्नः = पाण्डुकम्बली । अनेन इन्प्र० । 'प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । रथः ॥छ॥

## दृष्टे साम्नि नाम्नि ॥ ६।२।१३३ ॥

**[ दृष्टे ]** दृष्ट सप्तमी ङि ।

**[ साम्नि ]** सामन् सप्तमी ङि ।

**[ नाम्नि ]** नामन् सप्तमी ङि ।

**[ क्रौञ्चम् ]** 'नडादेः कीयः' (६।२।९२) इति गणपाठात् क्रुञ्चाशब्दस्य ह्रस्वः । क्रुञ्चेन दृष्टं साम = क्रौञ्चम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ मार्गीयवम् ]** मृगीयुणा दृष्टं साम = मार्गीयवम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० । वृद्धिः आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् ।

**[ मायूरम् ]** मयूरेण दृष्टं साम = मायूरम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ तैत्तिरम् ]** तित्तिरिणा दृष्टं साम = तैत्तिरम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ वासिष्ठम् ]** वसिष्ठेन दृष्टं साम = वासिष्ठम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ वैश्वामित्रम् ]** विश्वामित्रेण दृष्टं साम = वैश्वामित्रम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ कालेयम् ]** कलिना दृष्टं साम = कालेयम् । 'कल्यग्नेरेयण्' (६।१।१७) एयण्प्र० → एय । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ आग्नेयम् ]** अग्निना दृष्टं साम । 'कल्यग्नेरेयण्' (६।१।१७) एयण्प्र० → एय । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

एवंनामानि सामानि ॥छ॥

## गोत्रादङ्कवत् ॥ ६।२।१३४ ॥

**[ गोत्रात् ]** गोत्र पञ्चमी ङसि ।

**[ अङ्कवत् ]** अङ्के इव = अङ्कवत् । 'तत्र' (७।१।५३) वत्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ औपगवकम् ]** उप-गो । गोः समीपमुपगुः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । उपगोरपत्यमौपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । औपगवेन दृष्टं साम = औपगवकम् । 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वृद्धिः । सि-अम् ।

**[ कापटवकम् ]** कपटोरपत्यं = कापटवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । कापटवेन दृष्टं साम = कापटवकम् । 'गोत्राददण्ड०' (६।३।१६९) अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वृद्धिः । सि-अम् ।

**[ वाहतवकम् ]** वहतु । वहतोरपत्यं = वाहतवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । वाहतवेन दृष्टं साम = वाहतवकम् । 'गोत्राददण्ड०' (६।३।१६९) अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वृद्धिः । सि-अम् ॥छ॥

## वामदेवाद् यः ॥ ६।२।१३५ ॥

**[ वामदेवात् ]** वामं दीव्यतीति वामदेवः । 'अच्' (५।१।४९) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । तस्मात् ।

**[ यः ]** य प्रथमा सि ।

**[ वामदेव्यम् ]** वामदेवेन दृष्टं साम = वामदेव्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

**डिद् वाऽण्** ॥ ६।२।१३६ ॥

**[ डित् ]** ड् इदनुबन्धो यस्य सः = डित् । प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ अण् ]** अण् प्रथमा सि ।

**[ औशनम्, औशनसम् ]** 'वशक् कान्तौ' (११०१) वश् । वष्टि दानवाभिमुखम् = उशनाः । 'वष्टेः कनस्' (उणा० ९८५) किद् अनस्प्र० । 'वशेरयङि' (४।१।८३) य्वृत् व० → उ० । 'उशनसा दृष्टं साम = औशनम्, औशनसम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः औ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अस्लुक् । सि-अम् ॥छ॥

**वा जाते द्विः** ॥ ६।२।१३७ ॥

**[ वा ]** वा प्रथमा सि ।

**[ जाते ]** जात सप्तमी ङि ।

**[ द्विः ]** द्वौ वारावस्येति द्विः । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र० । प्रथमा सि ।

**[ शातभिषः, शातभिषजः ]** शतं भिषजोऽस्याः सा = शतभिषक्, तया चन्द्रयुक्तया युक्तः कालोऽपि शतभिषक् । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । शतभिषजि जातः = शातभिषजः । 'जाते' (६।३।९८) इत्यनेन अण्प्राप्तः, तद्बाधकः 'वर्षा-कालेभ्यः' (६।३।८०) इति इकण्, पुनस्तद्बाधकः, 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अज्लुक् ।

**[ हैमवतः ]** हिमवत् । हिमवति जातः = हैमवतः । 'जाते' (६।३।९८) अण्प्र० → अ । वृद्धिः ऐ ।

**[ औशं साम ]** उशनसा दृष्टं साम = औशनम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अस्लुक् । औशने जातः । 'जाते' (६।३।९८) इत्यण्प्राप्तः, तद्बाधकः 'वर्षा-कालेभ्यः' (६।३।८०) इति इकण् । पुनस्तद्बाधकः 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । सि-अम् ॥छ॥

**तत्रोद्धृते पात्रेभ्यः** ॥ ६।२।१३८ ॥

**[ तत्र ]** तत्र पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ उद्धृते ]** उद्धृत सप्तमी ङि ।

**[ पात्रेभ्यः ]** पात्र पञ्चमी भ्यस् । 'एद् बहुस्भोसि' (१।४।४) एत् ।

**[ शारावः ]** शरावेषु उद्धृत ओदनः = शारावः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ माल्लकः ]** मल्लकेषु, मल्लकासु वा उद्धृत (ओदनः) = माल्लकः । अनेन विहितः 'प्राग् जितादण्' (६।१।३) अण्प्र० → अ । 'जातिश्च णि तद्धितय-स्वरे' (३।२।५१) पुंवद्भावः । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ कार्परः ]** कर्परेषु उद्धृत ओदनः = कार्परः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

बहुवचनं पात्रविशेषपरिग्रहार्थम् ॥छा॥

**स्थण्डिलाच्छेते व्रती** ॥ ६।२।१३९ ॥

**[ स्थण्डिलात् ]** स्थण्डिल पञ्चमी ङसि ।

**[ शेते ]** शेते सप्तमी ङि । सूत्रत्वात् ङिलोपः ।

**[ व्रती ]** व्रतिन् प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[ स्थाण्डिलो भिक्षुः ]** स्थण्डिल एव शेते = स्थाण्डिलो भिक्षुः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।८) अलोपः ॥छा॥

**संस्कृते भक्ष्ये** ॥ ६।२।१४० ॥

**[ संस्कृते ]** संस्कृत सप्तमी ङि ।

**[ भक्ष्ये ]** भक्ष्य सप्तमी ङि ।

**[ भ्राष्ट्रा अपूपाः ]** भ्राष्ट्रे संस्कृताः = भ्राष्ट्राः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् । अपूप प्रथमा जस् ।

**[ कैलासाः( शाः ) ]** किलाशायां संस्कृताः = कैलाशाः । किलाशी नाम मण्डकपालं पात्रं - ताविका वा । किलाश्यां वा संस्कृताः = कैलाशाः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आ-ईलुक् । जस् ।

**[ पात्राः ]** पात्रे संस्कृताः = पात्राः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ॥छा॥

**शूलोखाद् यः** ॥ ६।२।१४१ ॥

**[ शूलोखात् ]** शूलश्च उखा च = शूलोखम्, तस्मात् = शूलोखात् । 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[ यः ]** य प्रथमा सि ।

**[ शूल्यं मांसम् ]** शूले संस्कृतं = शूल्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । सि-अम् ।

**[ उख्यम् ]** उखायां संस्कृतम् = उख्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः । सि-अम् ॥छा॥

**क्षीरादेयण्** ॥ ६।२।१४२ ॥

**[ क्षीरात् ]** क्षीर पञ्चमी ङसि ।

**[ एयण् ]** एयण् प्रथमा सि ।

**[ क्षैरेयम्, क्षैरेयी यवागूः ]** क्षीरे संस्कृतं भक्ष्यं = क्षैरेयम् । अनेन एयण्प्र० → एय । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । सि-अम् । अग्रेतने 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । यवागूः ॥छ॥

**दध्न इकण्** ॥ ६।२।१४३ ॥

**[ दध्नः ]** दधि पञ्चमी ङसि । 'दध्यस्थिसक्थ्यक्ष्णोऽन्तस्याऽन्' (१।४।६३) अन् । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ दाधिकम् ]** दध्नि संस्कृतं = दाधिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

ननु च संस्कृतार्थे इकण् वक्ष्यते, तेनैव सिद्धम् ? न सिध्यति । दध्ना हि तत् संस्कृतं यस्य दधिकृतमेवोत्कर्षाधानम् । इह तु दधि केवलमाधारभूतं, द्रव्यान्तरेण तु लवणादिना संस्कारः क्रियते ॥छ॥

**वोदश्वितः** ॥ ६।२।१४४ ॥

**[ वा ]** वा प्रथमा सि ।

**[ उदश्वितः ]** उदश्वित् पञ्चमी ङसि ।

**[ औदश्वितम् औदश्वित्कम् ]** उदक 'ट्वोश्वि गति-वृद्ध्योः' (९९७) श्वि । उदकेन वृद्धिं याति = उदश्वित् । क्विप्प्र० । अत एव निर्देशात् य्वृत् न भवति । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'नाम्न्युत्तरपदस्य च' (३।२।१०७) उदक० → उददेशः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । उदश्विति संस्कृतं भक्ष्यम् = औदश्वितम् । 'संस्कृते भक्ष्ये' (६।२।१४०) अण्प्र० → अ । वृद्धिः औ । एवम् - औदश्वित्कम् । अनेन इकण्प्र० → इक । वृद्धिः औ । 'ऋवर्णोवर्ण०' (७।४।७१) इलोपः । सि-अम् ॥छ॥

**क्वचित्** ॥ ६।२।१४५ ॥

**[ क्वचित् ]** क्वचित् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ चाक्षुषं रूपम् ]** चक्षुष् । चक्षुषा गृह्यते इति चाक्षुषम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः । सि-अम् । रूपम् ।

**[ श्रावणः शब्दः ]** श्रवणाभ्यां गृह्यत इति श्रावणः शब्दः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।८) अलोपः ।

**[ रासनो रसः ]** रसनया गृह्यत इति रासनो रसः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।८) आलुक् ।

**[ दार्षदाः सक्तवः ]** दृषद् । दृषदि पिष्टाः = दार्षदाः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आर् । जस् । 'षचि-सेचने' (६४७) षच् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सच् । सच्यन्ते जलेन = सक्तवः । 'कृ-सि-कम्यमि-गमि-तनि-मनि-जन्यसि-मसि-सच्यवि-भा-धा-गा-ग्ला-म्ला-हनि-हा-या-हि-क्रुशि-पूभ्यस्तुन्' (उणा० ७७३) तुन्प्र० → तु । 'च-जः क-गम्' (२।१।८६) च० → क० । जस् ।

**[ औदूखलो यावकः ]** उदूखले क्षुण्णः = औदूखलो यावकः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ चातुर्दशं रक्षः ]** चतुर्दश(शी) । चतुर्दश्यां दृश्यते = चातुर्दशम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अ(ई)लोपः । सि-अम् ।

**[ चातुरं शकटम् ]** चतुर्भिरुह्यते = चातुरं शकटम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आ । सि-अम् ।

**[ आश्वो रथः ]** अश्वैरुह्यते = आश्वो रथः । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ सांप्रतम् ]** संप्रति युज्यते = सांप्रतम् । अनेन विहितः 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

सांप्रतः सांप्रतीत्यपि वाच्यलिङ्गात् । यस्तु **'स्वयं छेत्तुमसाम्प्रतम्'** ।

**इत्याचार्यश्रीहेमचन्द्रविरचितायां बृहद्वृत्तौ तद्धितस्य**
**द्वितीयः पादः ।।छ।।**

• • •

॥ अर्हम् ॥

## ॥ अथ षष्ठाध्यायस्य तृतीयः पादः ॥

### **शेषे** ॥ ६।३।१ ॥

**[ शेषे ]** शेष सप्तमी ङि ।

कृतादिषु इत्यादि कोऽर्थः । 'तत्र कृत-लब्ध-क्रीत-सम्भूतादिषु' (६।३।९४) 'नद्यादेरेयण्' (६।३।२) इति 'संस्कृते भक्ष्ये' (६।२।१४०) इत्यनन्तरेणार्थेन कृतार्थं मा भूदित्यर्थः ॥छ॥

### **नद्यादेरेयण्** ॥ ६।३।२ ॥

**[ नद्यादेः ]** नदी आदिर्यस्य सः = नद्यादिस्तस्मात् ।

**[ एयण् ]** एयण् प्रथमा सि ।

**[ नादेयः ]** नद्यां जातो भवो वा = नादेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ माहेयः ]** मह्यां जातो भवो वा = माहेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ वानेयः ]** वने जातो भवो वा = वानेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वन्यः ]** वने साधुः = वन्यः । 'तत्र साधौ' (७।१।१५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नादिकम् ]** नदीनां समूहः = नादिकम् । 'कवचि-हस्त्यचित्ताच्चेकण्' (६।२।१४) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः । सि-अम् ।

**[ कौशाम्बी ]** कुशेन अम्बोऽम्बनं यस्य सः = कुशाम्बः । कुशाम्बेन निवृत्ता = कौशाम्बी ।

**[ वनवासी ]** वनं वासयतीति वनवासी । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छ॥

### **राष्ट्रादियः** ॥ ६।३।३ ॥

**[ राष्ट्रात् ]** राष्ट्र पञ्चमी ङसि ।

**[ इयः ]** इय प्रथमा सि ।

**[ राष्ट्रियः ]** राष्ट्रे क्रीतः कुशलो जातो भवो वा = राष्ट्रियः । अनेन इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ राष्ट्रिः ]** राष्ट्रस्यापत्यं = राष्ट्रिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## दूरादेत्यः ॥ ६।३।४ ॥

**[ दूरात् ]** दूर पञ्चमी ङसि ।

**[ एत्यः ]** एत्य प्रथमा सि ।

**[ दूरेत्यः ]** दूरे भवः = दूरेत्यः । अनेन एत्यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## उत्तरादाहञ् ॥ ६।३।५ ॥

**[ उत्तरात् ]** उत्तर पञ्चमी ङसि ।

**[ आहञ् ]** आहञ् प्रथमा सि ।

**[ औत्तराहः ]** उत्तरतीति उत्तरः । 'अच्' (५।१।४९) अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । उत्तरे कुशलः = औत्तराहः । अनेन आहञ्प्र० → आह । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'

**[ औत्तराहा स्त्री ]** उत्तरस्यां दिशि कुशलः = औत्तराहा । अनेन आहञ्प्र० → आह । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ औत्तराही ]** उत्तरस्यां अदूरवर्त्तिन्यां दिशि वसति = औत्तराही । 'वोत्तरात्' (७।२।१२१) आहिप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः । उत्तराहिशब्दोऽव्ययम् उत्तराहि भवा = औत्तराहि(ही) । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

उत्तरस्यां दूरवर्त्तिन्यां दिशि देशे वा वसति । 'वोत्तरात्' (७।२।१२१) इत्यनेन दिशि देशे वाहि कालरूपत्वेऽर्थे आहौ सति परत्वात् 'सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात्' (६।३।८८) तनडेव, न त्वण् ॥छ॥

## पारावारादीनः ॥ ६।३।६ ॥

**[ पारावारात् ]** पारावार पञ्चमी ङसि ।

**[ ईनः ]** ईन प्रथमा सि ।

**[ पारावारीणः ]** अवारः समुद्रस्तस्य पारम् । राजदन्तादित्वात् पूर्वनिपातः । पारावारे भवः = पारावारीणः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ॥छ॥

## व्यस्त-व्यत्यस्तात् ॥ ६।३।७ ॥

**[ व्यस्तव्यत्यस्तात् ]** व्यस्तश्चासौ व्यत्यस्तश्च = व्यस्तव्यत्यस्तम्, तस्मात् ।

**[ पारीणः ]** पारे भवः = पारीणः ।

**[ अवारीणः ]** अवारे भवः = अवारीणः ।

**[ अवारपारीणः ]** अवारस्य पारम् = अवारपारम् । 'राजदन्तादिषु' (३।१।१४९) इत्यनेन विभाषया पूर्वनिपातविधानात् इह न दो भावः(?) । अवारपारे भवः = अवारपारीणः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।।छ।।

**द्यु-प्रागपागुदक्-प्रतीचो यः** ।। ६।३।८ ।।

**[ द्युप्रागपागुदक्प्रतीचः ]** 卐द्युश्च (द्यु च) प्राङ् च अपाङ् च उदक्(ङ्) च प्रत्यङ् च = द्युप्रागपागुदक्प्रत्यङ्, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

**[ दिव्यम् ]** दिव् । दिवि भवं = दिव्यम् । अनेन यप्र० । सि-अम् ।

**[ प्राच्यम् ]** प्राच् । प्राचि प्राग्वा भवं = प्राच्यम् । अनेन यप्र० । दिक्शब्दात् दिक्-देश-कालेषु प्रथमा ।

**[ अपाच्यम् ]** अपाचि भवम् = अपाच्यम् । अनेन यप्र० । सि-अम् ।

**[ उदीच्यम् ]** उदीचि भवम् = उदीच्यम् । अनेन यप्र० । सि-अम् ।

**[ प्रतीच्यम् ]** प्रतीचि भवं = प्रतीच्यम् । अनेन यप्र० । सि-अम् ।

दिग्देशवृत्तेः प्रागादेरयं यः कालवृत्तेस्त्वव्ययात् परत्वात् 'सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात्' (६।३।८८) इत्यादिना तनट् । अनव्ययात्तु 'वर्षा-कालेभ्यः' (६।३।८०) इकण् ।

**[ प्राक्तनम् ]** प्राक् भवं = प्राक्तनम् । 'सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात्' (६।३।८८) तनट्प्र० → तन ।

**[ प्राचिकम् ]** प्राचि काले भवं = प्राचिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक ।।छ।।

**ग्रामादीनञ् च** ।। ६।३।९ ।।

**[ ग्रामात् ]** ग्राम पञ्चमी ङसि ।

**[ ईनञ् ]** ईनञ् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ ग्रामीणः, ग्राम्यः ]** ग्रामे भवो जातो वा = ग्रामीणः । अनेन ईनञ्प्र० → ईन । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । एवम्-ग्राम्यः । अनेनैव यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

ञकारः 'तद्धितः स्वरवृद्धिहेतु०' (३।२।५५) इत्यनेन पुंवद्भावप्राप्तिनिषेधार्थः ।

**[ ग्रामीणाभार्यः ]** ग्रामीणा भार्या यस्य सः = ग्रामीणाभार्यः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।।छ।।

**कत्र्यादेश्चैयकञ्** ।। ६।३।१० ।।

**[ कत्र्यादेः ]** कत्रिरादिर्यस्य सः = कत्र्यादिः, तस्मात् ।

卐 हैमप्रकाशे - द्यौश्च ।

**[ च ]** च प्रथमा सि ।

**[ एयकञ् ]** एयकञ् प्रथमा सि ।

**[ कात्त्रेयकः ]** कुत्सिताः के वा त्रयो यस्य सः = कत्त्रिः । 'कत्त्रिः' (३।२।१३३) इत्यनेन किमः कुशब्दस्य च कत्त्रिरादेशः । यद्वा कदः सौत्रो धातुः । कदतीति = कत्त्रिः । 'रा-शदि-शकि-कद्यदिभ्यस्त्रिः' (उणा० ६९६) त्रिप्र० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । कत्त्रौ भवः = कात्त्रेयकः । अनेन एयकञ्प्र० → एयक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पौष्करेयकः ]** पुष्करे भवः = पौष्करेयकः । अनेन एयकञ्प्र० → एयक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ ग्रामेयकः ]** ग्रामे भवः = ग्रामेयकः । अनेन एयकञ्प्र० → एयक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवं ग्रामशब्दस्य त्रैरूप्यम् ।

**[ पौदन ]** पुदन्या नद्या अदूरभवः = पौदनम् । 'निवासा-ऽदूरभव०' (६।२।६९) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् ।

अन्यत्र 'प्राग् जितादण्' (६।१।१३) अणमेव ॥छा॥

## कुण्ड्यादिभ्यो यलुक् च ॥ ६।३।११ ॥

**[ कुण्ड्यादिभ्यः ]** कुण्ड्या आदिर्येषां ते = कुण्ड्यादयः, तेभ्यः ।

**[ यलुक् ]** यस्य लुक् = यलुक् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ च ]** च प्रथमा सि ।

**[ कौण्डेयकः ]** 'कुडुङ् दाहे' (६९०) कुड् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । कुण्ड्यत इति कुण्ड्या - रन्ध्रदेशे नदी । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । कुण्ड्यायां भवो जातो वा = कौण्डेयकः । अनेन एयकञ्प्र० → एयक । वृद्धिः औ । अनेनैव यलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कौणेयकः ]** 'कुण आमन्त्रणे' (१८७५) कुण । 'चुरादि०' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलुक् । कुणयतीति कुणः । 'अच्' (५।१।४९) अच्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । कुणे साध्वी = कुण्या । 'तत्र साधौ' (७।१।१५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । कुण्यायां भवो जातो वा = कौणेयकः । अनेन एयकञ्प्र० → एयक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कुण्ड्या ]** कुण्डे साध्वी = कुण्ड्या । 'तत्र साधौ' (७।१।१५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ उक्ष्या ]** उक्षे साध्वी = उक्ष्या । 'तत्र साधौ' (७।१।१५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ भाण्ड्या ]** भाण्डे साध्वी = भाण्ड्या । 'तत्र साधौ' (७।१।१५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ग्रामकुण्ड्या ]** ग्रामकुण्डे साध्वी = ग्रामकुण्ड्या । 'तत्र साधौ' (७।१।१५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ तृण्या ]** तृणानां समूहः = तृण्या । 'पाशाऽऽदेश्च ल्यः' (६।२।२५) ल्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ वन्या ]** वनानां समूहः = वन्या । 'पाशाऽऽदेश्च ल्यः' (६।२।२५) ल्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पल्या ]** पले साध्वी = पल्या । 'पृषोदरादयः' (३।२।१५५) निपातः ।

**[ मुल्या ]** मुले साध्वी = मुल्या । 'पृषोदरादयः' (३।२।१५५) निपातः ।।छ।।

## **कुल-कुक्षि-ग्रीवाच्छ्वाऽस्यलङ्कारे** ।। ६।३।१२ ।।

**[ कुलकुक्षिग्रीवात् ]** कुलश्च कुक्षिश्च ग्रीवा च = कुलकुक्षिग्रीवम् । 'क्लीबे' (२।४।९७) ह्रस्वः । तस्मात् ।

**[ श्वाऽस्यलङ्कारे ]** श्वा च असिश्च अलङ्कारश्च = श्वाऽस्यलङ्कारम्, तस्मिन् ।

**[ कौलेयकः श्वा, कौलोऽन्यः ]** कुले शुद्धान्वये भवो जातो वा = कौलेयकः । अनेन एयकञ्प्र० → एयक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-कौलः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः औ ।

**[ कौक्षेयकोऽसिः, कौक्षोऽन्यः ]** कुक्षौ भवः = कौक्षेयकः । अनेन एयकञ्प्र० → एयक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । असिः । यः कङ्ककुक्षिनिर्जीर्णेनायसा कृतः । एवम्-कौक्षः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः औ ।

**[ ग्रैवेयकोऽलङ्कारः, ग्रैवोऽन्यः ]** ग्रीवायां भवः = ग्रैवेयकः । अनेन एयकञ्प्र० → एयक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । अलङ्कारः । एवम् - ग्रैवः । 'ग्रीवातोऽण् च' (६।३।१३२) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।।छ।।

## **दक्षिणा-पश्चात्-पुरसस्त्यण्** ।। ६।३।१३ ।।

**[ दक्षिणापश्चात्पुरसः ]** दक्षिणा च पश्चाच्च पुरस् च = दक्षिणापश्चात्पुरस्, तस्मात् ।

**[ त्यण् ]** त्यण् प्रथमा सि ।

**[ दाक्षिणात्यः ]** दक्षिणा दिक्, तस्यां भवः = दाक्षिणात्यः । अनेन त्यण्प्र० → त्य । वृद्धिः आ । अथवा दक्षिणस्यां दिशि वसति । 'वा दक्षिणात् प्रथमा-सप्तम्या आः' (७।२।११९) आप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । तत्र भवः = दाक्षिणात्यः । अनेन त्यण्प्र० → त्य । वृद्धिः आ । 'कौण्डिन्या-ऽगस्त्ययोः कुण्डिना-ऽगस्ती च' (६।१।१२७) कौण्डिन्यनिर्देशात् पुंवदनित्य इति 'सर्वादयोऽस्यादौ' (३।२।६१) न पुंवत् ।

**[ पाश्चात्यः ]** पश्चात् भवः = पाश्चात्यः । अनेन त्यण्प्र० → त्य । वृद्धिः आ ।

**[ पौरस्त्यः ]** पुरो भवः = पौरस्त्यः । अनेन त्यण्प्र० → त्य । वृद्धिः औ ।

पश्चात्-पुरः शब्दौ यदि(दा) कालवाचिनौ तदा परत्वात् तनटापभाव्यमित्यर्थादिह सूत्रे तौ दिग्-देशवाचिनौ पर्यवसितौ, ततस्तत्साहचर्यात् दक्षिणाशब्दोऽपि दिग्-देशवाची ग्राह्यौ, न द्विजदेयवाचीत्यर्थः ।

अपरा दिग्-देशः कालो वा रमणीयः = पश्चात् । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । 'पश्चोऽपरस्य दिक्पूर्वस्य चाऽऽति' (७।२।१२४) अपरास्थाने "पश्च"देशः ।

पूर्वः पूर्वा वा दिग्-देशः कालो वा रमणीयः = पुरः । 'पूर्वा-ऽवरा-ऽधरेभ्योऽसस्तातौ पुरवधश्चैषाम्' (७।२।११५) अस्प्र० - "पुरः" देशः ।

**[ दाक्षिणानि जुहोति ]** दक्षिणायां भवानि = दाक्षिणानि । अत्र दक्षिणाशब्दो गवादिवचनः ॥छ॥

## वह्ल्यूर्दि-पर्दि-कापिश्याष्टायनण् ॥ ६।३।१४ ॥

**[ वह्ल्यूर्दिपर्दिकापिश्याः ]** वह्लिश्च ऊर्दिश्च पर्दिश्च कापिशी च = वह्ल्यूर्दिपर्दिकापिशी । तस्याः = वह्ल्यूर्दिपर्दिकापिश्याः । सूत्रत्वात् समाहारेऽपि न क्लीबत्वम् ।

**[ टायनण् ]** टायनण् प्रथमा सि ।

**[ वाह्लायनः, वाह्लायनी ]** वह्लिषु भवः = वाह्लायनः । वह्लिर्देशविशेषः । 'बहुविषयेभ्यः' (६।३।४५) इत्यकञ्बाधकः । अनेन टायनण्प्र० → आयन । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ और्दायनः, और्दायनी ]** ऊर्दौ भवो भवा वा = और्दायनः । अनेन टायनण्प्र० → आयन । वृद्धिः औ । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ पार्दायनः, पार्दायनी ]** पर्दौ भवो भवा वा = पार्दायनः, पार्दायनी । अनेन टायनण्प्र० → आयन । वृद्धिः आ । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ कापिशायनं मधु, कापिशायनी द्राक्षा ]** कापिश्यां भवो भवा वा = कापिशायनं मधु, कापिशायनी द्राक्षा । अनेन टायनण्प्र० → आयन । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छ॥

## रङ्कोः प्राणिनि वा ॥ ६।३।१५ ॥

**[ रङ्कोः ]** रङ्कु पञ्चमी ङसि ।

**[ प्राणिनि ]** प्राणिन् सप्तमी ङि ।

**[ वा ]** वा प्रथमा सि ।

**[ राङ्कवायणः, राङ्कवो गौः ]** रङ्कुषु भवः = राङ्कवायणः । अनेन टायनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । एवम्-राङ्कवः-देशवाचिनः । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ राङ्कवः कम्बलः ]** रङ्कुषु भवः = राङ्कवः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । कम्बल प्रथमा सि ।

**[ राङ्कवको मनुष्यः ]** रङ्कुषु भवः = राङ्कवकः । 'कच्छादेर्नृ-नृस्थे' (६।३।५५) अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । मनुष्यः ॥छ॥

**क्वेहा-ऽमा-त्र-तसस्त्यच्** ॥ ६।३।१६ ॥

**[ क्वेहाऽमात्रतसः ]** क्वश्च इहश्च अमा च त्रश्च तस् च = क्वेहाऽमात्रतस्, तस्मात् ।

**[ त्यच् ]** त्यच् प्रथमा सि ।

**[ क्वत्यः ]** किम् । कस्मिन् । 'क्व-कुत्रा-ऽत्रेह' (७।२।९३) क्वनिपातः । क्व भवः = क्वत्यः । अनेन त्यच्प्र० → त्य ।

**[ इहत्यः ]** अदस् । अस्मिन् = इह । 'क्व-कुत्रा-ऽत्रेह' (७।२।९३) इहनिपातः । इह भवः = इहत्यः । अनेन त्यच्प्र० → त्य ।

**[ अमात्यः ]** अमा-सह भूपालेन एकान्ते भवतीति अमात्यः । अनेन त्यच्प्र० → त्य ।

**[ तत्रत्यः ]** तद् । तस्मिन् = तत्र । 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्या०' (२।१।११३) अलोपः । तत्र भवः = तत्रत्यः । अनेन त्यच्प्र० → त्य ।

**[ यत्रत्यः ]** यद् । यस्मिन् = यत्र । 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्या०' (२।१।११३) अलोपः । यत्र भवः = यत्रत्यः । अनेन त्यच्प्र० → त्य ।

**[ ततस्त्यः ]** तद् । तस्मात् = ततः । 'किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस्' (७।२।८९) पित् तस्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्या०' (२।१।११३) अलोपः । तत्र(तः) आगतः = ततस्त्यः । अनेन त्यच्प्र० → त्य ।

**[ यतस्त्यः ]** यद् । यस्मात् = यतः । 'किमद्व्यादि०' (७।२।८९) पित् तस्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । यत आगतः = यतस्त्यः । अनेन त्यच्प्र० → त्य ।

**[ कुतस्त्यः ]** किम् । कस्मात् = कुतः । 'इतोऽतः-कुतः' (७।२।९०) तस्प्र०-किम् → कुदेशः । कुत आगतः = कुतस्त्यः । अनेन त्यच्प्र० → त्य ।

**[ आविष्ट्यः ]** आविः - प्राकाश्ये भवः = आविष्ट्यः । मतान्तरे त्यच्प्र० → त्य । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ॥छ॥

**नेर्ध्रुवे** ॥ ६।३।१७ ॥

**[ नेर्ध्रुवे ]** नि पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) ए । 'एदोद्भ्यां ङसि०' (१।४।३५) ङसि० → र० । ध्रुव सप्तमी ङि ।

**[ नित्यं ध्रुवम् ]** नि-नियतं सर्वकालभवं = नित्यम् । अनेन त्यच्प्र० → त्य । सि-अम् । ध्रुवम् ॥छ॥

**निसो गते** ॥ ६।३।१८ ॥

**[ निसः ]** निस् पञ्चमी ङसि ।

**[ गते ]** गत सप्तमी ङि ।

**[ निष्ट्यश्चण्डालः ]** निर्गता(तो) वर्णाश्रमेभ्यः = निष्ट्यः । अनेन त्यच्प्र० → त्य । 'हृस्वान्नाम्नस्ति' (२।३।३४) ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । चण्डालः ॥छ॥

## ऐषमो-ह्यः-श्वसो वा ॥ ६।३।१९ ॥

**[ ऐषमोह्यःश्वसः ]** ऐषमस् च ह्यस् च श्वस् च = ऐषमोह्यःश्वस्, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ ऐषमस्त्यम्, ऐषमस्तनम् ]** इदम् । अस्मिन् संवच्छरे । 'ऐषमः-परुत्-परारि वर्षे' (७।२।१००) इति समसिण्प्र० → समस् - इदम्० → इ० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् । ऐषमो भवम् = ऐषमस्त्यम् । अनेन त्यच्प्र० → त्य । एवम्-ऐषमस्तनम् । 'सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात्' (६।३।८८) तनट्प्र० → तन । सि-अम् । 'सो रुः' (२।१।७२) स० → र० । 'च-ट-ते सद्वितीये' (१।३।७) र० → स० ।

**[ ह्यस्त्यम्, ह्यस्तनम् ]** ह्यस् । ह्यो भवं = ह्यस्त्यम् । अनेन त्यच्प्र० → त्य । एवम्-ह्यस्तनम् । 'सायं-चिरं-प्राह्णे०' (६।३।८८) तनट्प्र० → तन । सि-अम् ।

**[ श्वस्त्यम्, श्वस्तनम् ]** श्वस् । श्वो भवं = श्वस्त्यम् । अनेन त्यच्प्र० → त्य । एवम्-श्वस्तनम् । 'सायं-चिरं-प्राह्णे०' (६।३।८८) तनट्प्र० → तन । सि-अम् ।

**[ शौवस्तिकम् ]** श्वो भवं = शौवस्तिकम् । 'श्वसस्तादिः' (६।३।८४) इकण्प्र० - तादिः । 'लोकात्' (१।१।३) श् पाठउ विश्लेषियइ । 'द्वारादेः' (७।४।६) औ । सि-अम् ॥छ॥

## कन्थाया इकण् ॥ ६।३।२० ॥

**[ कन्थायाः ]** कन्था पञ्चमी ङसि ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ कान्थिकः ]** कन्था आमविशेषस्तत्र भवः = कान्थिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## वर्णावकञ् ॥ ६।३।२१ ॥

**[ वर्णौ ]** वर्णु सप्तमी ङि ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

**[ कान्थकः ]** वर्णुनाम नदः, तस्य समीपो देशोऽपि वर्णुः, तस्मिन् या कन्था तस्यां भवः = कान्थकः । अनेन अकञ्प्र० → अक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ॥छ॥

## रूप्योत्तरपदारण्याण्णः ॥ ६।३।२२ ॥

**[ रूप्योत्तरपदारण्याण्णः ]** रूप्य उत्तरपदं यस्य सः = रूप्योत्तरपदः । रूप्योतरपदश्च अरण्यश्च = रूप्योत्तरपदारण्यम् । तस्मात् = रूप्योत्तरपदारण्यात् । ण प्रथमा सि । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'प्रत्यये च' (१।३।२) द० → न० । 'तवर्गस्य श्चवर्ग' (१।३।६०) न० → ण० ।

**[ वार्करूप्यः, वार्करूप्या ]** वृक 'रूपण् रूपक्रियायाम्' (१८९०) रूप् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । वृकै रूप्यते = वृकरूप्यः, वृकरूप्या । 'य एच्वातः' (५।१।२८) यप्र० । 'णेरनिटि' (४।३।८३) णिच्-लोपः । वृकरूप्ये भवः = वार्करूप्यः । अनेन णप्र० → अ । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शैविरूप्यम्, शैवरूप्यम् ]** शिवेन रूप्यते = शिवरूप्यः । 'य एच्चातः' (५।१।२८) यप्र० । शिवरूप्ये भवः = शैवरूप्यः । अनेन णप्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । यद्वा शिवेरपत्यानि । 'दु-नादि-कुर्वित्०' (६।१।११८) ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) इति लुप् । शिविभी रूप्यते । 'य एच्चातः' (५।१।२८) यप्र० ।

**[ आरण्याः सुमनसः, आरण्याः पशवः ]** अरण्ये भवाः = आरण्याः । अनेन णप्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । यदुक्तं लिङ्गानुशासने - **सिकताः सुमनसः सा( स )माः** इति स्त्रीत्वम् (श्लोकाङ्कः - ९) ।

**[ माणिरूप्यकः ]** मा-अविद्यमाना अणिराणिर्वा यस्य सः = माणिः, तेन रूप्यते = माणिरूप्यः । 'य एच्चातः' (५।१।२८) यप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । माणिरूप्ये जातः = माणिरूप्यकः । 'प्रस्थ-पुर-वहान्त-योपान्त्य-धन्वार्थात्' (६।३।४३) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**अन्तग्रहणेनैव सिद्धे उत्तरपदग्रहणं बहुप्रत्ययपूर्वनिवृत्त्यर्थम्-**

**[ बाहुरूप्यी ]** ईषदूनो रूप्यः = बहुरूप्यः । बहुरूप्ये भवा = बाहुरूप्यी । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छ॥

## दिक्पूर्वादनाम्नः ॥ ६।३।२३ ॥

**[ दिक्पूर्वात् ]** दिक् पूर्वा यस्य सः = दिक्पूर्वः, तस्मात् ।

**[ अनाम्नः ]** न नाम = अनाम, तस्मात् = अनाम्नः । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ पौर्वशालः, पौर्वशाला ]** पूर्वा च सा शाला चेति 'पूर्वा-ऽपर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीरम्' (३।१।१०३) इति कर्मधारयः । यदि वा पूर्वस्यां शालायां भवः । तद्धितविषये 'दिगधिकं संज्ञा - तद्धितोत्तरपदे' (३।१।९८) इति तत्पुरुषकर्मधारयो द्विगुस्ततः संख्यापूर्वपदत्वाभावात् तदा अनेन णप्र० → अ । वृद्धिः औ । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ आपरशालः, आपरशाला ]** अपरस्यां शालायां भवः = आपरशालः । अनेन णप्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पूर्वैषुकामशमः ]** पूर्वेषुकामशमी मण्ड्यते । पूर्वेषुकामशमी नाम ग्रामः, तस्यां भवः = पूर्वैषुकामशमः । अनेन णप्र० → अ । 'प्राग्ग्रामाणाम्' (७।४।१७) इत्यनेन उत्तरपदवृद्धिः ऐ ।

**[ अपरैषुकामशमः ]** अपरेषुकामशमी नाम ग्रामः, तस्यां भवः = अपरैषुकामशमः । अनेन णप्र० → अ । 'प्राग्ग्रामाणाम्' (७।४।१७) इत्यनेन उत्तरपदवृद्धिः ऐ ।

**[ पूर्वकार्ष्णमृत्तिकी ]** पूर्वकृष्णमृत्तिकायां भवः = पूर्वकार्ष्णमृत्तिकी । अनेन णप्र० → अ । 'प्राग्ग्रामाणाम्' (७।४।१७) इत्युत्तरपदवृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ अपरकार्ष्णमृत्तिकी ]** अपरकृष्णमृत्तिकायां भवः = अपरकार्ष्णमृत्तिकी । अनेन णप्र० → अ । 'प्राग्ग्रामाणाम्' (७।४।१७) इत्युत्तरपदवृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छा॥

**मद्रादञ्** ॥ ६।३।२४ ॥

**[ मद्रात् ]** मद्र पञ्चमी ङसि ।

**[ अञ् ]** अञ् प्रथमा सि ।

**[ पौर्वमद्रः, पौर्वमद्री ]** पूर्वेषु मद्रेषु भवः = पौर्वमद्रः । अनेन अञ्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

ननु णप्रत्ययेनाधिकारायातेन सेत्स्यति किमञ्वचनेन ? सत्यम् - अञ्वचनं ङ्यर्थः, तर्हि 'प्राग् जितादण्' (६।१।१३) इत्यणैव सेत्स्यति, इत्याह बहुत्व इत्यादि । अयमर्थः - मद्रशब्दो जनपदवचनो भ(म)द्रवचनश्च तत्र भ(म)द्रवचनादणि सिध्यति, जनपदवाचिनस्तु न सिध्यति, बहुत्वे 'बहुविषयेभ्यः' (६।३।४५) इत्यकञ्प्राप्तस्तदपवादे 'वृजि-मद्राद् देशात् कः' (६।३।३८) इति के प्राप्तेऽञ्वचनम् ।

**[ सुपाञ्चालकः ]** सुपञ्चालेषु भवः = सुपाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक । 'सु-सर्वा-ऽर्द्धाद् राष्ट्रस्य' (७।४।१५) इत्युत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सर्वपाञ्चालकः ]** सर्वपञ्चालेषु भवः = सर्वपाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक । 'सु-सर्वा-ऽर्द्धाद् राष्ट्रस्य' (७।४।१५) इत्युत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अर्द्धपाञ्चालकः ]** अर्द्धपञ्चालेषु भवः = अर्द्धपाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक । 'सु-सर्वा-ऽर्द्धाद्०' (७।४।१५) इत्युत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पूर्वपाञ्चालकः ]** पूर्वेषु पञ्चालेषु भवः = पूर्वपाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक । 'अमद्रस्य दिशः' (७।४।१६) इत्युत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अपरपाञ्चालकः ]** अपरेषु पञ्चालेषु भवः = अपरपाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक । 'अमद्रस्य दिशः' (७।४।१६) इत्युत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सुमागधकः ]** सुमगधेषु भवः = सुमागधकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक । 'सु-सर्वा-ऽर्द्धाद्०' (७।४।१५) उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सर्वमागधकः ]** सर्वमगधेषु भवः = सर्वमागधकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक । 'सु-सर्वा-ऽर्द्धाद्०' (७।४।१५) उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सुवृजिकः ]** सुवृजिषु भवः = सुवृजिकः । 'वृजि-मद्राद् देशात् कः' (६।३।३८) कप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सुमद्रकः ]** (सु)मद्रेषु भवः = (सु)मद्रकः । 'वृजि-मद्राद् देशात् कः' (६।३।३८) कप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा॥

**उदग्ग्रामाद् यकृल्लोम्नः** ॥ ६।३।२५ ॥

**[ उदग्ग्रामात् ]** उदङ् चासौ ग्रामश्च = उदग्ग्रामः, तस्मात् ।

**[ यकृल्लोम्नः ]** यकृल्लोमन् इत्यखण्डम् । पञ्चमी ङसि । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ याकृल्लोमः ]** यकृत्-कालेयम्, तदाकाराणि लोमानि यत्र तत् = यकृल्लोमन् । यकृल्लोमनि भवः = याकृल्लोमः । अनेन अञ्प्र० → अ । वृद्धिः आ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः ।

**[ याकृल्लोमनः ]** यकृल्लोमनि भवः(वाः) = याकृल्लोमः(मनः) । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः आ । 'अणि' (७।४।५२) इत्यनेनान्त्यस्वरादिलोपाभावः ।

**[ प्रैक्षिणः ]** प्रेक्षाऽस्यास्ति = प्रेक्षी । 'प्रेक्षादेरिन्' (६।२।८०) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रेक्षिणि भवः = प्रैक्षिणः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः ऐ ।

**[ कौष्टिनः ]** कोष्टोऽस्यास्ति । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी । कोष्टिन्यां भवः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'जातिश्च णि०' (३।२।५१) पुंवद्भावः । वृद्धिः औ ॥छ॥

**गौष्ठी-तैकी-नैकेती-गोमती-शूरसेन-वाहीक-रोमक-पटच्चरात्** ॥ ६।३।२६ ॥

**[ गौष्ठीतैकीनैकेतीगोमतीशूरसेनवाहीकरोमकपटच्चरात् ]** गौष्ठी च तैकी च नैकेती च गोमती च सू(शू)रसेनश्च वाहीकश्च रोमकश्च पटच्चरश्च = गोष्ठीतैकीनैकेतीगोमतीसू(शू)रसेनवाहीकरोमकपटच्चरम्, तस्मात् ।

**[ गौष्ठः ]** गो 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) स्था । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' **(** न्या० सं० वक्ष०(१)/सूत्र(२९) **)** स्था । गावस्तिष्ठन्त्यस्मिन्निति गोष्ठम् । 'स्थादिभ्यः कः' (५।३।८२) कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । 'गो-ऽम्बा-ऽऽम्ब-सव्या-ऽप-द्वि-त्रि-भूम्यग्नि-शेकु-शङ्कु-क्वङ्गु-मञ्जि-पुञ्जि-बर्हिः-परमे-दिवेः स्थस्य' (२।३।३०) षत्वम् । गोष्ठस्य निवासः । 'निवासा-ऽदूरभव इति देशे नाम्नि' (६।२।६९) अण्प्र० । गोष्ठं देवताऽस्याः = गौष्ठी । 'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । गो(गौ)ष्ठ्यां भवः = गौष्ठः । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । वृद्धिः ।

**[ तैकः ]** तिको देवताऽस्याः = तैकी । 'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । तैक्यां भवः । अनेन अञ्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ नैकेतः ]** निकेतो देवताऽस्याः = नैकेती । 'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । नैकेत्यां भवः । अनेन अञ्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

एभ्यः 'वाहीकेषु ग्रामात्' (६।३।३६) इत्यनेन वाहीकग्रामलक्षणयोर्णिकेकणोस्तैक्याः कोपान्त्यलक्षणस्य 'क-खोपान्त्य-कन्था-पलद-नगर-ग्राम-ह्रदोत्तरपदाद् दोः' (६।३।५९) इत्यादिना ईयस्य चापवादः ।

**[ गौमतः ]** गो । गावः सन्त्यस्यां = गोमती । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । गोमत्यां भवः = गौमतः । 'जातिश्च णि०' (३।२।५१) पुंवत् । 'ईतोऽकञ्' (६।३।४१) इत्यस्यापवादः । अनेन अञ्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ शौरसेनः ]** सू(शू)रा सेना येषां ते = सू(शू)रसेनाः, तेषु भवः = शौरसेनः । 'बहुविषयेभ्यः' (६।३।४५) इत्यस्याकञोऽपवादः । अनेन अञ्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ वाहीकः ]** वाहीकेषु भवः = वाहीकः ।

**[ रौमकः ]** रोमकेषु भवः = रौमकः । नृवाचिनो 'दोरीयः' (६।३।३२) इत्यस्य, देशनाचिनस्तु 'क-खोपान्त्य०' (६।३।५९) इत्यस्यापवादस्तदुभयमपि श्लिष्टनिर्देशेन दुलक्षणस्येत्यनेन संगृहीतं, उभाभ्यामपि दुसंज्ञायामेव विधानात् अनेन अञ्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ पाटच्चरः ]** अट (१९४) - 'पट गतौ' (१९५) पट् । पटतीति पटत् । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । पटच्चरति = पटच्चरः । भूतपूर्वः पटन् = पटच्चरः । 'भूतपूर्वे प्चरट्' (७।२।७८) प्चरट्प्र० → चर । पटच्चरे भवः = पाटच्चरः । 'रोपान्त्यात्' (६।३।४२) इत्यकञोऽपवादः । अनेन अञ्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## शकलादेर्यञः ॥ ६।३।२७ ॥

**[ शकलादेः ]** शकल आदिर्यस्य सः = शकलादिः, तस्मात् ।

**[ यञः ]** यञ् पञ्चमी ङसि ।

गर्गाद्यन्तर्गणः शकलादिः ।

**[ शाकलाः ]** शकलस्यापत्यं वृद्धं = शाकल्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शाकल्यस्य इमे च्छात्राः = शाकलाः । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । जस् ।

**[ काण्वाः ]** कण्वस्यापत्यं वृद्धं = काण्व्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । वृद्धिः आ । काण्व्यस्य इमे च्छात्राः = काण्वाः । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । जस् ।

**[ गौकक्षाः ]** गोकक्षस्यापत्यं वृद्धं = गौकक्ष्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गौकक्ष्यस्य इमे च्छात्राः = गौकक्षाः । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितय०' (२।४।९२) यलुक् । जस् ।

**[ वामरथाः ]** वामरथस्यापत्यं वृद्धं = वामरथ्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वामरथ्यस्य इमे च्छात्राः = वामरथाः । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितय०' (२।४।९२) यलुक् । जस् ।

**[ शाकलीयम् ]** शकलो देवताऽस्य = शाकलः । 'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शाकलस्येदं = शाकलीयम् । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

卐**[ काण्वीयाः ]** कण्वादागतः = काण्वः । 'तत आगते' (६।३।१४९) अण्प्र० → अ । 'वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । काण्वस्य इमे च्छात्राः = काण्वीयाः । 'दोरीयः' (६।२।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ॥छ॥

---

卐 बृहद्वृत्तौ - काण्ठीयाः ।

**वृद्धेञः** ॥ ६।३।२८ ॥

**[ वृद्धेञः ]** वृद्धे इञ् = वृद्धेञ्, तस्मात् ।

**[ दाक्षाः ]** दक्षस्यापत्यं वृद्धं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षेरिमे च्छात्राः = दाक्षाः । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । जस् ।

**[ प्लाक्षाः ]** प्लक्षस्यापत्यं वृद्धं = प्लाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्लाक्षेरिमे च्छात्राः = प्लाक्षाः । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । जस् ।

**[ सौतङ्गमीयः ]** सुत अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । सुतं गच्छति । 'नाम्नो गमः०' (५।१।१३१) खप्र० → अ । 'खित्यन०' (३।२।१११) मोऽन्तः । सुतङ्गमेन निवृत्ता = सौतङ्गमी । 'सुतङ्गमादेरिञ्' (६।२।८५) इञ्प्र० । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'इञ इतः' (२।४।७१) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । सौतङ्गम्यां नगर्यां भवः = सौतङ्गमीयः । 'दोरीयः' (६।२।३२) ईयप्र० । 'समानानां तेन०' (१।२।१) दीर्घः ।

**[ शालङ्काः ]** शलङ्कु । शलङ्कोरपत्यं वृद्धं = शालङ्किः(:) । 'शालङ्क्यौदि-षाडि-वाड्वलि' (६।१।३७) इत्यादिना शालङ्किनिपातः । शालङ्केरपत्यं युवा । 'यञिञः' (६।१।५४) आयनण्प्र० । 'पैलाऽऽदेः' (६।१।१४२) आयनण्लुप् । शालङ्केरिमे च्छात्राः = शालङ्काः । अनेन अञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । जस् ॥छा॥

**न द्विस्वरात् प्राग्भरतात्** ॥ ६।३।२९ ॥

**[ न ]** न प्रथमा सि ।

**[ द्विस्वरात् ]** द्वौ स्वरौ यत्र तत् = द्विस्वरम्, तस्मात् ।

**[ प्राग्भरतात् ]** प्राङ् च भरतश्च = प्राग्भरतम्, तस्मात् ।

'वृद्धेञः' (६।३।२८) इत्यस्य निषेधः ।

**[ चैङ्कीयाः ]** चिङ्कस्यापत्यं = चैङ्किः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः ऐ । चिङ्काया अपत्यं वृद्धं वा = चैङ्कि(:) । इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । चैङ्केरिमे च्छात्राः = चैङ्कीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । जस् ।

**[ पौष्पीयाः ]** पुष्पस्य पुष्पाया वा अपत्यं = पौष्पि(:) । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अ-आलुक् । पौष्पेरिमे च्छात्राः = पौष्पीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । जस् ।

**[ काशीयाः ]** काशस्यापत्यं वृद्धं काशि(:) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । काशेरिमे च्छात्राः = काशीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'समानानां०' (१।२।१) दीर्घः । जस् ।

**[ वाशीयाः ]** वाशस्यापत्यं वृद्धं = वाशि(:) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वाशेरिमे च्छात्राः = वाशीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'समानानां०' (१।२।१) दीर्घः । जस् ।

**[ पान्नागाराः ]** पन्नं पतितमगारं यस्य सः = पन्नागारः । पन्नागारस्यापत्यं वृद्धं = पान्नागारि(ः) । 'अत इञ्' (६।१।३१) इञ्प्र० । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । पान्नागारेरिमे च्छात्राः = पान्नागाराः । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । जस् ।

**[ मान्थरेषणाः ]** मन्थरेषणस्यापत्यं वृद्धं = मान्थरेषणि(ः) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । मान्थरेषणेरिमे च्छात्राः = मान्थरेषणाः । 'वृद्धेञः' (६।३।२८) अञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । जस् । द्वावपि प्राच्य-भरतौ ।

**[ दाक्षाः ]** दक्षस्यापत्यं वृद्धं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षेरिमे च्छात्राः = दाक्षाः । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । जस् ।

**[ प्लाक्षाः ]** प्लक्षस्यापत्यं वृद्धं = प्लाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्लाक्षेरिमे च्छात्राः = प्लाक्षाः । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । जस् ।

प्राग्ग्रहणे भरतानां ग्रहणं न भवतीति स्वशब्देन ग्रहणम् ॥छा॥

**भवतोरिकणीयसौ** ॥ ६।३।३० ॥

**[ भवतोः ]** भवतु पञ्चमी ङसि ।

**[ इकणीयसौ ]** इकण् च ईयस् च = इकणीयसौ ।

**[ भावत्कम्, भावत्की ]** भवतः भवत्या वा इदं = भावत्कम्, भावत्की । अनेन इकण्प्र० → इक । 'जातिश्च णि तद्धितय-स्वरे' (३।२।५१) पुंवत् । 'ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त इकस्येतो लुक्' (७।४।७१) इकारलोपः । सि-अम् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ भवदीयः, भवदीया ]** भवतोऽयं = भवदीयः, भवदीया । अनेन ईयस्प्र० → ईय । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**सकारो 'नाम सिदय्व्यञ्जने' ( १।१।२१ ) इति पदत्वार्थः । उकारान्तग्रहणात् शत्रन्तान्न भवति ।**

**[ भावतम् ]** 'भू सत्तायाम्' (१) भू । भवतीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्या०' (२।१।११३) अलोपः । भवत इदं = भावतम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । वृद्धिः आ । सि-अम् ॥छा॥

**पर-जन-राज्ञोऽकीयः** ॥ ६।३।३१ ॥

**[ परजनराज्ञः ]** परश्च जनश्च राजा च = तत्, तस्मात् ।

**[ अकीयः ]** अकीय प्रथमा सि ।

**[ परकीयः ]** परस्यायं = परकीयः । अनेन अकीयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ जनकीयः ]** जनस्यायं = जनकीयः । अनेन अकीयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ राजकीयः ]** राज्ञोऽयं = राजकीयः । अनेन अकीयप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः ।

**[ राजकीयम् ]** राजन् 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी । 'अनोऽस्य' (२।१।१०८) अलुक् । 'तवर्गस्य०' (१।३।६०) न० → ञ० । 卐राज्ञ्या इदं = राजकीयम् । अकीयविषये 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) पुंवत् । अनेन अकीयप्र० । 'नोऽपदस्य०' (७।४।६१) अन्लोपः ।

**[ स्वकीयम् ]** स्व एव = स्वकः । स्वार्थे कप्र० । स्वकस्येदं = स्वकीयम् । 'गहादिभ्यः' (६।३।६३) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ देवकीयम् ]** देव एव = देवकः । स्वार्थे कप्र० । देवकस्येदं = देवकीयम् । 'गहादिभ्यः' (६।३।६३) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ सौवम् ]** स्व मण्ड्यते । स्वस्येदं = सौवम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'लोकात्' (१।१।३) सूपाठउ विश्लेषियइ । 'द्वारादेः' (७।४।६) औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ दैवमायुः ]** देव मण्ड्यते । देवस्येदं = दैवम् । 'देवाद् यञ् च' (६।१।२१) अञ्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ दैवी वाक् ]** दैवी इत्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।।छा।

## दोरीयः ।। ६।३।३२ ।।

**[ दोरीयः ]** दु पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) ओ । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) ङसि० → र० । ईय प्रथमा सि ।

**[ देवदत्तीयः ]** देवदत्तस्यायं = देवदत्तीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्

**[ जिनदत्तीयः ]** जिनदत्तस्यायं = जिनदत्तीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ तदीयः ]** तद् । तस्यायं = तदीयः । अनेन ईयप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ यदीयः ]** यद् । यस्यायं = यदीयः । अनेन ईयप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गार्गीयः ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यस्यायं = गार्गीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् ।

**[ वात्सीयः ]** वत्सस्यापत्यं (वृद्धं) = वात्स्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वात्स्यस्यायं = वात्सीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितय०' (२।४।९२) यलुक् ।

**[ शालीयः ]** शालस्यायं = शालीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गोनर्दीयः ]** 'प्राग् देशे' (६।१।१०) इति दुसंज्ञा । गोनर्दस्यायं = गोनर्दीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

---

卐 हैमप्रकाशे - राज्ञ इदं = राजकीयः ।

**[ भोजकटीयः ]** भोजकटस्यायं = भोजकटीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ साभासन्नयनः ]** सभासन्नयने भवः = साभासन्नयनः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**उष्णादिभ्यः कालात्** ॥ ६।३।३३ ॥

**[ उष्णादिभ्यः ]** उष्ण आदिर्येषां ते = उष्णादयः, तेभ्यः ।

**[ कालात् ]** काल पञ्चमी ङसि ।

**[ उष्णकालीयः( यम् ) ]** उष्णश्चासौ कालश्च = उष्णकालस्तत्र भवः = उष्णकालीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

**व्यादिभ्यो णिकेकणौ** ॥ ६।३।३४ ॥

**[ व्यादिभ्यः ]** विरादिर्येषां ते = व्यादयः, तेभ्यः ।

**[ णिकेकणौ ]** णिकश्च इकण् च = णिकेकणौ ।

**[ वैकालिकः, वैकालिका, वैकालिकी ]** विरुद्धः कालो विकालस्तत्र भवा = वैकालिका, वैकालिकी । अनेन णिक-इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ आनुकालिकः, आनुकालिका, आनुकालिकी ]** अनुरूपः कालोऽनुकालस्तत्र भवा = आनुकालिका, आनुकालिकी । अनेन णिक-इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ धौमकालिका, धौमकालिकी ]** धूमस्य कालः = धूमकालः । धूमकाले भवा = धौमकालिका, धौमकालिकी । अनेन णिक-इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ ऐदंकालिका, ऐदंकालिकी ]** अयं चासौ कालश्च = इदंकालः, तत्र भवा = ऐदंकालिका, ऐदंकालिकी । अनेन णिक-इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ आपत्कालिका, आपत्कालिकी ]** आपदः कालः = आपत्कालः । आपत्काले भवा = आपत्कालिका, आपत्कालिकी । अनेन णिक-इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शेषं पूर्ववत् ।

**[ सांपत्कालिका, सांपत्कालिकी ]** संपदः कालः = संपत्कालः । संपत्काले भवा = सांपत्कालिका, सांपत्कालिकी । अनेन णिक-इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।६८) वृद्धिः आ । शेषं पूर्ववत् ।

**[ कौपकालिका, कौपकालिकी ]** कोपस्य कालः = कोपकालः । कोपकाले भवा = कौपकालिका, कौपकालिकी ।

**[ क्रौधकालिका, क्रौधकालिकी ]** क्रोधस्य कालः = क्रोधकालः । क्रोधकाले भवा = क्रौधकालिका, क्रौधकालिकी ।

**[ और्ध्वकालिका, और्ध्वकालिकी ]** ऊर्ध्वकाल मांडणी । कालादूर्ध्वम् = ऊर्ध्वकालः । ऊर्ध्वकाले भवा = और्ध्वकालिका, और्ध्वकालिकी ।

**[ पौर्वकालिका, पौर्वकालिकी ]** पूर्वा(र्वः) कालोऽस्य सः = पूर्वकालः। पूर्वकाले भवा = पौर्वकालिका, पौर्वकालिकी ।

**[ तात्कालिका, तात्कालिकी ]** ता(त)त्काले भवा = तात्कालिका, तात्कालिकी ।

**[ क्रौरकालिका, क्रौरकालिकी ]** क्रूरः कालोऽस्य सः = क्रूरकालः । क्रूरकाले भवा = क्रौरकालिका, क्रौरकालिकी । अनेन णिक-इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

व्यादयः प्रयोगगम्याः ॥छा॥

**काश्यादेः** ॥ ६।३।३५ ॥

**[ काश्यादेः ]** काशिरादिर्यस्य सः = काश्यादिः तस्मात् ।

**[ काशिकः, काशिका, काशिकी ]** काशिषु भवः-भवा वा = काशिकः, काशिका । अनेन णिकप्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ । एवम् - काशिकी । अनेनैव इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ चैदिकः, चैदिका, चैदिकी ]** चेदिषु भवः-भवा वा = चैदिकः, चैदिका । अनेन णिकप्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ । एवम्- चैदिकी । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ दैवदत्तः ]** देवदत्तं नाम वाहीकग्रामः, तत्र जातः = दैवदत्तः । 'जाते' (६।३।९८) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

देवदत्तस्य प्राग् देश एव 'प्राग् देशे' (६।१।१०) इत्यनेन दुसंज्ञा, न 'वाहीकेषु०' (६।३।३६) इति न भवति, नाप्युत्तरेण । तत्रापि दोरित्यनुवर्त्तनात् । प्राग्देशेषु तु दुसंज्ञकत्वेन काश्यादित्वाद्भवत्येव-

**[ दैवदत्तिका, दैवदत्तिकी ]** देवदत्तेषु भवा । अनेन णिक-इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

येषां तु काश्यादीनां दुसंज्ञा न संभवति तेषां पाठसामर्थ्याद्भवति ।

**[ काशीयाश्छात्राः ]** काशस्यापत्यं = काशिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । काशेराचार्यस्य वाराणस्या वा इमे च्छात्राः = काशीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । जस् ।

**[ शौवावतान ]** श्वन्-अवतान । शुनोऽवतानाः = श्वावतनो मणिस्तेन निवृत्तो ग्रामः = शौवावतान । 'तेन निवृत्ते च' (६।२।७१) अण्प्र० → अ । 'लोकात्' (१।१।३) श् पाठउ विश्लेषियइ । 'द्वारादेः' (७।४।६) औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्वकुलाल ]** श्वा च कुलालश्च, तत्प्रचुरो ग्रामः = श्वकुलाल(ः) ।

**[ शकुलाद ]** श्वेनः(शुनः) कुलान्यति = शकुलादः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । निपातनात् वलोपः ।

**[ हैहिरण्यः ]** हैशब्दो निपातो विस्मये । है विस्मयं हिरण्यमत्र ग्रामे = हैहिरण्यः ।।छ।।

## **वाहीकेषु ग्रामात्** ॥ ६।३।३६ ॥

**[ वाहीकेषु ]** वाहीक सप्तमी सुप् ।

**[ ग्रामात् ]** ग्राम पञ्चमी ङसि ।

**[ कारन्तपिकः, कारन्तपिका, कारन्तपिकी ]** कार 'डुकृंग् करणे' (८८८) कृ । कुर्वन्त्यनेनेति करः । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । कर एव = कारः । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तपं संतापे' (३३३) तप् । कारं तपति = कारन्तपः । भृ-वृ-जि-तृ-तप-दमेश्च नाम्नि (५।१।११२) खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । कारन्तपे भवः-भवा = कारन्तपिकः, कारन्तपिका । अनेन णिकप्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ । एवम्-कारन्तपिकी । अनेन इकण्प्र० → इक । वृद्धिः । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ शाकलिकः, शाकलिका, शाकलिकी ]** शकलः(शकलस्य) निवासः = शाकलः । 'निवासा-ऽदूरभव इति देशे नाम्नि' (६।२।६९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शाकले भवः - भवा वा = शाकलिकः, शाकलिका । अनेन णिकप्र० → इक । वृद्धिः । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ । एवम्-शाकलिकी । अनेन इकण्प्र० → इक । वृद्धिः । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ मान्थविकः, मान्थविका, मान्थविकी ]** मन्थ । मन्थोऽस्यास्ति = मन्थवः । 'मण्यादिभ्यः' (७।२।४४) वप्र० । यद्वा मन्थ 'वांक् गति-गन्धनयोः' (१०६३) वा । मन्थं वाति = मन्थवः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । मन्थवेन निवृत्तः = मान्थवः । 'तेन निवृत्ते च' (६।२।७१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मान्थवे भवः - भवा वा = मान्थविकः, मान्थविका । अनेन णिकप्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ । मान्थविकी । अनेन इकण्प्र० → इक । वृद्धिः । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ आरात्कः, आरात्का, आरात्की ]** आर 'अत सातत्यगमने' (२७९) अत् । आरं - अरिसमूहं अतति यत्र तत् = आरात् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । आराति भवः - भवा वा = आरात्कः, आरात्का । अनेन णिकप्र० → इक । एवम् - आरात्की । अनेन इकण्प्र० → इक । वृद्धिः ।

**[ सैपुरिकः, सैपुरिका, सैपुरिकी ]** सेपुरे भवः - भवा वा = सैपुरिकः, सैपुरिका, सैपुरिकी । अनेन णिक-इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वृद्धिः ऐ । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ । तृतीये 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ स्कौनगरिकः, स्कौनगरिका, स्कौनगरिकी ]** स्कोनगरे भवः-भवा वा = स्कौनगरिकः, स्कौनगरिका, स्कौनगरिकी । अनेन णिक-इकण्प्र० → इक । शेषं पूर्ववत् ।

**[ नापितवास्तुकः ]** नापितानां वास्तु = नापितवास्तु, तत्र भवो जातो वा = नापितवास्तुकः । 'उवर्णादिकण्' (६।३।३९) इकण्प्र० → इक । वृद्धिः । 'ऋवर्णोवर्ण०' (७।४।७१) इलोपः ।

**[ वातानुप्रस्थकः ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) स्था । 'निमित्ताभावे०' ( न्या० सं० वक्ष० (१)/सूत्र(२९) ) स्था, अनु-प्रपूर्व० । अनुप्रतिष्ठन्ते = अनुप्रस्थः । 'स्था-पा-स्ना-त्रः कः' (५।१।१४२) कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । यद्वा प्रस्थं अनुगतः = अनुप्रस्थः । वातस्य अनुप्रस्थः = वातानुप्रस्थः, तस्मिन् भवः = वातानुप्रस्थकः । 'प्रस्थ-पुर-वहान्त-योपान्त्य-धन्वार्थात्' (६।३।४३) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ नान्दीपुरकः ]** नन्दीपुरे भवः = नान्दीपुरकः । 'प्रस्थ-पुर०' (६।३।४३) अकञ्प्र० → अक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कौक्कुटीवहकः ]** कुक्कुट । कुक्कुटस्येयं = कौक्कुटी । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । कु(कौ)क्कुट्या वहः, तत्र भवः = कु(कौ)क्कुटीवहकः । 'प्रस्थ-पुर-वहान्त-योपान्त्य-धन्वार्थात्' (६।३।४३) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दासरूप्यकः ]** दास 'रूपण् रूपक्रियायाम्' (१८९०) रूप् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । दासेन रूप्यते = दासरूप्यः । 'य एच्चातः' (५।१।२८) यप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । दासरूप्ये भवः = दासरूप्यकः । 'प्रस्थ-पुर-वहान्त०' (६।३।४३) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सौसुकीयः ]** सुसुका देवताऽस्य = सौसुकः । 'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सौसुके भवः । 'क-खोपान्त्य०' (६।३।५९) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मौञ्जीयम् ]** मुञ्जा अत्रास्ति = मौञ्जम् । 'तदत्रास्ति' (६।२।७०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । मौञ्जे भवं = मौञ्जीयम् । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ दैवदत्तः ]** देवदत्तं नाम वाहीकग्रामः, तत्र जातः = दैवदत्तः । 'जाते' (६।३।९८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छा।

**वोशीनरेषु** ॥ ६।३।३७ ॥

**[ वा ]** वा प्रथमा सि ।

**[ उशीनरेषु ]** उशीनर सप्तमी सुप् ।

**[ आह्वजालिकः, आह्वजालिका, आह्वजालिकी, आह्वजालीयः ]** आह्वजालि । आह्वजालिषु भवः-भवा वा = आह्वजालिकः, आह्वजालिका । अनेन णिकप्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । द्वितीये 'आत्'

(२।४।१८) आप्प्र० → आ । 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा, आङ्पूर्व० । आह्वयन्ति = आह्वाः । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । 'इडेत्०' (४।३।९४) आलुक् । जलतीति जालः । 'वा ज्वलादि-दु-नी-भू-ग्रहा-ऽऽस्रोर्णः' (५।१।६२) णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । आह्वानां जालम् = आह्वजालम्, तत्र भवो जातो वा । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । एवम्-आह्वजालीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सौदर्शनिकः, सौदर्शनिका, सौदर्शनिकी, सौदर्शनीयः ]** शोभनं दर्शनं यस्य सः = सुदर्शनः, तस्यायं = सौदर्शनः । 'तस्यदेम्' (६।३।१६०) अण्प्र० । सुदर्शना देवता अस्य । 'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धिः औ । सुदर्शनस्य निवासो वा । 'निवासा-ऽदूरभव इति देशे नाम्नि' (६।२।६९) अण्प्र० → अ । सुदर्शनश्चक्रं स देवताऽस्येति वा । 'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धिः औ । सौदर्शने भवः-भवा वा = सौदर्शनिकः, सौदर्शनिका, सौदर्शनिकी । अनेन णिक-इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ । 'अणञेयेकण्०' (२।४।२०) ङी । एवम्-सौदर्शनीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छ।।

## वृजि-मद्राद् देशात् कः ॥ ६।३।३८ ॥

**[ वृजिमद्रात् ]** वृजिश्च मद्रश्च = वृजिमद्रम्, तस्मात् ।

**[ देशात् ]** देश पञ्चमी ङसि ।

**[ कः ]** क प्रथमा सि ।

राष्ट्रा 'बहुविषयेभ्यः' (६।३।४५) अकञोऽपवादः ।

**[ वृजिकः ]** वृजिषु भवः = वृजिकः । अनेन कप्र० ।

**[ मद्रकः ]** मद्रेषु भवः = मद्रकः । अनेन कप्र० ।

**[ सुमद्रकः ]** शोभनेषु मद्रेषु भवः = सुमद्रकः ।

**[ सर्वमद्रकः ]** सर्वेषु मद्रेषु भवः = सर्वमद्रकः ।

**[ अर्द्धमद्रकः ]** अर्द्धं मद्राणां = अर्द्धमद्राः । अर्द्धमद्रेषु भवः = अर्द्धमद्रकः ।

**[ सुवृजिकः ]** शोभनेषु वृजिषु भवः = सुवृजिकः ।

**[ सर्ववृजिकः ]** सर्वेषु वृजिषु भवः = सर्ववृजिकः ।

**[ अर्द्धवृजिकः ]** अर्द्धेषु वृजिषु भवः = अर्द्धवृजिकः ।

**[ पूर्ववृजिकः ]** पूर्वेषु वृजिषु भवः = पूर्ववृजिकः ।

**[ अपरवृजिकः ]** अपरेषु वृजिषु भवः = अपरवृजिकः ।

सर्वत्र अनेन कप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वार्जः ]** वृजेरपत्यं = वार्जः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ माद्रः ]** मद्रस्यायम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा॥

**उवर्णादिकण्** ॥ ६।३।३९ ॥

**[ उवर्णात् ]** उकारेण उपलक्षितो वर्णः = उवर्णस्तस्मात् ।

**[ इकण् ]** इकण् प्रथमा सि ।

परत्वात् 'दोरीयः' (६।३।३२) - 'वाहीकेषु ग्रामात्' (६।३।३६) इति विहितान् ईय-णिकेकणोऽपि बाधते ।

**[ शाबरजम्बुकः ]** 'जनैचि प्रादुर्भावे' (१२६५) जन् । जायन्ते मधुरफलानि यस्यां सा = जम्बूः । 'कमि-जनिभ्यां बूः' (उणा० ८४७) बु(बू) । 'उतोऽप्राणिनश्चा-ऽयु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ्प्र० → ऊ(?) । शबरोपलक्षिता जम्बूः = शबरजम्बूः । शबरजम्ब्वां भवः = शाबरजा(ज)म्बुकः । अनेन इकण्प्र० → इक । वृद्धिः । 'ऋवर्णोवर्ण०' (७।४।७१) इकणः इकारलोपः । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः ।

**[ नैषादकर्षुकः ]** निषादकर्ष्वां भवः = नैषादकर्षुकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः । 'ऋवर्णोवर्ण०' (७।४।७१) इकारलोपः ।

**[ दाक्षिकर्षुकः ]** दाक्षिकर्षू । दाक्षिकर्ष्वां भवः = दाक्षिकर्षुकः । अनेन इकण्प्र० → इक । वृद्धिः । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः । 'ऋवर्णोवर्ण०' (७।४।७१) इकारलोपः ।

**[ प्लाक्षिकर्षुकः ]** प्लाक्षिकर्षू । प्लाक्षिकर्ष्वां भवः = प्लाक्षिकर्षुकः । अनेन इकण्प्र० → इक । वृद्धिः । 'ऋवर्णोवर्ण०' (७।४।७१) इकारलोपः । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः ।

**[ आव्रीतमायवकः ]** आव्रीत-मायु । आव्रीतो मायुर्येन सः = आव्रीतमायुः । आव्रीतमायौ भवः = आव्रीतमायवकः । प्रस्थ-पुर-वहान्त-योपान्त्य-धन्वार्थात्' (६।३।४३) अकञ्प्र० → अक । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ जैह्ववकः ]** जिह्वुषु भवः = जैह्ववकः । 'प्रस्थ-पुर०' (६।३।४३) अकञ्प्र० → अक । वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ ऐक्ष्वाकः ]** इक्ष्वाकु । इक्ष्वाकौ भवः = ऐक्ष्वाकः । 'कोपान्त्याच्चाण्' (६।३।५६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'सारवैक्ष्वाक-मैत्रेय-भ्रौणहत्य-धैवत्य-हिरण्मयम्' (७।४।३०) उलोपः ।

**[ पाटवाः ]** पटु । पटोरिमे च्छात्राः = पाटवाः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । जस् ॥छा॥

**दोरेव प्राचः** ॥ ६।३।४० ॥

**[ दोरेव ]** दु पञ्चमी ङसि । एव प्रथमा सि ।

**[ प्राचः ]** प्राच् पञ्चमी ङसि ।

**[ आषाढजम्बुकः ]** आषाढाः प्रयोजनमस्य = आषाढः । 'विशाखा-ऽऽषाढान्मन्थ-दण्डे' (६।४।१२०) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । आषाढजम्ब्वां भवः = आषाढजम्बुकः । अनेन इकण्प्र० इक । वृद्धिः । 'ऋवर्णोवर्ण०' (७।४।७१) इकारलोपः । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः ।

**[ नापितवास्तुकः ]** नापितस्य वास्तौ जातः = नापितवास्तुकः । अनेन इकण्प्र० → इक । वृद्धिः । 'ऋवर्णोवर्ण०' (७।४।७१) इकारलोपः ।

**[ माल्लवास्तवः ]** मल्लवास्तुः प्राग्ग्रामः, तत्र जातः = माल्लवास्तवः । 'जाते' (६।३।९८) अण्प्र० → अ । वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ॥छ॥

## ईतोऽकञ् ॥ ६।३।४१ ॥

**[ ईतः ]** ईत् पञ्चमी ङसि ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

**[ काकन्दकः ]** ककन्देन निवृत्ता = काकन्दी । 'तेन निवृत्ते च' (६।२।७१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । काकन्द्यां भवः = काकन्दकः । अनेन अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः ।

**[ माकन्दकः ]** मकन्देन निवृत्ता = माकन्दी । 'तेन निवृत्ते च' (६।२।७१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । म(मा)कन्द्यां भवः = माकन्दकः । अनेन अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः ।

**[ दात्तामित्रीयः ]** दत्तायां मित्रं = दत्तामित्रम् । दत्तामित्रेण निवृत्ता = दात्तामित्री । 'तेन निवृत्ते च' (६।२।७१) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । दात्तामित्र्यां भवः = दात्तामित्रीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० सर्वत्र ॥छ॥

## रोपान्त्यात् ॥ ६।३।४२ ॥

**[ रोपान्त्यात् ]** र उपान्त्ये यस्य सः = रोपान्त्यः, तस्मात् ।

**[ पाटलिपुत्रकः ]** पाटलिपुत्रे भवः = पाटलिपुत्रकः । अनेन अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'प्राग् देशे' (६।१।१०) इति दुसंज्ञा ।

**[ ऐकचक्रकः ]** एकचक्रे भवः = ऐकचक्रकः । अनेन अकञ्प्र० → अक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## प्रस्थ-पुर-वहान्त-योपान्त्य-धन्वार्थात् ॥ ६।३।४३ ॥

**[ प्रस्थपुरवहान्तयोपान्त्यधन्वार्थात् ]** प्रस्थश्च पुरश्च वहश्च = प्रस्थपुरवहाः । प्रस्थपुरवहा अन्ते यस्य सः = प्रस्थपुरवहान्तः । य उपान्त्ये यस्य सः = योपान्त्यः । धन्वार्थो यस्य सः = धन्वार्थः । प्रस्थपुरवहान्तश्च योपान्त्यश्च धन्वार्थश्च = प्रस्थपुरवहान्तयोपान्त्यधन्वार्थम्, तस्मात् ।

धन्वन्शब्दो मरुदेशवाची ।

प्रस्थान्त- **[ मालाप्रस्थकः ]** मालासु प्रतिष्ठतीति(ते) = मालाप्रस्थः । 'स्था-पा-स्ना-त्रः कः' (५।१।१४२) कप्र० → अ । 'इडेत् पुसि०' (४।३।९४) आलुक् । मालाप्रस्थे भवः = मालाप्रस्थकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शौणप्रस्थकः ]** शोणे प्रतिष्ठते = शोणप्रस्थः । 'स्था-पा-स्ना-त्रः कः' (५।१।१४२) कप्र० → अ । 'इडेत् पुसि०' (४।३।९४) आलुक् । शोणप्रस्थो देवताऽस्य सः = शौणप्रस्थः । 'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । शौणप्रस्थे भवः = शौणप्रस्थकः । अनेन अकञ्प्र० → अक ।

**[ क्षाञ्जीप्रस्थकः ]** क्षञ्जस्यापत्यं = क्षाञ्जी । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'इञ इतः' (२।४।७१) ङी । क्षाञ्ज्याः प्रस्थः = क्षाञ्जीप्रस्थः । क्षाञ्जीप्रस्थे भवः = क्षाञ्जीप्रस्थकः । अनेन अकञ्प्र० → अक । वृद्धिः ।

**[ वातानुप्रस्थकः ]** वातमनुलक्षीकृत्य प्रतिष्ठते = वातानुप्रस्थः । 'स्था-पा०' (५।१।४२) कप्र० → अ । 'इडेत् पुसि०' (४।३।९४) आलुक् । वातानुप्रस्थे भवः = वातानुप्रस्थकः । अनेन अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बाणप्रस्थकः ]** बाणे प्रतिष्ठते = बाणप्रस्थः । 'स्था-पा०' (५।१।१४२) कप्र० → अ । 'इडेत् पुसि०' (४।३।९४) आलुक् । बाणप्रस्थे भवः = बाणप्रस्थकः । अनेन अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

पुरान्त- **[ नान्दीपुरकः ]** नान्द्याः पुरं = नान्दीपुरम् । नान्दीपुरे भवः = नान्दीपुरकः ।

वहान्त- **[ पैलुवहकः ]** कृत्तस्याऽदूरभवो ग्रामः पैलुवहः । 'निवासा-ऽदूरभव०' (६।२।६९) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पैलुवहे भवः = पैलुवहकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ फाल्गुनीवहकः ]** फल्गुनीभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि = फल्गुनी । 'चन्द्रयुक्तात् काले' (६।२।६) अण्प्र० "लुप् त्वप्रयुक्ते" अण्लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः । पुनः 'गौरादिभ्यो०' (२।४।१९) ङी । फल्गुन्योर्जात इति 'फल्गुन्याष्टः' (६।३।१०६) इति टप्राप्तौ मतान्तरेण 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण् । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

यद्वा फल्गुनस्य निवासः । 'निवासा-ऽदूरभव०' (६।२।६९) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । फाल्गुन्या वहः = फाल्गुनीवहः, तत्र भवः = फाल्गुनीवहकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ कौक्कुटीवहकः ]** कुक्कुटी(टाः) अत्र सन्ति = कौक्कुटी । 'तदत्राऽस्ति' (६।२।७०) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । कौक्कुट्या वहः = कौक्कुटीवहः, तत्र भवः = कौक्कुटीवहकः । अनेन अकञ्प्र० → अक ।

**[ कौकुचीवहकः ]** कुत्सितौ कुचौ यस्याः सा = कुकुची । 'असहनञ्०' (२।४।३८) ङी । 'वहीं प्रापणे' (९९६) वह् । कुकुचीं वहति = कुकुचीवहः । अच्प्र० । कुकुचीवहेन निवृत्तः = कौकुचीवहः । 'तेन निवृत्ते च' (६।२।७१) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तत्र भवः = कौकुचीवहकः । अनेन अकञ्प्र० → अक ।

योपान्त्य- **[ साङ्काश्यकः ]** सङ्काशेन निवृत्तं = साङ्काश्यम् । 'सुपन्थ्यादेर्ज्यः' (६।२।८४) ञ्यप्र० → य । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । साङ्काश्ये भवः = साङ्काश्यकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ काम्पील्यकः ]** कम्पीलेन निवृत्तं = काम्पील्यम् । 'सुपन्थ्यादेर्ञ्यः' (६।२।८४) ञ्यप्र० → य । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । काम्पील्ये भवः = काम्पील्यकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माणिरूप्यकः ]** माणि 'रूपण् रूपक्रियायाम्' (१८९०) रूप् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । माणिभी रूप्यते = माणिरूप्यः । 'य एच्चातः' (५।१।२८) यप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । माणिरूप्ये भवः = माणिरूप्यकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।८) अलुक् ।

**[ दासरूप्यकः ]** दास 'रूपण् रूपक्रियायाम्' (१८९०) रूप् । 'चुरादि०' (३।४।१७) णिच्प्र० । दासेन दासैर्वा रूप्यते = दासरूप्यः । 'य एच्चातः' (५।१।२८) यप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । दासरूप्ये भवः = दासरूप्यकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आव्रीतमायवकः ]** आव्रीयते स्म = आव्रीतः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । आव्रीतो मायुर्येन सः = आव्रीतमायुः । आव्रीतमायौ भवः = आव्रीतमायवकः । अनेन अकञ्प्र० → अक । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

धन्ववाचि- **[ पारेधन्वकः ]** धन्वनि पारे = पारेधन्वा । 'नाम्नि' (३।१।९४) इति समासः । 'अद्-व्यञ्जनात् सप्तम्या बहुलम्' (३।२।१८) अलुप्समासः । पारेधन्वनि भवः = पारेधन्वकः । अनेन अकञ्प्र० → अक । वृद्धिः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः ।

**[ आपारेधन्वकः ]** आ ईषत् पारम् = आपारम् । 'आङल्पे' (३।१।४६) समासः । धन्वनि आपारे = आपारेधन्वा । 'अद्-व्यञ्जनात्०' (३।२।१८) अलुप्समासः । आपारेधन्वनि भवः = आपारेधन्वकः । अनेन अकञ्प्र० → अक । वृद्धिः । 'नोऽपदस्य०' (७।४।६१) अन्लोपः ।

**[ ऐरावतकः ]** इरावती नदी तस्या अदूरभवः = ऐरावतः । 'निवासा-ऽदूरभव इति देशे नाम्नि' (६।२।६९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । ऐरावते भवः = ऐरावतकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौप्रख्यीयः ]** 'चक्षिक् व्यक्तायां वाचि' (११२२) चक्ष्, सु-प्रपूर्व० । सुप्रचष्टे = सुप्रख्यः । 'चक्षो वाचि क्शांग्-ख्यांग्' (४।४।४) ख्यांग्देशः → ख्या । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । सुप्रख्येन निवृत्तः = सौप्रख्यः । 'तेन निवृत्ते च' (६।२।७१) अण्प्र० → अ । वृद्धिः औ । सौप्रख्ये भवः = सौप्रख्यीयः । 'गहादिभ्यः' (६।३।६३) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कामप्रस्थीयः ]** कामप्रस्थे भवः = कामप्रस्थीयः । 'गहादिभ्यः' (६।३।६३) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

पुरग्रहणमप्राच्यार्थम् । प्राच्याद्धि रोपान्त्यत्वेनैव सिद्धम् । अत एव इह नानुवर्त्तते । ईयबाधनार्थं वचनम् ॥छ॥

## राष्ट्रेभ्यः ॥ ६।३।४४ ॥

**[ राष्ट्रेभ्यः ]** राष्ट्र पञ्चमी भ्यस् ।

**[ आभिसारकः ]** अभि 'सृं गतौ' (२५) सृ । अभिसरन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । अभिसारयतीति अभिसारः । 'अच्' (५।१।४९) अच्प्र० → अ ।

'णेरनिटि' (४।३।८३) णिग्लोपः । अभिसारोऽत्राऽस्ति = आभिसारः । 'तदत्राऽस्ति' (६।२।७०) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आभिसारे भवः = आभिसारकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आदर्शकः ]** 'दृशूं प्रेक्षणे' (४९५) दृश्, आङ्पूर्व० । आ एत्य दृश्यन्तेऽस्मिन् = आदर्शः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । आदर्शे भवः = आदर्शकः । अनेन अकञ्प्र० → अक ।

**[ औषुष्टकः ]** 'उषू दाहे' (५२९) उष् । उषुष्टानां राष्ट्रम् = औषुष्टम् । 'राष्ट्रेऽनङ्गाऽऽदिभ्यः' (६।२।६५) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।८) अलुक् । औषुष्टे भवः = औषुष्टकः । अनेन अकञ्प्र० → अक ।

**[ श्यामायनकः ]** श्यामा 'अयि गतौ' (७९०) अय् । श्यामु(मा) अय्यतेऽस्मिन्निति = श्यामायनम् । 'करणाऽऽधारे' (५।३।१२९) अनट्प्र० → अन । औषुष्ट-श्यामायने राष्ट्रावधी अपि राष्ट्रे वर्त्तते, कस्मात् ? एकदेशे समुदायोपचारात् । श्यामायने भवः = श्यामायनकः । अनेन अकञ्प्र० → अक । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

बहुवचनमकञः प्रकृतिबहुत्वं द्योतयदपवादविषयेऽपि प्रापणार्थम् । तेनेहापि भवति-

**[ आभिसारगर्त्तकः ]** अभिसारगर्त्तस्य अदूरभवः = आभिसारगर्त्तः । 'निवासा-ऽदूरभव०' (६।२।६९) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आभिसारगर्त्ते भवः = आभिसारगर्त्तकः । अनेन अकञ्प्र० → अक । परमत्र गर्त्तोत्तरपदलक्षण ईयो बहुवचनान्न भवति ।

राष्ट्रसमुदायो न राष्ट्रग्रहणेन गृह्यते, इतीह न भवति-

**[ काशिकोशलीयाः ]** काशि-राष्ट्रम् । कोशला-राष्ट्रम् । काशयश्च कोशलाश्च = काशिकोशलाः । तेषु भवाः = काशिकोशलीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ॥छ॥

**बहुविषयेभ्यः** ॥ ६।३।४५ ॥

**[ बहुविषयेभ्यः ]** बहुत्वं विषयो येषां ते = बहुविषयाः, तेभ्यः = बहुविषयेभ्यः । पञ्चमी भ्यस् ।

दोरिति निवृत्तम्, योगविभागात् । अतः परं दोरदोश्च विधानम् । देशादिति तु वर्त्तते ।

**[ आङ्गकः ]** अङ्गेषु जातः = आङ्गकः ।

**[ वाङ्गकः ]** वङ्गेषु जातः = वाङ्गकः ।

**[ दार्वकः ]** दार्वेषु जातः = दार्वकः ।

**[ काम्बवकः ]** कम्बु । कम्बुर्देवताऽस्य सः = काम्बवः । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । काम्बवेषु जातः = काम्बवकः । अनेन अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ जैह्वकः ]** जिह्वुषु भवः = जैह्वकः । 'उवर्णादिकण्' (६।३।३९) इत्यस्यापवादः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ आजमीढकः ]** अज 'मिहं सेचने' (५५१) मिह् । अजैर्मिह्यन्ते स्म = अजमीढाः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः-पूर्वस्वरस्य दीर्घः । अजमीढेषु भवः = आजमीढकः ।

**[ आजकुन्दकः ]** अजाः कुन्दा येषु ते = अजकुन्दाः, तेषु जातः = आजकुन्दकः ।

**[ कालञ्जरकः ]** कालमपि जरयन्ति = कालञ्जराः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । पृषोदरादित्वात् मोऽन्तः । कालञ्जरेषु भवः = कालञ्जरकः ।

**[ वैकुलिशकः ]** विगतं कुलिशमस्य सः = विकुलिशः, स एव देवताऽस्य सः = वैकुलिशः । 'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वैकुलिशेषु भवः = वैकुलिशकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

विषयग्रहणमनन्यत्र **भावार्थम्** । न विद्यतेऽन्यत्र बहुविषयात् भावो यस्य सः । तथा अर्थं प्रयोजनमस्य सः, तम् ।

**[ वार्तनः ]** 'वृतूङ् वर्त्तने' (९५५) वृत् । वर्त्ततेऽनयेति । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । वर्त्तनी च वर्त्तनी च वर्त्तनी च = वर्त्तन्यः, तासु भवः = वार्त्तनः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ त्रैगर्त्तकः ]** त्रयो गर्त्ता येषु ते = त्रिगर्त्ताः । त्रिगर्त्तेषु भवः = त्रैगर्त्तकः । अनेन अकञ्प्र० → अक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अत्र गर्त्तोत्तरपदलक्षण ईयो बाध्यते ॥छ॥

**धूमादेः** ॥ ६।३।४६ ॥

**[ धूमादेः ]** धूम आदिर्यस्य सः = धूमादिः, तस्मात् ।

**[ धौमकः ]** धूमे भवः = धौमकः । अनेन अकञ्प्र० → अक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ षाडण्डकः ]** षडण्डेषु भवः = षाडण्डकः । अनेन अकञ्प्र० → अक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वतण्डव ]** वतण्डं वाति = वतण्डवः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ आर्जुनाव ]** ऋजुनाव । ऋजुनावानां निवासः = आर्जुनावः । 'निवासा-ऽदूरभव०' (६।२।६९) अण्प्र० → अ । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दाण्डायन ]** दण्डिन् । दण्डिनां समूहः = दाण्डः । 'श्वादिभ्योऽञ्' (६।२।२६) अञ्प्र० → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः । दाण्डमयनमस्य सः ।

**[ संस्फीय ]** 'स्फायैङ् वृद्धौ' (८०४) स्फाय्, सम्पूर्व० । संस्फायते = संस्फीय । 'अच्' (५।१।४९) अच्प्र० → अ । पृषोदरादित्वात् ईत्वेऽपि ।

**[ पाठेय ]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । पठतीति । 'पदि-पठि-पचि-स्थलि-हलि-कलि-बलि-वलि-वल्लि-पल्लि-कटि-चटि-वटि-वधि-गाध्यर्चि-वन्दि-नन्द्यवि-वशि-वाशि-काशि-छर्दि-तन्त्रि-मन्त्रि-खण्डि-मण्डि-चण्डि-

यत्यञ्जि-मस्यसि-वनि-ध्वनि-सनि-गमि-तमि-ग्रन्थि-श्रन्थि-जनि-मण्यादिभ्यः' (उणा० ६०७) इप्र०-पठिः । पाठयतीति पाठा । 'अच्' (५।१।४९) अच्प्र० → अ । 'णेरनिटि' (४।३।८३) णिलुक् । 'आत्' (२।४।१८) आप्प्र० । पाठायाः पठेर्वा अपत्ये । 'इतोऽनिञः' (६।१।७२) - 'द्विस्वरादनद्याः' (६।१।७१) इत्याभ्यां एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आ-इलुक् ।

**[ पाथेय ]** पथिन् । पथि साधुः । 'पथ्यतिथि-वसति-स्वपतेरेयण्' (७।१।१६) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य०' (७।४।६१) इन्लोपः ।

**[ साकेत ]** सह केतेन-ज्ञानेन वर्त्तते = साकेत । बाहुलकाद्दीर्घः ।

**[ वैदेहकम् ]** विदेहानां क्षत्रियाणामिदं = वैदेहकम् । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ आनर्त्तकम् ]** आनर्त्तानां क्षत्रियाणामिदम् = आनर्त्तकम् । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ पाठेयकम् ]** पठि-पाठा मण्ड्यते । पठेः पाठाया वा अपत्यं = पाठेयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इ-आलुक् । पाठेयस्य इदं = पाठेयकम् । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।।छ।।

## सौवीरेषु कूलात् ॥ ६।३।४७ ॥

**[ सौवीरेषु ]** शोभनो वीरोऽस्य सः = सुवीरः । सुवीरस्याऽयं = सौवीरः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । सौवीरस्यापत्यानि । 'दु-नादि०' (६।१।११८) ञ्यप्र० । बहुषु लुप् । सप्तमी सुप् ।

**[ कूलात् ]** कूल पञ्चमी ङसि ।

**[ कौलकः सौवीरेषु, कौलोऽन्यत्र ]** कूले भवः = कौलकः । अनेन अकञ्प्र० → अक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-कौलः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छ।।

## समुद्रान्नृ-नावोः ॥ ६।३।४८ ॥

**[ समुद्रात् ]** समुद्र पञ्चमी ङसि ।

**[ नृनावोः ]** ना च नौश्च = नृनावौ, तयोः = नृनावोः । सप्तमी ओस् ।

**[ सामुद्रको मनुष्यः, सामुद्रिका नौः ]** समुद्रे भवः = सामुद्रकः । अनेन अकञ्प्र० → अक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मनुष्यः । द्वितीये 'आत्' (२।४।१८) आप्प्र० । 'अस्याऽयत्० (२।४।१११) इ० ।

**[ सामुद्रं लवणम् ]** समुद्रे भवं = सामुद्रम् । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । लवण सि-अम् ।।छ।।

## नगरात् कुत्सा-दाक्ष्ये ॥ ६।३।४९ ॥

**[ नगरात् ]** नगर पञ्चमी ङसि ।

**[ कुत्सादाक्ष्ये ]** कुत्सा च दाक्ष्यं च = कुत्सादाक्ष्यम्, तस्मिन् ।

कुत्सा-निन्दा, कुत्सनं = कुत्सा । 'भीषि-भूषि-चिन्ति-पूजि-कथि-कुम्बि-चर्चि-स्पृहि-तोलि-दोलिभ्यः' (५।३।१०९) बहुवचनात् अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ चौरा हि नागरकाः ]** नगरे भवाः = नागरकाः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । जस् ।

**[ दक्षा हि नागरकाः ]** नगरे भवाः = नागरकाः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । जस् ।

**[ नागरः पुरुषः ]** नगरे भवः = नागरः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । पुरुषः ।

**[ नागरेयकः ]** नगरे भवः = नागरेयकः । 'कत्र्यादेश्चैयकञ्' (६।३।१०) एयकञ्प्र० → एयक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छा।

**कच्छा-ऽग्नि-वक्त्र-वर्त्तोत्तरपदात्** ॥ ६।३।५० ॥

**[ कच्छाऽग्निवक्त्रवर्त्तोत्तरपदात् ]** कच्छश्च अग्निश्च वक्त्रश्च वर्त्तश्च = कच्छाऽग्निवक्त्रवर्त्ताः । कच्छाऽग्निवक्त्रवर्त्ता उत्तरपदं यस्य सः = कच्छाऽग्निवक्त्रवर्त्तोत्तरपदः, तस्मात् ।

**[ भारुकच्छकः ]** भरोः-ऋषेः कच्छः स जलप्रदेशः । भरुकच्छस्याऽदूरभवः = भारुकच्छः । 'निवासा-ऽदूरभव इति देशे नाम्नि' (६।२।६९) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । भारुकच्छे भवः = भारुकच्छकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पैप्पलीयकच्छकः ]** पिप्पल्या विकारः, फलम् । 'विकारे' (६।२।३०) अण्प्र० → अ । 'फले' (६।२।५८) अण्लुप् । 'ङ्यादेर्गौणस्या०' (२।४।९५) ङीनिवृत्तिः । पिप्पल्यान्यत्र सन्ति = पिप्पलीयः । 'उत्करादेरीयः' (६।२।९१) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पिप्पलीयश्चासौ कच्छश्च = पिप्पलीयकच्छौ, तत्र भवः = पैप्पलीयकच्छकः । अनेन अकञ्प्र० → अक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ काण्डाग्नकः ]** काण्डानामग्निरिव = काण्डाग्नि(:) । काण्डाग्नौ भवः = काण्डाग्नकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैभुजाग्नकः ]** विभुजोऽग्निर्यत्र सः = विभुजाग्नि(:) । विभुजाग्नौ भवः = वैभुजाग्नकः । अनेन अकञ्प्र० → अक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ऐन्दुवक्त्रकः ]** इन्दुवक्त्रस्य निवासः = ऐन्दुवक्त्रः । 'निवासा-ऽदूरभव०' (६।२।६९) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ऐन्दुवक्त्रे भवः = ऐन्दुवक्त्रकः । अनेन अकञ्प्र० → अक ।

**[ तैन्दुवक्त्रकः ]** तिन्दुवद् वक्त्रं = तिन्दुवक्त्रम् । तिन्दुवक्त्रे भवः = तैन्दुवक्त्रकः । अनेन अकञ्प्र० → अक । वृद्धिः ऐ ।

**[ बाहुवर्त्तकः ]** बाहुकृतो वर्त्तो यस्य सः = बाहुवर्त्तः । बाहुवर्त्ते भवः = बाहुवर्त्तकः । अनेन अकञ्प्र० → अक ।

**[ चाक्रवर्त्तकः ]** चक्रवत् भ्राम्यन् वर्त्तो - वृत्तिर्यस्य सः = चक्रवर्त्तः । चक्रवर्त्ते भवः = चाक्रवर्त्तकः । अनेन अकञ्प्र० → अक । वृद्धिः आ ।

**[ बहुकच्छो देशः ]** ईषदसमाप्तः कच्छः = बहुकच्छः । 'नाम्नः प्राग् बहुर्वा' (७।३।१२) बहु । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

कुत्सा-दाक्ष्यादन्यत्र अकञ् न भवति ॥छ॥

## अरण्यात् पथि-न्याया-ऽध्यायेभ-नर-विहारे ॥ ६।३।५१ ॥

**[ अरण्यात् ]** अरण्य पञ्चमी ङसि ।

**[ पथिन्यायाऽध्यायेभनरविहारे ]** पन्था(ः) च न्यायश्च अध्यायश्च इभश्च नरश्च विहारश्च = पथिन्यायाऽध्यायेभनरविहारम्, तस्मिन् ।

**[ आरण्यकः पन्थाः न्यायोऽध्यायः इभो नरो विहारो वा ]** अरण्ये भवः = आरण्यकः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । पन्थेत्यादि ।

**[ आरण्याः सुमनसः ]** अरण्ये भवाः = आरण्याः । 'रूप्योत्तरपदा-ऽरण्याण्णः' (६।३।२२) णप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । सुमनस् प्रथमा जस् ।

**[ आरण्याः पशवः ]** अरण्ये भवाः = आरण्याः । रूप्योत्तरपदा-ऽरण्याण्णः' (६।३।२२) णप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । पशु प्रथमा जस् ॥छ॥

## गोमये वा ॥ ६।३।५२ ॥

**[ गोमये ]** गोमय सप्तमी ङि ।

**[ वा ]** वा प्रथमा सि ।

**[ आरण्यका गोमयाः, आरण्यानि गोमयानि ]** अरण्ये भवाः = आरण्यकाः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् । एवम् - आरण्यानि । 'रूप्योत्तरपदा-ऽरण्याण्णः' (६।३।२२) णप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ आरण्या आरण्यिका हस्तिनी ]** अरण्ये भवा = आरण्या, आरण्यिका । 'रूप्योत्तरपदा-ऽरण्याण्णः' (६।३।२२) णप्र० → अ । मतान्तरे अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ० । 'अस्याऽयत्०' (२।४।१११) इ । हस्तिनी ॥छ॥

## कुरु-युगन्धराद् वा ॥ ६।३।५३ ॥

**[ कुरुयुगन्धरात् ]** कुरुश्च युगन्धरश्च = कुरुयुगन्धरम्, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ कौरवकः, कौरवः ]** कुरुषु भवः = कौरवकः । अनेन अकञ्प्र० → अक । वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । एवम्-कौरवः । 'कोपान्त्याच्चाण्' (६।३।५६) अण्प्र० → अ । वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ यौगन्धरकः, यौगन्धरः ]** युगन्धरेषु, भवः = यौगन्धरकः । अनेन अकञ्प्र० → अक । वृद्धिः औ । एवम्- यौगन्धरः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

राष्ट्रशब्दावेतौ बहुविषयौ च तत्र युगन्धरात् 'बहुविषयेभ्यः' (६।३।४५) इति नित्यमकञि प्राप्ते विकल्पः । कुरोस्त्वकञः कच्छाद्यणा बाधितस्य प्रतिप्रसवार्थं वचनम् ।

**[ कौरवको मनुष्यः ]** कुरुषु भवः = कौरवकः । 'कच्छादेर्नृ-नृस्थे' (६।३।५५) अकञ्प्र० → अक । वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । मनुष्यः ।

**[ कौरवकमस्य हसितम् ]** कुरुषु भवः = कौरवकम् । 'कच्छादेर्नृ-नृस्थे' (६।३।५५) अकञ्प्र० → अक । वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् । अस्य हसितम् ।।छ।।

## साल्वाद् गो-यवाग्वपत्तौ ॥ ६।३।५४ ॥

**[ साल्वात् ]** साल्व पञ्चमी ङसि ।

**[ गोयवाग्वपत्तौ ]** गौश्च यवागूश्च अपत्तिश्च = गोयवाग्वपत्ति, तस्मिन् ।

**[ साल्वको गौः, साल्विका यवागूः, साल्वको मनुष्यः ]** साल्वेषु भवः । साल्वेषु भवा = साल्विका । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ साल्वा व्रीह्यः ]** साल्वेषु भवाः = साल्वाः । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । व्रीहि प्रथमा जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ साल्वः पत्तिः ]** साल्वेषु भवः = साल्वः । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । पत्ति प्रथमा सि ।

राष्ट्रेभ्योऽकञि कच्छाद्यणा बाधिते गो-यवागूग्रहणं प्रतिप्रसवार्थम् । अपत्तीति पत्तिप्रतिषेधात् तत्सदृशे मनुष्ये विधिः । तत्र चोत्तरेण 'कच्छादेर्नृ-नृस्थे' (६।३।५५) इत्यनेन सिद्ध एवाकञि नरि नियमार्थमपत्तिग्रहणम् ।।छ।।

## कच्छादेर्नृ-नृस्थे ॥ ६।३।५५ ॥

**[ कच्छादेः ]** कच्छ आदिर्यस्य सः = कच्छादिः, तस्मात् ।

**[ नृनृस्थे ]** ना च नृस्थश्च = नृनृस्थम्, तस्मिन् ।

**[ काच्छको मनुष्यः, काच्छकमस्य हसितम् ]** कच्छे भवः = काच्छकः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । मनुष्यः । एवम् - काच्छकम् ।

**[ काच्छिका चूला ]** कच्छे भवा = काच्छिका । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ सैन्धवको मनुष्यः, सैन्धवकमस्य हसितम् ]** सिन्धुषु भवः = सैन्धवकः । अनेन अकञ्प्र० → अक । वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । एवम्-सैन्धवकम् ।

**[ सैन्धविका चूला ]** सिन्धुषु भवा = सैन्धविका । अनेन अकञ्प्र० → अक । वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ काच्छो गौः ]** कच्छे भवः = काच्छः । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ ।

**[ सैन्धवं लवणम् ]** सिन्धुषु भवं = सैन्धवम् । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ । वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् ।

**[ विजापक ]** 'जिं अभिभवे' (८) जि । जयन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'णौ क्री-जीङः' (४।२।१०) इ० → आ० । 'अर्त्ति-री-व्ली०' (४।२।२१) पोऽन्तः । 'जप मानसे च' (३३८) जप्, विपूर्व० । विजपन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । विजापयतीति विजापकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'णेरनिटि' (४।३।८३) णिग्लुक् ॥छा॥

**कोपान्त्याच्चाऽण्** ॥ ६।३।५६ ॥

**[ कोपान्त्यात् ]** क उपान्त्यो यस्य सः = कोपान्त्यः, तस्मात् ।

**[ च ]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ अण् ]** अण् प्रथमा सि ।

'उवर्णादिकण्' (६।३।३९) - 'बहुविषयेभ्यः' (६।३।४५) इत्यनयोः इकण्-अकञोरपवादः ।

**[ आर्षिकः ]** ऋषयः सन्त्यत्र । कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्०' (२।४।१११) इ । ऋषिका जनपदः, तेषु जातः = आर्षिकः । अनेन अण्प्र० → अ । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ माहिषकः ]** महिष 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) का । महिषान् कायन्ति = महिषकः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । महिषकेषु भवः = माहिषकः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आश्मकः ]** अश्मकेषु भवः = आश्मकः । अनेन अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ऐक्ष्वाकः ]** इक्ष्वाकुषु भवः = ऐक्ष्वाकः । अनेन अण्प्र० → अ । वृद्धिः ऐ । 'सारवैक्ष्वाक-मैत्रेय-भ्रौणहत्य-धैवत्य-हिरण्मयम्' (७।४।३०) उलुक् ।

**[ काच्छः ]** कच्छेषु जातः = काच्छः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सैन्धवः ]** सिन्धुषु जातः = सैन्धवः । अनेन अण्प्र० → अ । वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ वार्णवः ]** वर्णुषु जातः = वार्णवः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

अथाण्ग्रहणं किमर्थम् ? यो हि अन्येन बाधितो न प्राप्नोति तदर्थमिदं स्यात् स चाणेव, न चानन्तरोऽकञेव स्यादित्याशङ्कनीयम् । एवं हि पूर्वमकञ्विधानमनर्थकं स्यात् ? नैवम्, असत्यण्ग्रहणे इक्ष्वाकोरुवर्णलक्षण इकण् स्यात्, स हि ततो राष्ट्राकञा बाधितः ॥छा॥

**गर्त्तोत्तरपदादीयः** ॥ ६।३।५७ ॥

**[ गर्त्तोत्तरपदात् ]** गर्त्त उत्तरपदं यस्य सः = गर्त्तोत्तरपदः, तस्मात् ।

**[ ईयः ]** ईय प्रथमा सि ।

**[ श्वाविद्गर्त्तीयः ]** श्वाविद्गर्त्ते भवः = श्वाविद्गर्त्तीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वृकगर्त्तीयः ]** वृकगर्त्ते भवः = वृकगर्त्तीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शृगालगर्त्तीयः ]** शृगालगर्त्ते भवः = शृगालगर्त्तीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ रोहिद्गर्त्तीयः ]** रोहिद्गर्त्ते भवः = रोहिद्गर्त्तीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आभिसारगर्त्तकः ]** अभिसारगर्त्ते भवः = आभिसारगर्त्तकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ त्रैगर्त्तकः ]** त्रिगर्त्तेषु भवः = त्रैगर्त्तकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बाहुगर्त्तः ]** ईषदपरिसमाप्तो गर्त्तः = बहुगर्त्तः । 'नाम्नः प्राग् बहुर्वा' (७।३।१२) बहु । बहुगर्त्ते भवः = बाहुगर्त्तः । 'भवे' (६।३।१२३) अण्प्र० । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**कटपूर्वात् प्राचः** ॥ ६।३।५८ ॥

**[ कटपूर्वात् ]** कटं पूर्वपदं यस्य सः = कटपूर्वः, तस्मात् = कटपूर्वात् । 'ते लुग्वा' (३।२।१०८) पदलोपः ।

**[ प्राचः ]** प्राञ्चतीति प्राङ्, तस्मात् = प्राचः । पञ्चमी ङसि ।

**[ कटनगरीयः ]** कटस्य नगरं = कटनगरम् । कटनगरे भवः = कटनगरीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कटग्रामीयः ]** कटस्य ग्रामः = कटग्रामः । कटग्रामे भवः = कटग्रामीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कटघोषीयः ]** कटस्य घोषः = कटघोषः । कटघोषे भवः = कटघोषीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कटवर्त्तीयः ]** कटवर्त्ते भवः = कटवर्त्तीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कटपल्वलीयः ]** कटपल्वले भवः = कटपल्वलीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ काटनगरः ]** कटनगरे भवः = काटनगरः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**क-खोपान्त्य-कन्था-पलद-नगर-ग्राम-ह्रदोत्तरपदाद् दोः** ॥६।३।५९ ॥

**[ कखोपान्त्यकन्थापलदनगरग्रामह्रदोत्तरपदात् ]** कश्च खश्च = कखौ, कखावुपान्त्यौ यस्य सः = कखोपान्त्यः । कखोपान्त्यश्च कन्था च पलदश्च नगरश्च(रं च) ग्रामश्च ह्रदश्च = कखोपान्त्यकन्थापलदनगरग्रामह्रदाः । कखोपान्त्यकन्थापलदनगरग्रामह्रदा उत्तरपदे यस्य सः = कखोपान्त्यकन्थापलदनगरग्रामह्रदोत्तरपदः, तस्मात् ।

**[ दोः ]** दु पञ्चमी ङसि ।

**[ आरीहणकीयः ]** अरीहणेन निवृत्तम् = आरीहणकम् । 'अरीहणादेरकण्' (६।२।८३) अकण्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अरीहणादिपाठात् णत्वम् । आरीहणके भवः = आरीहणकीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्रौघणकीयः ]** द्रु 'हनंक् हिंसा-गत्योः' (११००) हन् । द्रुर्हन्यते = द्रुघणः । 'व्ययो-द्रोः करणे' (५।३।३८) अल्प्र० - घनादेशश्च । द्रुघणा अत्र सन्ति = द्रौघणकः । 'अरीहणादेरकण्' (६।२।८३) अकण्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्रौघणके भवः = द्रौघणकीयः । अनेन ईयप्र० ।

**[ आश्वत्थिकीयः ]** अश्वत्था अत्र सन्ति = आश्वत्थिकाः । 'अश्वत्थादेरिकण्' (६।२।९७) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आश्वत्थिके भवः = आश्वत्थिकीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शाल्मलिकीयः ]** शाल्मलि । शाल्मलयोऽत्र सन्ति = शाल्मलिकाः । 'अश्वत्थादेरिकण्' (६।२।९७) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । शाल्मलिके भवः = शाल्मलिकीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौषु( सु )कीयः ]** शोभनः सुको देवताऽस्य = सौसुकः । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सौसुके भवः = सौसुकीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आष्टकीयः ]** अष्टन् 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) का । अष्टौ कायन्ति = अष्टकः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अष्टकाः अत्र सन्ति = आष्टकाः । 'तदत्राऽस्ति' (६।२।७०) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आष्टकेषु भवः = आष्टकीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ब्राह्मणकीयः ]** ब्राह्मणेभ्योऽचिरोद्धृतः = ब्राह्मणकः । 'ब्राह्मणान्नाम्नि' (७।१।१८४) कप्र० । ब्राह्मणकेषु भवः = ब्राह्मणकीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बालकीयः ]** बालके भवः = बालकीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कौटशिखीयः ]** कूटाकारा शिखा यत्र । कूटशिखेन निवृत्तः = कौटशिखः । 'तेन निवृत्ते च' (६।२।७१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कौटशिखे भवः = कौटशिखीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माटिशिखीयः ]** मा-अविद्यमाना आटयो यासु ताः = माटयः । माटयः शिखा यत्र सः = माटिशिखः । माटिशिखा अत्र सन्ति = माटिशिखः । 'तदत्राऽस्ति' (६।२।७०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । माटिशिखे भवः = माटिशिखीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

卐**[ आयामुखीयः ]** 'यांक् प्रापणे' (१०६२) या, आङ्पूर्व० । आयान्तीति आया(:) । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । आयं आयानां वा आगच्छतां मुखम् = आयामुखम् । आयामुखमत्रास्ति । 'तदत्राऽस्ति' (६।२।७०) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आयामुखे भवः = आयामुखीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

卐 बृहद्वृत्तौ - हैमप्रकाशे च "अयोमुखीयः" ।

**[ दाक्षिकन्थीयः ]** दक्षस्यापत्यं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षीणां कन्था = दाक्षिकन्था, तस्यां भवः = दाक्षिकन्थीयः । णिकेकणोरपवादः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ माहकिकन्थीयः ]** अर्ह (५६४) - 'मह पूजायाम्' (५६५) मह् । महतीति माहकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । माहकस्यापत्यं = माहकि(ः) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । माहकीनां कन्था = माहकिकन्था, तस्यां भवः = माहकिकन्थीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ दाक्षिपलदीयः ]** दाक्षीणां पलदः = दाक्षिपलदः, तत्र भवः = दाक्षिपलदीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माहकिपलदीयः ]** माहकीनां पलदः = माहकिपलदः, तत्र भवः = माहकिपलदीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

नगरोत्तरपदात् 'रोपान्त्यात्' (६।३।४२) अकञि प्राप्ते—

**[ दाक्षिनगरीयः ]** दाक्षीणां नगरं = दाक्षिनगरम्, तत्र भवः = दाक्षिनगरीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माहकिनगरीयः ]** माहकीनां नगरं = माहकिनगरम्, तत्र भवः = माहकिनगरीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

ग्राम-ह्रदोत्तरपदात् णिकेकणोरेव-

**[ दाक्षिग्रामीयः ]** दाक्षीणां ग्रामः = दाक्षिग्रामः, तत्र भवः = दाक्षिग्रामीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माहकिग्रामीयः ]** माहकीनां ग्रामः = माहकिग्रामः, तत्र भवः = माहकिग्रामीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दाक्षिह्रदीयः ]** दाक्षीणां ह्रदः = दाक्षिह्रदः, तत्र भवः = दाक्षिह्रदीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माहकिह्रदीयः ]** माहकीनां ह्रदः = माहकिह्रदः, तत्र भवः = माहकिह्रदीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आर्षिकः ]** ऋषिक । ऋषिकेषु भवः = आर्षिकः । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माडनगरः ]** मा 'अड्ड अभियोगे' (२५७) अड् । मा या लक्ष्या अडति = मडः । 'अच्' (५।१।४९) अच्प्र० → अ । 'पृषोदरादयः' (३।२।१५५) ह्रस्वः । मा(म)डनगरे भवः = माडनगरः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## पर्वतात् ॥ ६।३।६० ॥

**[ पर्वतात् ]** पर्वत पञ्चमी ङसि ।

**[ पर्वतीयो राजा पुमान् वा ]** पर्वते भवः = पर्वतीयः राजा । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पुमान् वा ।

**अनरे वा** ॥ ६।३।६१ ॥

**[ अनरे ]** न नरोऽनरस्तस्मिन् ।

**[ वा ]** वा प्रथमा सि ।

**[ पर्वतीयानि, पार्वतानि फलानि ]** पर्वते भवानि = पर्वतीयानि, पार्वतानि । अनेन ईयप्र० । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ पर्वतीयं, पार्वतमुदकम् ]** पर्वते भवं = पर्वतीयम् । अनेन ईयप्र० । एवम् - पार्वतम् । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ पर्वतीयो मनुष्यः ]** पर्वते भवः = पर्वतीयः । 'पर्वतात्' (६।३।६०) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मनुष्यः ।।छ।।

**पर्ण-कृकणाद् भारद्वाजात्** ॥ ६।३।६२ ॥

**[ पर्णकृकणात् ]** पर्णश्च कृकणश्च = पर्णकृकणम्, तस्मात् ।

**[ भारद्वाजात् ]** भारद्वाज पञ्चमी ङसि । भा(भ)रद्वाजोऽत्रास्ति = भारद्वाजः । 'तदत्राऽस्ति' (६।२।७०) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तस्मात् ।

**[ पर्णीयः ]** पर्णे भवः = पर्णीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कृकणीयः ]** कृकणे भवः = कृकणीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पार्णः ]** पर्णे भवः = पार्णः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कार्कणः ]** कृकणे भवः = कार्कणः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छ।।

**गहादिभ्यः** ॥ ६।३।६३ ॥

**[ गहादिभ्यः ]** गह आदिर्येषां ते = गहादयः, तेभ्यः ।

**[ गहीयः ]** 'गाहौङ् विलोडने' (८७१) गाह् । गाहते = गहः । घञ्प्र० → अ । 'पृषोदरादयः' (३।२।१५५) इति ह्रस्वः । गहे भवः = गहीयः । अनेन ईयप्र० ।

**[ अन्तस्थीयः ]** अन्तस्थे भवः = अन्तस्थीयः । अनेन ईयप्र० ।

गहादौ पठितानां येषां देशे वृत्तिर्वर्त्तते तेषां योज्यते नान्येषाम् । यथा अन्तस्थाशब्दस्य य-र-ल-ववाचिनोऽधुट्वृत्तेऽनेन ईयप्र० । यथा अन्तस्थीयः ।

**[ खाडायनि ]** खडस्यापत्यं = खाडायनि । 'अवृद्धाद् दोर्नवा' (६।१।११०) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ काठेरिणि ]** कठ 'ईरण् क्षेपे' (१९७४) ईर् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । कठमीरयति । 'विपिनाजिनादयः' (उणा० २८४) किद् इनप्र० । 'पृषोदरादयः' (३।२।१५५) काठेरिणिनिपात्यते ।

**[ लावेरिणि ]** लव 'ईरण् क्षेपे' (१९७४) ईर् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । लवमीरयति । 'विपिनाजिनादयः' (उणा० २८४) किद् इनप्र० । 'पृषोदरादयः' (३।२।१५५) लावेरिणिनिपात्यते ।

इति गहादिः ॥छ॥

**पृथिवीमध्यान्मध्यमश्चास्य** ॥ ६।३।६४ ॥

**[ पृथिवीमध्यात् ]** पृथिवीमध्य पञ्चमी ङसि ।

**[ मध्यमः ]** मध्यम प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ अस्य ]** इदम् षष्ठी ङस् । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'अनक्' (२।१।३६) इद० → अ० । 'टा-ङसोरिन-स्यौ' (१।४।५) ङस्० → स्य० ।

**[ मध्यमीयः ]** पृथिव्या मध्यं = पृथिवीमध्यम् । पृथिवीमध्ये जातो भवो वा = मध्यमीयः । अनेन ईयप्र० - पृथिवीमध्य० → मध्यमदेशश्च ।

**निवासाच्चरणेऽण्** ॥ ६।३।६५ ॥

**[ निवासात् ]** निवास पञ्चमी ङसि ।

**[ चरणे ]** चरण सप्तमी ङि ।

**[ अण् ]** अण् प्रथमा सि ।

**[ माध्यमाश्चरणाः ]** पृथिवीमध्यं निवास एषां चरणानां = माध्यमाश्चरणाः । अनेन अण्प्र० → अ - पृथिवीमध्य० → मध्यमदेशश्च । वृद्धिः आ । प्रथमा जस् ।

**[ मध्यमीयः कठः ]** पृथिवीमध्यादागतः = मध्यमीयः । 'पृथिवीमध्यान्मध्यमश्चास्य' (६।३।६४) ईयप्र० - मध्यमदेशश्च । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मध्यमीयः शूद्रः ]** पृथिवीमध्यं निवासोऽस्य सः = मध्यमीयः । 'पृथिवीमध्यान्मध्यमश्चास्य' (६।३।६४) ईयप्र० - पृथिवीमध्य० → मध्यमदेशश्च । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शूद्रः ।

अण्ग्रहणं किमर्थम् ? यतो यो हि अन्येन बाधितो न प्राप्नोति तदर्थमिदं स चाणेव ? सत्यम् - निवासाच्चरण इति कृते पूर्वसूत्रेणैव सिद्धे नियमार्थं स्यात् । पृथिवीमध्यान्निवासभूतदेशवाचिनश्चरणे एव निवस्तरि नान्यत्र । ततश्च मध्यमीयाश्चरणाः, माध्यमः शूद्रः इति वैपरीत्यं स्याद् अतस्तन्मा भूदिति अण्ग्रहणमिति भावार्थः ॥छ॥

**वेणुकादिभ्य ईयण्** ॥ ६।३।६६ ॥

**[ वेणुकादिभ्यः ]** 卐वेणुक आदिर्येषां ते = वेणुकादयः, तेभ्यः ।

**[ ईयण् ]** ईयण् प्रथमा सि ।

卐 शब्दरत्नमहोदधौ - वेणुकशब्दो नपुंसकलिङ्गेऽस्ति ।

**[ वैणुकीयः ]** वेणवोऽत्र सन्ति = वेणुकः । 'ऋश्यादेः कः' (६।२।९४) कप्र० । वेणुके भवः = वैणुकीयः । अनेन ईयण्प्र० → ईय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[वैत्रकीयः]** वित्रयतीति वि(वे)त्रकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'णेरनिटि' (४।३।८३) णिग् - लुक् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । वि(वे)त्रके भवः = वैत्रकीयः । अनेन ईयण्प्र० → ईय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औत्तरपदीयः ]** उत्तरपदे भवः = औत्तरपदीयः । अनेन ईयण्प्र० → ईय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औत्तरीयः ]** उत्तरे भवः = औत्तरीयः । अनेन ईयण्प्र० → ईय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औत्तरकीयः ]** उत्तरके भवः = औत्तरकीयः । अनेन ईयण्प्र० → ईय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।८) अलुक् ।

**[ प्रास्थीयः ]** प्रस्थे भवः = प्रास्थीयः । अनेन ईयण्प्र० → ईय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रास्थकीयः ]** प्रस्थ 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) का । प्रस्थं कायति = प्रस्थकः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । प्रस्थस्य तुल्यः = प्रस्थकः । 'तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः' (७।१।१०८) कप्र० । प्रस्थके भवः = प्रास्थकीयः । अनेन ईयण्प्र० → ईय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माध्यमकीयः ]** मध्यम एव = मध्यमकः । 'यावादिभ्यः कः' (७।३।१५) कप्र० । मध्यमके भवः = माध्यमकीयः । अनेन ईयण्प्र० → ईय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माध्यमिकीयः ]** मध्यममत्रास्ति = मध्यमिकः । 'अतोऽनेकस्वरात्' (७।२।६) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मध्यमिकायां भवः = माध्यमिकीयः । अनेन ईयण्प्र० → ईय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ नैपुणकीयः ]** निपुण एव = निपुणकः । यावादिभ्यः कः' (७।३।१५) कप्र० । निपुणके भवः = नैपुणकीयः । अनेन ईयण्प्र० → ईय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० सर्वत्र ॥छ॥

**वा युष्मदस्मदोऽञीनञौ युष्माका-ऽस्माकं चास्यैकत्वे तु तवक-ममकम्** ॥ ६।३।६७ ॥

**[ वा ]** वा प्रथमा सि ।

**[ युष्मदस्मदः ]** युष्मच्च अस्मच्च = युष्मदस्मद्, तस्मात् ।

**[ अञीनञौ ]** अञ् च ईनञ् च = अञीनञौ । प्रथमा औ ।

**[ युष्माकाऽस्माकम् ]** युष्माकश्च अस्माकश्च = युष्माकाऽस्माकम् ।

**[ च ]** च प्रथमा सि ।

**[ अस्य ]** इदम् षष्ठी ङस् । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'अनक्' (२।१।३६) इद० → अ० । 'टा-ङसोरिन-स्यौ' (१।४।५) ङस्० → स्य० ।

**[ एकत्वे ]** एकत्व सप्तमी ङि ।

**[ तु ]** तु प्रथमा सि ।

**[ तवकममकम् ]** तवकश्च ममकश्च = तवकममकम् ।

**[ यौष्माकः, यौष्माकीणः ]** युष्मद् । युष्माकमयं युवयोर्वा = यौष्माकः, यौष्माकीणः । अनेन अञ्प्र० → अ - ईनञ्प्र० → ईन - युष्मद्० → युष्माकदेशश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आस्माकः, आस्माकीनः ]** अस्मद् । अस्माकमयमावयोर्वा = आस्माकः, आस्माकीनः । अनेन अञ्प्र० → अ - ईनञ्प्र० → इन - अस्मद्० → अस्माकदेशश्च । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्।

**[ युष्मदीयः ]** युष्माकमयं = युष्मदीयः । 'दोरीयः' (६।३।३२) ईयप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अस्मदीयः ]** अस्माकमयम् = अस्मदीयः । 'दोरीयः' (६।३।३२) ईयप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ तावकः, तावकीनः ]** युष्मद् । तवायं = तावकः, तावकीनः । अनेन अञ्प्र० → अ - ईनञ्प्र० → ईन - तवकआदेशश्च । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मामकः, मामकीनः ]** अस्मद् । ममायं = मामकः, मामकीनः । अनेन अञ्प्र० → अ - ईनञ्प्र० → ईन - ममकदेशश्च । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ त्वदीयः ]** युष्मद् । तवायं = त्वदीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'लोकात्' (१।१।३) युष्म् पाठउ विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) त्वदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मदीयः ]** अस्मद् । ममायं = मदीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'लोकात्' (१।१।३) अस्म् पाठउ विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) मदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

### द्वीपादनुसमुद्रं ण्यः ॥ ६।३।६८ ॥

**[ द्वीपात् ]** द्वीप पञ्चमी ङसि ।

**[ अनुसमुद्रम् ]** समुद्रस्य अनु-समीपम् = अनुसमुद्रम्, तस्मिन् । सप्तम्याः ङिस्थाने 'सप्तम्या वा' (३।२।४) ङि० → अम्भावः । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ ण्यः ]** ण्य प्रथमा सि ।

**[ द्वैप्यो मनुष्यः, द्वैप्यमस्य हसितम्, द्वैप्यम् ]** द्वीपे भवः = द्वैप्यः । अनेन ण्यप्र० → य । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मनुष्यः । एवम्-द्वैप्यम् ।

**[ द्वैपको व्यासः, द्वैपकमस्य हसितम् ]** द्वीपे भवः = द्वैपकः । 'कच्छादेर्नृ-नृस्थे' (६।३।५५) अकञ्प्र० → अक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । व्यासः । एवम् - द्वैपकम् ।

**[ द्वैपम् ]** द्वीपे भवं = द्वैपम् । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## अर्द्धाद् यः ॥ ६।३।६९ ॥

**[ अर्द्धात् ]** अर्द्ध पञ्चमी ङसि ।

**[ यः ]** य प्रथमा सि ।

**[ अर्द्ध्यम् ]** अर्द्धे भवम् = अर्द्ध्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## सपूर्वादिकण् ॥ ६।३।७० ॥

**[ सपूर्वात् ]** सह पूर्वपदेन वर्त्तते = सपूर्वः । 'ते लुग्वा' (३।२।१०८) पदलुक् । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सह० → स० । तस्मात् ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ पौष्करार्द्धिकः ]** पुष्करस्यार्द्धं = पुष्करार्द्धम्, तत्र भवः = पौष्करार्द्धिकः । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वैजयार्द्धिकः ]** विजयस्यार्द्धं = विजयार्द्धम्, तत्र भवः = वैजयार्द्धिकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वालेयार्द्धिकः ]** वाला । वालाया अपत्यं = वालेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । वालेयो गर्द्दभः, तस्यार्द्धे भवः = वालेयार्द्धिकः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गौतमार्द्धिकः ]** गौतमस्यार्द्धे भवः = गौतमार्द्धिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ क्षैत्रार्द्धिकः ]** क्षेत्रस्यार्द्धः = क्षेत्रार्द्धः, तत्र भवः = क्षैत्रार्द्धिकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ यौवनार्द्धिकः ]** यौवनस्यार्द्धः = यौवनार्द्धः, तत्र भवः = यौवनार्द्धिकः । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## दिक्पूर्वात् तौ ॥ ६।३।७१ ॥

**[ दिक्पूर्वात् ]** दिक् पूर्वपदं यस्य सः = दिक्पूर्वपदः, तस्मात् = दिक्पूर्वात् । 'ते लुग्वा' (३।२।१०८) पदलुक्।

**[ तौ ]** तद् औ । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[ पूर्वार्द्ध्यम्, पौर्वार्द्धिकम् ]** पूर्वं च तत् अर्द्धं च = पूर्वार्द्धम् । पूर्वार्द्धे भवः(भवं) = पूर्वार्द्ध्यः(र्द्ध्यम्) । अनेन यप्र० । एवम् - पौर्वार्द्धिकः(कम्) । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दक्षिणार्द्धयम्, दाक्षिणार्द्धिकम् ]** दक्षिणाया अर्द्धं = दक्षिणार्द्धम् । 'दिगधिकं संज्ञा - तद्धितोत्तरपदे' (३।१।९८) समासः । दक्षिणार्द्धे भवं = दक्षिणार्द्धयम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम् - दाक्षिणार्द्धिकम् । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पश्चार्द्धयम्, पाश्चार्द्धिकम् ]** अपर-अर्द्ध । अपरमर्द्धं = पश्चार्द्धम् । 'वोत्तरपदेऽर्द्धे' (७।२।१२५) पश्चादेशः । पश्चार्द्धे भवं = पश्चार्द्धयम् । अनेन यप्र० । एवम्-पाश्चार्द्धिकम् । इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा॥

## ग्राम-राष्ट्रांऽशादणिकणौ ॥ ६।३।७२ ॥

**[ ग्रामराष्ट्रांऽशात् ]** ग्रामश्च राष्ट्रं च = ग्रामराष्ट्रे, ग्रामराष्ट्रयोरंशः = ग्रामराष्ट्रांऽशः, तस्मात् ।

**[ अणिकणौ ]** अण् च इकण् च = अणिकणौ ।

**[ पौर्वार्द्धः, पौर्वार्द्धिकः ]** पूर्वस्यार्द्धः = पूर्वार्द्धः । ग्रामस्य राष्ट्रस्य वा पूर्वार्द्धे भवः = पौर्वार्द्धः, पौर्वार्द्धिकः । अनेन अण्प्र० → अ, इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दाक्षिणार्द्धः, दाक्षिणार्द्धिकः ]** दक्षिणाया अर्द्धः = दक्षिणार्द्धः, दक्षिणार्द्धे भवः = दाक्षिणार्द्धः, दाक्षिणार्द्धिकः । अनेन अण्प्र० → अ - इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा॥

## परा-ऽवरा-ऽधमोत्तमादेर्यः ॥ ६।३।७३ ॥

**[ पराऽवराऽधमोत्तमादेः ]** परश्च अवरश्च अधमश्च उत्तमश्च = पराऽवराऽधमोत्तमाः । पराऽवराऽधमोत्तमा आदयो यस्य सः = पराऽवराऽधमोत्तमादिः, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

**[ परार्द्धयम् ]** परस्यार्द्धं = परार्द्धम् । परार्द्धे भवं = परार्द्धयम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अवरार्द्धयम् ]** अवरस्यार्द्धम् = अवरार्द्धम् । अवरार्द्धे भवम् = अवरार्द्धयम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अधमार्द्धयम् ]** अधमस्यार्द्धम् = अधमार्द्धम् । अधमार्द्धे भवम् = अधमार्द्धयम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ उत्तमार्द्धयम् ]** उत्तमार्द्धे भवम् = उत्तमार्द्धयम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा॥

## अमोऽन्ता-ऽवो-ऽधसः ॥ ६।३।७४ ॥

**[ अमः ]** अम प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अन्ताऽवोऽधसः ]** अन्तश्च अवश्च अधस् च = अन्ताऽवोऽधस्, तस्मात् ।

**[ अन्तमः ]** अन्ते भवः = अन्तमः । अनेन अमप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अवमः ]** अवरा । अवरस्यां दिशि । 'पूर्वा-ऽवरा-ऽधरेभ्योऽसस्तातौ पुरवधश्चैषाम्' (७।२।११५) अस्प्र० - अवरा० → अव्देशश्च । अवो भवः = अवमः । अनेन अमप्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लोपः ।

**[ अधमः ]** अधरा । अधरस्यां दिशि । 'पूर्वा-ऽवरा-ऽधरेभ्योऽसस्तातौ पुरवधश्चैषाम्' (७।२।११५) अस्प्र० - अधरा० → अध्देशश्च । अधो भवः = अधमः । अनेन अमप्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लोपः ।

**पश्चादाद्यन्ता-ऽग्रादिमः** ॥ ६।३।७५ ॥

**[ पश्चादाद्यन्ताऽग्रात् ]** पश्चाच्च आदिश्च अन्तश्च अग्रश्च = पश्चादाद्यन्ताऽग्रम्, तस्मात् ।

**[ इमः ]** इम प्रथमा सि ।

**[ पश्चिमः ]** पश्चाद्भवः = पश्चिमः । अनेन इमप्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अन्त्यस्वरादिलोपः ।

**[ आदिमः ]** आदौ जातः । अनेन इमप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ अन्तिमः ]** अन्ते जातः । अनेन इमप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अग्रिमः ]** अग्रे जातः । अनेन इमप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

आद्यन्ताभ्यां भवादन्यत्रायं विधिः । भवे तु परत्वाद् दिगादिय एव ॥छा॥

**मध्यान्मः** ॥ ६।३।७६ ॥

**[ मध्यात् ]** मध्य पञ्चमी ङसि ।

**[ मः ]** म प्रथमा सि ।

**[ मध्यमः ]** मध्ये जातः = मध्यमः । अनेन मप्र० ।

भवेऽर्थे 'मध्याद् दिनण्-णेया०' (६।३।१२६) इत्यनेन दिनणादिर्वक्ष्यते, ततोऽन्यत्रायं विधिः ॥छा॥

**मध्य उत्कर्षा-ऽपकर्षयोरः** ॥ ६।३।७७ ॥

**[ मध्ये ]** मध्य सप्तमी ङि ।

**[ उत्कर्षाऽपकर्षयोः ]** उत्कर्षश्च अपकर्षश्च = उत्कर्षाऽपकर्षौ, तयोः = उत्कर्षाऽपकर्षयोः । षष्ठी ओस् ।

**[ अः ]** अ प्रथमा सि ।

नात्युत्कृष्टो नात्यपकृष्टो मध्यपरिणाम इत्यर्थकथनम् ।

**[ मध्यो वैयाकरणः ]** मध्ये जातः = मध्यो वैयाकरणः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ मध्या गुणाः ]** मध्ये जाताः = मध्याः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । गुण प्रथमा जस् ।

**[ मध्या स्त्री ]** मध्ये जाता = मध्या । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

नातिदीर्घं नातिह्रस्वं मध्यप्रमाणमित्यर्थकथनम् ।

**[ मध्यं काष्ठम् ]** मध्ये जातं = मध्यम् । अनेन अप्र० । सि-अम् । काष्ठम् ।

नातिस्थूलो नातिकृश इत्यर्थकथनम् ।

**[ मध्यः कायः ]** मध्ये जातः = मध्यः । अनेन अप्र० । 'चिंग्ट् चयने' (१२९०) चि । चीयते आहारादिना इति कायः । 'चिति-देहा-ऽऽवासोपसमाधाने कश्चाऽऽदेः' (५।३।७९) घञ्प्र० → अ - च० → क० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**अध्यात्मादिभ्य इकण्** ॥ ६।३।७८ ॥

**[ अध्यात्मादिभ्यः ]** आत्मनि अधि = अध्यात्मम् । 'अनः' (७।३।८८) अत्समासान्तः । 'नोऽपदस्य०' (७।४।६१) अन्लोपः । अध्यात्मं आदिर्येषां ते = अध्यात्मादयः, तेभ्यः = अध्यात्मादिभ्यः । पञ्चमी भ्यस् ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ आध्यात्मिकम् ]** आत्मन्यधि = अध्यात्मम् । 'अनः' (७।३।८८) इति अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । सप्तम्यां उक्तत्वात् सिप्रत्ययस्ततो 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) इत्यादिना अम्देशः । अध्यात्मं भवम् = आध्यात्मिकम् । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ आधिदैविकम् ]** देवेष्वधि = अधिदेवम् । अधिदेवे भवम् = आधिदैविकम् । अनेन इकण्प्र० → इक । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः । सि-अम् ।

**[ आधिभौतिकम् ]** भूतेष्वधि = अधिभूतम् । तत्र भवम् = आधिभौतिकम् । अनेन इकण्प्र० → इक । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः । सि-अम् ।

**[ और्ध्वदमिकः, और्ध्वंदमिकः ]** ऊर्ध्वदमे भवः = और्ध्वदमिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ और्ध्वदेहिकः, और्ध्वंदेहिकः ]** ऊर्ध्वदेहेषु भवः = और्ध्वदेहिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**अत एव पाठात् ऊर्ध्वशब्दस्य दम-देहयोर्वा मोऽन्तः ।**

**[ आकस्मिकम् ]** अकस्मात्-हेतुशून्यः कालः, तत्र भवम् = आकस्मिकम् ।

**[ आमुष्मिकम् ]** अमुष्मिन्-परलोके भवम् = आमुष्मिकम् ।

**[ आमुत्रिकम् ]** अमुत्र-परलोके भवम् = आमुत्रिकम् ।

**[ पारत्रिकम् ]** परत्र-परलोके भवं = पारत्रिकम् ।

**[ ऐहिकम् ]** इह भवम् = ऐहिकम् ।

**[ शैषिकम् ]** शेषे भवं = शैषिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

पाठसामर्थ्यात् सप्तम्या अलुप् ॥छ॥

**समानपूर्वलोकोत्तरपदात्** ॥ ६।३।७९ ॥

**[ समानपूर्वलोकोत्तरपदात् ]** समानः पूर्वपदं(दः) यस्य सः = समानपूर्वः । 'ते लुग्वा' (३।२।१०८) पदलुक् । लोक उत्तरपदं(दः) यस्य सः = लोकोत्तरपदः । समानपूर्वश्च लोकोत्तरपदश्च = समानपूर्वलोकोत्तरपदम्, तस्मात् ।

**[ सामानग्रामिकः ]** समानग्रामे कृतो भवो वा = सामानग्रामिकः । अनेन इकण्प्र० → इक । वृद्धिः ।

**[ सामानदेशिकः ]** समानदेशे कृतो भवो वा = सामानदेशिकः । अनेन इकण्प्र० → इक । वृद्धिः ।

**[ ऐहलौकिकः ]** इहलोके कृतो भवो वा = ऐहलौकिकः । अनेन इकण्प्र० → इक । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः ।

**[ पारलौकिकः ]** परलोके कृतो भवो वा = पारलौकिकः । अनेन इकण्प्र० → इक । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः ।

**[ सार्वलौकिकः ]** सर्वलोके कृतो भवो वा = सार्वलौकिकः । अनेन इकण्प्र० → इक । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः ॥छ॥

**वर्षा-कालेभ्यः** ॥ ६।३।८० ॥

**[ वर्षाकालेभ्यः ]** वर्षा च कालश्च = ते, तेभ्यः ।

**[ वार्षिकः ]** वर्षासु भवः = वार्षिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ पूर्ववार्षिकः ]** पूर्वाश्च ता वर्षाश्च । 'पूर्वा-ऽपर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीरम्' (३।१।१०३) इति समासः । पूर्वासु वर्षासु भवः इति तद्धितविषये 'दिगधिकं संज्ञा-तद्धितोत्तरपदे' (३।१।९८) इत्यनेन वा । वर्षाणां पूर्वत्वमिति 'पूर्वा-ऽपरा-ऽधरोत्तरमभिन्नेनांशिना' (३।१।५२) तत्पुरुषो वा । अनेन इकण्प्र० । 'अंशादृतोः' (७।४।१४) इत्युत्तरपदवृद्धिः ।

विशेषविहितत्वात् परत्वाच्चानेन 'दिक्पूर्वात्०' (६।३।७१) इति बाध्यते ।

**[ अपरवार्षिकः ]** वर्षाणां अपरत्वमपरवर्षा । अपरवर्षासु भवः = अपरवार्षिकः । अनेन इकण्प्र० → इक । 'अंशादृतोः' (७।४।१४) उत्तरपदवृद्धिः ।

**[ मासिकः ]** मासे भवः = मासिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आर्द्धमासिकः ]** अर्द्धं मासस्य = अर्द्धमासः । अर्द्धमासेषु भवः = आर्द्धमासिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सांवत्सरिकः ]** संवत्सरेषु भवः = सांवत्सरिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आह्निकः ]** अहन् । अह्नि भवः । 'अनीना-ऽदट्यह्नोऽतः' (७।४।६६) अकारो लुक् । अह्नेषु भवः = आह्निकः । अनेन इकण्प्र० → इक । वृद्धिः आ ।

**[ दैवसिकः ]** दिवसेषु भवः = दैवसिकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

वर्षाग्रहणं 'भर्तु-सन्ध्यादेरण्' (६।३।८९) ऋत्वण्बाधनार्थम् । कालशब्दः कालविशेषवाची 'भर्तु-सन्ध्यादेरण्' (६।३।८९) इत्यत्र सन्ध्यादिग्रहणात् । स्वरूपग्रहणे हि काललक्षणेकण्बाधकं सन्ध्यादिग्रहणमनर्थकं स्यात् । बहुवचनं तु यथाकथञ्चित् कालवृत्तिभ्यः प्रत्ययप्रापणार्थम् ।

**[ नैशिकः ]** निशासहचरितमध्ययनं निशा, तत्र जयी = नैशिकः ।

**[ प्रादोषिकः ]** प्रदोषसहचरितं प्रदोषस्तत्र जयी = प्रादोषिकः ।

**[ कादम्बपुष्पिकम् ]** कदम्बपुष्पसहचरितः कालः = कदम्बपुष्पम् । कदम्बपुष्पे देयं = कादम्बपुष्पिकम् । 'कालाद् देये ऋणे' (६।३।११३) इत्यनेन यथाविहितमनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ व्रैहिपलालिकम् ]** व्रीहिपलालसहचरितः कालः = व्रीहिपलालम् । व्रीहिपलाले देयं ऋणं = व्रैहिपलालिकम् । 'कालाद् देये ऋणे' (६।३।११३) इत्यनेन यथाविहितमनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## शरदः श्राद्धे कर्मणि ॥ ६।३।८१ ॥

**[ शरदः ]** शरद् पञ्चमी ङसि ।

**[ श्राद्धे ]** श्राद्ध सप्तमी ङि ।

**[ कर्मणि ]** कर्मन् सप्तमी ङि ।

**[ शारदिकं श्राद्धं कर्म ]** शरदि भवं = शारदिकम् । अनेन इकण्प्र० → इक । वृद्धिः आ । श्रत् 'डुधांग्क् धारणे च' (११३९) धा । श्रद्धानं = श्रद्धा । 'मृगयेच्छा-याच्ञा-तृष्णा-कृपा-भा-श्रद्धा-अन्तर्द्धा' (५।३।१०१) अङ्प्र० → अ । 'समानानां०' (१।२।१) दीर्घः । श्रद्धा प्रयोजनमस्य = श्राद्धम् । 'चूडादिभ्योऽण्' (६।४।११९) अण्प्र० । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ शारदः श्राद्धः ]** शरदि भवः = शारदः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः आ । श्रद्धा अस्यास्ति = श्राद्धः । 'प्रज्ञा-श्रद्धा-ऽर्चा-वृत्तेर्णः' (७।२।३३) णप्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । श्रद्धावानित्यर्थः ।

**[ शारदं विरेचनम् ]** शरदि भवं = शारदम् । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः आ । सि-अम् ॥छ॥

## नवा रोगा-ऽऽतपे ॥ ६।३।८२ ॥

**[ नवा ]** नवा प्रथमा सि ।

**[ रोगाऽऽतपे ]** रोगश्च आतपश्च = रोगाऽऽतपम्, तस्मिन् ।

**[ शारदिकः शारदो वा रोगः ]** शरदि भवः = शारदिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । पक्षे 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः । रोगः ।

**[ शारदिकः शारद आतपः ]** शरदि भवः = शारदिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । पक्षे 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः । आतपः ।

**[ शारदं दधि ]** शरदि भवं = शारदम् । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः । सि-अम् । दधि ॥छ॥

## निशा-प्रदोषात् ॥ ६।३।८३ ॥

**[ निशाप्रदोषात् ]** निशा च प्रदोषश्च = निशाप्रदोषम्, तस्मात् ।

**[ नैशिकः, नैशः ]** निशायां भवः = नैशिकः । अनेन इकण्प्र० → इक । एवम् - नैशः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ प्रादोषिकः, प्रादोषः ]** प्रदोषे भवः = प्रादोषिकः । अनेन इकण्प्र० → इक । एवम्-प्रादोषः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## श्वसस्तादिः ॥ ६।३।८४ ॥

**[ श्वसः ]** श्वस् पञ्चमी ङसि ।

**[ तादिः ]** त आदिर्यस्य सः = तादिः ।

**[ शौवस्तिकः, श्वस्त्यम्, श्वस्तनम् ]** श्वस् । श्वो भवः = शौवस्तिकः । अनेन इकण्प्र० → इक तादिः । लोकात् श् पाठउ विश्लेषियइ । 'द्वारादेः' (७।४।६) औ । एवम्-श्वस्त्यम् । 'ऐषमो-ह्यः-श्वसो वा' (६।३।१९) त्यच्प्र० → त्य । एवम्-श्वस्तनम् । 'सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात्' (६।३।८८) तनट्प्र० → तन । 'सो रुः' (२।१।७२) स० → र० । 'च-ट-ते सद्वितीये' (१।३।७) र० → स० । सि-अम् ॥छ॥

## चिर-परुत्-परारेस्त्नः ॥ ६।३।८५ ॥

**[ चिरपरुत्परारेः ]** चिरश्च परुच्च परारिश्च = चिरपरुत्परारि, तस्मात् ।

**[ त्नः ]** त्न प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ चिरत्नम्, चिरंतनम् ]** चिरे भवं = चिरत्नम् । अनेन त्नप्र० । सि-अम् । पक्षे 'सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात्' (६।३।८८) तनट्प्र० → तन । द्वितीये उदाहरणे अत एव निर्देशात् मुगमः ।

**[ परुत्नम्, परुत्तनम् ]** परुत् भवं = परुत्नम् । अनेन त्नप्र० । सि-अम् । पक्षे 'सायं-चिरं-प्राह्णे०' (६।३।८८) तनट्प्र० → तन ।

**[ परारित्नम्, परारितनम् ]** परारि भवं = परारित्नम् । अनेन त्नप्र० । सि-अम् । पक्षे 'सायं-चिरं-प्राह्णे०' (६।३।८८) तनट्प्र० → तन ।

**[ परात्नः ]** परारि भवं = परात्नः । मतान्तरे अनेनैव त्नप्र०-रिलुक् च ।

मोरुदित्करणं 'तौ मुमो०' (१।३।१४) इत्यादिना अनुस्वारार्थम्, अन्यथा अपदान्तत्वान्न स्यात् ॥छ॥

## पुरो नः ॥ ६।३।८६ ॥

**[ पुरः ]** पुरा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[ नः ]** न प्रथमा सि ।

**[ पुराणम्, पुरातनम् ]** पुरा भवं = पुराणम् । अनेन नप्र० । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । सि-अम् । पक्षे 'सायं-चिरं-प्राह्णे०' (६।३।८८) तनट्प्र० → तन । सि-अम् ॥छ॥

## पूर्वाह्णा-ऽपराह्णात् तनट् ॥ ६।३।८७ ॥

**[ पूर्वाह्णाऽपराह्णात् ]** पूर्वाह्णश्च अपराह्णश्च = पूर्वाह्णाऽपराह्णम्, तस्मात् ।

**[ तनट् ]** तनट् प्रथमा सि ।

**[ पूर्वाह्णेतनः, पूर्वाह्णतनः ]** पूर्वमह्नः = पूर्वाह्णः । 'सर्वां-ऽश-संख्या०' (७।३।११८) अट्समासान्तः-अह्नदेशश्च । 'अतोऽह्नस्य' (२।३।७३) न० → ण० । पूर्वाह्णे जातो भवो वा = पूर्वाह्णेतनः, पूर्वाह्णतनः । अनेन तनट्प्र० → तन । 'कालात् तन-तर-तम-काले' (३।२।२४) इत्यनेन वा सप्तम्या अलुप्समासः ।

**[ अपराह्णेतनः, अपराह्णतनः ]** अपरमह्नः = अपराह्णः । 'सर्वां-ऽश-संख्या-अव्ययात्' (७।३।११८) अट्समासान्तः-अह्नदेशश्च । 'अतोऽह्नस्य' (२।३।७३) न० → ण० । अपराह्णे भवः = अपराह्णेतनः, अपराह्णतनः । अनेन तनट्प्र० → तन । 'कालात् तन०' (३।२।२४) इत्यनेन वा सप्तम्या अलुप्समासः ।

**[ पूर्वाह्णतनः, अपराह्णतनः, पौर्वाह्णिकः, आपराह्णिकः, पूर्वाह्णेतनी, अपराह्णेतनी ]** पूर्वाह्णे जयी = पूर्वाह्णतनः । अपराह्णे जयी = अपराह्णतनः । अनेन तनट्प्र० । अत्र जयिनि वाच्ये कालात् तन-तरे तत्र व्यवस्थितविभाषाविज्ञानात् नित्यं सप्तम्या लुप् । एवम्-पौर्वाह्णिकः, आपराह्णिकः । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ-आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । टकारो ङ्यर्थः-यथा 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छ॥

## सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात् ॥ ६।३।८८ ॥

**[ सायंचिरंप्राह्णेप्रगेऽव्ययात् ]** सायं च चिरं च प्राह्णेश्च प्रगेश्च अव्ययं च = सायंचिरंप्राह्णेप्रगेऽव्ययम्, तस्मात् ।

**[ सायंतनम् ]** साये भवं = सायंतनम् । अनेन तनट्प्र० → तन । अत एव निर्देशान्मान्तत्वं निपात्यते ।

**[ चिरंतनम् ]** चिरे भवं = चिरंतनम् । अनेन तनट्प्र० → तन । अत एव निर्देशान्मान्तत्वं निपात्यते ।

**[ प्राह्णेतनम् ]** प्राह्णे भवं = प्राह्णेतनम् । अनेन तनट्प्र० → तन । अत्र एकारान्तत्वनिपातनम् । 'कालात् तन-तर-तम-काले' (३।२।२४) इत्यादिना समासः ।

**[ प्रगेतनम् ]** प्रगे भवं = प्रगेतनम् । अनेन तनट्प्र० → तन । अत्र एकारान्तत्वनिपातनम् । 'कालात् तन०' (३।२।२४) इत्यादिना समासः ।

**[ दिवातनम् ]** दिवा भवं = दिवातनम् ।

**[ दोषातनम् ]** दोषा भवं = दोषातनम् ।

**[ नक्तंतनम् ]** नक्तं भवं = नक्तंतनम् ।

**[ पुनस्तनम् ]** पुनर्भवं = पुनस्तनम् ।

**[ प्रातस्तनम् ]** प्रातर्भवं = प्रातस्तनम् ।

**[ प्राक्तनम् ]** प्राक् भवं = प्राक्तनम् । सर्वत्र अनेन तनट्प्र० → तन । सि-अम् ।

**[ सौवम् ]** स्वर् । स्वर्भवं = सौवम् । 'भवे' (६।३।१२३) अण्प्र० → अ । 'लोकात्' (१।१।३) स् पाठउ विश्लेषियइ । 'द्वारादेः' (७।४।६) औ । 'प्रायोऽव्ययस्य' (७।४।६५) अर्लुक् । सि-अम् ।

सायं-चिरं-प्राह्णे-प्रगे इत्यव्ययेभ्योऽव्ययादित्येव सिद्धे साय-चिर-प्राह्ण-प्रगशब्देभ्यस्तनट्विधानं कालेकण्बाधनार्थम् ।।छ।।

**भर्तु-सन्ध्यादेरण्** ॥ ६।३।८९ ॥

**[ भर्तुसन्ध्यादेः ]** भं च ऋतुश्च सन्ध्यादिश्च = भर्तुसन्ध्यादि, तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

'वर्षा-कालेभ्यः' (६।३।८०) इत्यनेन इकणोऽपवादः ।

**[ पौषः ]** पुष्येण चन्द्रयुक्तेन युक्तः कालोऽपि = पुष्यः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । पुष्ये भवः = पौषः । अनेन अण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तिष्य-पुष्ययोर्भाऽणि' (२।४।९०) यलुक् ।

**[ तैषः ]** तिष्येण चन्द्रयुक्तेन युक्तः कालोऽपि = तिष्यः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । तिष्ये भवः = तैषः । अनेन अण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तिष्य-पुष्ययोर्भाऽणि' (२।४।९०) यलुक् ।

**[ आश्विनः ]** अश्विन् । अश्वाः सन्त्यस्याम्-अश्विनी । मत्वर्थीय इन् । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । अश्विन्या चन्द्रयुक्तया युक्तः कालोऽपि = अश्विनी । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । 'ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणी-सूच्योः' (२।४।९५) ङीनिवृत्तिः । अश्विन्यां भवः = आश्विनः । अनेन अण्प्र० । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ रौहिणः ]** रोहिण 'रेवत-रोहिणाद् भे' (२।४।२६) ङी । रोहिण्या चन्द्रयुक्तया युक्तः कालोऽपि = रोहिणी । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः । पुनरेव ङी । रोहिण्यां भवः = रौहिणः । अनेन अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ सौवातः ]** स्वात्या चन्द्रयुक्तया युक्तः कालोऽपि स्वाति(:) । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । लुप् । स्वातौ भवः = सौवातः । अनेन अण्प्र० → अ । 'लोकात्' (१।१।३) स् पाठउ विश्लेषियइ । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

ऋतु- **[ ग्रैष्मः ]** ग्रसते रसो रसान् = ग्रीष्मः । ग्रीष्मे भवः = ग्रैष्मः । अनेन अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शैशिरः ]** शिशिरे भवः = शैशिरः । अनेन अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वासन्तः ]** वसन्ते भवः = वासन्तः । अनेन अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पूर्वग्रैष्मः ]** पूर्वग्रीष्मे भवः । यद्वा पूर्वस्मिन् ग्रीष्मे भवः = पूर्वग्रैष्मः । अनेन अण्प्र० → अ । 'अंशादृतोः' (७।४।१४) उत्तरपदवृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अपरशैशिरः ]** अपरस्मिन् शिशिरे भवः = अपरशैशिरः । अनेन अण्प्र० → अ । 'अंशादृतोः' (७।४।१४) उत्तरपदवृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

सन्ध्यादि- **[ सान्ध्यः ]** सन्ध्यायां भवः = सान्ध्यः । अनेन अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ सान्धिवेलः ]** सन्धिवेलायां भवः = सान्धिवेलः । अनेन अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आमावास्यः ]** अमावास्यायां भवः = आमावास्यः । अनेन अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

एकदेशविकृतस्यानन्यत्वादमावस्याशब्दादपि भवति- **[ आमावस्यः ]** अमावस्यायां भवः = आमावस्यः । अनेन अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

अण्ग्रहणं स्वाति-राधा-आर्द्रा-पौणमासीभ्य ईयबाधनार्थम् । यथाविहितमित्युच्यमाने 'दोरीयः' (६।३।३२) इति ईयः प्राप्नोति ।

**[ स्वातीयम् ]** स्वातेरिदमुदयस्थानं = स्वातीयम् । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ राधीयम् ]** राधाया इदमुदयस्थानं = राधीयम् । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ आर्द्रीयम् ]** आर्द्राया इदमुदयस्थानमार्द्रीयम् । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ प्रतिपत् ]** 'पदिंच् गतौ' (१२५७) पद्, प्रतिपूर्व० । प्रतिपद्यते प्रथमतिथितया जनैरिति प्रतिपद् । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ शाश्वतम् ]** शश्वद् भवं = शाश्वतम् । अनेन अण्प्र० → अ । वृद्धिः आ । सि-अम् ।

**[ शाश्वतिकम् ]** शश्वद् भवं = शाश्वतिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । वृद्धिः आ । सि-अम् ॥छ॥

### संवत्सरात् फल-पर्वणोः ॥ ६।३।९० ॥

**[ संवत्सरात् ]** संवत्सर पञ्चमी ङसि ।

**[ फलपर्वणोः ]** फलं च पर्व च = फलपर्वणी, तयोः = फलपर्वणोः । सप्तमी ओस् ।

**[ सांवत्सरं फलम् ]** संवच्छ(त्स)रे भवं = सांवच्छ(त्स)रम् । अनेन अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । फलम् ।

**[ सांवत्सरं पर्व ]** संवच्छ(त्स)रे भवं = सांवच्छ(त्स)रम् । अनेन अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । पर्व ।

**[ सांवत्सरिकं श्राद्धम् ]** संवच्छ(त्स)रे भवं = सांवच्छ(त्स)रिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । श्राद्धम् ॥छ॥

### हेमन्ताद् वा तलुक् च ॥ ६।३।९१ ॥

**[ हेमन्तात् ]** हेमन्त पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ तलुक् ]** तस्य लुक् = तलुक् । प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

'भर्तु-सन्ध्यादेरण्' (६।३।८९) इत्यनेन अणि प्राप्तौ विभाषा ।

**[ हैमनम्, हैमन्तम्, हैमन्तिकम् ]** हेमन्ते भवं = हैमनम् । अनेन अण्प्र० → अ - विकल्पेन तलुक् च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-हैमन्तिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पूर्वहैमनम् ]** पूर्वस्मिन् हेमन्ते भवं = पूर्वहैमनम् । अनेन अण्प्र० → अ - तलुक् च । 'अंशादृतोः' (७।४।१४) उत्तरपदवृद्धिः । सि-अम् ।।छ।।

## **प्रावृष एण्यः** ।। ६।३।९२ ।।

**[ प्रावृषः ]** प्रावृष् पञ्चमी ङसि ।

**[ एण्यः ]** एण्य प्रथमा सि ।

**[ प्रावृषेण्यः ]** प्रावृष् । प्रावृषि भवः = प्रावृषेण्यः । अनेन एण्यप्र० ।

**[ प्रावृषिकः ]** जिषू (५२२) - विषू (५२३) - मिषू (५२४) - निषू (५२५) - पृषू (५२६) - 'वृषू सेचने' (५२७) वृष्, प्रपूर्व० । प्रवर्षतीति प्रावृट् । क्विप्प्र० । 'गति-कारकस्य नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनौ क्वौ' (३।२।८५) दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रावृषि जातः = प्रावृषिकः । 'प्रावृष इकः' (६।३।९९) इकप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ प्रावृषेण् ]** प्रावृषेण्य । प्रावृषेण्यमाचष्टे । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । प्रावृषेण्ययतीति प्रावृषेण् । क्विप्प्र० । 'णेरनिटि' (४।३।८३) णिच्लोप । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक् । अन्यथा-परे क्विप्-णि-यलोपादौ 'ण-षमसत्परे०' (२।१।६०) इत्यनेन णत्वनिवृत्तौ नान्ता प्रकृतिः स्यात् ।।छ।।

## **स्थामा-ऽजिनान्ताल्लुप्** ।। ६।३।९३ ।।

**[ स्थामाऽजिनान्तात् ]** स्थामा च अजिनश्च = स्थामाऽजिनौ । स्थामाऽजिनावन्ते यस्य सः = स्थामाऽजिनान्तः, तस्मात् ।

**[ लुप् ]** लुप् प्रथमा सि ।

**[ अश्वत्थामा ]** अश्व 'ष्ठां गतिनिवृत्तौ (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे०' **(** न्या० सं० वक्ष० (१) / सूत्र (२९) **)**, स्था । अश्व इव तिष्ठति = अश्वत्थामा । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) मन्प्र० । 'पृषोदरादयः' (३।२।१५५) स० → त० । अश्वत्थामनि जातो भवो वा = अश्वत्थामा । 'अः स्थाम्नः' (६।१।२२) अप्र० । अनेन लुप् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ सिंहाजिनः ]** सिंहाजिने जातो भवो वा = सिंहाजिनः । 'जाते' (६।३।९८) अण्प्र० । 'भवे' (६।३।१२३) अण्प्र० । अनेन लुप् ।

**[ उलाजिनः ]** उलः - स्वा(श्वा)पदभेदः । उलस्याजिनम् = उलाजिनम् । उलाजिने जातो भवो वा = उलाजिनः । 'जाते' (६।३।९८) अण्प्र० । 'भवे' (६।३।१२३) अण्प्र० । अनेन लुप् ।

**[ वृकाजिनः ]** वृकस्याजिनं = वृकाजिनम् । वृकाजिने जातो भवो वा = वृकाजिनः । 'जाते' (६।३।९८) अण्प्र० । 'भवे' (६।३।१२३) अण्प्र० । अनेन लुप् ।

**[ अश्वत्थामः ]** अश्वत्थाम्नोऽयम् । अश्वत्थाम्न आगतो वा = आ(अ)श्वत्थामः । 'अः स्थाम्नः' (६।१।२२) अप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक ।

**[ सैंहाजिनः ]** सिंहस्याजिनं = सिंहाजिनम् । सिंहाजिनस्यायम् । सिंहाजिनादागतो वा = सैंहाजिनः । 'तस्येदम्' (६।३।१६०) अण्प्र० । अथवा 'तत आगते' (६।३।१४९) अण्प्र० → अ । वृद्धिः ऐ ।

**[ वार्काजिनः ]** वृकाजिनस्यायं-वृकाजिनादागतो वा = वार्काजिनः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । अथवा 'तत आगते' (६।३।१४९) अण्प्र० → अ । वृद्धिः आर् ॥छ॥

## तत्र कृत-लब्ध-क्रीत-सम्भूते ॥ ६।३।९४ ॥

**[ तत्र ]** तत्र पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ कृतलब्धक्रीतसम्भूते ]** कृतश्च लब्धश्च क्रीतश्च सम्भूतश्च = कृतलब्धक्रीतसम्भूतम्, तस्मिन् ।

'तद्धितोऽणादिः' (६।१।१) - 'रागाट्टो रक्ते' (६।२।१) इति च द्वयोः पादयोः 'प्राग् जितादण्' (६।१।१३) इत्यादिभिर्विहिताः, शेषेऽस्मिन् पादे 'नद्यादेरेयण्' (६।३।२) इत्यादिभिर्विहिता अणादय एयणादयश्च ।

यदन्येनोत्पादितं तत्**कृतम्** । उदकपूर्वकं दानं प्रतिग्रहः । यत् प्रतिग्रहादिना प्राप्तं त**ल्लब्धम्** । यन्मूल्येन स्वीकृतं तत् **क्रीतम्** । यत् संभाव्यते घटते सम्माति वा तत् **सम्भूतम्** । 'ज्ञानेच्छाऽर्चाऽर्थञीच्छील्यादिभ्यः क्तः' (५।२।९२) क्तप्र० → त । सि-अम् ।

**[ स्रौघ्नः ]** स्रुघ्ने कृतो लब्धः क्रीतः सम्भूतो वा = स्रौघ्नः । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माथुरः ]** मथुरायां कृतादिः । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ ।

**[ औत्सः ]** उत्से कृतो लब्धः क्रीतः सम्भूतो वा = औत्सः । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।८) अलुक् ।

**[ बाह्यः, बाहीकः ]** बहिस् । बहिः कृतो लब्धः क्रीतः सम्भूतो वा = बाह्यः, बाहीकः । 'बहिषष्टीकण् च' (६।१।१६) ञ्यप्र० → य, टीकण्प्र० → ईक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'प्रायोऽव्ययस्य' (७।४।६५) इस्लुक् ।

**[ नादेयः ]** नद्यां कृतो लब्धः क्रीतः सम्भूतो वा = नादेयः । 'नद्यादेरेयण्' (६।३।२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ राष्ट्रियः ]** राष्ट्रे कृतो लब्धः क्रीतः सम्भूतो वा = राष्ट्रियः । 'राष्ट्रादियः' (६।३।३) इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पारावारीण: ]** अवारस्य समुद्रस्य पार: = पारावार: । पारावारे कृतो लब्ध: क्रीत: सम्भूतो वा = पारावारीण: । 'पारावारादीन:' (६।३।६) ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ शयने शेते ]** 'शीङ्क् स्वप्ने' (११०५) शी । शय्यतेऽस्मिन्निति शयनम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय्, तस्मिन् ॥छ॥

## **कुशले** ॥ ६।३।९५ ॥

**[ कुशले ]** कुशल सप्तमी ङि ।

**[ स्रौघ्न: ]** स्रुघ्ने कुशल: = स्रौघ्न: । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धि: स्वरे०' (७।४।१) वृद्धि: औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माथुर: ]** मथुरायां कुशल: = माथुर: । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धि: स्वरे०' (७।४।१) वृद्धि: आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ नादेय: ]** नद्यां तरणे कुशल: = नादेय: । 'नद्यादेरेयण्' (६।३।२) एयण्प्र० → एय । 'वृद्धि: स्वरे०' (७।४।१) वृद्धि: आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ राष्ट्रिय: ]** राष्ट्रे कुशल: = राष्ट्रिय: । 'राष्ट्रादिय:' (६।३।३) इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## **पथोऽक:** ॥ ६।३।९६ ॥

**[ पथ: ]** पथिन् पञ्चमी ङसि । 'इन् ङी-स्वरे लुक्' (१।४।७९) इन्लुक् ।

**[ अक: ]** अक प्रथमा सि ।

**[ पथक: ]** पथिन् । पथि कुशल: = पथक: । अनेन अकप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ॥छ॥

## **कोऽश्मादे:** ॥ ६।३।९७ ॥

**[ क: ]** क प्रथमा सि ।

**[ अश्मादे: ]** अश्म आदिर्यस्य स: = अश्मादि:, तस्मात् ।

**[ अश्मक: ]** अश्मनि कुशल: = अश्मक: । अनेन कप्र० ।

**[ अशनिक: ]** अशनौ-वज्रे कुशल: = अशनिक: । अनेन कप्र० ।

**[ आकर्षक: ]** आकर्ष:-कुतुपादि:, तत्र कुशल: = आकर्षक: । अनेन कप्र० ॥छ॥

## **जाते** ॥ ६।३।९८ ॥

**[ जाते ]** 'जनैचि प्रादुर्भावे' (१२६५) जन् । जायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजे:' (५।१।११) क्तप्र० → त । 'आ: खनि-सनि-जन:' (४।२।६०) न० → आ० । 'समानानां तेन०' (१।२।१) दीर्घ:, तस्मिन् ।

**[ स्रौघ्न: ]** स्रुघ्ने जात: = स्रौघ्न: । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धि: स्वरे०' (७।४।१) वृद्धि: औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माथुर: ]** मथुरायां जात: = माथुर: । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धि: स्वरे०' (७।४।१) वृद्धि: आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ औत्सः ]** उत्से जातः = औत्सः । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औदपानः ]** उदपाने जातः = औदपानः । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बाह्यः, बाहीकः ]** बहिर्जातः = बाह्यः, बाहीकः । 'बहिषष्टीकण् च' (६।१।१६) ञ्यप्र० → य, टीकण्प्र० → ईक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'प्रायोऽव्ययस्य' (७।४।६५) इस्लुक् ।

**[ कालेयः ]** कलि । कलौ जातः = कालेयः । 'कल्यग्नेरेयण्' (६।१।१७) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ आग्नेयः ]** अग्नि । अग्नौ जातः = आग्नेयः । 'कल्यग्नेरेयण्' (६।१।१७) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ स्त्रैणः ]** स्त्रियां जातः = स्त्रैणः । 'प्राग्वतः स्त्री-पुंसात् नञ्-स्नञ्' (६।१।२५) । नञ्प्र० → न । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ ।

**[ पौंस्नः ]** पुंसि जातः = पौंस्नः । 'प्राग्वतः स्त्री-पुंसात्०' (६।१।२५) स्नञ्प्र० → स्न । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः । 'पदस्य' (२।१।८९) सलुक् ।

**[ नादेयः ]** नद्यां जातः = नादेयः । 'नद्यादेरेयण्' (६।३।२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ राष्ट्रियः ]** राष्ट्रे जातः = राष्ट्रियः । 'राष्ट्रादियः' (६।३।२) इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पारावारीणः ]** पारावारे जातः = पारावारीणः । 'पारावारादीनः' (६।३।६) ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६२) न० → णत्वम् ।

**[ ग्राम्यः ]** ग्रामे जातः = ग्राम्यः । 'ग्रामादीनञ् च' (६।३।९) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ग्रामीणः ]** ग्रामे जातः = ग्रामीणः । 'ग्रामादीनञ् च' (६।३।९) ईनञ्प्र० → इन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → णत्वम् ।

**[ कात्त्रेयकः ]** कुत्सिताः के वा त्रयोऽस्य सः = कत्त्रिः । 'कत्त्रिः' (३।२।१३३) इत्यनेन किमः कुशब्दस्य वा कत्त्रिरादेशः । कत्त्रिषु जातः = कात्त्रेयकः । 'कत्त्र्यादेश्चैयकञ्' (६।३।१०) एयकञ्प्र० → एयक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।८) इलुक् ।

स्वयमुत्पत्तिर्जातस्यार्थ इति कृतादिभ्यो भेदः ॥छ॥

## प्रावृष इकः ॥ ६।३।९९ ॥

**[ प्रावृषः ]** प्रावृष् पञ्चमी ङसि ।

**[ इकः ]** इक प्रथमा सि ।

**[ प्रावृषिकः ]** प्रावृषि जातः = प्रावृषिकः । अनेन इकप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

**नाम्नि शरदोऽकञ्** ॥ ६।३।१०० ॥

**[ नाम्नि ]** नामन् सप्तमी ङि ।

**[ शरदः ]** शरद् पञ्चमी ङसि ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

प्रकृतिप्रत्ययसमुदायश्चेत् कस्यचिन्नाम भवति । ऋत्वणोऽपवादः 'भर्तु-सन्ध्यादेरण्' (६।३।८९) ।

**[ शारदका दर्भाः, मुद्गा वा ]** शरद् । शरदि जाताः = शारदकाः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । प्र० जस् । दर्भा मुद्गा वा । 'दर्भविशेषाणां मुद्गविशेषाणां चेयं संज्ञा ।

**[ शारदं सस्यम् ]** शरदि जातम् । जाते 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । सि-अम् । सस्यम् ॥छ॥

**सिन्ध्वपकरात् का-ऽणौ** ॥ ६।३।१०१ ॥

**[ सिन्ध्वपकरात् ]** सिन्धुश्च अपकरश्च = सिन्ध्वपकरम्, तस्मात् ।

**[ काऽणौ ]** कश्च अण् च = काऽणौ ।

सिन्धोः 'कच्छादेर्नृ-नृस्थे' (६।३।५५) अकञ्, 'कोपान्त्याच्चाऽण्' (६।३।५६) अण् एतयोरपवादः । अपकराच्चौत्सर्गिकाणोपवादः ।

**[ सिन्धुकः, सैन्धवः ]** सिन्धौ जातः = सिन्धुकः, सैन्धवः । अनेन क-अण्प्र० → अ । वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ अपकरकः, आपकरः ]** कचैर्वरः = कचवरः । अपकरे-कचवरे जातः = अपकरकः, आपकरः । अनेन क-अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सैन्धवको मनुष्यः ]** सिन्धुषु जातः = सैन्धवकः । 'कच्छादेर्नृ-नृस्थे' (६।३।५५) अकञ्प्र० → अक । वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । मनुष्यः ।

नाम्नीत्यधिकारः 'कालाद् देये ऋणे' (६।३।११३) इति सूत्रं यावत् ॥छ॥

**पूर्वाह्णा-ऽपराह्णा-ऽऽर्द्रा-मूल-प्रदोषा-ऽवस्करादकः** ॥ ६।३।१०२ ॥

**[ पूर्वाह्णाऽपराह्णाऽऽर्द्रामूलप्रदोषाऽवस्करात् ]** पूर्वाह्णश्च अपराह्णश्च आर्द्रा च मूलश्च प्रदोषश्च अवस्करश्च = पूर्वाह्णाऽपराह्णाऽऽर्द्रामूलप्रदोषाऽवस्करम्, तस्मात् ।

**[ अकः ]** अक प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ पूर्वाह्णकः ]** पूर्वमह्नः = पूर्वाह्णः । 'सर्वां-ऽश-संख्या-अव्ययात्' (७।३।११८) अट्समासान्तः - अह्नदेशश्च । पूर्वाह्णे जातः = पूर्वाह्णकः । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अत्र 'वर्षा-कालेभ्यः' (६।३।८०) इकण्, 'पूर्वाह्णा-ऽपराह्णात् तनट्' (६।३।८७) तनट् एतयोर्द्वयोरपवादः ।

**[ अपराह्णकः ]** अपरमह्नः = अपराह्णः । 'सर्वां-ऽश०' (७।३।११८) अट्समासान्तः - अह्नदेशश्च । अपराह्णे जातः = अपराह्णकः । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अत्र 'वर्षा-कालेभ्यः' (६।३।८०) इकण्, 'पूर्वाह्णा०' (६।३।८७) तनट् एतयोर्द्वयोरपवादः ।

**[ आर्द्रकः ]** आर्द्राभिश्च चन्द्रयुक्ताभिर्युक्तः कालोऽपि = आर्द्रा । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । आर्द्रायां जातः = आर्द्रकः । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ मूलकः ]** मूलेन चन्द्रयुक्तेन युक्तः कालोऽपि = मूलः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । मूले जातः = मूलकः । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रदोषकः ]** प्राप्तो दोषां = प्रदोषः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । यद्वा प्रकृष्टा दोषा अत्र सः = प्रदोषः । प्र 'दुषंच् वैकृत्ये' (१२०९) दुष् । प्रदुष्यति अध्ययनादिकमत्र = प्रदोषः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रदोषे जातः = प्रदोषकः । अनेन अकप्र० । अत्र 'निशा-प्रदोषात्' (६।३।८३) इकण् - औत्सर्गिकाऽणोऽपवादोऽकः ।

**[ अवस्करकः ]** अव 'कृत् विक्षेपे' (१३३४) कृ । अवकीर्यते-विक्षिप्यन्ते दिशो दिशं वायुना इति अवस्करः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'पृषोदरादयः' (३।२।१५५) सागमः । अवस्करे जातः = अवस्करकः । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पौर्वाह्णिकम् ]** पूर्वाह्णे भवं = पौर्वाह्णिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ पूर्वाह्णेतनम् ]** पूर्वाह्णे भवं = पूर्वाह्णेतनम् । 'पूर्वाह्णा-ऽपराह्णात् तनट्' (६।३।८७) तनट्प्र० → तन । सि-अम् ।

**[ आपराह्णिकम् ]** अपराह्णे भवम् = आपराह्णिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अपराह्णेतनम् ]** अपराह्णे भवम् = अपराह्णेतनम् । 'पूर्वाह्णा-ऽपराह्णात् तनट्' (६।३।८०) तनट्प्र० → तन । सि-अम् ।

**[ आर्द्रम् ]** आर्द्रायां जातः = आर्द्रः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ मौलम् ]** मूले जातः = मौलः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ प्रादोषिकम्, प्रादोषम् ]** प्रदोषे भवं = प्रादोषिकम् । 'निशा-प्रदोषात्' (६।३।८३) इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । एवम्-प्रादोषम् । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ आवस्करम् ]** अवस्करे जातम् = आवस्करम् । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ आर्द्रिका ]** केनैव सिद्धेऽकविधान**मार्द्रिका** इत्येवमर्थम् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्०' (२।४।१११) इ ।

**[ खट्वाका, खट्वका, खट्विका ]** कुत्सिता खट्वा = खट्वाका, खट्वका, खट्विका । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'इच्चाऽपुंसोऽनित्क्याप्परे' (२।४।१०७) इत्वं-ह्रस्वत्वं विकल्पनात् ॥छ॥

**पथः पन्थ च** ॥ ६।३।१०३ ॥

**[ पथः ]** पथिन् पञ्चमी ङसि । 'इन् ङी-स्वरे लुक्' (१।४।७९) इन्लुक् ।

**[ पन्थ ]** पन्थ प्रथमा सि । सूत्रत्वाल्लुप् ।

**[ च ]** च प्रथमा सि ।

**[ पन्थकः ]** पथिन् । पथि जातः = पन्थकः । अनेन अकप्र० - पथिन्शब्दस्य पन्थादेशश्च । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**अश्च वाऽमावास्यायाः** ॥ ६।३।१०४ ॥

**[ अश्च ]** अ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि । 'च-ट-ते०' (१।३।७) र० → श० ।

**[ वा ]** वा प्रथमा सि ।

**[ अमावास्यायाः ]** अमावास्या पञ्चमी ङसि । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) यास्देशः । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ अमावास्यः, अमावास्यकः, आमावास्यः ]** अमा 'वसं निवासे' (९९१) वस् । अमा सह वसतोऽस्यां चन्द्रार्क्काविति अमावास्या । 'वाऽऽधारेऽमावस्या' (५।१।२१) घ्यण्प्र० → य - विकल्पेन ह्रस्वत्वं च । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'आत्' (२।४।१८) आप्प्र० । अमावास्यायां जातः = अमावास्यः, अमावास्यकः । अनेन अ-अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम् - आमावास्यः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**एकदेशविकृतस्याऽनन्यत्वादमावस्याशब्दादपि भवति-**

**[ अमावस्यः, अमावस्यकः, आमावस्यः ]** अमावस्यायां जातः = अमावस्यः, अमावस्यकः । अनेन अ-अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम् - आमावस्यः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आमावास्यः ]** अमावास्यायां जातः = आमावास्यः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ॥छ॥

**श्रविष्ठा-ऽषाढादीयण् च** ॥ ६।३।१०५ ॥

**[ श्रविष्ठाऽषाढात् ]** श्रविष्ठा च आ(अ)षाढा च = श्रविष्ठाऽषाढम्, तस्मात् । 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[ ईयण् ]** ईयण् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ श्राविष्ठीयः, श्रविष्ठः ]** 'श्रुंट् श्रवणे' (१२९६) श्रु । श्रवणं = श्रवः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । श्रवो विद्यते यस्यां सा = श्रववती । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी ।

'मावर्णान्तो०' (२।१।९४) म० → व० । इमा श्रववत्यः, इमा श्रववत्यः, इमा आसां मध्ये प्रकृष्टाः श्रववत्यः = श्रविष्ठाः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । 'जातिश्च णि०' (३।२।५१) पुंवत् । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) मत् - लुप् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । श्रविष्ठाः - धनिष्ठाः ताभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि = श्रविष्ठाः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । 'ङ्यादेर्गौण०' (२।४।९५) आप्निवृत्तौ पुनरेव आप् । श्रविष्ठासु जातः = श्राविष्ठीयः । अनेन ईयण्प्र० → ईय । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम्-श्रविष्ठः । अनेनैव अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आषाढीयः, अषाढः ]** 'षहि मर्षणे' (९९०) षह् । न सहते = अषाढा । 'नञः सहेः षा च' (उणा० १८१) अषाढनिपात्यते । 'आत्' (२।४।१८) आप्प्र० → आ । अषाढानक्षत्रमेकद्वित्रितारकं च मन्यन्ते । अषाढायामषाढयोरषाढासु वा जातः = आषाढीयः । अनेन ईयण्प्र० → ईय । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम्-अषाढः । अनेनैव अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ श्राविष्ठः ]** श्रविष्ठासु जातः = श्राविष्ठः । 'भर्तु-सन्ध्यादेरण्' (६।२।८९) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आषाढः ]** अषाढासु जातः = आषाढः । 'भर्तु-सन्ध्यादेरण्' (६।२।८९) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ॥छ॥

### फल्गुन्याष्टः ॥ ६।३।१०६ ॥

**[ फल्गुन्याः ]** फल्गुनी पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० ।

**[ टः ]** ट प्रथमा सि ।

**[ फल्गुनः, फल्गुनी स्त्री ]** फल्गुनीभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि = फल्गुन्यौ । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप । 'ङ्यादेर्गौणस्या०' (२।४।९५) ङीनिवृत्तौ पुनः 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । फल्गुन्योर्जातः = फल्गुनः । अनेन टप्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । एवम्-फल्गुनी । अनेनैव टप्र० । ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक ।

**[ फाल्गुनः ]** फल्गुन्योर्जातः = फाल्गुनः । मतान्तरे 'जाते' (६।३।९८) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

टकारो ङ्यर्थः ॥छ॥

### बहुला-ऽनुराधा-पुष्यार्थ-पुनर्वसु-हस्त-विशाखा-स्वातेर्लुप् ॥ ६।३।१०७ ॥

**[ बहुलाऽनुराधापुष्यार्थपुनर्वसुहस्तविशाखास्वातेः ]** बहुला च अनुराधा च पुष्यार्थश्च पुनर्वसुश्च हस्तश्च विशाखा च स्वातिश्च = बहुलाऽनुराधापुष्यार्थपुनर्वसुहस्तविशाखास्वाति, तस्मात् ।

**[ लुप् ]** लुप् प्रथमा सि ।

**[ बहुलः ]** 卐''मघा-अप्-कृत्तिका बहौ'' इत्यर्थप्राधान्याद् बहुलाशब्दोऽपि स्त्री-बहुवचनान्तश्च लिङ्गानुशासने उक्तमेतत् । बहुलाः कृत्तिकाः ताभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि = बहुलाः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । बहुलासु जातः = बहुलः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्या०' (२।४।९५) आप्निवृत्तिः ।

卐 लिङ्गानुशासने श्लोकाङ्कः ॥९॥

**[ अनुराधः, अनूराधः ]** अनु 'राधं संसिद्धौ' (१३०४) राध् । अनुराध्यन्ते अनुराधयन्ति वा = अनुराधा । 'भावाऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० । अनुराधाभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि = अनुराधा । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । अनुराधासु जातः = अनुराधः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्या०' (२।४।९५) आप्निवृत्तिः । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) इति दीर्घत्वे अनूराधाः, तासु जातः = अनूराधः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण् । अनेन लुप् ।

**[ पुष्यः ]** पुष्येण चन्द्रयुक्तेन युक्तः कालोऽपि = पुष्यः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । पुष्ये जातः = पुष्यः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् ।

**[ तिष्यः ]** तिष्येण चन्द्रयुक्तेन युक्तः कालोऽपि = तिष्यः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । तिष्ये जातः = तिष्यः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् ।

**[ सिध्यः ]** सिध्येन चन्द्रयुक्तेन युक्तः कालोऽपि = सिध्यः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । सिध्ये जातः = सिध्यः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् ।

**[ पुनर्वसुः ]** पुनर्वसु पुंसि तथा च न्यासः । तिष्यश्च पुनर्वसू चेति अत्र चैकैव तारा विवक्षितेत्येकवचनान्तत्वम् । पुनर्वसुना चन्द्रयुक्तेन युक्तः कालोऽपि = पुनर्वसुः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । पुनर्वसौ जातः = पुनर्वसुः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् ।

**[ हस्तः ]** हस्तेन चन्द्रयुक्तेन युक्तः कालोऽपि = हस्तः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । हस्ते जातः = हस्तः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् ।

**[ विशाखः ]** विशाखया चन्द्रयुक्तया युक्तः कालोऽपि = विशाखा । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । विशाखायां जातः = विशाखः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् ।

**[ स्वातिः ]** स्वाति पुं-स्त्रीलिङ्गे वर्त्तते । स्वात्या स्वातिना वा चन्द्रयुक्तया युक्तः कालोऽपि = स्वातिः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । स्वातौ जातः = स्वातिः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० सर्वत्र ॥छ॥

### चित्रा-रेवती-रोहिण्याः स्त्रियाम् ॥ ६।३।१०८ ॥

**[ चित्रारेवतीरोहिण्याः ]** चित्रा च रेवती च रोहिणी च = चित्रारेवतीरोहिणी, तस्याः = चित्रारेवतीरोहिण्याः । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० ।

**[ स्त्रियाम् ]** स्त्री सप्तमी ङि । 'स्त्रियां ङितां वा०' (१।४।२८) ङि० → दाम्० → आम्० । 'स्त्रियाः' (२।१।५४) इय् ।

**[ चित्रा माणविका ]** चित्रायां(त्रया) चन्द्रयुक्तया युक्तः कालोऽपि = चित्रा । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । चित्रायां जाता = चित्रा । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् । कुत्सिता माणवा = माणविका । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्र० । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्०' (२।४।१११) इ ।

**[ रेवती ]** रेवत । 'रेवत-रोहिणाद् भे' (२।४।२६) ङी । रेवत्या चन्द्रयुक्तया युक्तः कालोऽपि = रेवती । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । रेवत्यां जाता = रेवती । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् ।

**[ रोहिणी ]** रोहिण । 'रेवत-रोहिणाद् भे' (२।४।२६) ङी । रोहिण्या चन्द्रयुक्तया युक्तः कालोऽपि = रोहिणी । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । रोहिण्यां जाता = रोहिणी । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् ।

**[ चैत्रः ]** चित्रायां जातः = चैत्रः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ रैवतः ]** रेवत्यां जातः = रैवतः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ रौहिणः ]** रोहिण्यां जातः = रौहिणः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा॥

**बहुलमन्येभ्यः** ॥ ६।३।१०९ ॥

**[ बहुलम् ]** 'बहुङ् वृद्धौ' (८७३) बह् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । बंहतेऽस्मात्कार्यजातमिति बहुलम् । 'स्था-वङ्कि-बंहि-बिन्दिभ्यः किन्नलुक् च' (उणा० ४८६) बहुलनिपात्यते । सि-अम् ।

**[ अन्येभ्यः ]** अन्य पञ्चमी भ्यस् ।

**[ अभिजित्, आभिजितः ]** अभि 'जिं अभिभवे' (८) जि । अभिजयतीति अभिजित् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक् । अभिजिता चन्द्रयुक्तया युक्तः कालोऽपि = अभिजित् । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । अभिजिति जातोऽभिजित् । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन अण्लुप् । यत्र न लुप् तत्र वृद्धिः ।

**[ अश्वयुक्, आश्वयुजः ]** अश्वयुजा चन्द्रयुक्तया युक्तः कालोऽपि = अश्वयुक् । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । अश्वयुजि जातः = अश्वयुक् । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन अण्लुप् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० । यत्राण् न लुप् तत्र वृद्धिः । प्रथमा सि ।

**[ शतभिषक्, शातभिषजः ]** शतभिषजा चन्द्रयुक्तया युक्तः कालोऽपि शतभिषक् । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । शतभिषजि जातः = शतभिषक् । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन अण्लुप् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० । यत्राण् लुप् तत्र न वृद्धिः ।

'वा जाते द्विः' (६।२।१३७) इति विकल्पेनाणो डित्त्वादन्त्यस्वरादिलोपः । अत्र न जाता लोपः ।

**[ कृत्तिकः, कार्त्तिकः ]** कृत्तिकाभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि = कृत्तिका । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । कृत्तिकासु जातः = कृत्तिकः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौण०' (२।४।९५) आप्निवृत्तिः । यत्राण् न लुप् तत्र वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ मृगशिरा:, मार्गशीर्ष: ]** स्वमते मृगशिर: क्लीबम् । गौडस्तु स्त्रियाम् । मृगशिरसा चन्द्रयुक्तया युक्त: कालोऽपि = मृगशिरा: । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । मृगशिरसि जात: = मृगशिरा:, मार्गशीर्ष: । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन अण्लुप् । प्रथमा सि । 'अभ्वादेरत्वस: सौ' (१।४।९०) दीर्घ: । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'सो रु:' (२।१।७२) स० → र० । 'शीर्ष: स्वरे तद्धिते' (३।२।१०३) शिरस्० → शीर्षदेश: । यत्र अण् न लुप् तत्र देश: कार्य: । प्रथमा सि । 'सो रु:' (२।१।७२) स० → र० ।

**[ अश्विन:, अश्विनी ]** अश्विनीभिश्चन्द्रयुक्ताभिर्युक्त: कालोऽपि = अश्विन: । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । अश्विनीषु जात: = अश्विन:, अश्विनी । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन नित्यं लुप् । 'ङ्यादेर्गौण०' (२।४।९५) ङीनिवृत्ति: । पुनरेव 'गौरादिभ्यो मुख्यान्ङी:' (२।४।१९) ङी ।

**[ राध:, राधा ]** राधया चन्द्रयुक्तया युक्त: कालोऽपि = राधा । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । राधासु जात: = राध: । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन नित्यं लुप् । 'ङ्यादेर्गौण०' (२।४।९५) आप्निवृत्ति: । पुनरेव आप् ।

**[ श्रवण:, श्रवणा ]** श्रवणेन चन्द्रयुक्तेन युक्त: कालोऽपि = श्रवण: । श्रवणेन चन्द्रयुक्तेन युक्ता रात्रिरपि = श्रवणा । 'श्रवणा-ऽश्वत्थान्नाम्न्य:' (६।२।८) अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । श्रवणे जात:, श्रवणायां जाता वा । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् ।

**[ उत्तर:, उत्तरा ]** उत्तरानक्षत्रं स्त्रीत्वे वर्त्तते । उत्तरया चन्द्रयुक्तया युक्त: कालोऽपि = उत्तरा । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । उत्तरायां जात: - जाता वा । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । अनेन लुप् ।

क्वचिन्न भवति-

**[ माघ: ]** मघाभिश्चन्द्रयुक्ताभिर्युक्त: कालोऽपि मघा । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । मघासु जात: = माघ: । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । वृद्धि: आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आश्वत्थ: ]** अश्वत्थो मुहूर्त्त: - अश्विनी वा कथ्यते । अश्वत्थेन मुहूर्त्तेन चन्द्रयुक्तेन युक्तो मासोऽश्वत्थ: । 'श्रवणा-ऽश्वत्थान्नाम्न्य:' (६।२।८) अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अश्वत्थे भव: = आश्वत्थ: । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धि: स्वरे०' (७।४।१) वृद्धि: आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रोष्ठपाद: ]** प्रोष्ठो गौस्तस्येव पादौ यासां ता: । 'सुप्रात-सुश्व-सुदिव-शारिकुक्ष-चतुरस्त्रैणीपदा-ऽजपद-प्रोष्ठपद-भद्रपदम्' (७।३।१२९) डप्र० - पददेश: । प्रोष्ठपद 'आत्' (२।४।१८) आप्प्र० → आ । प्रोष्ठपदाभिश्चन्द्रयुक्ताभिर्युक्त: कालोऽपि प्रोष्ठपदा । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । प्रोष्ठपदासु जात: = प्रोष्ठपाद: । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'प्रोष्ठ-भद्राज्जाते' (७।४।१३) उत्तरपदवृद्धि: । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रु:' (२।१।७२) स० → र० ।

**[ भद्रपाद: ]** भद्राणि पदानि यस्यां सा = भद्रपदा । भद्रपदाभिश्चन्द्रयुक्ताभिर्युक्त: कालोऽपि = भद्रपदा । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । भद्रपदासु जात: = भद्रपाद: । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'प्रोष्ठ-भद्राज्जाते' (७।४।१३) इत्यनेन उत्तरपदवृद्धि: । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रु:' (२।१।७२) स० → र० ।।छ।।

**स्थानान्त-गोशाल-खरशालात्** ॥ ६।३।११० ॥

**[ स्थानान्तगोशालखरशालात् ]** स्थानशब्दोऽन्ते यस्य सः = स्थानान्तः । स्थानान्तश्च गोशालश्च खरशालश्च = स्थानान्तगोशालखरशालम्, तस्मात् ।

**[ गोस्थानः ]** गो 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै०' (२।३।९८) स्था । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' **(** न्या० सं० वक्ष०(१) सूत्र (२९) **)** स्था । स्थीयतेऽस्मिन्निति स्थानम् । अनट्प्र० → अन । 'ओदौतोऽवाव्' (१।२।२४) अव् । गवां स्थानं = गोस्थानम् । 'गोस्थाने जातः = गोस्थानः । 'जाते' (६।३।९८) अण्प्र० । अनेन लुप् ।

**[ अश्वस्थानः ]** अश्वानां स्थानमश्वस्थानम् । अश्वस्थाने जातोऽश्वस्थानः । 'जाते' (६।३।९८) अण्प्र० । अनेन लुप् ।

**[ गोशालः ]** गवां शाला = गोशालम् । 'क्लीबे' (२।४।९७) ह्रस्वः । गोशाले जातः = गोशालः । 'जाते' (६।३।९८) अण्प्र० । अनेन लुप् ।

**[ खरशालः ]** खराणां शाला = खरशालम् । 'क्लीबे' (२।४।९७) ह्रस्वः । खरशाले जातः = खरशालः । 'जाते' (६।३।९८) अण्प्र० । अनेन लुप् ।

नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात्-

**[ गोस्थानः ]** स्थीयतेऽस्यामिति स्थानी । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'समानानां०' (१।२।१) दीर्घः । 'अणञेयेकण्०' (२।४।२०) ङी । गवां स्थानी = गोस्थानी । गोस्थान्यां जातः = गोस्थानः । 'जाते' (६।३।९८) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौणस्या०' (२।४।९५) ङीनिवृत्तिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गोशालः ]** गवां शाला = गोशाला । गोशालायां जातः = गोशालः । 'जाते' (६।३।९८) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौण०' (२।४।९५) आप्निवृत्तिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ खरशालः ]** खराणां शाला = खरशाला । खरशालायां जातः = खरशालः । 'जाते' (६।३।९८) अण्प्र० । अनेन लुप् । 'ङ्यादेर्गौण०' (२।४।९५) आप्निवृत्तिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**वत्सशालाद्वा** ॥ ६।३।१११ ॥

**[ वत्सशालात् ]** वत्सशाल पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ वत्सशालः, वात्सशालः ]** वत्सानां शाला = वत्सशालम् । 'क्लीबे' (२।४।९७) ह्रस्वः । लिङ्गानुशासने-"सेना-शाला-सुराच्छाया-निशा वोर्णा शशात्परा । भाद्गणो गृहतः स्थूणा, संख्यादन्ता शतादिका" ॥१२॥ क्लीबत्वस्य विधानात् स्त्री-क्लीबः शब्दः इत्युक्तं लिङ्गानुशासने । वत्सशाले जातः = वत्सशालः, वात्सशालः । 'जाते' (६।३।९८) अण्प्र० → अ । अनेन अण् वा लुप् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**सोदर्य-समानोदर्यौ** ॥ ६।३।११२ ॥

**[ सोदर्यसमानोदर्यौ ]** सोदर्यश्च समानोदर्यश्च = सोदर्यसमानोदर्यौ ।

**[ सोदर्यः, समानोदर्यो भ्राता ]** समानोदरे जातः = सोदर्यः । अनेन यप्र० । अत एव निर्देशात् समानस्य सः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अनेन समानोदर्य निपात्यते, ततो निपातनादेव च जातार्थमात्रत्वेऽपि भ्रातरश्च भगिन्यश्चेत्येकशेषः । भ्रातृष्वेवाभिधानं न कृमिमलादिषु नाम्नीत्यधिकाराद्वा ॥छ॥

**कालाद् देये ऋणे** ॥ ६।३।११३ ॥

**[ कालात् ]** काल पञ्चमी ङसि ।

**[ देये ]** देय सप्तमी ङि ।

**[ ऋणे ]** ऋण सप्तमी ङि ।

**[ मासिकम् ]** मासे देयमृणं = मासिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आर्द्धमासिकम् ]** अर्द्धमासे देयमृणम् = आर्द्धमासिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सांवत्सरिकमृणम् ]** संवत्सरे देयमृणं = सांवत्सरिकमृणम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मासादिके गते देयमित्यर्थः ।

**[ स्वस्तिवाचनम् ]** स्वस्ति 'वचंक् भाषणे' (१०९६) वच् । वचन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । वाच्यते = वचनम् । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । यौजादिकः 'वचण्(परि)भाषणे' (१९५३) वच । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलोपः । वच्यते = वचनम् । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । 'णेरनिटि' (४।३।८३) णिलुक् । स्वस्ति वाचनं = स्वस्तिवाचनम् ।।छ।।

**कलाप्यश्वत्थ-यवबुसोमाव्यासैषमसोऽकः** ॥ ६।३।११४ ॥

**[ कलाप्यश्वत्थयवबुसोमाव्यासैषमसः ]** कलापी च अश्वत्थश्च यवबुसश्च उमाव्यासश्च ऐषमस् च = कलाप्यश्वत्थयवबुसोमाव्यासैषमस्, तस्मात् ।

**[ अकः ]** अक प्रथमा सि ।

**[ कलापकम् ]** यस्मिन् काले मयूराः केदाराः इक्षवः कलापिनो भवन्ति स कालस्तत्साहचर्यात् कलापी, तत्र देयमृणं = कलापकम् । अनेन अकप्र० । 'कलापि-कुथुमि-तैतलि-जाजलि-लाङ्गलि-शिखण्डि-शिलालि-सब्रह्मचारि-पीठसर्पि-सूकरसद्म-सुपर्वणः' (७।४।६२) इत्यादिना, 'नोऽपदस्य तद्धिते' (७।४।६१) इति वा अन्त्यस्वरादिलोपः ।

**[ अश्वत्थकम् ]** यस्मिन् कालेऽश्वत्थाः फलन्ति स कालोऽश्वत्थफलसहचरितोऽश्वत्थः, तत्र देयमृणमश्वत्थकम् । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ यवबुसकम् ]** यस्मिन् काले यवानां बुसं भवति स कालो यवबुसम्, तत्र देयमृणं = यवबुसकम् । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ उमाव्यासकम् ]** उमा-अतसीनाम्ना(म) वृक्षः । 'असूच् क्षेपणे' (१२२१) अस्, विपूर्व० । व्यस्यन्ते-विक्षिप्यन्ते यस्मिन् स काल उमाव्यासः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । तत्र देयमृणमुमाव्यासकम् । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ ऐषमकम् ]** ऐषमोऽस्मिन् संवच्छरे देयमृणमैषमकम् । अनेन अकप्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लोपः । 'ऐषमो-ह्यः-श्वसो वा' (६।३।१९) त्यच्, 'सायं-चिरं-प्राह्णे०' (६।३।८८) तनटोः प्राप्तौ अयं अकप्र० । सि-अम् ।।छ।।

**ग्रीष्मा-ऽवरसमादकञ्** ॥ ६।३।११५ ॥

**[ ग्रीष्माऽवरसमात् ]** ग्रीष्मश्च अवरसमश्च(मा च) = ग्रीष्माऽवरसमम्, तस्मात् ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

'भर्तु-सन्ध्यादेरण्' (६।३।८९) - 'वर्षा-कालेभ्यः' (६।३।८०) अणिकणोरपवादः ।

**[ ग्रैष्मकम् ]** ग्रीष्मे देयमृणं = ग्रैष्मकम् । अनेन अकञ्प्र० → अक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आवरसमकम् ]** अवरा चासौ समा च = अवरा(र)समा । यद्वा समाया अवरत्वमित्यवरसमम् । अवरसमायां अवरसमे वा देयमृणम् = आवरसमकम् । अनेन अकञ्प्र० → अक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ आपरसमकम् ]** अपरा समा = अपरसमम् । 'क्लीबे' (२।४।९७) ह्रस्वः । अपरसमे भवम् = आपरसमकम् । मतान्तरे अनेन अकञ्प्र० → अक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

**संवत्सरा-ऽऽग्रहायण्या इकण् च** ॥ ६।३।११६ ॥

**[ संवत्सराऽऽग्रहायण्याः ]** संवत्सरश्च आग्रहायणी च = संवत्सराऽऽग्रहायणी, तस्याः = संवत्सराऽऽग्रहायण्याः । पञ्चमी ङसि ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

'संवत्सरात् फल-पर्वणोः' (६।३।९०) - 'वर्षा-कालेभ्यः' (६।३।८०) इत्याभ्यां अणिकणोरपवादः । 'कालाद् देये ऋणे' (६।३।११३) इत्यस्य च ।

**[ सांवत्सरिकम्, सांवत्सरकम् ]** संवत्सरे देयं ऋणं फलं पर्व वा = सांवत्सरिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । एवम्-सांवत्सरकम् । अनेनैव अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[आग्रहायणिकम्, आग्रहायणकम्]** अग्रं हायनस्य = अग्रहायणम्(णः) । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) न० → ण० । अग्रहायण एव = आग्रहायणी । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । आग्रहायण्यां देयं ऋणम् = आग्रहायणिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । एवम्-आग्रहायणकम् । अनेन अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् ।

वेत्यकृत्वा इकण्विधानं 'संवत्सरात् फल-पर्वणोः' (६।३।९०) इत्यण्बाधनार्थम् ॥छ॥

**साधु-卐पुष्यत्-पच्यमाने** ॥ ६।३।११७ ॥

**[ साधुपुष्यत्पच्यमाने ]** साधुश्च पुष्यच्च पच्यमानश्च = साधुपुष्यत्पच्यमानम्, तस्मिन् ।

**[ हैमनमनुलेपनम्, हैमन्तम्, हैमन्तिकम् ]** हेमन्ते साधु = हैमनम्, हैमन्तम् । 'हेमन्ताद्वा तलुक् च' (६।३।९१) अण्प्र० → अ - तलुक् च विकल्पेन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । एवम्-हैमन्तिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

卐 हैमप्रकाशे - "पुष्यत्" ।

**[ वासन्त्यः कुन्दलताः ]** वसन्त । वसन्ते पुष्यन्ति = वासन्त्यः । 'भर्तु-सन्ध्या०' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । प्र० जस् । कुन्दलता इत्यर्थः ।

**[ ग्रैष्म्यः पाटलाः ]** ग्रीष्मे पुष्यन्ति = ग्रैष्म्यः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । प्र० जस् । पाटलाः ।

**[ शारदाः शालयः ]** शरद् । शरदि पच्यन्ते = शारदाः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । प्र० जस् । शालयः ।

**[ शैशिरा मुद्गाः ]** शिशिरे पच्यन्ते = शैशिराः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । मुद्गाः ॥छ॥

### **उप्ते** ॥ ६।३।११८ ॥

**[ उप्ते ]** उप्त सप्तमी ङि ।

**[ शारदा यवाः ]** शरद् । शरदि उप्ताः = शारदाः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । प्र० जस् । यवाः ।

**[ हैमनाः ]** हेमन्ते उप्ताः = हैमनाः । 'हेमन्ताद्वा तलुक् च' (६।३।९१) अण्प्र० → अ - तलुक् च । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । प्र० जस् ।

**[ ग्रैष्माः ]** ग्रीष्मे उप्ताः = ग्रैष्माः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् ।

**[ नैदाघाः ]** निदाघे उप्ताः = नैदाघाः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् ॥छ॥

### **आश्वयुज्या अकञ्** ॥ ६।३।११९ ॥

**[ आश्वयुज्याः ]** आश्वयुजी पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

**[ आश्वयुजका माषाः ]** अश्वयुज् । अश्विनीभिश्चन्द्रयुक्ताभिर्युक्ता या पौर्णमासी सा = आश्वयुजी । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० → अ । वृद्धिः आ । 'अणञेयेकण्०' (२।४।२०) ङी । अश्विनीपर्यायोऽश्वयुक्शब्दः । आश्वयुज्यां कौमुद्यामुप्ताः = आश्वयुजकाः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्र० जस् । माषाः ॥छ॥

### **ग्रीष्म-वसन्ताद्वा** ॥ ६।३।१२० ॥

**[ ग्रीष्मवसन्तात् ]** ग्रीष्मश्च वसन्तश्च = ग्रीष्मवसन्तम्, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ ग्रैष्मकं, ग्रैष्मं सस्यम् ]** ग्रीष्मे उप्तं = ग्रैष्मकम् । अनेन वा अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । एवम्-ग्रैष्मम् । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । सस्यम् ।

**[ वासन्तकं, वासन्तं सस्यम् ]** वसन्ते उप्तं = वासन्तकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । एवम्-वासन्तम् । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । सस्यम् ॥छ॥

## **व्याहरति मृगे** ॥ ६।३।१२१ ॥

**[ व्याहरति ]** व्याहरत् सप्तमी ङि ।

**[ मृगे ]** मृग सप्तमी ङि । 'मृगण् अन्वेषणे' (१९३०) मृग । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । मृग्यते = मृगः । 'युवर्ण-वृ-दृ०' (५।३।२८) अल्प्र० → अ, तस्मिन् ।

**[ नैशिको नैशो वा शृगालः ]** निशा । निशायां व्याहरति = नैशिकः । 'निशा-प्रदोषात्' (६।३।८३) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम्-नैशः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । शृगालः ।

**[ प्रादोषिकः, प्रादोषो वा शृगालः ]** प्रदोष । प्रदोषे व्याहरति = प्रादोषिकः । 'निशा-प्रदोषात्' (६।३।८३) इकण्प्र० → इक - विकल्पेन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । एवम्-प्रादोषः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शृगालः ॥छ॥

## **जयिनि च** ॥ ६।३।१२२ ॥

**[ जयिनि ]** जयः-प्रसहनमभ्यासः, सोऽस्यास्तीति जयी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तस्मिन् ।

**[ च ]** च प्रथमा सि ।

**[ नैशिकः, नैशः ]** निशासहचरितमध्ययनं = निशा, तत्र जयी साभ्यासः = नैशिकः । 'निशा-प्रदोषात्' (६।३।८३) इकण्प्र० → इक । एवम्-नैशः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ प्रादोषिकः, प्रादोषः ]** प्रदोषसहचरितमध्ययनं = प्रदोषस्तत्र जयी साभ्यासः = प्रादोषिकः । 'निशा-प्रदोषात्' (६।३।८३) इकण्प्र० → इक । एवम्-प्रादोषः । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वासन्तः ]** वसन्तसहचरितमध्ययनं = वसन्तस्तत्र जयी = वासन्तः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वार्षिकः ]** वर्षा । वर्षासु भवः = वार्षिकः । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## भवे ॥ ६।३।१२३ ॥

**[ भवे ]** 'भू सत्तायाम्' (१) भू । भवनं = भवः । 'अच्' (५।१।४९) अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव्, तस्मिन् ।

**सत्ता भवत्यर्थो गृह्यते, न जन्म, जात इत्यनेन गतार्थत्वात् ।**

**[ स्रौघ्नः ]** स्रुघ्ने भवः = स्रौघ्नः । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माथुरः ]** मथुरायां भवः = माथुरः । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ औत्सः ]** उत्से भवः = औत्सः । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नादेयः ]** नद्यां भवः = नादेयः । 'नद्यादेरेयण्' (६।३।२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ राष्ट्रियः ]** राष्ट्रे भवः = राष्ट्रियः । 'राष्ट्रादियः' (६।३।३) इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पारावारीणः ]** अवारस्य पारं = पारावारम् । पारावारे भवः = पारावारीणः । 'पारावारादीनः' (६।३।६) ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ग्राम्यः ]** ग्रामे भवः = ग्राम्यः । 'ग्रामादीनञ् च' (६।३।९) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ग्रामीणः ]** ग्रामे भवः = ग्रामीणः । 'ग्रामादीनञ् च' (६।३।९) ईनञ्प्र० → ईन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → णत्वम् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा॥

## दिगादि-देहांशाद् यः ॥ ६।३।१२४ ॥

**[ दिगादिदेहांशात् ]** दिग् आदिर्यस्याऽसौ दिगादिः । देहस्य अंशः = देहांशः । दिगादिश्च देहांशश्च = दिगादिदेहांशम्, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

**[ दिश्यः ]** दिश् । दिशि भवः = दिश्यः । अनेन यप्र० ।

**[ वर्ग्यः ]** वर्ग । वर्गे भवः = वर्ग्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अप्सव्यः ]** अप्सु भवः = अप्सव्यः । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'अपो य-योनि-मति-चरे' (३।२।२८) इत्यलुप् ।

**[ मूर्द्धन्यः ]** मूर्द्धन् । मूर्द्धनि भवः = मूर्द्धन्यः । अनेन यप्र० । 'अनोऽट्ये-ये' (७।४।५१) इत्यनो लोपाभावः ।

**[ दन्त्यः ]** दन्तेषु भवः = दन्त्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कर्ण्यः ]** कर्णयोर्भवः = कर्ण्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ओष्ठ्यः ]** ओष्ठे भवः = ओष्ठ्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पाण्यः ]** पाणौ भवः = पाण्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पद्यः ]** पादयोर्भवः = पद्यः । अनेन यप्र० । 'हिम-हति-काषि-ये पद्' (३।२।९६) पद् ।

**[ तालव्यः ]** तालु । तालौ भवः = तालव्यः । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ मुख्यः ]** मुखे भवः = मुख्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ जघन्यः ]** जघने भवः = जघन्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कण्ठतालव्यः ]** कण्ठश्च तालुश्च(तालु च) = कण्ठतालु । कण्ठतालुनि भवः = कण्ठतालव्यः । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ दन्तोष्ठ्यः ]** दन्तश्च ओष्ठश्च = दन्तोष्ठः । दन्तोष्ठे भवः = दन्तोष्ठ्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मुख्यः ]** मुख । सेनाया यन्मुखं तत्र भवः = मुख्यः । अनेन यप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ जघन्यः ]** जघन । सेनाया यज्जघनं तत्र भवः = जघन्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वंश्यः ]** वंशोऽन्वयस्तत्र भवः = वंश्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अनुवंश्यः ]** अनुगतो वंशोऽनुवंशः, तत्र भवः = अनुवंश्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

### **नाम्न्युदकात्** ॥ ६।३।१२५ ॥

**[ नाम्नि ]** नामन् सप्तमी ङि । 'ई-ङौ वा' (२।१।१०९) अलोपः ।

**[ उदकात् ]** उदक पञ्चमी ङसि । 'ङे-ङस्योर्या-ऽऽतौ' (१।४।६) ङसि० → आत् ।

**[ उदक्या रजस्वला ]** उदकेषु भवा = उदक्या । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । रजस्वला ऋतुमती उच्यते ।

**[ औदको मत्स्यः ]** उदके भवः = औदकः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । मत्स्यः ॥छ॥

### **मध्याद् दिनण्-णेया मोऽन्तश्च** ॥ ६।३।१२६ ॥

**[ मध्यात् ]** मध्य पञ्चमी ङसि ।

**[ दिनण्णेयाः ]** दिनण् च णश्च ईयश्च = दिनण्णेयाः ।

**[ मोऽन्तश्च ]** म प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अन्त प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ माध्यंदिना उद्गायन्ति ]** मध्य । मध्ये भवाः = माध्यंदिनाः । अनेन दिनण्प्र० → दिन - मोऽन्तश्च । प्र० जस् । उत् कैं (३६) - 'गैं शब्दे' (३७) गै । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) आय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । यद्यपि सामान्येन मध्यशब्दाद्दिनणुक्तस्तथापि दिनण्प्रत्यये सति शब्दशक्ति स्वाभाव्या(त्) मध्यशाखोद्भवा उच्यन्ते ।

**[ माध्यमः ]** मध्ये भवः = माध्यमः । अनेन णप्र० → अ । 'वृद्धिः स्वरेष्वादेञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मध्यमीयः ]** मध्ये भवः = मध्यमीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मध्यंदिनः ]** मध्ये भवः = मध्यंदिनः । मतान्तरेऽनेन दिनप्र०-मोऽन्तश्च ॥छ॥

## जिह्वामूला-ऽङ्गुलेश्चेयः ॥ ६।३।१२७ ॥

**[ जिह्वामूलाऽङ्गुलेः ]** जिह्वामूलश्च अङ्गुलिश्च = जिह्वामूलाऽङ्गुलि, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ ईयः ]** ईय प्रथमा सि ।

'दिगादि-देहांशाद् यः' (६।३।१२४) इत्यादिना यापवादः ।

**[ जिह्वामूलीयः ]** जिह्वामूले भवः = जिह्वामूलीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अङ्गुलीयः ]** अङ्गुलौ भवः = अङ्गुलीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ मध्यीयः ]** मध्ये भवः = मध्यीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

चकारो मध्यशब्दानुकर्षणार्थं-मागमाबाधनार्थम् (मागमाभावार्थम्) ॥छ॥

## वर्गान्तात् ॥ ६।३।१२८ ॥

**[ वर्गान्तात् ]** वर्गो अन्ते यस्य सः = वर्गान्तः, तस्मात् ।

**[ कवर्गीयो वर्णः ]** कवर्गे भवः = कवर्गीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । वर्णः ।

**[ पवर्गीयो वर्णः ]** पवर्गे भवः = पवर्गीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । वर्णः ॥छ॥

## ईन-यौ चाऽशब्दे ॥ ६।३।१२९ ॥

**[ ईनयौ ]** ईनश्च यश्च = ईनयौ ।

**[ च ]** च प्रथमा सि ।

**[ अशब्दे ]** न शब्दोऽशब्दः, तस्मिन् = अशब्दे । 'नञत्' (३।२।१२५) न० → अ० ।

**[ भरतवर्गीणः, भरतवर्ग्यः, भरतवर्गीयः ]** भरतवर्ग । भरतवर्गे भवः = भरतवर्गीणः, भरतवर्ग्यः, भरतवर्गीयः । अनेन ईन-य-ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । भरतपक्ष इत्यर्थः ।

**[ बाहुबलिवर्गीणः, बाहुबलिवर्ग्यः, बाहुबलिवर्गीयः ]** बाहु-बल । बाहोर्बलं = बाहुबलम् । बाहुबलमत्रास्ति = बाहुबली । 'बाहूर्वादेर्बलात्' (७।२।६६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अथवा बाहुबलिशब्दः प्रकृत्यन्तरमस्ति । बाहुबलिनो बाहुबलेर्वा वर्गः = बाहुबलिवर्गः । बाहुबलिवर्गौ(र्गे) भवः = बाहुबलिवर्गीणः, बाहुबलिवर्ग्यः, बाहुबलिवर्गीयः । अनेन ईन-य-ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ युष्मद्वर्गीणः, युष्मद्वर्ग्यः, युष्मद्वर्गीयः ]** युष्मद्-वर्ग । युष्माकं वर्गः = युष्मद्वर्गः । युष्मद्वर्गे भवः = युष्मद्वर्गीणः, युष्मद्वर्ग्यः, युष्मद्वर्गीयः । अनेन ईन-य-ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ अस्मद्वर्गीणः, अस्मद्वर्ग्यः, अस्मद्वर्गीयः ]** अस्मद्-वर्ग । अस्माकं वर्गः = अस्मद्वर्गः । अस्मद्वर्गे भवः = अस्मद्वर्गीणः, अस्मद्वर्ग्यः, अस्मद्वर्गीयः । अनेन ईन-य-ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ कवर्गीयः ]** कवर्गे भवः = कवर्गीयः । 'वर्गान्तात्' (६।३।१२८) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

### दृति-कुक्षि-कलशि-वस्त्यहेरेयण् ॥ ६।३।१३० ॥

**[ दृतिकुक्षिकलशिवस्त्यहेः ]** दृतिश्च कुक्षिश्च कलशिश्च वस्तिश्च अहिश्च = दृतिकुक्षिकलशिवस्त्यहि, तस्मात् ।

**[ एयण् ]** एयण् प्रथमा सि ।

**[ दार्त्तेयं जलम् ]** दृतौ - चर्मखल्वायां भवं = दार्त्तेयम् । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । जलम् ।

**[ कौक्षेयो व्याधिः ]** कुक्षि । कुक्षौ-देहांशे भवः = कौक्षेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक्, व्याधिः ।

**[ कालशेयं तक्रम् ]** कलश इवाचरति । 'कर्तुः क्विप्०' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक् । 'पदि-पठि-पचि-स्थलि-हलि-कलि-बलि-वलि-वल्लि-पल्लि-कटि-चटि-वटि-वधि-गाध्यर्चि-वन्दि-नन्द्यवि-वशि-वाशि-काशि-छर्दि-तन्त्रि-मन्त्रि-खण्डि-मण्डि-चण्डि-यत्यञ्जि-मस्यसि-वनि-ध्वनि-सनि-गमि-तमि-ग्रन्थि-श्रन्थि-जनि-मण्यादिभ्यः' (उणा० ६०७) इप्र० । 'अतः' (४।३।८२) अलुक् । 'इतोऽक्त्यर्थात्' (२।४।३२) ङी । कलश्यां-मन्थन्यां भवं = कालशेयम् । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् । तक्रम् ।

**[ वास्तेयं पुरीषम् ]** वस्तौ-पुरीषनिर्गमरन्ध्रे भवं = वास्तेयम् । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । पुरीषम् ।

**[ आहेयं विषम् ]** अहौ भवम् = आहेयम् । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् । विषम् ॥छ॥

### आस्तेयम् ॥ ६।३।१३१ ॥

**[ आस्तेयम् ]** आस्तेय सि-अम् ।

**[ आस्तेयम् ]** अस्ति धने विद्यमाने वा भवम् = आस्तेयम् । अथवा असृज्-असृजि भवमास्तेयम् । उभयवाक्ये अनेन एयण्प्र० → एय-असृज्शब्दस्य अस्त्यादेशश्च । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ॥छ॥

**ग्रीवातोऽण् च** ॥ ६।३।१३२ ॥

**[ ग्रीवातः ]** ग्रीवा । ग्रीवायां = ग्रीवातः । 'अहीय-रुहोऽपादाने' (७।२।८८) तसुप्र० → तस् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

'दिगादि-देहांशाद् यः' (६।३।१२४) इत्यादिना यस्य स अपवादः ।

**[ ग्रैवम्, ग्रैवेयम् ]** ग्रीवा । ग्रीवासु भवं = ग्रैवम्, ग्रैवेयम् । अनेन अण्प्र० → अ । एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

ग्रीवाशब्दो यदा शिरोधमनीवचनस्तदा तासां बहुत्वाद्बहुवचनम् । ग्रीवासु इति बहुत्वे एव प्रत्ययः, नैकत्वे अनभिधानात् । अतः पाणिनीयसूत्रे **ग्रीवाभ्य एव** इति बहुवचनान्त उपात्तः ग्रीवाशब्दः ॥छ॥

**चतुर्मासान्नाम्नि** ॥ ६।३।१३३ ॥

**[ चतुर्मासात् ]** चतुर्मास पञ्चमी ङसि ।

**[ नाम्नि ]** नामन् सप्तमी ङि । 'ई-ङौ वा' (२।१।१०९) अलुक् ।

**[ चातुर्मासी ]** चतुर्षु मासेषु भवा = चातुर्मासी । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । आषाढी कार्त्तिकी फाल्गुनी च पौर्णमासी भण्यते । 'संख्या समाहारे च द्विगुश्चाऽनाम्न्यम्' (३।१।९९) इत्यादिना द्विगुः समासः । अत्र 'द्विगोरनपत्ये०' (६।१।२४) इत्यादिना प्रत्ययस्य लुब् भवति ।

**[ चतुर्मासः ]** चतुर्षु मासेषु भवः = चतुर्मासः । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) लुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**यज्ञे ञ्यः** ॥ ६।३।१३४ ॥

**[ यज्ञे ]** यज्ञ सप्तमी ङि ।

**[ ञ्यः ]** ञ्य प्रथमा सि ।

**[ चातुर्मास्यानि यज्ञकर्माणि ]** चतुर्षु मासेषु भवानि = चातुर्मास्यानि । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । यज्ञरूपाणि कर्माणि = यज्ञकर्माणि ॥छ॥

**गम्भीर-पञ्चजन-बहिर्देवात्** ॥ ६।३।१३५ ॥

**[ गम्भीरपञ्चजनबहिर्देवात् ]** गम्भीरश्च पञ्चजनश्च बहिश्च दि(दे)वश्च = गम्भीरपञ्चजनबहिर्देवम्, तस्मात् ।

**[ गाम्भीर्यः ]** गम्भीरे भवः = गाम्भीर्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पाञ्चजन्यः ]** पञ्चजने भवः = पाञ्चजन्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अनयोः संज्ञाविवक्षणात् द्विगुत्वाभावे लुब्भावः ।

**[ बाह्यः ]** बहिस् । बहिर्भवः = बाह्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'प्रायोऽव्ययस्य' (७।४।६५) इस्लुक् ।

**[ दैव्यः ]** देवे भवः = दैव्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गाम्भीरः ]** गम्भीरे जातः = गाम्भीरः । 'जाते' (६।३।९८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पाञ्चजनः ]** पञ्चजने जातः = पाञ्चजनः । 'जाते' (६।३।९८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पञ्चजनः ]** पञ्चसु जनेषु जातः = पञ्चजनः । रथकारपञ्चमस्य चातुर्वर्णस्य पञ्चजनस्येति संज्ञेयम् । 'जाते' (६।३।९८) अण्प्र० → अ । 'द्विगोरनपत्ये०' (६।१।२४) अण्लुप् ।

**[ बाहीकः ]** बहिस् । बहिर्जातः = बाहीकः । 'बहिषष्टीकण् च' (६।१।१६) टीकण्प्र० → ईक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'प्रायोऽव्ययस्य' (७।४।६५) इस्लुक् ।

**[ दैवः ]** देवादागतः = दैवः । 'देवाद् यञ् च' (६।१।२१) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बाहीकः ]** बहिस् । बहिर्भवः = बाहीकः । मतान्तरे 'बहिषष्टीकण् च' (६।१।१६) टीकण्प्र० → ईक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'प्रायोऽव्ययस्य' (७।४।६५) इस्लुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा॥

## परिमुखादेरव्ययीभावात् ॥ ६।३।१३६ ॥

**[ परिमुखादेः ]** परिमुख(खं) आदिर्यस्य सः = परिमुखादिः, तस्मात् ।

**[ अव्ययीभावात् ]** अव्ययीभाव पञ्चमी ङसि । इंण्क् गतौ (१०७५) इ, न-विपूर्व० । वर्त्त० तिव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् । न क्षयं यातीत्यव्ययम् । 'अच्' (५।१।४९) अच्प्र० → अ । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नञत्' (३।२।१२५) न० → अ० । अग्रे 'भू सत्तायाम्' (१) भू । अनव्ययोऽव्ययो भवतीति अव्ययीभावः । 'वा ज्वलादि-दु-नी-भू-ग्रहा-ऽऽस्रोर्णः' (५।१।६२) णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'कृ-भ्वस्तिभ्यां०' (७।२।१२६) च्विप्र० । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलुक्, तस्मात् = अव्ययीभावात् ।

**[ पारिमुख्यः ]** परितः = सर्वतो मुखं = परिमुखम् । अत एव वचनादव्ययीभावः-वर्जनार्थो वा परि । मुखात् परि = परिमुखम् । 'पर्यपा-ऽऽङ्-बहिरच् पञ्चम्या' (३।१।३२) इत्यादिना अव्ययीभावः । परिमुखे भवः = पारिमुख्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पारिहनव्यः ]** हनोः परि = परिहनुः । परिहनौ भवः = पारिहनव्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ पार्योष्ठ्यः ]** ओष्ठात् परि = पर्योष्ठः । पर्योष्ठे भवः = पार्योष्ठ्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'विभक्ति-समीप०' (३।१।३९) इत्यादिना अव्ययीभावः समासः सर्वेषु उदाहरणेषु ।

**[ औपकूलम् ]** कूलस्य समीपम् = उपकूलम् । उपकूले भवम् = औपकूलम् ।

**[ औपमूलम् ]** मूलस्य समीपम् = उपमूलम् । उपमूले भवम् = औपमूलम् ।

**[ औपशाखम् ]** शाखायाः समीपम् = उपशाखम् । 'क्लीबे' (२।४।९७) ह्रस्वः । उपशाखे भवम् = औपशाखम् ।

**[ औपकुम्भम् ]** कुम्भस्य समीपम् = उपकुम्भम् । उपकुम्भे भवम् = औपकुम्भम् ।

**[ औपखलम् ]** खलस्य समीपम् = उपखलम् । उपखले भवम् = औपखलम् । सर्वत्र 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ आनुकुम्भम् ]** कुम्भस्य अनु-पश्चात्-समीपं वा = अनुकुम्भम् । अनुकुम्भे भवम् = आनुकुम्भम् ।

**[ आनुकूलम् ]** कूलस्य अनु-पश्चात्-समीपं वा = अनुकूलम् । अनुकूले भवम् = आनुकूलम् ।

**[ आनुखलम् ]** खलस्य अनु-पश्चात्-समीपं वा = अनुखलम् । अनुखले भवम् = आनुखलम् । सर्वत्र 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ पारिमुखः ]** परिग्लानो मुखाय = परिमुखः । 'प्रात्यव-परि-निरादयो गत-क्रान्त-क्रुष्ट-ग्लान-क्रान्ताद्यर्थाः प्रथमाद्यन्तैः' (३।१।४७) इत्यादिना समासः । परिमुखे भवः = पारिमुखः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अनुवंश्यः ]** वंशस्य अनु-पश्चात् = अनुवंशः । अनुवंशे भवः = अनुवंश्यः । 'दिगादि-देहांशाद् यः' (६।३।१२४) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

### अन्तःपूर्वादिकण् ॥ ६।३।१३७ ॥

**[ अन्तःपूर्वात् ]** अन्तः पूर्वपदं यस्य सः = अन्तःपूर्वः । 'ते लुग्वा' (३।२।१०८) पदलुक्, तस्मात् ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ आन्तरगारिकः ]** अन्तर् । अगारस्यान्तः = अन्तरगारम् । 'पारे-मध्ये-ऽग्रे-ऽन्तः षष्ठ्या वा' (३।१।३०) अव्ययीभावः समासः । अन्तरगारे भवः = आन्तरगारिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आन्तर्गेहिकः ]** गेहस्य अन्तः = अन्तर्गेहम् । अन्तर्गेहं अन्तर्गेहे वा भवः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आन्तर्वेश्मिकः ]** अन्तर्-वेश्मन् । वेश्मनोऽन्तः = अन्तर्वेश्म । 'नपुंसकाद् वा' (७।३।८९) अत्समासान्तः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । अन्तर्वेश्मं भवः - अन्तर्वेश्म वा भवः = आन्तर्वेश्मिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आन्तरगारम् ]** अन्तर्गतमगारस्य = अन्तरगारम् । बाहुलकात् 'प्रात्यव-परि-निरादयो०' (३।१।४७) इति समासः । अन्तःस्थं वा अगारम् = अन्तरगारम् । 'विशेषणं विशेष्येणैकार्थं कर्मधारयश्च' (३।१।९६) इत्यादिना समासः । अन्तरगारे

भवम् = आन्तरगारम् । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ आन्तःपुरम् ]** अन्तर्गतं पुरस्य = अन्तःपुरम् । अन्तःपुरे भवम् = आन्तःपुरम् । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ आन्तःकरणम् ]** अन्तःस्थं करणस्य = अन्तःकरणम् । अन्तःकरणे भवम् = आन्तःकरणम् । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## पर्यनोर्ग्रामात् ॥ ६।३।१३८ ॥

**[ पर्यनोः ]** परिश्च अनुश्च = पर्यनुस्तस्मात् ।

**[ ग्रामात् ]** ग्राम पञ्चमी ङसि ।

**[ पारिग्रामिकः ]** ग्रामात् परि = परिग्रामम् । 'पर्यपा-ऽऽङ्-बहिरच् पञ्चम्या' (३।१।३२) इत्यादिना समासः । परिग्रामे भवः = पारिग्रामिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आनुग्रामिकः ]** ग्रामस्य अनु-समीपम् = अनुग्रामम् । 'विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावा०' (३।१।३९) इत्यादिना समासः । अनुग्रामे भवः = आनुग्रामिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पारिग्रामः ]** परिगतो ग्रामः = परिग्रामः । 'प्रात्यव-परि०' (३।१।४७) इत्यादिना समासः । परिग्रामे भवः = पारिग्रामः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आनुग्रामः ]** अनुगतो ग्रामः = अनुग्रामः । अनुग्रामे भवः = आनुग्रामः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## उपाज्जानु-नीवि-कर्णात् प्रायेण ॥ ६।३।१३९ ॥

**[ उपात् ]** उप पञ्चमी ङसि ।

**[ जानुनीविकर्णात् ]** जानुश्च नीविश्च कर्णश्च = जानुनीविकर्णम्, तस्मात् ।

**[ प्रायेण ]** प्रायेण प्रथमा सि । सूत्रत्वाल्लुप् ।

**[ औपजानुकः सेवकः ]** जानुनः समीपम् = उपजानु । प्रायेणोपजानु भवति = औपजानुकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त इकस्येतो लुक्' (७।४।७१) इलुक् । सेवकः ।

**[ औपजानुकं शाटकम् ]** जानुनः समीपम् = उपजानु । प्रायेणोपजानु भवति = औपजानुकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'ऋवर्णोवर्ण०' (७।४।७१) इलुक् । सि-अम् । शाटकम् ।

**[ औपनीविकं ग्रीवादाम ]** नीव्या उप-समीपम् = उपनीवि । प्रायेणोपनीवि भवति = औपनीविकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । ग्रीवा माला ।

**[ औपनीविकं कार्षापणम् ]** नीव्याः समीपम् = उपनीवि । 'क्लीबे' (२।४।९७) ह्रस्वः । प्रायेणोपनीवि भवति = औपनीविकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । कार्षापणम्-आभरणविशेषम् ।

**[ औपकर्णिकः सूचकः ]** कर्णयोः समीपम् = उपकर्णम् । प्रायेणोपकर्णं भवति = औपकर्णिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । सूचको दुर्जनः । 'सूचण् पैशून्ये' (१८५४) सूच् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । सूचयति पैशून्यमिति सूचकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'णेरनिटि' (४।३।८३) णिच्लुक् ।

**[ औपजानवं मांसम् ]** उपजानु नित्यं भवति = औपजानवम् । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् । मांसम् ।

**[ औपजानवं गडु ]** उपजानु नित्यं भवति = औपजानवम् । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् । गडु ॥छ॥

## **रूढावन्तःपुरादिकः** ॥ ६।३।१४० ॥

**[ रूढौ ]** रूढि सप्तमी ङि ।

**[ अन्तःपुरात् ]** अन्तःपुर पञ्चमी ङसि ।

**[ इकः ]** इक प्रथमा सि ।

एकपुरुषपरिग्रहे स्त्रीसमुदाये, उपचारात्तन्निवासेऽपि अन्तःपुरशब्दो रूढः ।

**[ अन्तःपुरिका स्त्री ]** अन्तर्मध्ये पुरः = अन्तःपुरम् । 'अव्ययं प्रवृद्धादिभिः' (३।१।४८) समासः । अन्तःपुरे भवा = अन्तःपुरिका । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । स्त्री ।

**[ आन्तःपुरः ]** पुरस्यान्तर्गतमन्तःपुरम् । यथा अन्तर्गतोऽङ्गुलेः = अन्तरङ्गुलः । 'संख्या-ऽव्ययादङ्गुलेः' (७।३।१२४) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् । नखः । अन्तःपुरे भवः = आन्तःपुरः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आन्तःपुरिकः ]** पुरस्यान्तः = अन्तःपुरम् । 'पारे-मध्ये-ऽग्रे-ऽन्तः षष्ठ्या वा' (३।१।३०) इत्यादिना समासः । अन्तःपुरे भवः = आन्तःपुरिकः । 'अन्तःपूर्वादिकण्' (६।३।१३७) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## **कर्ण-ललाटात् कल्** ॥ ६।३।१४१ ॥

**[ कर्णललाटात् ]** कर्णश्च ललाटश्च = कर्णललाटम्, तस्मात् ।

**[ कल् ]** कल् प्रथमा सि ।

**[ कर्णिका कर्णाभरणविशेषः पद्माद्यवयवश्च ]** कर्णे भवा = कर्णिका । अनेन कल्प्र० → क । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । कर्णाभरणविशेषः पद्माद्यवयवश्च ।

**[ ललाटिका ललाटमण्डनम् ]** ललाटे भवा = ललाटिका । अनेन कल्प्र० → क । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । ललाटमण्डनम् ।

**[ कर्ण्यम् ]** कर्णे भवं = कर्ण्यम् । 'दिगादि-देहांशाद् यः' (६।३।१२४) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ ललाट्यम् ]** ललाटे भवं = ललाट्यम् । 'दिगादि-देहांशाद् यः' (६।३।१२४) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

लकारः स्त्रीत्वार्थः ॥छ॥

## तस्य व्याख्याने च ग्रन्थात् ॥ ६।३।१४२ ॥

**[ तस्य ]** तस्य पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ व्याख्याने ]** व्याख्यान सप्तमी ङि ।

**[ च ]** च प्रथमा सि ।

**[ ग्रन्थात् ]** ग्रन्थ पञ्चमी ङसि ।

**ग्रन्थः शब्दसन्दर्भः रचना, स व्याख्यायतेऽवयवशः कथ्यते येन तद् व्याख्यानम् ।**

**[ कार्त्तम् ]** कृत् । कृतां व्याख्यानं, कृत्सु भवं वा = कार्त्तम् । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आर् ।

**[ प्रातिपदिकीयम् ]** प्रतीतं पदं = प्रतिपदम्, तत् प्रयोजनमस्य = प्रातिपदिकम् । प्रातिपदिकस्य व्याख्यानं, प्रातिपदिके भवं वा = प्रातिपदिकीयम् । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ पाटलिपुत्रस्य व्याख्यानी सुकोसला ]** पाटलिपुत्रमेव । 'रोपान्त्यात्' (६।३।४२) अकञ्प्र० । द्विगोरनपत्ये य-स्वराऽऽदेर्लुबद्विः (६।१।२४) अकञ्लुप् । संनिवेशमिति सुकोशलयं(या) प्रतिच्छन्दकभूतया व्याख्यायते, न तु पाटलिपुत्रं ग्रन्थ इत्युत्तरेणापवादिक इकण् न भवति ॥छ॥

## प्रायो बहुस्वरादिकण् ॥ ६।३।१४३ ॥

**[ प्रायः ]** प्रायस् । अम् । 'अव्ययस्य' (३।२।७) लुप् ।

**[ बहुस्वरात् ]** बहवः स्वरा यत्र = बहुस्वरस्तस्मात् ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ षात्वणत्विकम् ]** षत्वणत्वयोर्व्याख्यानं-तत्र भवं वा = षात्वणत्विकम् । विरोधित्वान्न समाहूति । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ नातानतिकम् ]** नतश्च अनतश्च = नतानतौ । अल्पस्वरत्वान्नतस्य पूर्वनिपातः । नतानतयोर्व्याख्यानं-तत्र भवं वा = नातानतिकम् । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । उदात्तानुदात्तयोः स्वरयोरेते नतानतसंज्ञे ।

**[ आत्मनेपदपरस्मैपदिकम् ]** आत्मनेपदं च परस्मैपदं च = आत्मनेपदपरस्मैपदे । आत्मनेपदपरस्मैपदयोर्व्याख्यानं-तत्र भवं वा = आत्मनेपदपरस्मैपदिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आव्ययीभावतत्पुरुषिकम् ]** अव्ययीभावश्च तत्पुरुषश्च = अव्ययीभावतत्पुरुषम् । अव्ययीभावतत्पुरुषयोर्व्याख्यानं-तत्र भवं वा = आव्ययीभावतत्पुरुषिकम् । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नामाख्यातिकम् ]** नाम च आख्यातं च = नामाख्याते । नामाख्यातयोर्व्याख्यानं-तत्र भवं वा = नामाख्यातिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आख्यातिकम् ]** आख्यातस्य व्याख्यानं-तत्र भवं वा = आख्यातिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ब्राह्मणिकम् ]** ब्राह्मणनाम ग्रन्थस्य व्याख्यानं-तत्र भवं वा = ब्राह्मणिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्राथमिकम् ]** प्रथमाया व्याख्यानं- प्रथमायां भवं वा = प्राथमिकम् । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आध्वरिकम् ]** आ(अ)ध्वरप्रतिपादको ग्रन्थोऽप्यध्वरस्तस्य व्याख्यानं अध्वरे भवं वा = आध्वरिकम् । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पौरश्चरणिकम् ]** पुरस् 'चर भक्षणे च' (४१०) चर् । पुरो विपाकादर्वाक् चर्यते = पुरश्चरणः । 'भुजि-पत्यादिभ्यः कर्मा-ऽपादाने' (५।३।१२८) अनट्प्र० → अन । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । पुरश्चरणं-प्रायश्चित्तं तत्प्रतिपादको ग्रन्थोऽपि पुरश्चरणः । पुरश्चरणस्य व्याख्यानं-पुरश्चरणे भवं वा = पौरश्चरणिकम् । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सांहितम् ]** संहिताया व्याख्यानं-तत्र भवं वा । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ प्रातिपदिकीयम् ]** प्रातिपदिकस्य व्याख्यानं - प्रातिपदिके भवं वा = प्रातिपदिकीयम् । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।।छा।

## ऋगृद्-द्विस्वर-यागेभ्यः ॥ ६।३।१४४ ॥

**[ ऋगृद्द्विस्वरयागेभ्यः ]** ऋग् च ऋच्च द्विस्वरश्च यागश्च = ऋगृद्द्विस्वरयागाः, तेभ्यः ।

**[ आर्चिकम् ]** ऋच् । ऋचां व्याख्यानं-ऋक्षु भवं वा = आर्चिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आर् । सि-अम् ।

**[ चातुर्होतृकम् ]** चतुर्-होतृ । चतुर्षु होतृषु भवः = चतुर्होतृ(ता) । 'भवे' (६।३।१२३) अण्प्र० → अ । 'द्विगोरनपत्ये०' (६।१।२४) अण्लुप् । चतुर्होतुर्व्याख्यानं चतुर्होतरि भवं वा = चातुर्होतृकम् । अनेन इकण्प्र० → इक । वृद्धिः आ । 'ऋवर्णोवर्ण-दोसिसुस०' (७।४।७१) इकारस्य लुक् ।

**[ पाञ्चहोतृकम् ]** पञ्चसु होतृषु भवः = पञ्चहोता । 'भवे' (६।३।१२३) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) अण्लुप् । पञ्चहोतृ(तुः) नाम ग्रन्थस्य व्याख्यानं - पञ्चहोतरि भवं वा = पाञ्चहोतृकः(कम्) । अनेन इकण्प्र० → इक । वृद्धिः आ । 'ऋवर्णोवर्ण-दोसिसुस०' (७।४।७१) इकारस्य लुक् ।

**[ आङ्गिकम् ]** अङ्गानां व्याख्यानं-तत्र भवं वा = आङ्गिकम् । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पौर्विकम् ]** पूर्वाणां व्याख्यानं-तत्र भवं वा = पौर्विकम् । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौत्रिकम् ]** सूत्राणां व्याख्यानं-सूत्रे भवं वा = सौत्रिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ तार्किकम् ]** तर्कस्य व्याख्यानं - तर्के भवं वा = तार्किकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ नामिकम् ]** नामन् । नाम्नां व्याख्यानं-तत्र भवं वा = नामिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'नोपदस्य तद्धिते' (७।४।६१) अन्लुक् । सि-अम् ।

याग - **[ आग्निष्टोमिकम् ]** अग्नि-स्तोम । अग्नीनां स्तोमः = अग्निष्टोमः । 'ज्योतिरायुर्भ्यां च स्तोमस्य' (२।३।१७) स० → ष । 'तवर्गस्य०' (१।३।६०) त० → ट० । अग्निष्टोमस्य व्याख्यानं - अग्निष्टोमे भवं वा = आग्निष्टोमिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ राजसूयिकम् ]** राजन् 'षूङौच् प्राणिप्रसवे' (१२४२) षू । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः (२।३।९८) सू । राजा सूयते = राजसूयम् । 'संचाय्य-कुण्डपाय्य-राजसूयं क्रतौ' । (५।१।२२) राजसूयं निपात्यते । राजसूयस्य व्याख्यानं-राजसूये भवं वा = राजसूयिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ वाजपेयिकम् ]** वाजं-यज्ञान्नं पेयं यस्य सः = वाजपेयः । वाजपेये भवं = वाजपेयिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ पाकयज्ञिकम् ]** पाकप्रधानो यज्ञः = पाकयज्ञः । पाकयज्ञस्य व्याख्यानं-पाकयज्ञे भवं वा = पाकयज्ञिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ नावयज्ञिकम् ]** नवन्-यज्ञ । नवानां यज्ञानां समाहारः = नवयज्ञम् । नवयज्ञस्य व्याख्यानं-तत्र भवं वा = नावयज्ञिकम् । यद्वा नवसु यज्ञेषु भवः । 'भवे' (६।३।१२३) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) अण्लुप् । अग्रेतनं पूर्ववत् ज्ञेयम् ।

**[ पाञ्चौदनिकम् ]** पञ्च ओदना यत्र यागे सः = पञ्चौदनः । पञ्चौदनस्य व्याख्यानं-पञ्चौदने भवं वा = पाञ्चौदनिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ दाशौदनिकम् ]** दशा(श)न्-ओदन । दशसु ओदनेषु भवः = दशौदनः । 'भवे' (६।३।१२३) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) अण्लुप् । यद्वा दश ओदना यत्र यागे सः = दशौदनः । दशौदनस्य व्याख्यानं-दशौदने भवं वा = दाशौदनिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।।छ।।

**ऋषेरध्याये** ॥ ६।३।१४५ ॥

**[ ऋषेरध्याये ]** ऋषि पञ्चमी ङसि । अधि 'इंङ्क् अध्ययने (११०४) इ । अध्ययनम् = अध्यायः । 'इङोऽपादाने तु टिद् वा' (५।३।१९) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय्, तस्मिन् ।

**[ वासिष्ठिकोऽध्यायः ]** वसिष्ठस्य ग्रन्थस्य व्याख्यानस्तत्र भवो वा = वासिष्ठिकोऽध्यायः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वसिष्ठादिसाहचर्यात् ग्रन्थोऽपि तथोच्यते ।

**[ वैश्वामित्रिकोऽध्यायः ]** विश्वं मित्रमस्य सः = विश्वामित्रः । 'ऋषौ विश्वस्य मित्रे' (३।२।७९) दीर्घः । विश्वामित्रस्य ग्रन्थस्य व्याख्यानस्तत्र भवो वा = वैश्वामित्रिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र०, अध्यायः ।

**[ वासिष्ठी ऋक् ]** वसिष्ठस्य ग्रन्थस्य व्याख्यानी यद्वा वसिष्ठे ग्रन्थे भवा = वासिष्ठम् । 'तस्य व्याख्याने च ग्रन्थात्' (६।३।१४२) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी, ऋक् ।

'प्रायो बहुस्वरात्०' (६।३।१४३) इति प्रायोग्रहणात् प्रायोग्रहणस्य यादृच्छिकत्वात् अप्राप्तिकल्पनायां विध्यर्थम्, प्राप्तिकल्पनायामध्याय एवेति नियमार्थं वचनम् ॥छ॥

**पुरोडाश-पौरोडाशादिकेकटौ** ॥ ६।३।१४६ ॥

**[ पुरोडाशपौरोडाशात् ]** पुरोडास(श)श्च पौरोडास(श)श्च = पुरोडाशपौरोडाशम्, तस्मात् । 'एकदेशविकृतमनन्यवत्' (न्या०सं०वक्ष० (१)/सूत्र(७)) इति न्यायादेव एकोपादानेऽपि उभयोरपि सिद्धौ द्वयोरुपादानम् । एकदेशेत्यस्मानपेक्षया ।

**[ इकेकटौ ]** इकश्च इकट् च = इकेकटौ । 'प्राग् जितादण्' (६।१।१३) - 'दोरीयः' (६।३।३२) - 'प्रायो बहुस्वरादिकण्' (६।३।१४३) एतेषामपवादः ।

**[ पुरोडाशिकः, पुरोडाशिका, पुरोडाशिकी ]** पुरस् 'दंशं दशने' (४९६) दंश् । पुरो दशत्यनेन = पुरोडाशः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'पृषोदरादयः' (३।२।१५५) निपात्यते । पुरोडाशाः पर्पटादेः पिष्टपिण्डाः, तैः सहचरितो मन्त्रः = पुरोडाशः, तस्य व्याख्यानस्तत्र भवो वा = पुरोडाशिकः, पुरोडाशिका । अनेन इक-इकट्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अणञेयेकण्०' (२।४।६८) ङी ।

**[ पौरोडाशिकः, पौरोडाशिका, पौरोडाशिकी ]** पुरोडाश मण्ड्यते । पुरोडाशानामयं = पौरोडाशः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । यद्वा पुरोडाशेषु भवः = पौरोडाशः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तस्य व्याख्यानस्तत्र भवो वा = पौरोडाशिकः, पौरोडाशिका । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । एवम्-पौरोडाशिकी । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४६) सिलुक् ॥छ॥

**छन्दसो यः** ॥ ६।३।१४७ ॥

**[ छन्दसो यः ]** छन्दस् पञ्चमी ङसि । य प्रथमा सि । द्विस्वरे 'ऋगृद्-द्विस्वर-यागेभ्यः' (६।३।१४४) इत्यादिना इकणोऽपवादः ।

**[ छन्दस्यः ]** छन्दसो व्याख्यानस्तत्र भवो वा = छन्दस्यः । अनेन यप्र० ॥छा॥

**शिक्षादेश्चाण्** ॥ ६।३।१४८ ॥

**[ शिक्षादेः ]** शिक्षा आदिर्यस्य सः = शिक्षादिः, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ अण् ]** अण् प्रथमा सि ।

**[ शैक्षः ]** 'शिक्षि विद्योपादाने' (८७९) शिक्ष् । शिक्ष्यतेऽभ्यस्यते इति शिक्षा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । शिक्षाया व्याख्यानस्तत्र भवो वा = शैक्षः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आर्गयनः ]** ऋचामयनम् = ऋगयनम्, तस्य व्याख्यानः-ऋगयने भवो वा = आर्गयनः । अनेन अण्प्र० → अ । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ छान्दसः ]** छन्दसो व्याख्यानं-यद्वा छन्दसि भवो वा = छान्दसः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ ।

**[ नैयायः ]** न्यायस्य व्याख्यानं-यद्वा न्याये भवो वा = नैयायः । अनेन अण्प्र० → अ । 'लोकात्' (१।१।३) न् पाठउ विश्लेषियइ । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वास्तुविद्यः ]** वास्तुविद्याया व्याख्यानः-यद्वा वास्तुविद्यायां भवो वा = वास्तुविद्यः । अनेन अण्प्र० → अ । 'अवर्णेवर्णस्य (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ छन्दोभाष ]** भाष्यतेऽनेनेति भाषः । 'अच्' (५।१।४९) अच्प्र० → अ । छन्दसां भाषः = छन्दोभाषः ।

**[ छन्दोविचिती ]** छन्दसो विचितिर्यस्याः सा । 'इतोऽक्त्यर्थात्' (२।४।३२) ङी ।

**[ छन्दोविजिति ]** छन्दसो विजिति = छन्दोविजिति ।

**[ निमित्त ]** निमीयते-निक्षिप्यते कारणमध्ये = निमित्त ।

**[ उपनिषद् ]** उपनिषद्यतेऽस्याः सा ।

**[ प्रपञ्चः ]** 'पचुण् विस्तारे' (१५८०) पच् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) पञ्च् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । प्रपञ्चनं = प्रपञ्चः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः (५।३।२८) अल्प्र० → अ ।

**तत आगते** ॥ ६।३।१४९ ॥

**[ ततः ]** तद् । तस्मात् = ततः । 'किमद्व्यादिसर्वाद्य०' (७।२।८९) पित्तस्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्या०' (२।१।११३) अलोपः । पञ्चमी ङसि । 'अव्ययस्य' (३।२।७) ङसिलोपः ।

**[ आगते ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्, आङ्पूर्व० । आगम्यते स्म । क्तप्र० → त । 'यमि-रमि-नमि-गमि०' (४।२।५५) मलोपः । तस्मिन् ।

**[ माथुरः ]** मथुराया आगतः = माथुरः । अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ औत्सः ]** उत्स । उत्सादागतः = औत्सः । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गव्यः ]** गो । गोभ्य आगतः = गव्यः । 'गोः स्वरे यः' (६।१।२७) यप्र० । 'य्यक्ये' (१।२।२५) अव् ।

**[ दैत्यः ]** दिति । दितेरागतः = दैत्यः । 'अनिदम्यणपवादे च दित्य०' (६।१।१५) ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः दि० → दै० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ बाह्यः ]** बहिस् । बहिष आगतः = बाह्यः । 'बहिषष्टीकण् च' (६।१।१६) ञ्यप्र० → य । 'प्रायोऽव्ययस्य' (७।४।६५) इस्लोपः । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ।

**[ कालेयः ]** कलि । कलेरागतः = कालेयः । 'कल्यग्नेरेयण्' (६।१।१७) एयण्प्र० → एय । 'वृद्धि स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

**[ नादेयः ]** नदी । नद्या आगतः = नादेयः । 'नद्यादेरेयण्' (६।३।२) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णे०' (७।४।६८) ईलुक् ।

**[ ग्रामीणः ]** ग्राम । ग्रामादागतः = ग्रामीणः । 'ग्रामादीनञ् च' (६।३।९) ईनञ्प्र० → ईन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ग्राम्यः ]** ग्राम । ग्रामादागतः = ग्राम्यः । 'ग्रामादीनञ् च' (६।३।९) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**विद्यायोनिसम्बन्धादकञ्** ॥ ६।३।१५० ॥

**[ विद्यायोनिसम्बन्धात् ]** सम्बध्यते इति सम्बन्धः । घञ्प्र० । विद्यायोनिभ्यां सम्बन्धः - विद्यायोनिकृतः सम्बन्धो वा = विद्यायोनिसम्बन्धः । उष्ट्रमुखादित्वात् समासः । तस्मात् ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

विद्यासम्बन्ध - **[ आचार्यकम् ]** आचार्यादागतम् = आचार्यकम् । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औपाध्यायकम् ]** उपाध्यायादागतम् = औपाध्यायकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शैष्यकम् ]** शिष्यादागतं = शैष्यकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

योनिसम्बन्ध - **[ पैतामहकम् ]** पितुः पिता = पितामहः । 'पित्रोर्डामहट्' (६।२।६३) डामहट्प्र० → आमह० । 'डित्यन्त्य०' (२।१।११४) ऋलोपः । पितामहादागतं = पैतामहकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पैतृव्यकम् ]** पितुर्भ्राता = पितृव्यः । 'पितृ-मातुर्व्य-डुलं भ्रातरि' (६।२।६२) व्यप्र० । पितृव्यादागतं = पैतृव्यकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्।

**[ मातुलकम् ]** मातुर्भ्राता = मातुलः । 'पितृ-मातुर्व्य०' (६।२।६२) डुलप्र० → उल । 'डित्यन्त्य०' (२।१।११४) ऋलोपः । मातुलादागतं = मातुलकम् । अनेन अकञ्प्र० → अक । 'अवर्णे०' (७।४।६८) अलोपः ॥छ॥

## पितुर्यो वा ॥ ६।३।१५१ ॥

**[ पितुर्यो वा ]** पितृ पञ्चमी ङसि । 'ऋतो डुर्' (१।४।३७) ङसि० → डुर्० → उर्० । 'डित्यन्त्य०' (२।१।११४) ऋलोपः । य प्रथमा सि । वा प्रथमा सि ।

**[ पित्र्यम्, पैतृकम् ]** पितृ । पितुरागतं = पित्र्यम्, पैतृकम् । अनेन विकल्पे यप्र० । 'ऋतो रस्तद्धिते' (१।२।२६) तृ० → त्र० । पक्षे-'ऋत इकण्' (६।३।१५२) इकण्प्र० → इक । 'ऋवर्णोवर्ण०' (७।४।७१) इकण इलोपः । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः पि० → पै० ॥छ॥

## ऋत इकण् ॥ ६।३।१५२ ॥

**[ ऋत इकण् ]** ऋत् पञ्चमी ङसि । इकण् प्रथमा सि ।

**[ हौतृकम् ]** होतृ । होतुरागतं = हौतृकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० औ । 'ऋवर्णोवर्ण०' (७।४।७१) इकण इलोपः ।

**[ शास्तृकम् ]** शास्तृ । शास्तुरागतं = शास्तृकम् । अनेन इकण्प्र० → इक । 'ऋवर्णोवर्ण०' (७।४।७१) इकण इलोपः ।

**[ मातृकम् ]** मातृ । मातुरागतं = मातृकम् । अनेन इकण्प्र० → इक । 'ऋवर्णोवर्ण०' (७।४।७१) इकण इलोपः ।

**[ भ्रातृकम् ]** भ्रातृ । भ्रातुरागतं = भ्रातृकम् । अनेन इकण्प्र० → इक । 'ऋवर्णोवर्ण०' (७।४।७१) इकण इलोपः।

**[ स्वासृकम् ]** स्वसृ । स्वसुरागतं = स्वासृकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० आ । 'ऋवर्णोवर्ण०' (७।४।७१) इकण इलोपः ।

**[ जामातृकम् ]** जामातृ । जामातुरागतं = जामातृकम् । अनेन इकण्प्र० → इक । 'ऋवर्णोवर्ण०' (७।४।७१) इकण इलोपः ।

**[ मातृकी विद्या ]** मातृ । मातुरागता = मातृकी विद्या । अनेन इकण्प्र० → इक । 'ऋवर्णोवर्ण०' (७।४।७१) इकण इलोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छ॥

## आयस्थानात् ॥ ६।३।१५३ ॥

**[ आयस्थानात् ]** 'इंण्क् गतौ' (१०७५) इ । एति स्वामिनमिति आयः । 'तन्-व्यधीण् - श्वसातः' (५।१।६४) णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'ष्ठां गतिनिवृत्तौ (५) ष्ठा । 'षः सोऽष्ट्यै०' (२।३।९८) ष० → स० । 'निमित्ताभावे०' (न्या० सं० वक्ष० (१)/सूत्र(२९) स्था । तिष्ठन्त्यस्मिन्निति स्थानम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । आयस्य स्थानम् = आयस्थानम् । तस्मात् ।

**स्वामिग्राह्यो भाग आयः, स यस्मिन्नुत्पद्यते तद् आयस्थानम् ।**

**[ आतरिकम् ]** 'तृ प्लवन-तरणयोः' (२७) तृ, आङ्पूर्व० । एत्य तरन्त्यस्मिन्निति आतरः । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । 'नामिनो गुणो०' (४।३।१) गु० अर् । आतरादागतम् = आतरिकम् । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ शौल्कशालिकम् ]** शुल्कशालाया आगतं = शौल्कशालिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ आपणिकम् ]** आपणादागतम् = आपणिकम् । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दौवारिकम् ]** द्वारादागतं = दौवारिकम् । अनेन इकण्प्र० → इक । 'द्वारादेः' (७।४।६) वात् प्राग् औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छ।।

## शुण्डिकादेरण् ॥ ६।३।१५४ ॥

**[ शुण्डिकादेः ]** शुण्डिकः-शुण्डिका वा आदिर्यस्य सः = शुण्डिकादिः, तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

'आयस्थानात्' (६।३।१५३) इत्यनेन आदिपदात् अकञीययोरपवादः ।

**[ शौण्डिकम् ]** शुण्डः शुण्डा वा सुरा, सोऽस्यास्ति = शुण्डिकः-शुण्डिका वा । 'व्रीह्यादिभ्यस्तौ (७।२।५) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । सुरापणः सुराविक्रयी वोच्यते । शुण्डिकात् शुण्डिकाया वा आगतं = शौण्डिकम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक्।

**[ औदपानम् ]** उदकस्य पानम् = उदपानम् । 'नाम्न्युत्तरपदस्य च' (३।२।१०७) उदकस्य उदभावः क्रियते । उदपानादागतम् = औदपानम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ कार्कणम् ]** कृकण । कृकणात्-पक्षिविशेषादागतं मांसादि = कार्कणम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । **अकञीयबाधनार्थमिति** अयमर्थः-यदा शुण्डिकादीनि सर्वाण्यप्यायस्थानान्येव तदा तीर्थाद् धूमादकञः पर्ण-कृकणाभ्यां च ईयस्यापवादे 'आयस्थानात्' (६।३।१५३) इतीकणि प्राप्ते अयमारम्भादिकणि निवृत्ते यथाप्राप्तमिति ततोऽकञीयौ प्राप्नुतः । अतस्तौ बाधित्वा ततोऽसौ यथास्यादित्येवमर्थमणग्रहणम् ।।छ।।

## गोत्रादङ्कवत् ॥ ६।३।१५५ ॥

**[ गोत्रात् ]** गोत्र पञ्चमी ङसि ।

**[ अङ्कवत् ]** अङ्के इव = अङ्कवत् । 'तत्र' (७।१।५३) वत्प्र० । प्रथमा सि ।

**[ वैदम् ]** विदस्यापत्यानि वृद्धानि । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । 'यञञोऽश्यापर्णान्त-गोपवनादेः' (६।१।१२६) अञ्लुप् । विदानामङ्कः = वैदः । 'सङ्घ-घोषा-ऽङ्क-लक्षणेऽञ्-यञिञः' (६।३।१७२) इति अण्वत् विदेभ्य

आगतं = वैदम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ गार्गम् ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्याणामङ्कः । 'सङ्घ-घोषा-ऽङ्क०' (६।३।१७२) इति अण्वत् गार्गेभ्यः आगतं = गार्गम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ दाक्षम् ]** दक्षस्यापत्यं वृद्धं = दाक्षिः । 'अत इञ् (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षरेङ्कः । 'सङ्घ-घोषा-ऽङ्क०' (६।३।१७२) इति अण्वत् दाक्षेरागतं = दाक्षम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् । **अङ्कग्रहणेन तस्येदमित्यर्थसामान्यं लक्ष्यते, तेन अकञोऽप्यतिदेशः ।**

**[ औपगवकः ]** उपगोरपत्यम् = औपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव् (७।४।७०) अव् । औपगवानामङ्कः । 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) अकञ्वत् औपगवेभ्य आगतः = औपगवकः । अनेन अकञ्प्र० → अक । 'अवर्णे०' (७।४।६८) अलुक् ।

**[ कापटवकः ]** कपटु । कपटोरपत्यं = कापटवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव् (७।४।७०) अव् । कापटवानामङ्कः । 'गोत्राददण्डमाणव०' (६।३।१६९) अकञ्वत् कापटवेभ्य आगतः = कापटवकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नाडायनकः ]** नडस्यापत्यं = नाडायनः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । नाडायनानामङ्कः । 'गोत्राददण्डमाणव०' (६।३।१६९) अकञ्वत् नाडायनेभ्य आगतः = नाडायनकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गार्ग्यायणकः ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यस्यापत्यं युवा = गार्ग्यायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यायणानामङ्कः । 'गोत्राददण्डमाणव०' (६।३।१६९) अकञ्वत् गार्ग्यायणेभ्य आगतः = गार्ग्यायणकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ रैवतिकीयम् ]** रेवत । 'रेवत-रोहिणाद् भे' (२।४।२६) ङी । रेवत्या चन्द्रयुक्तया युक्तः कालोऽपि = रेवती । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वयुक्ते'' अण्लुप् । रेवत्यां जाता = रेवती । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । 'चित्रा-रेवती-रोहिण्याः स्त्रियाम्' (६।३।१०८) अण्लुप् । रेवत्या अपत्यानि = रैवत्यः । 'रेवत्यादेरिकण्' (६।३।८६) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । रैवतिकेभ्य आगतं = रैवतिकीयम् । 'रैवतिकादेरीयः' (६।३।१७०) इत्यनेन ईयवत् अनेनैव ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ गौरग्रीवीयम् ]** गौरा(री) ग्रीवा यस्य सः = गौरग्रीवः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । गौरग्रीवस्यापत्यं = गौरग्रीवि(:) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गौरग्रीवेरागतं = गौरग्रीवीयम् । 'रैवतिकादेरीयः' (६।३।१७०) ईयवत् अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ कौपिञ्जलम् ]** कुपिञ्जलस्यापत्यम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कौपिञ्जलादागतं = कौपिञ्जलम् । अनेन अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ हास्तिपदम् ]** हस्तिपादस्यापत्यम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'कौपिञ्जल-हास्तिपदादण्' (६।३।१७१) इत्यादि निर्देशात् पददेशः । हास्तिपदादागतं = हास्तिपदम् । अनेन अण्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## नृ-हेतुभ्यो रूप्य-मयटौ वा ॥ ६।३।१५६ ॥

**[ नृहेतुभ्यः ]** ना च हेतवश्च = नृहेतवस्तेभ्यः ।

**[ रूप्यमयटौ ]** रूप्यश्च मयट् च = रूप्यमयटौ ।

**[ वा ]** वा प्रथमा सि ।

**हेतुः कारणम् । नृग्रहणमहेत्वर्थम् ।**

**[ देवदत्तरूप्यम्, देवदत्तमयम्, दैवदत्तम् ]** देवदत्तादागतं = देवदत्तरूप्यम्, देवदत्तमयम् । अनेन रूप्य-मयट्प्र० → मय । सि-अम् । एवम्-दैवदत्तम् । 'तत आगते' (६।३।१४९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अपादाने पञ्चमी ।

हेतु -**[ समरूप्यम्, सममयम्, समीयम् ]** समादागतं = समरूप्यम्, सममयम् । अनेन रूप्य-मयट्प्र० → मय । सि-अम् । पक्षे-'गहादिभ्यः' (६।३।६३) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ विषमरूप्यम्, विषममयम्, विषमीयम् ]** विषमादागतं = विषमरूप्यम्, विषममयम् । अनेन रूप्य-मयट्प्र० → मय । सि-अम् । पक्षे-'गहादिभ्यः' (६।३।६३) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ पापरूप्यम्, पापमयम्, पापीयम् ]** पापादागतं = पापरूप्यम्, पापमयम् । अनेन रूप्य-मयट्प्र० → मय । सि-अम् । पक्षे 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

यदा समत्वमृणं तदा 'ऋणाद्धेतोः' (२।२।७६) - अथ गुणवाचकस्तदा 'गुणादस्त्रियां नवा (२।२।७७) इत्याभ्यां यथासंभवं अत्र हेतौ पञ्चमी ।

**[ जिनदत्तमयी ]** जिनदत्तादागता = जिनदत्तमयी । अनेन मयट्प्र० → मय । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ सममयी ]** समादागता = सममयी । अनेन मयट्प्र० → मय । 'अणञेयेकण्०' (२।४।२० ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

बहुवचनं स्वरूपव्युदासार्थम् ॥छ॥

## प्रभवति ॥ ६।३।१५७ ॥

**[ प्रभवति ]** 'भू सत्तायाम्' (१) भू, प्रपूर्व० । प्रभवतीति प्रभवत् । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव् (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । तस्मिन् ।

प्रथममुपलभ्यमानता प्रभवः । अन्ये प्रभवति-जायमाने इत्याहुः । 'जाते' (६।३।९८) इति भूते सप्तम्यन्तात् प्रत्ययः । अयं तु पञ्चम्यन्ताद्वर्त्तमाने इति विशेषः ।

**[ हैमवती गङ्गा ]** हिमवत् । हिमवतः प्रभवति = हैमवती । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अणञेयेकण्०' (२।४।२०) ङी, गङ्गा ।

**[ दारदी सिन्धुः ]** दरद् । दरदो देशात् प्रभवति = दारदी । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ काश्मीरी वितस्ता ]** कश्मीरेभ्यः प्रभवति = काश्मीरी । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अणञेयेकण्०' (२।४।२०) ङी । वितस्ता नदीपर्याय उच्यते ॥छ॥

## वैडूर्यः ॥ ६।३।१५७ ॥

**[ वैडूर्यः ]** वैडूर्य प्रथमा सि ।

**[ वैडूर्यो मणिः ]** टवर्गतृतीयः 'विड आक्रोशे' (२५२) विड् । वेडतीति विडूरः । 'स्था-विडेः कित्' (उणा० ४२९) किद् ऊरप्र० । विडूरात् प्रभवति = वैडूर्यः । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र०, मणिः ।

विडूरग्रामे ह्ययं संस्क्रियमाणो मणितया ततः प्रथमं प्रभवति । वालवायात्तु पर्वतात् असौ प्रभवन्नसौ न मणिः किन्तु पाषाणः । विडूर । विडूरात् प्रभवति । मतान्तरेऽनेनैव विडूरादेशश्च निपात्यते । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वालवायपर्याय एव वा विडूरशब्दः । यद्येवं तर्हि सर्वत्रापि वालवे(वा)यपर्यायो विडूरशब्दः प्रयुज्यते । इत्याह- प्रतिनियतविषयाश्च रूढ्या वैयाकरणानामेव प्रसिद्धिः । अस्य वचसो दृढतोच्यते । इति वैयाकरणानामेव विडूरशब्दस्य वालवे(वा)य(ये) प्रसिद्धिर्नान्येषाम् । यथा जित्वरीशब्देन वणिज एव वाणारसीं व्यवहरन्ति ।

## त्यदादेर्मयट् ॥ ६।३।१५९ ॥

**[ त्यदादेः ]** त्यद् आदिर्यस्य सः = त्यदादिः, तस्मात् ।

**[ मयट् ]** मयट् प्रथमा सि ।

**[ तन्मयम्, तन्मयी ]** तस्मात् प्रभवति = तन्मयः(यम्), तन्मयी । अनेन मयट्प्र० → मय । 'धुटस्तृतीयः' (२।१।७६) द० → द० । 'प्रत्यये च' (१।३।२) द० → न० । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ भवन्मयम्, भवन्मयी ]** भवतः प्रभवति = भवन्मयः(यम्), भवन्मयी । अनेन मयट्प्र० → मय । शेषं पूर्ववत् ॥छ॥

## तस्येदम् ॥ ६।३।१६० ॥

**[ तस्य ]** तस्य पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ इदम् ]** इदमोऽर्थः = इदमर्थस्तस्मिन् । 'ते लुग्वा' (३।२।१०८) अर्थस्य लोपः । सूत्रत्वात् ङिलोपः । अथवा इदम् अग्रे प्रथमाया एकवचनस्य सि । 'अनतो लुप्' (१।४।६९) इति सिलुप्, तदा इदमर्थ इति कथं लभ्यते सप्तम्याभावात् ?

उच्यते–'वाद्यात्' (६।१।११) इति सूत्रत्वात् । अयमर्थः – यत्सूत्रे आदौ निर्दिश्यते सा प्रकृति(ः) अन्यत् प्रत्ययार्थे संभवति ।

**[ औपगवम् ]** गोः समीपम् = उपगुः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । उपगोरिदमौपगवम् । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि–अम् ।

**[ कापटवम् ]** कपटु । कपटोरिदं = कापटवम् । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि–अम् ।

**[ स्रौघ्नम् ]** स्रुघ्नस्येदं = स्रौघ्नम् । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माथुरम् ]** मथुराया इदं = माथुरम् । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ दैत्यम् ]** दिति । दितेरयं = दैत्यः । 'अनिदम्यणपवादे च दित्यदित्यादित्ययमपत्युत्तरपदाञ्ञ्यः (६।१।१५) ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ बार्हस्पत्यम् ]** बृहस्पतेरिदं = बार्हस्पत्यम् । 'अनिदम्यणपवादे०' (६।१।१५) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ कालेयम् ]** कलेरिदं = कालेयम् । 'कल्यग्नेरेयण्' (६।१।१७) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ आग्नेयम् ]** अग्नेरिदम् = आग्नेयम् । 'कल्यग्नेरेयण्' (६।१।१७) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ औत्सम् ]** उत्सस्येदम् = औत्सम् । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ स्त्रैणम् ]** स्त्रीणामिदं = स्त्रैणम् । 'प्राग्वतः स्त्री–पुंसात् नञ्–स्नञ्' (६।१।२५) नञ्प्र० → न । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ ।

**[ पौंस्नम् ]** पुंसामिदं = पौंस्नम् । 'प्राग्वतः स्त्री–पुंसात्०' (६।१।२५) स्नञ्प्र० → स्न । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । शिड्हेऽनुस्वारः' (१।३।४०) अनुस्वारः । 'पदस्य' (२।१।८९) सलुक् । सि–अम् सर्वत्र ।

**[ गव्यम् ]** गो । गोरिदं = गव्यम् । 'गोः स्वरे यः' (६।१।२७) यप्र० । 'य्यक्ये' (१।२।२५) अव् ।

**[ नादेयम् ]** नद्या इयं = नादेयम् । 'नद्यादेरेयण्' (६।३।२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ राष्ट्रियम् ]** राष्ट्रस्येदम् । 'राष्ट्रादियः' (६।३।३) इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पारीणः ]** पारस्य इदम् । 'व्यस्त–व्यत्यस्तात्' (६।३।७) ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ भानवीयः ]** भानोरिदं = भानवीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ श्यामगवीयः ]** श्यामा गौर्यस्य सः = श्यामगुः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । श्यामगवस्य (श्यामगोः) इदं(अयं) = श्यामगवीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ पाटलिपुत्रकः प्राकारः ]** पाटलिपुत्रस्यायं = पाटलिपुत्रकः । 'रोपान्त्यात्' (६।३।४२) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## हल-सीरादिकण् ॥ ६।३।१६१ ॥

**[ हलसीरात् ]** हलश्च सीरश्च = हलसीरम्, तस्मात् ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ हालिकम् ]** हलस्येदं = हालिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ सैरिकम् ]** सीरस्येदं = सैरिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## समिध आधाने टेन्यण् ॥ ६।३।१६२ ॥

**[ समिधः ]** समिध् पञ्चमी ङसि ।

**[ आधाने ]** आधान सप्तमी ङि ।

**[ टेन्यण् ]** टेन्यण् प्रथमा सि ।

**[ सामिधेन्यो मन्त्रः ]** आ 'डुधांग्क् धारणे च' (११३९) धा । आधीयते येन समित् तदाधानम् । समिध् । समिधामाधानो मन्त्रः = सामिधेन्यः । अनेन टेन्यण्प्र० → एन्य । वृद्धिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र०, मन्त्रः ।

**[ सामिधेनी ऋक् ]** समिधामाधानी ऋक् = सामिधेनी । अनेन टेन्यण्प्र० → एन्य । वृद्धिः । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ सामिधेनीरन्वाह ]** समिधामाधान्यः = सामिधेन्यः, ताः = सामिधेनाः(नीः) । अनेन टेन्यण्प्र० → एन्य । वृद्धिः । 'अणञेयेकण्०' (२।४।२०) ङी । द्वितीया शस् । 'शसोऽता०' (१।४।४९) दीर्घः । 'सो रुः' (२।१।७२) स० → र० । अनु-पश्चात् । आह एवमग्रेऽपि ॥छ॥

## विवाहे द्वन्द्वादकल् ॥ ६।३।१६३ ॥

**[ विवाहे ]** विवाह सप्तमी ङि ।

**[ द्वन्द्वात् ]** द्वन्द्व पञ्चमी ङसि ।

**[ अकल् ]** अकल् प्रथमा सि ।

**[ अत्रिभरद्वाजिका ]** अत्रि । अत्रेरपत्यानि = अत्रयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० । भरद्वाजस्यापत्यानि वृद्धानि = भरद्वाजाः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । 'भृग्वङ्गिरस-कुत्स-वशिष्ठ-गोतमा-ऽत्रेः' (६।१।१२८) एयण्लुप् । 'यञञोऽश्यापर्णान्त०' (६।१।१२६) अञ्लुप् । अत्रीणां भरद्वाजानां विवाहः = अत्रिभरद्वाजिका । अनेन

अकल्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । यद्वा भरद्वाजस्यापत्यानि वृद्धानि । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । भरद्वाजानामपत्यानि युवानः । 'अत इञ्' (६।१।३१) इञ्प्र० । 'ञिदार्षादणिञोः' (६।१।१४०) इञ्लुप् । 'यञञोऽश्या०' (६।१।१२६) अञ्लुप् । 'गर्ग - भार्गविका' (६।१।१३६) इति नियमात्' न प्राग्जितीये स्वरे' (६।१।१३५) इति सर्वेषु न प्रवर्त्तते । शेषं पूर्ववत् ।

**[ वशिष्ठकश्यपिका ]** वसि(शि)ष्ठस्यापत्यानि । 'ऋषि वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० । 'भृग्वङ्गिरस्-कुत्स-वशिष्ठ०' (६।१।१२८) अण्लुप् । कश्यपस्यापत्यानि वृद्धानि । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । 'यञञोऽश्या०' (६।१।१२६) अञ्लुप् । वसि(शि)ष्ठानां कश्यपानां च विवाहः = वसि(शि)ष्ठकश्यपिका । अनेन अकल्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ भृग्वङ्गिरसिका ]** भृगु । भृगोरपत्यानि । अङ्गिरसोऽपत्यानि । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । भृग्वङ्गिरस् - कुत्स०' (६।१।१२८) अण्लुप् । भृगूणामङ्गिरसां च विवाहः = भृग्वङ्गिरसिका । अनेन अकल्प्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ कुत्सकुशिकिका ]** कुत्सस्यापत्यानि = कुत्साः । 'ऋषि वृष्ण्यन्धक-कुरुभ्यः (६।१।६१) अण्प्र० । 'भृग्वङ्गिरस्-कुत्स०' (६।१।१२८) अण्लुप् । कुशिकस्यापत्यानि वृद्धानि = कुशिकाः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । 'यञञोऽश्यापर्णान्त०' (६।१।१२६) अञ्लुप् । कुत्सानां कुशिकानां च विवाहः = कुत्सकुशिकिका । अनेन अकल्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ।

**[ गर्गभार्गविका ]** गर्गस्यापत्यानि वृद्धानि । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'यञञोऽश्यापर्णान्त०' (६।१।१२६) यञ्लुप् । भृगोरपत्यं = भार्गवः । 'ऋषि वृष्ण्यन्धक०' (६।१।६१) अण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । गर्गाणां भार्गवाणां च विवाहः = गर्गभार्गविका । अनेन अकल्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत् - तत्०' (२।४।१११) इ ।

**[ कुरुवृष्णिका ]** कुरु । कुरोरपत्यानि । 'दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ज्यः' (६।१।११८) ञ्यप्र० । वृष्णेरपत्यानि । 'दु-नादि०' (६।१।११८) ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । कुरूणां वृष्णीनां च विवाहः = कुरुवृष्णिका । अनेन अकल्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत् - तत्०' (२।४।१११) इ ।

**[ कुरुकाशिका ]** कुरु । कुरोरपत्यानि । 'दु-नादि-कुर्वित्०' (६।१।११८) ञ्यप्र० । काशेरपत्यानि । 'दु-नादि-कुर्वित्०' (६।१।११८) ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । कुरूणां काशा(शी)नां च विवाहः = कुरुकाशिका । अनेन अकल्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत् - तत्०' (२।४।१११) इ ।

लकारः स्त्रीत्वार्थः ।।छ।।

## अदेवासुरादिभ्यो वैरे ॥ ६।३।१६४ ॥

**[ अदेवासुरादिभ्यः ]** देवाश्च असुराश्च = देवासुराः(रम्) । देवासुरा(रं) आदिर्येषां ते = देवासुरादयः । न देवासुरादयः = अदेवासुरादयस्तेभ्यः ।

**[ वैरे ]** वैर सप्तमी ङि ।

**[ बाभ्रवशालङ्कायनिका ]** बभ्रु । बभ्रोरपत्यानि = बाभ्रवाः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) 'वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । शलङ्कोरपत्यानि वृद्धानि = शालङ्कायनाः । 'क्रोष्टु-शलङ्कोर्लुक् च' (६।१।५६) आयनण्प्र० → आयन-उकारस्य च लुक् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । बाभ्रवाणां शालङ्कायनानां च वैरं = बाभ्रवशालङ्कायनिका । अनेन अकल्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत् - तत्०' (२।४।१११) इ ।

**[ काकोलूकिका ]** काकाश्च उलूकाश्च = काकोलूकम् । काकोलूकस्य इदं वैरं = काकोलूकिका ।

**[ श्वावराहिका ]** श्वन्-वराह । श्वा च वराहश्च = श्वावराहम् । 'शुनः' (३।२।९०) आत्वम् । श्वावराहस्य इदं वैरं = श्वावराहिका ।

**[ श्वशृगालिका ]** श्वा च शृगालश्च = श्वशृगालम् । श्वशृगालस्य इदं वैरं = श्वशृगालिका ।

**[ अहिनकुलिका ]** अहयश्च नकुलाश्च = अहिनकुलम् । अहिनकुलस्य इदं वैरं = अहिनकुलिका ।

**[ दैवासुरम् ]** देवाश्च असुराश्च = देवासुराः(रम्), तेषामिदं वैरं = दैवासुरम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ राक्षोऽसुरम् ]** रक्षस्-असुर । रक्षांसि च असुराश्च = रक्षोऽसुराः । तेषामिदं वैरं = राक्षोऽसुरम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## नटान्नृत्ते ञ्यः ॥ ६।३।१६५ ॥

**[ नटात् ]** नट पञ्चमी ङसि ।

**[ नृत्ते ]** नृत्त सप्तमी ङि ।

**[ ञ्यः ]** ञ्य प्रथमा सि ।

**[ नाट्यम् ]** नटानामिदं नृत्यं = नाट्यम् । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## छन्दोगौक्थिक-याज्ञिक-बह्वृचाच्च धर्मा-ऽऽम्नाय-सङ्घे ॥ ६।३।१६६ ॥

**[ छन्दोगौक्थिकयाज्ञिकबह्वृचात् ]** छन्दोगश्च औक्थिकश्च याज्ञिकश्च बह्वृचश्च = छन्दोगौक्थिकयाज्ञिकबह्वृचम्, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ धर्माऽऽम्नायसङ्घे ]** धर्मश्च आम्नायश्च सङ्घश्च = धर्माऽऽम्नायसङ्घम्, तस्मिन् ।

**[ छान्दोग्यम् ]** छन्दस् कैं (३६) - 'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । छन्दो गायन्ति = छन्दोगाः । 'आतो होऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । छन्दोगानां धर्मः-आम्नायः-सङ्घो वा = छान्दोग्यम् । अनेन ञ्यप्र० → य । 'वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औक्थिक्यम् ]** उक्थं वेत्त्यधीते वा = औक्थिकः । 'याज्ञिकौक्थिक-लौकायितिकम्' (६।२।१२२) औक्थिकनिपात्यते । औक्थिकानां धर्मः-आम्नायः - सङ्घो वा = औक्थिक्यम् । अनेन ञ्यप्र० → य । 'वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ याज्ञिक्यम् ]** यज्ञं याज्ञिक्यं वा वेत्त्यधीते वा = याज्ञिकः । 'याज्ञिकौक्थिक-लौकायितिकम्' (६।२।१२२) याज्ञिकनिपात्यते । याज्ञिकानां धर्मः-आम्नायः-सङ्घो वा = याज्ञिक्यम् । अनेन ञ्यप्र० → य । 'वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बाह्वृच्यम् ]** बहु-ऋच् । बह्व्य ऋचो यस्य सः = बह्वृचः । 'नञ्-बहोर्ऋचो माणव-चरणे (७।३।१३५) अप्समासान्तः । बह्वृचेन प्रोक्तं वेदं विदन्त्यधीयते वा । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) इति वा अण् । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'कठादिभ्यो वेदे लुप्' (६।३।१८३) अण्लुप् । बह्वृचां(चानां) धर्मः-आम्नायः-सङ्घो वा = बाह्वृच्यम् । अनेन ञ्यप्र० → य । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ नाट्यम् ]** नटानां धर्मः-आम्नायः-सङ्घो वा = नाट्यम् । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) 'वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ छान्दोगम् ]** छन्दोगानामिदं गृहं = छान्दोगम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) 'वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।।छा।

### आथर्वणिकादणिकलुक् च ॥ ६।३।१६७ ॥

**[ आथर्वणिकात् ]** आथर्वणिक पञ्चमी ङसि ।

**[ अण् ]** अण् प्रथमा सि ।

**[ इकलुक् ]** इकस्य लुक् = इकलुक् । प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

आथर्वणिकादण् लुक् चेति क्रियतां किमिकोपादानेन ? यतोऽणो विधानसामर्थ्यात् लुक् न भविष्यति, ततश्च 'प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्' (न्या०सं०वक्ष०(२)/सूत्र(२)) इति न्यायात् इकस्यैव लोपो भविष्यति । न च वाच्यमुभयोरपि प्राप्नोति, यदि स्यात्तदा विधानस्य न किमपि फलम् ? नैवम्, विधानस्य एतदेव फलमकञभावस्तत उभयोरपि लोपेऽनिष्टं स्यात् रूपं, अत इकग्रहणं विधातव्यम् ।

**[ आथर्वणः ]** अथर्वन् । अथर्वणा प्रोक्तं वेदं वेत्त्यधीते वा = आथर्वणिकः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'न्यायादेरिकण्' (६।२।११८) इकण्प्र० → इक । वृद्धिः आ । अत एव निपातनात् गणपाठसामर्थ्याद्वा 'प्रोक्तात्' (६।२।१२९) इत्यनेन इकणो लुप् न भवति ।

अथवा अथर्वाणं आथर्वणं वा वेत्त्यधीते वा = आथर्वणिकः । 'न्यायादेरिकण्' (६।२।११८) तस्य लुप् न प्राप्नोति, अप्रोक्तत्वात् इति वा । आथर्वणिकानां धर्मः-आम्नायः-सङ्घो वा = आथर्वणः । अनेन अण्प्र० → इकण्लोपश्च । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

चरणादकञ्(ञि) प्राप्ते वचनम् ।।छा।

**चरणादकञ्** ॥ ६।३।१६८ ॥

**[ चरणात् ]** चरण पञ्चमी ङसि ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

चरणशब्दो वेदशाखावचनस्तद्योगात्तदध्यापि(यि)षु वर्त्तते ।

**[ काठकः ]** कठेन प्रोक्तं वेदं विदन्त्यधीयते वा = कठाः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) इत्यनेन द्वितीयाणो लोपः । 'कठादिभ्यो वेदे लुप्' (६।३।१८३) इत्यनेन प्रथमस्याणो लुप्। कठानां धर्मः आम्नायः-सङ्घो वा = काठकः अनेन अकञ्प्र० → अक । 'वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्।

**[ चारककः ]** चरकेन(ण) प्रोक्तं वेदं विदन्त्यधीयते वा = चरकाः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) द्वितीयाणो लुप् । 'कठादिभ्यो वेदे लुप्' (६।३।१८३) प्रथमस्याणो लुप् । चरकाणां धर्मः-आम्नायः-सङ्घो वा = चारककः । अनेन अकञ्प्र० → अक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्।

**[ कालापकः ]** कलापिन् । कलापिना प्रोक्तं वेदं विदन्त्यधीयते वा । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) द्वितीयाणो लुप् । प्रथमस्य तु कठादावभावान्न लुप् । इन्-लुप् । वृद्धिः आ । कालापानां धर्मः-आम्नायः-सङ्घो वा = कालापकः । अनेन अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्।

**[ पैप्पलादकः ]** पिप्पलादस्यापत्यं = पैप्पलादः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्। पैप्पलादेन प्रोक्तं वेदं विदन्त्यधीयते वा = पैप्पलादाः । 'दोरीयः' (६।३।३२) बाधनाय 'मौदादिभ्यः' (६।३।१८२) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) द्वितीयाणो लुप् । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्। पैप्पलादानां धर्मः-आम्नायः-सङ्घो वा = पैप्पलादकः । अनेन अकञ्प्र० → अक ।

**[ मौदकः ]** मुदस्यापत्यं = मौदः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० । 'वृद्धिः' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मौदेन प्रोक्तं वेदं विदन्त्यधीयते वा = मौदाः । 'दोरीयः' (६।३।३२) बाधनाय 'मौदादिभ्यः' (६।३।१८२) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) द्वितीयाणो लुप् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्। मौदानां धर्मः-आम्नायः-सङ्घो वा = मौदकः । अनेन अकञ्प्र० → अक ।

**[ आर्चाभकः ]** ऋचाभेन प्रोक्तं वेदं विदन्त्यधीयते वा = आर्चाभिनः । 'शौनकादिभ्यो णिन्' (६।३।१८६) णिन्प्र० → इन् । 'तद् वेत्त्यधीते' (६।२।११७) अण् । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । आर्चाभिनां धर्मः-आम्नायः-सङ्घो वा = आर्चाभकः । अनेन अकञ्प्र० → अक । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

**[ वाजसनेयकः ]** वाजसना । वाजसनाया अपत्यं = वाजसनेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । वाजसनेयेन प्रोक्तं वेदं विदन्त्यधीयते वा = वाजसनेयिनः । 'शौनकादिभ्यो णिन्' (६।३।१८६) णिन्प्र० → इन् । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् ।

वाजसनेयिनां धर्मः-आम्नायः-सङ्घो वा = वाजसनेयकः । अनेन अकञ्प्र० → अक । 'नोऽपदस्य०' (७।४।६१) इन्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छा।

**गोत्राददण्डमाणव-शिष्ये** ॥ ६।३।१६९ ॥

**[ गोत्रात् ]** गोत्र पञ्चमी ङसि ।

स्वापत्यसन्तानस्येति लक्षणं गोत्रमिह ग्राह्यम् ।

**[ अदण्डमाणवशिष्ये ]** दण्डश्च माणवश्च शिष्यश्च = दण्डमाणवशिष्यम् । न दण्डमाणवशिष्यम् = अदण्डमाणवशिष्यम्, तस्मिन् ।

**[ औपगवकम् ]** गोः समीपम् = उपगुः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । उपगोरपत्यमौपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । औपगवस्येदम् = औपगवकम् । ईयप्राप्तिरनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कापटवकम् ]** कपटोरपत्यं = कापटवः । ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । कापटवस्येदं = कापटवकम् । ईयप्राप्तिरनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दाक्षकम् ]** दक्षस्यापत्यं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षेरिदं = दाक्षि(क्ष)कम् । अनेन अकञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ प्लाक्षकम् ]** प्लक्षस्यापत्यं = प्लाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्लाक्षेरिदं = प्लाक्षकम् । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ गार्गकम् ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यस्येदं = गार्ग्य(र्ग)कम् । 'दोरीयः' (६।३।३२) ईयप्राप्तिरनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् ।

**[ गार्ग्यायणकम् ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यस्यापत्यं युवा = गार्ग्यायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६२) न० → ण० । गार्ग्यायणस्येदं = गार्ग्यायणकम् । 'दोरीयः' (६।३।३२) ईयप्राप्तिरनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ग्लौचुकायनकम् ]** ग्लुचुकस्यापत्यं = ग्लुचुकायनिः । 'अदोरायनिः प्रायः' (६।१।११३) आयनिप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ग्लुचुकायनेरिदं = ग्लौचुकायनकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ म्लौचुकायनकम् ]** म्लुचुकस्यापत्यं = म्लुचुकायनिः । 'अदोरायनिः प्रायः' (६।१।११३) आयनिप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । म्लुचुकायनेरिदं = म्लौचुकायनकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ काण्वा दण्डमाणवाः शिष्या वा ]** कण्वस्यापत्यं वृद्धं = काण्व्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । काण्व्यस्य इमे = काण्वाः । 'शकलादेर्यञः' (६।३।२७) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तद्धितय०' (२।४।९२) यलुक् । प्रथमा जस् ।

**[ गौकक्षाः ]** गोकक्षस्यापत्यं वृद्धं = गौकक्ष्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गौकक्ष्यस्य इमे = गौकक्षाः । 'शकलादेर्यञः' (६।३।२७) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितय०' (२।४।९२) यलुक् । प्रथमा जस् ।

**[ दाक्षाः ]** दक्षस्यापत्यं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षेरिमे = दाक्षाः । 'वृद्धेञः' (६।३।२८) अञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा जस् ।

**[ प्लाक्षाः ]** प्लक्षस्यापत्यं = प्लाक्षिः । 'अत इञ्' (६।३।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्लाक्षेरिमे = प्लाक्षाः । 'वृद्धेञः' (६।३।२८) अञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा जस् ।

**[ माहकाः ]** अर्ह (५६४) - 'मह पूजायाम्' (५६५) मह् । महतीति माहकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । माहकस्यापत्यं = माहकिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । माहकेरिमे छात्राः = माहकाः । 'वृद्धेञः' (६।३।२८) अञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा जस् ।

दण्डप्रधाना माणवाः = दण्डमाणवाः, आश्रमिणां रक्षापरिचरणार्थाः ।

शिष्या अध्ययनार्था अन्तेवासिनः ॥छ॥

## रैवतिकादेरीयः ॥ ६।३।१७० ॥

**[ रैवतिकादेः ]** रैवतिक आदिर्यस्य सः = रैवतिकादिः, तस्मात् ।

**[ ईयः ]** ईय प्रथमा सि ।

**[ रैवतिकीयं शकटम्, रैवतिकीयः सङ्घादिः, रैवतिकीया दण्डमाणवशिष्याः ]** रेवत । 'रेवत-रोहिणाद् भे' (२।४।२६) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । रेवत्या चन्द्रयुक्तया युक्तः कालोऽपि = रेवती । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । ''लुप् त्वप्रयुक्ते'' अण्लुप् । 'ङ्यादेर्गौण०' (२।४।९५) ङीनिवृत्तिः । पुनरेव ङी । रेवत्यां जाता = रेवती । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० । 'चित्रा-रेवती-रोहिण्याः स्त्रियाम्' (६।३।१०८) अण्लुप् । पुनः ङीनिवृत्तिः । पुनरेव ङी । रेवत्या अपत्यं = रैवतिकः । 'रेवत्यादेरिकण्' (६।१।८६) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । रैवतिकस्येमे(दं) = रैवतिकीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । रैवतिकस्येमे छात्राः = रैवतिकीयाः । अनेन ईयप्र० । प्रथमा जस् ।

**[ गौरग्रीवीयं शकटम्, गौरग्रीवीयः सङ्घादिः, गौरग्रीवीया दण्डमाणवशिष्याः ]** गौरी ग्रीवा यस्य सः = गौरग्रीवः । 'गोश्चान्ते ह्रस्वो०' (२।४।९६) ह्रस्वः । गौरग्रीवस्यापत्यं = गौरग्रीविः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गौरग्रीवेरिदं = गौरग्रीवीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् । एवमग्रेऽपि । गौरग्रीवेरिमे छात्राः = गौरग्रीवीयम्(याः) । अनेन ईयप्र० । प्रथमा जस् ॥छ॥

## कौपिञ्जल-हास्तिपददादण् ॥ ६।३।१७१ ॥

**[ कौपिञ्जलहास्तिपदात् ]** कौपिञ्जलश्च हास्तिपदश्च = कौपिञ्जलहास्तिपदम्, तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) अकञ्-'दोरीयः' (६।३।३२) ईय इत्यनयोरपवादः ।

**[ कौपिञ्जलं शकटम्, कौपिञ्जला दण्डमाणवशिष्याः ]** कुपिञ्जलस्यापत्यं = कौपिञ्जलः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कौपिञ्जलस्येदं = कौपिञ्जलम् । कौपिञ्जलस्येमे = कौपिञ्जलाः । अनेन अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम्-जस् ।

**[ हास्तिपदं शकटम्, हास्तिपदा दण्डमाणवशिष्याः ]** हस्तिपादस्यापत्यं = हास्तिपदः । अत एव निपातनात् 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ - पादस्य च पद्भावः । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । हास्तिपदस्येदं = हास्तिपदम् । हास्तिपदस्येमे = हास्तिपदाः । अनेन अण्प्र० → अ । वृद्धिः । सि-अम्-जस् ।

**[ कौपिञ्जली स्थूणः( लः ) ]** कौपिञ्जलस्येयं = कौपिञ्जली । अनेन अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । स्थूलः ।

**[ हास्तिपदी स्थूणः( लः ) ]** हास्तिपदस्य [इमे]इयम् । अनेन अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । स्थूलः ।।छा।

## सङ्घ-घोषा-ऽङ्क-लक्षणेऽञ्-यञिञः ॥ ६।३।१७२ ॥

**[ सङ्घघोषाऽङ्कलक्षणे ]** सङ्घश्च घोषश्च अङ्कश्च लक्षणं च = सङ्घघोषाऽङ्कलक्षणम्, तस्मिन् ।

**[ अञ्यञिञः ]** अञ् च यञ् च इञ् च = अञ्यञिञ्, तस्मात् ।

'गोत्राददण्डमाणव-शिष्ये' (६।३।१३९) इत्यादिना विहितोऽकञोऽपवादः ।

**[ वैदः सङ्घो घोषोऽङ्को वा, वैदं लक्षणम् ]** विदस्यापत्यानि वृद्धानि । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । 'न प्राग्जितीये स्वरे' (६।१।१३५) इति निषेधात् 'यञञोऽश्यापर्णान्त०' (६।१।१२६) इत्यादिना न अञ्लोपः । विदानामयं सङ्घो घोषोऽङ्को वा = वैदः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'यावत् संभवस्तावद्विधिः' (न्या० सं० वक्ष० (२)/सूत्र (५६)) इति न्यायात् अलुप् । एवम्-विदानामिदं = वैदम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । सि-अम् ।

**[ गार्गः सङ्घो घोषोऽङ्को वा, गार्गं लक्षणम् ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । गर्गाणामयं सङ्घादिः = गार्गः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । एवम्-गर्गाणामिदं = गार्गम् ।

**[ दाक्षः सङ्घो घोषोऽङ्को वा, दाक्षं लक्षणम् ]** दक्षस्यापत्यानि = दाक्षयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । दाक्षीणामयं सङ्घादिः = दाक्षः । अनेन अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । एवम्-दाक्षेरिदं = दाक्षम् । अनेन अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ औपगवकः सङ्घादिः ]** गोः समीपम् = उपगुः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । उपगोरपत्यमौपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । औपगवस्यायं सङ्घादिः = औपगवकः । 'गोत्राददण्ड०' (६।३।१६९) अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौतङ्गमीयः सङ्घादिः ]** सुतङ्गमेन निवृत्ता । 'सुतङ्गमादेरिञ्' (६।२।८५) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'इञ इतः' (२।४।७१) ङी । सौतङ्गम्या अयं सङ्घादिः । 'तस्येदम्' (६।३।१६०) यथाविहितः प्राप्तौ 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

अथ अङ्कलक्षणयोः को विशेषः ? लक्षणं लक्ष्यस्यैव स्वम्-यथा शिखादि । यथा शिखया परिव्राजकमद्राक्षीत् । शिखालक्षणं स्वं परिव्राजकस्यैव । अङ्कस्तु स्वामिविशेषज्ञापकः । स्वस्तिकादिर्गवादिस्थो न गवादीनामेव स्वं भवति ॥छा॥

## शाकलादकञ् च ॥ ६।३।१७३ ॥

**[ शाकलात् ]** शाकल पञ्चमी ङसि ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

ननु "शाकलाद् वा" इति क्रियतां चरणत्वात्, पक्षे अकञ् भविष्यति, नैवम्-अत्र चत्वारोऽर्थाः सङ्घादयः सन्ति । एषां मध्यात्त्रैक एवास्ति, ततोऽन्येषु न सिध्यति, इत्यनेनाकञ् विधानम् ।

**[ शाकलः, शाकलकः संघादिः ]** शकलस्यापत्यं = शाकल्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शाकल्येन प्रोक्तं वेदं विदन्त्यधीयते वा = शाकलाः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) द्वितीयाणो लुप् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । शाकलानां सङ्घो घोषोऽङ्को वा = शाकलः । अनेन अण्प्र० → अ - अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शाकलं, शाकलकं लक्षणम् ]** शाकलानामिदं लक्षणं = शाकलम् । अनेन अण्प्र० → अ । द्वितीये 'गोत्राददण्ड०' (६।३।१६९) अकञ्प्र० → अक (अनेन अकञ्प्र० → अक) । उभयत्र वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा॥

## गृहेऽग्नीधो रण् धश्च ॥ ६।३।१७४ ॥

**[ गृहे ]** गृह सप्तमी ङि ।

**[ अग्नीधः ]** अग्नीध् पञ्चमी ङसि ।

**[ रण् ]** रण् प्रथमा सि ।

**[ धश्च ]** ध प्रथमा सि । च प्रथमा सि ।

**[ आग्नीध्रम् ]** अग्नीध् ऋत्विग्विशेषः । अग्नि 'ञिइन्धैपि दीप्तौ' (१४९८) इन्ध् । अग्निमिन्द्धे = अग्नीध् । क्विप्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । अग्नीध इदं गृहमाग्नीध्रम् । अनेन रण्प्र० → र-धस्य मध्ये धकारः ॥छा॥

## रथात् साऽऽदेश्च वोढ्रङ्गे ॥ ६।३।१७५ ॥

**[ रथात् ]** रथ पञ्चमी ङसि ।

**[ साऽऽदेः ]** सह आदिना वर्त्तत इति साऽऽदिः, तस्मात् । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सह० → सभावः ।

**[ च ]** च प्रथमा सि ।

**[ वोढ्रङ्गे ]** वोढा च अङ्गं च = वोढ्रङ्गम्, तस्मिन् ।

**[ रथ्योऽश्वः ]** रथस्यायं वोढा = रथ्यः । 'यः' (६।३।१७६) इति यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अश्व प्रथमा सि ।

**[ रथ्यं चक्रम् ]** रथस्येदं = रथ्यम् । 'यः' (६।३।१७६) इत्यनेन यप्र० ।

**[ रथ्यं युगम् ]** रथस्येदं रथ्यम् । 'यः' (६।३।१७६) इत्यनेन यप्र० । युगम् । धूसरु कथ्यते ।

**[ द्विरथः ]** द्वि-रथ । द्वयो रथयोर्वोढा = द्विरथः । 'यः' (६।३।१७६) यप्र० । 'द्विगोरनपत्ये०' (६।१।२४) यलुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ त्रिरथः ]** त्रि-रथ । त्रयाणां रथानां वोढा = त्रिरथः । 'यः' (६।३।१७६) यप्र० । 'द्विगोरनपत्ये०' (६।१।२४) यलुप् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ द्विरथ्यः ]** द्वयो रथयोर्वोढा = द्विरथ्यः ।

**[ त्रिरथ्यः ]** त्रयाणां रथानां वोढा = त्रिरथ्यः ।

**[ परमरथ्यम् ]** परमश्चासौ रथश्च = परमरथः । परमरथस्येदं = परमरथ्यम् । 'यः' (६।३।१७६) इत्यनेन यप्र० । मतान्तरे अकारस्य लुग् 'द्विगोरनपत्ये०' (६।१।२४) इत्यादिना ।

**[ उत्तमरथ्यम् ]** उत्तमश्चासौ रथश्च = उत्तमरथः । उत्तमरथस्येदम् = उत्तमरथ्यम् । 'यः' (६।३।१७६) इत्यनेन यप्र० । मतान्तरे अकारस्य लुग् 'द्विगोरनपत्ये०' (६।१।२४) इत्यादिना ।

**[ आश्वरथं चक्रम् ]** अश्वैर्युक्तो रथः = अश्वरथः । अश्वरथस्येदम् = आश्वरथम् । 'पत्रपूर्वादञ्' (६।३।१७७) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि । चक्रम् ॥छ॥

## यः ॥ ६।३।१७६ ॥

**[ यः ]** य प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्ग०' (१।३।५३) विसर्गः ।

**[ रथ्यः ]** रथस्यायं वोढा = रथ्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्विरथः ]** द्वयो रथयोर्वोढा = द्विरथः । अनेन यप्र० । 'द्विगोरनपत्ये०' (६।१।२४) यलुप् ।

**[ त्रिरथः ]** त्रयाणां रथानां वोढा = त्रिरथः । अनेन यप्र० । 'द्विगोरनपत्ये०' (६।१।२४) यलुप् ।

**[ रथ्यम् ]** रथस्येदं = रथ्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ परमरथ्यम् ]** परमश्चासौ रथश्च = परमरथः । परमरथस्येदं = परमरथ्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ काष्ठरथ्यं चक्रम् ]** काष्ठस्य रथः = काष्ठरथः । काष्ठरथस्येदं = काष्ठरथ्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । चक्रम् ॥छ॥

## पत्रपूर्वादञ् ॥ ६।३।१७७ ॥

**[ पत्रपूर्वात् ]** पत्रवाचीशब्दः पूर्वो यस्यासौ पत्रपूर्वस्तस्मात् ।

**[ अञ् ]** अञ् प्रथमा सि ।

पत्रं वाहनम्, तत्पूर्वात् रथशब्दात् ।

**[ आश्वरथं चक्रम् ]** अश्वैर्युक्तो रथः = अश्वरथः । अश्वरथस्येदम् = आश्वरथम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । चक्रम् ।

**[ आश्वरथं युगम् ]** अश्वैर्युक्तो रथः = अश्वरथः । अश्वरथस्येदम् = आश्वरथम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । युगम् ।

**[ औष्ट्ररथम् ]** उष्ट्राणां रथः = उष्ट्ररथः । उष्ट्रस्थस्येदम् = औष्ट्ररथम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ रासभरथम् ]** रासभानां रथः = रासभरथः । रासभरथस्येदं = रासभरथम् । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

**वाहनात्** ॥ ६।३।१७८ ॥

**[ वाहनात् ]** 'वहीं प्रापणे' (९९६) वह् । उह्यते तेन = वहनम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । वहनमेव = वाहनम् । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तस्मात् ।

**[ औष्ट्रः ]** उष्ट्रस्यायम् = औष्ट्रः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ रासभः ]** रासभस्यायं = रासभः । अनेन अञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ हास्तो रथः ]** हस्तिन् । हस्तिनः अयं = हास्तः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । रथः ॥छ॥

**वाह्य-पथ्युपकरणे** ॥ ६।३।१७९ ॥

**[ वाह्यपथ्युपकरणे ]** वाह्यश्च पन्थाश्च उपकरणं च = वाह्यपथ्युपकरणम्, तस्मिन् ।

**[ आश्वो रथः ]** अश्वस्यायम् = आश्वः । 'वाहनात् (६।३।१७८) अञ्प्र० → अ । 'वृद्धि स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । रथः ।

**[ आश्वः पन्थाः ]** अश्वस्यायम् = आश्वः । 'वाहनात् (६।३।१७८) अञ्प्र० → अ । 'वृद्धि स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । पन्थाः ।

**[ आश्वं पल्ययनम् ]** अश्वस्येदम् = आश्वम् । 'वाहनात् (६।३।१७८) अञ्प्र० → अ । 'वृद्धि स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । पलाण कथ्यते ।

**[ आश्वी कशा ]** अश्वस्येयम् = आश्वी । 'वाहनात् (६।३।१७८) अञ्प्र० → अ । 'वृद्धि स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । कसा वामठी कथ्यते ॥छ॥

## वहेस्तुरिश्चादिः ॥ ६।३।१८० ॥

**[ वहेस्तुरिश्चादिः ]** वहि पञ्चमी ङसि । तृ पञ्चमी ङसि । इ प्रथमा सि । च प्रथमा सि । आदि प्रथमा सि ।

**[ सांवहित्रम् ]** सम् 'वहीं प्रापणे' (९९६) वह् । संवहतीति संवोढा । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । संवोढुं सारथेरिदं = सांवहित्रम् । अनेन अञ्प्र० → अ - तृशब्दस्य चादिः इश्च । वृद्धिः । 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् । सि-अम् ॥छ॥

## तेन प्रोक्ते ॥ ६।३।१८१ ॥

**[ तेन ]** तेन पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ प्रोक्ते ]** प्रोक्त सप्तमी ङि ।

प्रकर्षेण व्याख्यानं(तं)-अध्यापितं वा = प्रोक्तम् ।

**[भाद्रबाहवानि उत्तराध्ययनानि]** भद्रबाहु । भद्रबाहुना प्रोक्तानि = भाद्रबाहवानि । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । उत्तर 'इंङ्क अध्ययने' (११०४) इ, अधिपूर्व० । उत्तरे-उत्कृष्टे काले अधीयते = उत्तराध्यनानि । 'भुजि-पत्यादिभ्यः कर्माऽपादाने' (५।३।१२८) अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'इवर्णादेरस्वे०' (१।२।२१) यत् । उभयत्र जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । प्रतीतं एकं तेन बुद्धाः । आदिशब्दाच्चतुर्दशपूर्वधराः - चतुर्दशपूर्वज्ञाः - गणधरप्रत्येकबुद्धादिभिः कृतानि-तेन व्याख्यातानीत्यर्थः ।

**[ याज्ञवल्कानि ब्राह्मणानि ]** यज्ञवल्क । यज्ञवल्कस्यापत्यं = याज्ञवल्क्यम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । याज्ञवल्क्येन प्रोक्तानि = याज्ञवल्कानि । अनेन 'शकलादेर्यञः' (६।३।२७) अञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । प्र० जस् । ब्राह्मणेति नाम ग्रन्थानि ।

**[ पाणिनीयम् ]** पाणिनि । पाणिनिना प्रोक्तं = पाणिनीयम् । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ आपिशलम् ]** अपिशलस्यापत्यम् = आपिशलिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आपिशलिना प्रोक्तम् = आपिशलम् । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ काशकृत्स्नम् ]** कस(श)कृत्स्नस्यापत्यं = काशकृत्स्निः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । काशकृत्स्निना प्रोक्तं = काशकृत्स्नम् । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ औशनसम् ]** उशनस् । उशनसा प्रोक्तम् = औशनसम् । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । सि-अम् ।

**[ बार्हस्पत्यम् ]** बृहस्पतिना प्रोक्तं = बार्हस्पत्यम् । 'अनिदम्यणपवादे च०' (६।१।१५) ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ॥छ॥

## मौदादिभ्यः ॥ ६।३।१८२ ॥

**[ मौदादिभ्यः ]** मौद आदिर्येषां ते = मौदादयः, तेभ्यः ।

**[ मौदाः ]** 'मुदि हर्षे' (७२६) मुद् । मोदते = मोदः । 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । यद्वा 'मुदण् हर्षे(संसर्गे)' (१७४३) मुद् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । मोदयतीति मुदः । 'अच्' (५।१।४९) अच्प्र० → अ । 'णेरनिटि' (६।३।८३) णिच्लुक् । मुदस्य मोदस्य वा अपत्यं = मौदः । 'ऋषि-वृष्ण्य०' (६।१।६१) अण्प्र० → अ । 'वृद्धि स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मौदेन प्रोक्तं वेदं विदन्त्यधीयते वा = मौदाः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) द्वितीयस्याणो लुप् । 'कठादिभ्यो वेदे लुप्' (६।३।१८३) प्रथमस्याणो लुप् । यद्वा मौदेन प्रोक्तं वेदं विदन्त्यधीयते वा । 'तेन प्रोक्ते' (६।३।१८१) - 'तद् वेत्त्यधीते' (६।२।११७) वा इत्यनयोः प्राप्तौ अनेन अण्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । एवमग्रेपि ज्ञेयम् ।

**[ पैप्पलादाः ]** पिप्पलादेन प्रोक्तं वेदं विदन्त्यधीयते वा । अनेन अण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ जाजलाः ]** जाजलमस्यास्ति । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जाजलेन जाजलिना वा प्रोक्तं वेदं विदन्त्यधीयते वा = जाजलाः । अनेन अण्प्र० → अ । 'कलापि-कुथुमि-तैतलि-जाजलि०' (७।४।६२) इत्यनेन अन्त्यस्वरादिलोपः । प्रथमा जस् ।

**[ माथुरी वृत्तिः ]** मथुरायां भवः = माथुरः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । माथुरेण प्रोक्ता = माथुरी । अनेन अण्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ सौलभानि ब्राह्मणानि ]** सुलभस्यापत्यं = सौलभः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सौलभेन प्रोक्तानि । अनेन अण्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्र० जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।।छा।

## कठादिभ्यो वेदे लुप् ॥ ६।३।१८३ ॥

**[ कठादिभ्यः ]** कठ आदिर्येषां ते = कठादयः, तेभ्यः ।

**[ वेदे ]** वेद सप्तमी ङि ।

**[ लुप् ]** लुप् प्रथमा सि ।

**[ कठाः ]** कठेन प्रोक्तं वेदं विदन्त्यधीयते वा = कठाः ।

**[ चरकाः ]** चरकेण प्रोक्तं वेदं विदन्त्यधीयते वा = चरकाः ।

**[ कर्कराः ]** कर्करेण प्रोक्तं वेदं विदन्त्यधीयते वा = कर्कराः ।

**[ धेनुकण्ठाः ]** धेनुकण्ठेन प्रोक्तं वेदं विदन्त्यधीयते वा = धेनुकण्ठाः ।

**[ गोगडाः ]** गोरिव क(ग)डोऽस्य सः गौ(गो)गडः । गौ(गो)गडेन प्रोक्तं वेदं विदन्त्यधीयते वा = गोगडाः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७)वा अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । अनेन अण्लुप् । सर्वत्र प्रथमा जस् ।

**[ चारकाः श्लोकाः ]** चरकेण प्रोक्ताः = चारकाः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । श्लोकाः ।

**[ चरको वैशम्पायनः ]** चरकोऽत्र वैशम्पायनः कृष्णद्वैपायनशिष्यः । विशम्पस्यापत्यं = वैशम्पायनः । 'अश्वादेः' (६।१।४९) आयनञ्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## तित्तिरि-वरतन्तु-खण्डिकोखादीयण् ॥ ६।३।१८४ ॥

**[ तित्तिरिवरतन्तुखण्डिकोखात् ]** तित्तिरिश्च वरतन्तुश्च खण्डिकश्च उखश्च = तित्तिरिवरतन्तुखण्डिकोखम्, तस्मात् ।

**[ ईयण् ]** ईयण् प्रथमा सि ।

**[ तैत्तिरीयाः ]** तित्तिरिणा प्रोक्तं वेदं विदन्त्यधीयते वा = तैत्तिरीयाः । अनेन ईयण्प्र० → ईय । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । प्रथमा जस् ।

**[ वारतन्तवीयाः ]** वरास्तन्तवो यज्ञोपवीतलक्षणाः । यद्वा वर 'तनूयी विस्तारे' (१४९९) तन् । वरं तनोति = वरतन्तुः । 'कृ-सि-कम्यमि-गमि तनि० (उणा० ७७३) तुन्प्र० → तु । 'म्नां धुड्वर्गेऽन्त्यो०' (१।३।३९) न० → न० । वरतन्तुना प्रोक्तं वेदं विदन्त्यधीयते वा = वारतन्तवीयाः । अनेन ईयण्प्र० → ईय । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा जस् ।

**[ खाण्डिकीयाः ]** खण्डा अस्य सन्ति = खण्डिकाः । 'नावादेरिकः' (७।२।३) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । खण्डिकैः प्रोक्तं वेदं विदन्त्यधीयते वा = खाण्डिकीयाः । अनेन ईयण्प्र० → ईय । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् ।

**[ औखीयाः ]** उखेन प्रोक्तं वेदं विदन्त्यधीयते वा = औखीयाः । अनेन ईयण्प्र० → ईय । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । प्रथमा जस् ।

**[ तैत्तिराः श्लोकाः ]** तित्तिरिणा प्रोक्ताः = तैत्तिराः । 'तेन प्रोक्ते (६।३।१८१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा जस् । श्लोकाः । अत्रापि 'वेदेन्ब्राह्मणमत्रैव' (६।२।१३०) इत्युपतिष्ठते ॥छ॥

## छगलिनो णेयिन् ॥ ६।३।१८५ ॥

**[ छगलिनः ]** छगलिन् पञ्चमी ङसि ।

**[ णेयिन् ]** णेयिन् प्रथमा सि ।

**[ छागलेयिनः ]** छगलोऽस्यास्ति = छगली । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । छगलिना प्रोक्तं वेदं विदन्त्यधीयते वा = छागलेयिनः । अनेन णेयिन्प्र० → एयिन् । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् प्रथमा जस् ॥छ॥

**शौनकादिभ्यो णिन्** ॥ ६।३।१८६ ॥

**[ शौनकादिभ्यः ]** शौनक आदिर्येषां ते = शौनकादयः, तेभ्यः ।

**[ णिन् ]** णिन् प्रथमा सि ।

'तेन प्रोक्ते' (६।३।१८१) इत्यस्यापवादः ।

**[ शौनकिनः ]** शुनकस्यापत्यं = शौनकः । जुन (१३७३) 'शुनत् गतौ' (१३७४) शुन् । शुनति परमां काष्ठां कीचकाः । 'नाम्युपान्त्य०' (५।१।५४) कप्र० → अ । शुन एव = शुनकः । स्वार्थे कप्र० । 'विदादेर्वृद्धे (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शौनकेन प्रोक्तं वेदं विदन्त्यधीयते वा = शौनकिनः । अनेन णिन्प्र० → इन् । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् ।

**[ शाङ्गरविणः ]** शम् 'गृश् निगरणे'(शब्दे) (१५३८) गृ । शं - सुखं गृणाति = शङ्गरुः । 'भृ-मृ-तृ०' (उणा०७१६) बहुवचनात् उप्र० । 'नामिनो गुणोऽक्ङिति (४।३।१) गु० अर् । शङ्गरोरपत्यं = शाङ्गरवः । 'ऋषि-वृष्ण्य०' (६।१।६१) अण्प्र० → अ । वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । शाङ्गरवेण प्रोक्तं वेदं विदन्त्यधीयते वा = शाङ्गरविणः । अनेन णिन्प्र० → इन् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् ।

**[ वाजसनेयिनः ]** वाजसनाया अपत्यं = वाजसनेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय० । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । वाजसनेयेन प्रोक्तं वेदं विदन्त्यधीयते वा = वाजसनेयिनः । अनेन णिन्प्र० → इन् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् ।

**[ शौनकीया शिक्षा ]** शौनकेन प्रोक्ता = शौनकीया । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । शिक्षा ।

**[ वाजसनेय ]** संज्ञानं(समानं) नेयम् । 'समानस्य धर्मादिषु' (३।२।१४९) समानस्य सभावः = सनेयम् । वाजं यज्ञोऽत्र सनेयमस्य = वाजसनेयम् ।

**[ शापेय ]** 'शपीं आक्रोशे' (९१६) शप् । शपति आक्रोशति । 'आत्' (२।४।१८) आप्प्र० → आ । शपाया अपत्यं = शापेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शाफेय ]** 'शोंच् तक्षणे' (११४७) शो । 'आत् सन्ध्यक्षरस्य' (४।२।१) शा । 'शफ-कफ-शिफा-शोफादयः' (उणा० ३१६) शफनिपातः । 'आत्' (२।४।१८) आप्प्र० → आ । शफाया अपत्यं = शाफेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ शा )( पेय ]** 'शसू हिंसायाम्' (५४९) शस् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) शंस् । शंसतीति शस् । क्विप्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । शसं फणति = शस्फः । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अण्लोपः । 'सो रुः' (२।१।७२) स० → र० । 'रः कख-पफयोः०' । (१।३।५)(पदेशः । 'आत्' (२।४।१८) आप्प्र० → आ । श)(पस्या अपत्यं = शा)(पेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय ॥ 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ दामकण्ठ ]** दाम कण्ठे यस्य स ।

**[ कठशाठ ]** कठं शठति = कठशाठः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[ कुशायन ]** कुत्सितं शयनमस्य सः = कुश(शा)यनः । बाहुलकाद्दीर्घः ।

**[ आश्वपञ्चम ]** अश्वपञ्चमस्यापत्यम् = आश्वपञ्चम । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ परुषांसक ]** परुषो अंशो(सो) यस्य सः = परुषांसः । परुषांस एव = परुषांसकः । स्वार्थे कप्प्र० → क ।

**[ आरुणि ]** अरुणस्यापत्यम् = आरुणि । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ खादायन ]** खादस्येव अयनमस्य सः = खादायनः ।

**[ भाल्लविनः ]** भल्लव मण्ड्यते । भल्लवस्यापत्यं = भाल्लविः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । भाल्लविना प्रोक्तं वेदं विदन्त्यधीयते वा = भाल्लविनः । अनेन णिन्प्र० → इन् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा जस् ।

**[ शाट्यायनिनः ]** शटतीति शाट्यः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । शाट्यस्यापत्यं = शाट्यायनि(:) । 'तिकादेरायनिञ्' (६।१।१०७) आयनिञ्प्र० → आयनि । यद्वा शब्द(ट)स्यापत्यं वृद्धं = शाट्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शाट्यस्यापत्यं = शाट्यायनः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । वृद्धिः। 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शाट्यायनिना शाट्यायनेन वा प्रोक्तं वेदं विदन्त्यधीयते वा = शाट्यायनिनः । अनेन णिन्प्र० → इन् । 'अवर्णेवर्णस्य' (७।४।६८) इ-अलुक् । प्रथमा जस् ।

**[ ऐतरेयिणः ]** इतरस्यापत्यम् = ऐतरेयः । 'शुभ्रादिभ्यः' (६।१।७३) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ऐतरेयेण प्रोक्तं वेदं विदन्त्यधीयते वा = ऐतरेयिणः । अनेन णिन्प्र० → इन् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् ।

ब्राह्मणमपि वेद एव । मन्त्रब्राह्मणं हि वेदः । कोऽर्थः ? अयमर्थः-मन्त्रश्च ब्राह्मणश्च तयोः समुदायो वेद उक्तमिदम् ॥छ॥

## पुराणे कल्पे ॥ ६।३।१८७ ॥

**[ पुराणे ]** पुराण सप्तमी ङि ।

**[ कल्पे ]** 'कृपौङ् सामर्थ्ये' (९५९) कृप् । कल्पन्ते व्यवहारा अनेन = कल्पः । 'अच्' (५।१।४९) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु०अर् । 'ऋ-र लृ-लं कृपोऽकृपीटादिषु' (२।३।९९) र० → ल०, तस्मिन् ।

**[ पैङ्गी कल्पः ]** पिङ्ग । पिङ्गेन प्रोक्तः कल्पः पुराणः = पैङ्गी । अनेन णिन्प्र० → इन् । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । कल्पः ।

**[ आरुणपराजी कल्पः ]** अरुण 'पां पाने' (२) पा । अरुणं पाति(पिबति) = अरुणपः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । अरुणपस्य राजा = अरुणपराजा । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । अरुणपराजेन प्रोक्तः कल्पः पुराणः = आरुणपराजी । अनेन णिन्प्र० → इन् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्। प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक्।

**[ पैङ्गिनः ]** पैङ्गिन् मण्ड्यते । येऽपि पैङ्गिनं कल्पं विदन्त्यधीयते वा तेऽपि = पैङ्गिनः । अनेन पुनरेव णिन्प्र० । 'प्रोक्तात्' (६।२।१२९) इन्लुप् । प्रथमा जस् ।

**[ आरुणपराजिनः ]** ये आरुणपराजिनं कल्पं विदन्त्यधीयते वा उपचारात् तेऽपि = आरुणपराजिनः । अनेन पुनरेव णिन्प्र० । 'प्रोक्तात्' (६।२।१२९) इन्लुप् । प्रथमा जस् ।

**[ आश्मरथः कल्पः ]** अश्मरथस्यापत्यं वृद्धम् = आश्मरथ्यम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आश्मरथे(थ्ये)न प्रोक्तः कल्पः = आश्मरथः । 'शकलादेर्यञः' (६।३।२७) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

### **काश्यप-कौशिकाद् वेदवच्च** ॥ ६।३।१८८ ॥

**[ काश्यपकौशिकात् ]** काश्यपश्च कौशिकश्च = काश्यपकौशिकम्, तस्मात् ।

**[ वेदवत् ]** वेद इव = वेदवत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ च ]** च प्रथमा सि ।

'दोरीयः' (६।३।३२) इत्यस्यापवादः ।

**[ काश्यपिनः ]** कश्य 'पांक् रक्षणे' (१०६७) पा । कश्यं पातीति कश्यपः । 'आतो डोऽह्वा०' (५।१।७६) डप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'डित्यन्त्य०' (२।१।११४) आलुक् । काश्यपेन प्रोक्तं पुराणं कल्पं विदन्त्यधीयते वा = काश्यपिनः । अनेन णिन्प्र० → इन् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् ।

**[ कौशिकिनः ]** कुत्सि(शि)कस्यापत्यं वृद्धं = कौशिकः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कौशिकेन प्रोक्तं पुराणं कल्पं विदन्त्यधीयते वा = कौशिकिनः । अनेन णिन्प्र० → इन् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् ।

**[ काश्यपकः ]** काश्यपिन् । काश्यपिनां धर्मः-आम्नायः-सङ्घो वा = काश्यपकः । 'वेदेन्ब्राह्मणमत्रैव (६।२।१३०) इत्यस्य प्राप्तौ 'चरणादकञ्' (६।३।१६८) अकञ्प्र० → अक । 'नोऽपदस्य०' (७।४।६१) इन्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कौशिककः ]** कौशिकिन् मण्ड्यते । कौशिकिनां धर्मः-आम्नायः-सङ्घो वा = कौशिककः । 'वेदेन्ब्राह्मणमत्रैव' (६।२।१३०) इत्यस्य प्राप्तौ 'चरणादकञ्' (६।३।१६८) अकञ्प्र० → अक । 'नोऽपदस्य०' (७।४।६१) इन्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ काश्यपीया संहिता ]** काश्यपेन प्रोक्ता = काश्यपीया । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ काश्यपीयः ]** इदानींतनेन गोत्रकाश्यपेन प्रोक्तः कल्पः = काश्यपीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अत्र गोत्रेण नाम्ना काश्यपो न त्वादिभूत इति शेषः ॥छ॥

## शिलालि-पाराशर्यान्नट-भिक्षुसूत्रे ॥ ६।३।१८९ ॥

**[ शिलालिपाराशर्यात् ]** शिलाली च पाराशर्यश्च = शिलालिपाराशर्यम्, तस्मात् ।

**[ नटभिक्षुसूत्रे ]** नटश्च भिक्षुश्च = नटभिक्षू, तयोः = नटभिक्ष्वोः, नटभिक्ष्वोः सूत्रं = नटभिक्षुसूत्रम्, तस्मिन् ।

शिलालिन्शब्दात् 'तेन प्रोक्ते' (६।३।१८१) अण्, पाराशर्यात्तु 'शकलादेर्यञः' (६।३।२७) इत्यञ्, अनयोरपवादोऽयम् ।

**[ शैलालिनो नटाः ]** नटानामध्ययनं = नटसूत्रम् । शिलामलतीत्येवंशीलः । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । शिलालिना प्रोक्तं नटसूत्रं विदन्त्यधीयते वा = शैलालिनो नटाः । अनेन णिन्प्र० → इन् । वृद्धिः ऐ । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'कलापि-कुथुमि-तैतलि-जाजलि-लाङ्गलि-शिखण्डि-शिलालि०' (७।४।६२) इन्लुक् । प्रथमा जस् । नट प्रथमा जस् ।

**[ पाराशरिणो भिक्षवः ]** पराशर । पराशरस्यापत्यं वृद्धं = पाराशर्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पाराशर्येण प्रोक्तं भिक्षुसूत्रं विदन्त्यधीयते वा = पाराशरिणः । अनेन णिन्प्र० → इन् । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । प्रथमा जस् । भिक्षु प्रथमा जस् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ शैलालकम् ]** शैलालिन् मण्ड्यते । शैलालिनां धर्मः-आम्नायः-सङ्घो वा = शैलालकम् । वेदवच्चेति भणनात् वेदितृ-अध्येतृविषयता 'चरणादकञ्' (६।३।१६८) अकञ्प्र० → अक । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । बाहुलकात् क्लीबत्वम् ।

**[ पाराशरकम् ]** पाराशरिन् मण्ड्यते । पाराशरिणां धर्मः-आम्नायः-सङ्घो वा = पाराशरकम् । वेदवच्चेति भणनात् वेदितृ-अध्येतृविषयता 'चरणादकञ्' (६।३।१६८) अकञ्प्र० → अक । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । बाहुलकात् क्लीबत्वम् ।

**[ शैलालम् ]** शिलालिना प्रोक्तं = शैलालम् । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । 'कलापि-कुथुमि-तैतलि०' (७।४।६२) इन्लुक् । सि-अम् ।

**[ पाराशरम् ]** पारशर्येण प्रोक्तं = पाराशरम् । 'शकलादेर्यञः' (६।३।२७) अञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । सि-अम् ॥छ॥

## कृशाश्व-कर्मन्दादिन् ॥ ६।३।१९० ॥

**[ कृशाश्वकर्मन्दात् ]** कृशाश्वश्च कर्मन्दश्च = कृशाश्वकर्मन्दम्, तस्मात् ।

**[ इन् ]** इन् प्रथमा सि ।

**[ कृशाश्विनो नटाः ]** कृशोऽश्वो यस्य सः = कृशाश्वः । कृशाश्वेन प्रोक्तं नटसूत्रं विदन्त्यधीयते वा = कृशाश्विनः । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । नट प्रथमा जस् ।

**[ कर्मन्दिनो मिक्षवः ]** कर्मन् 'अदु बन्धने' (३०८) अद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । कर्माण्यन्दति-बध्नाति । 'अच्' (५।१।४९) अच्प्र० → अ । 'पृषोदरादयः (३।२।१५५) अलोपः । कर्मन्दनिपातः । 'दों छेदने' (११४८) दो । कर्माणि द्यति-खण्डयति = कर्मन्दः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ ।

'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । योगविभागात् मोऽन्तः । कर्मन्देन प्रोक्तं भिक्षुसूत्रं विदन्त्यधीयते वा = कर्मन्दिनः । अनेन इन्प्र० । उभयत्र 'तद् वेत्त्यधीते (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् ।

**[ कार्शाश्वकम् ]** कृशाश्विन् मण्ड्यते । कृशाश्विनां धर्मः-आम्नायः-सङ्घो वा = कार्शाश्वकम् । 'चरणादकञ्' (६।३।१६८) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आर् । 'नोऽपदस्य तद्धिते' (७।४।६१) इन् - लोपः ।

**[ कार्मन्दकम् ]** कर्मन्दिन् मण्ड्यते । कर्मन्दिनां धर्मः-आम्नायः-सङ्घो वा = कार्मन्दकम् । 'चरणादकञ्' (६।३।१६८) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य०' (७।४।६१) इन्लोपः । बाहुलकात् दीर्घत्वम् (क्लीबत्वम्) ।

**[ कापिलेयिनो नटाः ]** कपिलाया अपत्यं = कापिलेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । कापिलेयेन प्रोक्तं नटसूत्रं विदन्त्यधीयते वा = कापिलेयिनः । मतान्तरे अनेन इन्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कापिलेयक आम्नायः ]** कापिलेयिनां नटानां आम्नायः = कापिलेयकः । 'चरणादकञ्' (६।३।१६८) अकञ्प्र० → अक । 'नोऽपदस्य०' (७।४।६१) इन्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । आम्नायः ॥छ॥

### **उपज्ञाते** ॥ ६।३।१९१ ॥

**[ उपज्ञाते ]** प्रथमत उपदेशेन विना ज्ञातमुपज्ञातम्, तस्मिन् ।

**[ पाणिनीयं अकालकं, व्याकरणम् ]** पाणिनेन पाणिनिना वा उपज्ञातं = पाणिनीयम् । 'दोरीयः' (६।३।३२) ईयप्र० । न विद्यते कालः-कालाधिकारो यत्र तत् = अकालकम् । 'शेषाद् वा' (७।३।१७५) कच्प्र० → क । 'नञत्' (३।२।१२५) न० → अ० । सि-अम् । व्याकरणम् ।

**[ काशकृत्स्नं गुरुलाघवम् ]** कशकृत्स्नस्यापत्यं = काशकृत्स्नि(ः) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । काशकृत्स्निना उपज्ञातं = काशकृत्स्नम् । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । सि-अम् । गुरुश्च लाघवश्च = गुरुलाघवम् । सि-अम् ॥छ॥

### **कृते** ॥ ६।३।१९२ ॥

**[ कृते ]** कृत सप्तमी ङि ।

**[ शैवः ]** शिवेन कृतो ग्रन्थः = शैवः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वाररुचानि वाक्यानि ]** वररुचिना कृतानि = वाररुचानि । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । वाक्यानि ।

**[ जालूकाः श्लोकाः ]** जलूकेन जलूकया वा कृता(ः) । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । प्रथमा जस् ।

**[ जालुकाः ]** जलुकस्यापत्यं = जालुकि(:) । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जालुकिना कृताः = जालुकाः । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा जस् ।

**[ सिद्धसेनीयः स्तवः ]** सिद्धसेनेन कृतः = सिद्धसेनीयः । 'संज्ञा दुर्वा' (६।१।६) इत्यनेन दुसंज्ञत्वात् 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । स्तवः ।

**[ ऐष्टकः ]** इष्टि(ष्ट)काभिः कृतः प्रासादः = ऐष्टकः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नारदीयम् ]** नारदेन कृतं गीतं = नारदीयम् । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ मानसी कन्या ]** मनस् मण्ड्यते । मनसा कृता = मानसी । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः 'स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अणञेयेकण्०' (२।४।२०) ङी । कन्या ॥छ॥

## नाम्नि मक्षिकादिभ्यः ॥ ६।३।१९३ ॥

**[ नाम्नि ]** नामन् सप्तमी ङि । 'ई-ङौ वा' (२।१।१०९) अलोपः ।

**[ मक्षिकादिभ्यः ]** मक्षिका आदिर्येषां ते = मक्षिकादयः, तेभ्यः = मक्षिकादिभ्यः । पञ्चमी भ्यस् ।

**[ माक्षिकं मधु ]** कष (५०७) - शिष (५०८) - जष (५०९) - झष (५१०) - वष (५११) 'मष हिंसायाम्' (५१२) मष् । मष्यन्ते-हिंस्यते(न्ते) लू(भू)तादिना इति । 'कुशिक-हृदिक-मक्षिकेतिक-पिपीलिकादयः' (उणा० ४५) मक्षिकानिपातः । मक्षिकाभिः कृतं = माक्षिकम् । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ सारघम् ]** 'सृं गतौ' (२५) सृ । सरन्ति गच्छन्तीति सरघाः । 'सर्तेरघः' (उणा० १११) अघप्र० । 'नामिनो०' (४।३।१) गु० अर् । सरघाभिः कृतं = सारघम् । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ गार्मुतम् ]** गॄत् निगरणे' (१३३५) गॄ । गिरतीति गर्मुत् । 'ग्रो मादिर्वा' (उणा० ८९०) मुत्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० → अर् । गर्मुद्भिः कृतं = गार्मुतम् । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । सि-अम् ।

**[ नार्मुकम् ]** 'नॄश् नये' (१५३७) नॄ । नृणन्तीति नर्मुकाः । 'कञ्चुकांशुक-नंशुक-पाकुक-हिबुक-चिबुक-जम्बुक-चुलुक-चूचुकोल्मुक-भावुक-पृथुक-मधुकादयः' (उणा० ५७) किदुकप्र०(?) निपातः । 'नामिनो०' (४।३।१) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ । नर्मुकाभिः कृतं = नार्मुकम् । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक्। सि-अम् ।

**[ वातपम् ]**वातपैः कृतं = वातपम् । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्। सि-अम् । इत्यत्र अणन्तं नाम संज्ञा न ईयान्तमितीयो न भवति । अयमर्थः-ईयप्रत्यये समानीते संज्ञा न गम्यते । अतः कारणात् ईयः प्रत्ययो न भवति, अपि तु अणेव । अणि द्विमतिसंज्ञा गम्यते इति शेषः ॥छ॥

**कुलालादेरकञ्** ॥ ६।३।१९४ ॥

**[ कुलालादेः ]** कुलाल आदिर्यस्य सः = कुलालादिः, तस्मात् ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

**[ कौलालकम् ]** कुलालेन कृतं = कौलालकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ वारुटकम् ]** वरुटेन कृतं = वारुटकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

नाम्नीत्यभिधेयनियमार्थम्, तेन घटघटीशरावोदञ्चनाद्येव भाण्डं कौलालकम्, न यत्किञ्चित्कुलालकृतम् । शूर्पपिटकपटलिकापिच्छिकाच्छज्जिकेति प्रसिद्धिः द्येव भाण्डं वारुटकम्, नान्यत् । एवमन्यत्राप्यभिधेयनियमः ।

**[ सिरन्ध्र ]** 'षिंगृट् बन्धने' (१२८७) षि । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सि । सिनोतीति । 'सु-सि-तनि-तुसेर्दीर्घश्च वा' (उणा० २०३) तप्र० । सितानि रन्ध्राणि यस्य सः = सितरन्ध्रः । पृषोदरादित्वात् तस्य लोपः । अदासो दासवृत्तिर्यः स सिरन्ध्र इति स्मृतः ॥छ॥

**सर्वचर्मण ईनेनञौ** ॥ ६।३।१९५ ॥

**[ सर्वचर्मणः ]** सर्वचर्मन् पञ्चमी ङसि ।

**[ ईनेनञौ ]** ईनश्च ईनञ् च = ईनेनञौ ।

**[ सर्वचर्मीणः, सार्वचर्मीणः ]** सर्वचर्मणा कृतः = सर्वचर्मीणः । अनेन ईनप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । एवम्-सार्वचर्मीणः । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ॥छ॥

**उरसो याऽणौ** ॥ ६।३।१९६ ॥

**[ उरसः ]** उरस् पञ्चमी ङसि ।

**[ याऽणौ ]** यश्च अण् च = याऽणौ ।

**[ उरस्यः, औरसः ]** उरसा कृतः = उरस्यः, औरसः पुत्रः । अनेन य-अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**छन्दस्यः** ॥ ६।३।१९७ ॥

**[ छन्दस्यः ]** छन्दस्य प्रथमा सि ।

**[ छन्दस्यः ]** छन्दस् । छन्दसा इच्छया वा कृतः = छन्दस्यः । अनेन यप्र० । न तु प्रवचनेन वेदेन गायत्र्यादिना वा ।

**[ एष वै सप्तदशाक्षरश्छन्दस्यो यज्ञमनुविहितः ]** एव(ष) पूर्वोक्ते मीलितः सन् मन्त्रः । वै इति टक्कभाषायां वाक्यालंकारे । सप्तदशाक्षरश्छन्दस्यो मन्त्रः । छन्दस् मण्ड्यते । छन्द एव = छन्दस्यो मन्त्रः । अनेन स्वार्थे यप्र० । यज्ञमनुलक्षीकृत्य विहितो अनुगत इत्यर्थः । यथा अनुष्टुबादिरक्षरसमूहश्छन्दस्तथैषां सप्तदशानामक्षराणां समूहश्छन्दस्य उच्यते ॥छ॥

**अमोऽधिकृत्य ग्रन्थे** ॥ ६।३।१९८ ॥

**[ अमोऽधिकृत्य ]** अम् पञ्चमी ङसि । अधिकृत्य प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ ग्रन्थे ]** ग्रन्थ सप्तमी ङि ।

**[ सौभद्रः ]** सुभद्रा । सुभद्रामधिकृत्य उद्दिश्य कृतो ग्रन्थः = सौभद्रः । अनेन अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ भाद्रः ]** भद्रामधिकृत्य कृतो ग्रन्थः = भाद्रः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ सौतारः ]** सुतारामधिकृत्य कृतो ग्रन्थः = सौतारः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ भैमरथी ]** भीमरथं राजानमधिकृत्य कृताख्यायिका = भैमरथी । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । कथा ।।छ।।

**ज्योतिषम्** ॥ ६।३।१९९ ॥

**[ ज्योतिषम् ]** ज्योतिष्(स्) सि-अम् ।

**[ ज्योतिषम् ]** ज्योतिस् । ज्योतींषि अधिकृत्य कृतो ग्रन्थः = ज्योतिषम् । अनेन अण्प्र० → अ - निपात्यते च । सि-अम् ।।छ।।

**शिशुक्रन्दादिभ्य ईयः** ॥ ६।३।२०० ॥

**[ शिशुक्रन्दादिभ्यः ]** शिशुक्रन्द आदिर्येषां ते = शिशुक्रन्दादयः, तेभ्यः ।

**[ ईयः ]** ईय प्रथमा सि ।

**[ शिशुक्रन्दीयः ]** शिशुक्रन्दमधिकृत्य कृतो ग्रन्थः = शिशुक्रन्दीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ यमसभीयः ]** यमस्य सभा = यमसभम् । शालां विना सभा । राजवर्जितेत्यादिना राक्षसादित्वात् क्लीबत्वम् । 'क्लीबे' (२।४।९७) ह्रस्वः । यमसभमधिकृत्य कृतो ग्रन्थः = यमसभीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ इन्द्रजननीयः ]** इन्द्रस्य जननः = इन्द्रजननः । इन्द्रजननमधिकृत्य कृतो ग्रन्थः = इन्द्रजननीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ प्रद्युम्नप्रत्यागमनीयः ]** प्रद्युम्नस्य-कामस्य प्रत्यागमनं = प्रद्युम्नप्रत्यागमनम् । प्रद्युम्नप्रत्यागमनमधिलक्षीकृत्य कृतो ग्रन्थः = प्रद्युम्नप्रत्यागमनीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ प्रद्युम्नोदयनीयः ]** प्रद्युम्नश्च उदयनश्च, तमधिलक्षीकृत्य कृतो ग्रन्थः = प्रद्युम्नोदयनीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सीताहरणीयः ]** सीताया हरणं = सीताहरणम् । सीताहरणमधिकृत्य कृतो ग्रन्थः = सीताहरणीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सीतान्वेषणीयः ]** सीताया अन्वेषणं = सीतान्वेषणम् । सीतान्वेषणमधिकृत्य कृतो ग्रन्थः = सीतान्वेषणीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ शैशुक्रन्दम् ]** शिशुक्रन्दमधिकृत्य कृतो ग्रन्थः = शैशुक्रन्दम् । 'अमोऽधिकृत्य ग्रन्थे' (६।३।१९८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**द्वन्द्वात् प्रायः** ॥ ६।३।२०१ ॥

**[ द्वन्द्वात् ]** द्वन्द्व पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) ङसि० → आत् ।

**[ प्रायः ]** प्रायस् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ वाक्यपदीयम् ]**वाक्यं च तत् पदं च = वाक्यपदम् । वाक्यपदमधिकृत्य कृतो ग्रन्थः = वाक्यपदीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ द्रव्यपर्यायीयम् ]** द्रव्यश्च पर्यायश्च = द्रव्यपर्यायौ, तौ अधिकृत्य कृतो ग्रन्थः = द्रव्यपर्यायीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ शब्दार्थसम्बन्धीयम् ]** शब्दश्च अर्थश्च = शब्दार्थौ, तयोः सम्बन्धः = शब्दार्थसम्बन्धः, तमधिकृत्य कृतो ग्रन्थः = शब्दार्थसम्बन्धीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ श्येनकपोतीयम् ]** श्येनश्च कपोतश्च = श्येनकपोतम् । नित्यं वैरत्वात् समासः । श्येनकपोतमधिकृत्य कृतो ग्रन्थः = श्येनकपोतीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ दैवासुरम् ]** देवाश्च असुराश्च = देवासुरम् । देवासुरमधिकृत्य कृतो ग्रन्थः = दैवासुरम् । 'अमोऽधिकृत्य ग्रन्थे' (६।३।१९८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ राक्षोऽसुरम् ]** रक्षस्-असुर मण्ड्यते । रक्षांसि च असुराश्च = रक्षोऽसुराः, तानधिकृत्य कृतं ग्रन्थं = राक्षोऽसुरम् । 'अमोऽधिकृत्य ग्रन्थे' (६।३।१९८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ गौणमुख्यम् ]** गुणश्च मुख्यं च = गुणमुख्ये, तेऽधिकृत्य कृतं ग्रन्थं = गौणमुख्यम् । 'अमोऽधिकृत्य ग्रन्थे' (६।३।१९८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

**अभिनिष्क्रामति द्वारे** ॥ ६।३।२०२ ॥

**[ अभिनिष्क्रामति ]** अभि-निर् 'क्रमू पादविक्षेपे' (३८५) क्रम् । अभिनिःक्रामतीति अभिनिष्क्रामत्, तस्मिन् ।

**[ द्वारे ]** द्वार सप्तमी ङि ।

**[ स्रौघ्नं कन्यकुब्जद्वारम् ]** स्रुघ्न मण्ड्यते । स्रुघ्नमभिनिष्क्रामति कन्यकुब्जद्वारं = स्रौघ्नम् । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ माथुरम् ]** मथुरामभिनिःक्रामति कन्यकुब्जद्वारं = माथुरम् । 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ नादेयम् ]** नदीमभिनिष्क्रामति कन्यकुब्जद्वारं = नादेयम् । 'नद्यादेरेयण्' (६।३।२) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् ।

**[ राष्ट्रियं द्वारम् ]** राष्ट्रमभिनिष्क्रामति कन्यकुब्जद्वारं = राष्ट्रियम् । 'राष्ट्रादियः' (६।३।३) इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

रचनाबहिर्भावे वा निःक्रमिः । अस्मिन् व्याख्याने स्रुघ्नादेर्लक्षणवीप्सेत्यनेन अभिशब्दयोगे द्वितीयान्तेन धातोरकर्मकत्वात् रचनाया बहिर्निर्गत इत्यर्थः । यथा गृहकोणो निःक्रान्तः ॥छ॥

## गच्छति पथिदूते ॥ ६।३।२०३ ॥

**[ गच्छति ]** गच्छतीति गच्छत्, तस्मिन् ।

**[ पथिदूते ]** पन्थाश्च दूतश्च = पथिदूतम्, तस्मिन् । पथिन् सप्तमी ङि । 'इन् ङी-स्वरे लुक्' (१।४।७९) इन्लुक् ।

**[ स्रौघ्नः पन्था दूतो वा ]** स्रुघ्नं गच्छति = स्रौघ्नः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । पन्था दूतो वा । दूतः सन्देशहारक इत्युक्तम् ।

**[ माथुरः ]** मथुरायां(रां) गच्छति = माथुरः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ नादेयः ]** नद्यां(दीं) गच्छति = नादेयः । 'नद्यादेरेयण्' (६।३।२) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ राष्ट्रियः ]** राष्ट्रे(ट्रं) गच्छति = राष्ट्रियः । 'राष्ट्रादियः' (६।३।३) इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

पथिस्थेषु गच्छत्सु तद्धेतुः पुरुषगमनहेतुः पन्था अपि गच्छतीत्युच्यते । स्रुघ्नादिप्राप्तिर्वा पथो गमनम् ॥छ॥

## भजति ॥ ६।३।२०४ ॥

**[ भजति ]** भजतीति भजत्, तस्मिन् ।

**[ स्रौघ्नः ]** स्रुघ्नं भजति = स्रौघ्नः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माथुरः ]** मथुरां भजति = माथुरः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ नादेयः ]** नदीं भजति = नादेयः । 'नद्यादेरेयण्' (६।३।२) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ राष्ट्रियः ]** राष्ट्रं भजति = राष्ट्रियः । 'राष्ट्रादियः' (६।३।३) इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## महाराजादिकण् ॥ ६।३।२०५ ॥

**[ महाराजात् ]** महाराज पञ्चमी ङसि ।

यदि महाराजशब्दो वैश्रवणार्थस्तदा ईयः स्यात् ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ माहाराजिकः ]** महत्-राजन् । महांश्चासौ राजा च = महाराजः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । महाराजं भजति = माहाराजिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## अचित्तादेशकालात् ॥ ६।३।२०६ ॥

**[ अचित्तात् ]** अचित्त पञ्चमी ङसि ।

**[ अदेशकालात् ]** देशश्च कालश्च = देशकालम् । न देशकालम् = अदेशकालम्, तस्मात् । 'नञत्' (३।२।१२५) न० → अ० ।

**[ आपूपिकः ]** अपूपान् भजति = आपूपिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ शाष्कुलिकः ]** शष्कुल 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । शष्कुलीः भजति = शाष्कुलिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मौदकिकः ]** मोदकान् भजति = मौदकिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पायसिकः ]** पयः पायसं वा भजति = पायसिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ ।

**[ दैवदत्तः ]** देवदत्तं भजति = दैवदत्तः । 'भजति' (६।३।२०४) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ ।

**[ स्रौघ्नः ]** स्रुघ्ने भवः = स्रौघ्नः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ हैमनः ]** हेमन्ते भवः = हैमनः । 'हेमन्ताद् वा तलुक् च (६।३।९१) अण्प्र० → अ - तस्य लुक् च । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## वासुदेवा-ऽर्जुनादकः ॥ ६।३।२०७ ॥

**[ वादुसेवाऽर्जुनात् ]** वासुदेवश्च अर्जुनश्च = वासुदेवाऽर्जुनम्, तस्मात् । अर्च्यत्वाद् वासुदेवस्य पूर्वनिपातः ।

**[ अकः ]** अक प्रथमा सि ।

'दोरीयः' (६।३।३२) - 'गोत्रक्षत्रियेभ्योऽकञ् प्रायः' (६।३।२०८) इत्यनयोरपवादः ।

**[ वासुदेवकः ]** वासुदेवं भजति = वासुदेवकः । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यदा वासुदेवशब्दः संज्ञाशब्दोऽक्षत्रियवचनस्तदोत्तरेणाकञ् न प्राप्नोति, किन्तु 'दोरीयः (६।३।३२) इतीयः स्यात् इति तद्ग्रहणम् ।

**[ अर्जुनकः ]** अर्जुनं भजति = अर्जुनकः । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

अर्जुनशब्दः क्षत्रियवाचीत्युत्तरेणाकञ् स्यात्, केनैव सिद्धेऽकविधानम्-

**[ वासुदेवकः ]** वासुदेवस्य भार्या = वासुदेवी । 'धवाद्योगादपालकान्तात्' (२।४।५९) ङी । वासुदेवीं भजति = वासुदेवकः । अनेन अकप्र० । 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) पुंवद्भावः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अर्जुनकः ]** अर्जुनस्य भार्या = अर्जुनी । 'धवाद्योगाद०' (२।४।५९) ङी । अर्जुनीं भजति = अर्जुनकः । अनेन अकप्र० । 'जातिश्च णि०' (३।२।५१) पुंवद्भावः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । इत्येवमर्थम् । अन्यथा के सति पदान्तत्वात् 'अवर्णेवर्णस्य' (७।४।६८) अप्रवृत्तौ 'ङ्यादीदूतः के' (२।४।१०४) इति ह्रस्वत्वे वासुदेविकः, अर्जुनिक इति अनिष्टे रूपे स्याताम् । अकप्रत्यये तु इष्टे रूपे स्याताम् ॥छा।

**गोत्र-क्षत्रियेभ्योऽकञ् प्रायः** ॥ ६।३।२०८ ॥

**[ गोत्रक्षत्रियेभ्यः ]** गोत्रं च क्षत्रियाश्च = गोत्रक्षत्रियाः, तेभ्यः ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

**[ प्रायः ]** प्रायस् 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) लुप् ।

**[ ग्लौचुकायनकः ]** ग्लुचुकस्यापत्यं = ग्लुचुकायनिः । 'अदोरायनिः प्रायः', (६।१।११३) आयनिप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ग्लुचुकायनिं भजति = ग्लौचुकायनकः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ औपगवकः ]** गोः उप-समीपमुपगु: । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । उपगोरपत्यमौपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । औपगवं भजति = औपगवकः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दाक्षकः ]** दक्षस्यापत्यं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दाक्षिं भजति = दाक्षकः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ गार्गकः ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गार्ग्यायणकः ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यस्यापत्यं युवा = गार्ग्यायणः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यायणं भजति = गार्ग्यायणकः । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ नाकुलकः ]** नकुल । नकुलं भजति = नाकुलकः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ साहदेवकः ]** सह 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । सह दीव्यतीति सहदेवः । 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ऐ । सहदेवं भजति = साहदेवकः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दौर्योधनकः ]** दुर् 'युधिंच् सम्प्रहारे' (१२६०) युध् । दुःखेन युध्यते = दुर्योधनः । 'शासू-युधि०' (५।३।१४१) अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । दुर्योधनं भजति = दौर्योधनकः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दौःशासनकः ]** दुर् 'शासूक् अनुशिष्टौ' (१०९५) शास् । दुःखेन शास्यते(शिष्यते) = दुःशासनः । 'शासू-युधि०' (५।३।१४१) अनप्र० । दुःशासनं भजति = दौःशासनकः । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

बहुवचनं क्षत्रियविशेषपरिग्रहार्थम्-

**[ पाणिनीयः ]** पण । पणोऽस्यास्तीति पणी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पणिनोऽपत्यं = पाणिनः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । पाणिनं भजति = पाणिनीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पौरवीयः ]** पुरु । पुरोरपत्यं = पौरवः । 'पुरु-मगध०' (६।१।११६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । पौरवं भजति = पौरवीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा।

## सरूपाद् द्रेः सर्वं राष्ट्रवत् ॥ ६।३।२०९ ॥

**[ सरूपात् ]** सरूप पञ्चमी ङसि ।

**[ द्रेः ]** द्रि षष्ठी ङस् ।

**[ सर्वम् ]** सर्व प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानाद०' (१।४।४६) अलुक् ।

**[ राष्ट्रवत् ]** राष्ट्रस्येव = राष्ट्रवत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ वृजिकः ]** वृजि मण्ड्यते । वृजीनां राजा, राजानौ, राजानः । वृजेरपत्यं-अपत्ये-अपत्यानि वा = वार्ज्यः, वार्ज्यौ, वृजयः । 'दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः' (६।१।११८) ञ्यप्र० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । वार्ज्यं, वार्ज्यौ, वृजीन् वा भजति = वृजिकः । 'वृजि-मद्राद् देशात् कः' (६।३।३८) कप्र०-वार्ज्यस्य वृजिश्चादेशः ।

**[ मद्रकः ]** मद्र मण्ड्यते । मद्राणां राजा, राजानौ, राजानः । मद्रस्यापत्यं-अपत्ये-अपत्यानि वा = माद्रः, माद्रौ, मद्राः । 'पुरु-मगध०' (६।१।११६) अण्प्र० । बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । माद्रं, माद्रौ, मद्रान् वा भजति = मद्रकः । 'वृजि-मद्राद् देशात् कः (६।३।३८) कप्र०-माद्रस्य मद्रश्चादेशः ।

**[ पाण्डवकः ]** पाण्डु मण्ड्यते । पाण्डूनां राष्ट्रस्य राजा, राजानौ, राजानः । पाण्डोरपत्यं-अपत्ये-अपत्यानि वा = पाण्ड्यः, पाण्ड्यौ, पाण्डवः । 'पाण्डोर्ड्यण्' (६।१।११९) ड्यण्प्र० → य । बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४)

यलुप् । वृद्धिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) उलोपः । पाण्ड्यं, पाण्ड्यौ, पाण्डून् वा भजति = पाण्डवकः । अनेन 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक - पाण्डुरादेशश्च । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आङ्गकः ]** अङ्गानां राष्ट्रस्य राजानौ, राजानः । एवमग्रेऽपि । अङ्गस्य राजा, अङ्गस्य राज्ञोऽपत्यं वा । 'पुरु-मगध०' (६।१।११६) अण्प्र० । यत्र बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आङ्गं आ(अ)ङ्गान् वा भजति = आङ्गकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक - अङ्गदेशश्च । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वाङ्गकः ]** वङ्गानां राष्ट्रस्य राजा, वङ्गस्य राज्ञोऽपत्यं वा । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । यत्र बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वाङ्गं, वाङ्गौ, वङ्गान् वा भजति = वाङ्गकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक - वङ्गदेशश्च । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पाञ्चालकः ]** पञ्चालानां राष्ट्रस्य राजा, राजानौ, राजानः । पञ्चालस्य राज्ञोऽपत्यं-अपत्ये-अपत्यानि वा = पाञ्चालः, पाञ्चालौ, पञ्चालाः । 'राष्ट्र-क्षत्रियात्०' (६।१।११४) अञ्प्र० । बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पाञ्चालं, पाञ्चालौ, पञ्चालान्, वा भजति = पाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक - पञ्चाल आदेशश्च । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैदेहकः ]** विदेहानां राष्ट्रस्य राजा, राजानौ, राजानः । विदेहस्य राज्ञोऽपत्यं-अपत्ये-अपत्यानि वा । 'राष्ट्र-क्षत्रियात्०' (६।१।११४) अञ्प्र० । बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वैदेहं, वैदेहौ, विदेहान् वा भजति = वैदेहकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक - विदेह आदेशश्च । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औदुम्बरकः ]** उदुम्बराणां राष्ट्रस्य राजा, उदुम्बरस्य राज्ञोऽपत्यं वा = औदुम्बरिः । 'साल्वांश-प्रत्यग्रथ-कलकूटाऽश्मकादिञ्' (६।१।११७) इञ्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् । उदुम्बरान् भजति । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ तैलखलकः ]** तिलखलानां राष्ट्रस्य राजा, तिलखलस्य राज्ञोऽपत्यं वा = तैलखलिः । 'साल्वांश-प्रत्यग्रथ०' (६।१।११७) इञ्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) इञ्लुप् । तिलखलान् भजति = तैलखलकः । 'बहुविषयेभ्यः' (६।३।४५) अकञ्प्र० → अक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कौरवकः, कौरवः ]** कुरु । कुरोरपत्यं, कुरूणां राष्ट्रस्य राजा = कौरव्यः । 'दु-नादि०' (६।१।११८) ञ्यप्र० → य । वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । कौरव्यं भजति । मनुष्यवाचिनः 'कच्छादेर्नृ-नृस्थे' (६।३।५५) इत्यनेन अकञ्प्र० । अथवा 'कुरु-युगन्धराद् वा । (६।३।५३) अकञ्प्र० → अक । वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ यौगन्धरकः, यौगन्धरः ]** युगन्धराणां राष्ट्रस्य राजा, युगन्धरस्य राज्ञोऽपत्यं = यौगन्धरिः । 'साल्वांश-प्रत्यग्रथ०' (६।१।११७) इञ्प्र० → इ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यौगन्धरिं भजति = यौगन्धरकः यौगन्धरः । अनेन 'कुरु-युगन्धराद् वा' (६।३।५३) अकञ्प्र० → अक । पक्षे 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ - युगन्धरदेशश्च । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ ऐक्ष्वाकः ]** इक्ष्वाकु । इक्ष्वाकोरपत्यानि । 'राष्ट्र-क्षत्रियात्०' (६।१।११४) अञ्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् । इक्ष्वाकून् भजति, ऐक्ष्वाकून् भजति = ऐक्ष्वाकः । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'सारवैक्ष्वाक०' (७।४।३०) उलोपः ।

**[ पौरवीयम् ]** पुरु मण्ड्यते । पुरोरपत्यं-अपत्ये-अपत्यानि वा । 'पुरु-मगध०' (६।१।११६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । पौरवं भजति = पौरवीयम् । 'दोरीयः (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ पाञ्चालः ]** पञ्चालान् ब्राह्मणान् भजति = पाञ्चालः । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

पूर्वलिखितप्रयोगापेक्षया अन्यत्र नास्ति विशेष इत्युक्तम् । यावता अवन्त्यं राजानं भजति इति कृतेऽस्त्येवावन्तक इत्यत्र विशेषः । अन्यथा आवन्त्येति स्थितेऽकञि अनापत्यत्वात् यकारस्य लुक् न स्यात् इति विशेषः ॥छा॥

## टस्तुल्यदिशि ॥ ६।३।२१० ॥

**[ टः ]** टा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः (२।१।१०७) आलुक् ।

**[ तुल्यदिशि ]** तुल्या समाना साधारणा दिक् यत्र तत् = तुल्यदिक्, तस्मिन् ।

**[ सौदामनी विद्युत् ]** सुदामन् मण्ड्यते । शोभनानि दामानि माला यत्र स(सा) = सुदामा । सुदाम्ना एकदिक् = सौदामनी । 'अणि' (७।४।५२) इत्यन्त्यस्वरादिलोपाभावः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः औ । 'अणञेयेकण्०' (२।४।२०) ङी, विद्युत् । सुदामा नाम पर्वतो यस्यां दिशि तस्यां दिशि विद्युत् तेन सा सुदाम्ना सहैकदिगुच्यते ।

**[ सौरी बलाका ]** सूर्येण सहैकदिग् = सौरी । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'सूर्या-ऽगस्त्ययोरीये च' (२।४।८९) यलुक् । बलाका ।

**[ हैमवती गङ्गा ]** हिमवत् । हिमवता एकदिग् = हैमवती । अनेन 'हेमन्ताद् वा तलुक् च' । (६।३।९१) अण्प्र० → अ । वृद्धिः ऐ । 'अणञेयेकण्०' (२।४।२०) ङी । गङ्गा ।

**[ त्रैककुदी लङ्का ]** त्रि-ककुद् । त्रीणि ककुदाकाराणि श्रृंगाणि यस्य । 'त्रिककुद् गिरौ' (७।३।१६८) त्रिककुद् निपात्यते । त्रिककुदा एकदिक् = त्रैककुदी । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । वृद्धिः ऐ । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । लङ्का ॥छा॥

## तसिः ॥ ६।३।२११ ॥

**[ तसिः ]** तसि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ सुदामतः ]** सुदाम्ना एकदिग् = सुदामतः । अनेन तसिप्र० → तस् ।

**[ सूर्यतः ]** सूर्येण एकदिग् = सूर्यतः ।

**[ हिमवत्तः ]** हिमवता एकदिग् = हिमवत्तः ।

**[ त्रिककुत्तः ]** त्रिककुदा एकदिग् = त्रिककुत्तः । अनेन तसिप्र० → तस् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[ पीलुमूलतः ]** पीलमूलेन एकदिग् = पीलुमूलतः ।

**[ पार्श्वतः ]** पार्श्वेन एकदिग् = पार्श्वतः ।

**[ पृष्ठतः ]** पृष्ठेन एकदिग् = पृष्ठतः । अनेन सर्वत्र तसिप्र० → तस् । सर्वत्र प्रथमैकवचनं सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

इकारो 'वत्-तस्याम्' (१।१।३४) इत्यत्र विशेषणार्थः ॥छ॥

**यश्चोरसः** ॥ ६।३।२१२ ॥

**[ यश्च ]** य प्रथमा सि । च प्रथमा सि ।

**[ उरसः ]** उरस् पञ्चमी ङसि ।

'टस्तुल्यदिशि' (६।३।२१०) इत्यनेन प्राप्तस्यापवादः ।

**[ उरस्यः, उरस्तः ]** उरस् । उरसा एकदिक् = उरस्यः, उरस्तः । अनेन य-तस्प्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**सेर्निवासादस्य** ॥ ६।३।२१३ ॥

**[ सेर्निवासात् ]** सि पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) ए । 'एदोद्भ्यां०' (१।४।३५) ङसि० → र० । निवास पञ्चमी ङसि ।

**[ अस्य ]** अस्य सप्तमी ङि । सूत्रत्वाल्लुप् ।

निवसन्त्यस्मिन्निति निवासो देश उच्यते ।

**[ स्रौघ्नः ]** स्रुघ्नो निवासोऽस्य = स्रौघ्नः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ माथुरः ]** मथुरा निवासोऽस्य = माथुरः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ नादेयः ]** नदी निवासोऽस्य सः = नादेयः । 'नद्यादेरेयण्' (६।३।२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ राष्ट्रियः ]** राष्ट्रं निवासोऽस्य सः = राष्ट्रियः । 'राष्ट्रादियः' (६।३।३) इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## आभिजनात् ॥ ६।३।२१४ ॥

**[ आभिजनात् ]** अभिमतं ज्ञायन्ते = अभिजनः । 'अच्' (५।१।४९) अच्प्र० → अ । 'जनैचि प्रादुर्भावे' (१२६५) इत्यस्य प्रयोगः । अभिजनः-पूर्वबान्धवाः, तेषामयमाभिजनः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तस्मात् ।

**[ स्रौघ्नः ]** स्रुघ्नोऽस्याभिजनो निवासः = स्रौघ्नः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ माथुरः ]** मथुरा अस्याभिजनो निवासः = माथुरः । अनेन 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ नादेयः ]** नदी अस्याभिजनो निवासः = नादेयः । 'नद्यादेरेयण्' (६।३।२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ राष्ट्रियः ]** राष्ट्रोऽस्याभिजनो निवासः = राष्ट्रियः । 'राष्ट्रादियः' (६।३।३) इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छा।

## शण्डिकादेर्ण्यः ॥ ६।३।२१५ ॥

**[ शण्डिकादेर्ण्यः ]** शण्डिक आदिर्यस्य सः = शण्डिकादिः, तस्मात् ॥ ण्य प्रथमा सि ।

अणाद्यपवादः । आदिशब्दात् ईयाकञो परिग्रहः ।

ये पर्वतवाचिनः शण्डिकादयः तेभ्यः शस्त्रजीविषु वाच्येषु ञ्यस्यापवादो ण्यप्रत्ययो अशस्त्रजीविषु त्वण एव । ये जनपदशब्दास्तेभ्योऽकञः शण्डिकशब्दाज्जनपदवृत्तेरितरस्माच्च 'कोपान्त्याच्चाऽण्' (६।३।५६) इत्यनेन विहित अणः इति न्यासः ।

**[ शाण्डिक्यः ]** शण्डिक आभिजनो निवासोऽस्य = शाण्डिक्यः । अनेन ण्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कौचवार्यः ]** कूचवार आभिजनो निवासोऽस्य = कौचवार्यः । अनेन ण्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शण्डिक ]** अवश्यं शण्डते । 'णिन् चाऽऽवश्यकाऽधमर्ण्ये (५।४।३६) णिन्प्र० → इन् । शण्डी एव = शण्डिक । स्वार्थे कप्र० ।

**[ कूचवार ]** कुच 'वृग्ट् वरणे' (१२९४) वृ । वृण्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । कुचं वारयतीति कूचवारः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'णेरनिटि' (४।२।८३) णिग्लुक् । बाहुलकाद्दीर्घः ।।छा।

## सिन्ध्वादेरञ् ॥ ६।३।२१६ ॥

**[ सिन्ध्वादेः ]** सिन्धुरादिर्यस्य सः = सिन्ध्वादिः, तस्मात् ।

**[ अञ् ]** अञ् प्रथमा सि ।

**[ सैन्धवः ]** सिन्धुराभिजनो निवासोऽस्य = सैन्धवः । अनेन अञ्प्र० → अ । वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ वार्णवः ]** वर्णुराभिजनो निवासोऽस्य सः = वार्णवः । अनेन अञ्प्र० → अ । वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

केचित् तक्षशिलादिभ्योऽञ् ब्रुवते तन्न, बाधकप्रत्ययान्तराप्राप्त्या । 'प्राग् जितादण्' (६।१।१३) इत्यनेन एव सिद्धत्वात् ॥छ॥

## सलातुरादीयण् ॥ ६।३।२१७ ॥

**[ सलातुरात् ]** सलातुर पञ्चमी ङसि ।

**[ ईयण् ]** ईयण् प्रथमा सि ।

**[ सालातुरीयः पाणिनिः ]** सलातुर आभिजनो निवासोऽस्य सः = सालातुरीयः । अनेन ईयण्प्र० → ईय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पाणिनिः । सालैस्ततं = सालततं, तच्च तत्पुरं च = सालततत्पुरम् । 'पृषोदरादयः' (३।२।१५५) सलातुरनिपातः ॥छ॥

## तूदीवर्मत्या एयण् ॥ ६।३।२१८ ॥

**[ तूदीवर्मत्याः ]** तूदी च वर्मती च = तूदीवर्मती, तस्याः ।

**[ एयण् ]** एयण् प्रथमा सि ।

**[ तौदेयः ]** 'तुदींत् व्यथने' (१३१५) तुद् । तुदतीति । 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० → अ । बाहुलकाद्दीर्घः । गौरादिपाठात्' ङी । तूदी आभिजनो निवासोऽस्य सः = तौदेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ वार्मतेयः ]** वर्मन् 'तनूयी विस्तारे' (१४९९) तन् । वर्माणि तनोति । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'गौरादि०' (२।४।१९) ङी । अथवा वारयाः पानीयमस्यास्ति । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → अत् । 'अधातूदृदितः' (२।४।२) ङी । वा(व)र्मती आभिजनो निवासः (अस्य) = वार्मतेयः । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## गिरेरीयोऽस्त्राजीवे ॥ ६।३।२१९ ॥

**[ गिरेरीयः ]** गिरि पञ्चमी ङसि । ईय प्रथमा सि ।

**[ अस्त्राजीवे ]** अस्त्रमाजीवो जीविका यस्य सः = अस्त्राजीवः, तस्मिन् ।

**[ हृद्गोलीयः ]** हृदां गोल इव = हृद्गोलः । हृद्गोलः पर्वत आभिजनो निवासोऽस्यास्त्राजीवस्य सः = हृद्गोलीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ भोजकटीयः ]** भोजकटः पर्वत आभिजनो निवासोऽस्यास्त्राजीवस्य सः = भोजकटीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ रोहितगिरीयः ]** रोहितश्चासौ गिरिश्च = रोहितगिरिः । रोहितगिरिः पर्वत आभिजनो निवासोऽस्यास्त्राजीवस्य सः = रोहितगिरीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ अन्धाश्मीयः ]** अन्ध-अश्मन् मण्ड्यते । अन्धा अश्मानो यत्र सः । 'पृषोदरादयः' (३।२।१५५) अन्धाश्मनिपातः । अन्धाश्मः पर्वत आभिजनो निवासोऽस्यास्त्राजीवस्य सः = अन्धाश्मीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सांकाश्यकोऽस्त्राजीवः ]** सांकाश्ये भवः = सांकाश्यकः । 'प्रस्थ-पुर-वहान्त-योपान्त्य-धन्वार्थात्' (६।३।४३) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आर्क्षोदो ब्राह्मणः ]** ऋक्षो नक्षत्रमिव निर्मलमुदकं यत्र सः = ऋक्षोदः । नाम्न्युत्तरपदस्य च' (३।२।१०७) उदकस्य उदभावः । ऋक्षोदः पर्वत आभिजनो निवासोऽस्य सः = आर्क्षोदो ब्राह्मणः । 'आभिजनात्' (६।३।२१४) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पार्थवः ]** पृथुः पर्वत आभिजनो निवासोऽस्य सः = पार्थवः । 'आभिजनात्' (६।३।२१४) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः सर्वत्र ॥छ॥

**इत्याचार्यश्रीहेमचन्द्रविरचितायां बृहद्वृत्तौ तद्धितस्य**
**तृतीयः पादः ॥छ॥**

• • •

॥ अर्हम् ॥

## ॥ अथ षष्ठाध्यायस्य चतुर्थः पादः ॥

### **इकण्** ॥ ६।४।१ ॥

**[ इकण् ]** इकण् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

अणः पूर्णोऽवधिः । प्रथमपादे 'प्राग् जितादण्' (६।१।१३) इत्यनेन योऽण्विहितस्तस्य अधिकारः अधिक्रियते । योगे २ उपतिष्ठते इत्यर्थः । 'भावा-ऽकर्त्रो (५।३।१८) घञ्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ॥छ॥

### **तेन जित-जयद्-दीव्यत्-खनत्सु** ॥ ६।४।२ ॥

**[ तेन ]** तेन पञ्चमी ङसि ।

**[ जितजयद्दीव्यत्खनत्सु ]** जितश्च जयंश्च दीव्यंश्च खनंश्च = जितजयद्दीव्यत्खनतः, तेषु ।

**[ आक्षिकम् ]** अक्षैर्जितम् = आक्षिकम् । अनेन इकणप्र० → इक । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ शालाकिकम् ]** शलाकया जितं = शालाकिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ आक्षिकः ]** अक्षैर्जयति = आक्षिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शालाकिकः ]** शलाकाभिर्जयति = शालाकिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आक्षिकः ]** अक्षैर्दीव्यति = आक्षिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शालाकिकः ]** शलाकया दीव्यति = शालाकिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आभ्रिकः ]** अभ्री मण्ड्यते । अभ्र्या खनति = आभ्रिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ कौद्दालिकः ]** कुद्दालेन खनति = कौद्दालिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

अभ्री काष्ठमयी तीक्ष्णाग्रा कुद्दालिका उच्यते । इह तेनेति करणे तृतीया वेदितव्या, नान्यत्रानभिधानात् ॥छ॥

## संस्कृते ॥ ६।४।३ ॥

**[ संस्कृते ]** संस्कृत सप्तमी ङि ।

**सतो विद्यमानस्य उत्कर्षाधानं संस्कारः ।**

**[ दाधिकम् ]** दधि मण्ड्यते । दध्ना संस्कृतं = दाधिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ मारिचिकम् ]** मरिचैः संस्कृतं = मारिचिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शार्ङ्गवेरिकम् ]** शृङ्गवेरेण–आर्द्रकेण संस्कृतं = शार्ङ्गवेरिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औपाध्यायिकः शिष्यः ]** उपाध्यायेन संस्कृतम् = औपाध्यायिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा–सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वैद्यिकः ]** विद्यया संस्कृतः = वैद्यिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## कुलत्थ-कोपान्त्यादण् ॥ ६।४।४ ॥

**[ कुलत्थकोपान्त्यात् ]** क उपान्त्यो यस्य सः । कुलत्थश्च कोपान्त्यश्च = कुलत्थकोपान्त्यम्, तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ कौलत्थम् ]** कुलत्थैः संस्कृतं = कौलत्थम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

卐**[ तैन्तिडीकम् ]** तिन्तिडीकेन आम्लवेतसेन संस्कृतं, तिन्तिडीकाभिः आम्लिकाभिर्वा = तैन्तिडीकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । सि–अम् ।

**[ दार्दुरूकम् ]** दर्दुरूकेण संस्कृतं = दार्दुरूकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मारण्डूकम् ]** मरण्डूकेन संस्कृतं = मारण्डूकम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मौद्गम् ]** मुद्गेन संस्कृतं = मौद्गम् ।

**[ सारघम् ]** 'सृं गतौ' (२५) सृ । सरन्ति मधुच्छत्रं = सरघा । 'सर्त्तेरघः' (उणा०१११) अघप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । सरघाभिः कृतं = सारघम् । 'नाम्नि मक्षिकादिभ्यः' (६।३।१९३) अण्प्र० → अ ।

卐 बृहद्वृत्त्यादिषु – तैत्तिडीकम् । हैमप्रकाशे – तैत्तिरीकम् ।

'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सारघेन मधुना संस्कृतं = सारघम् । मतान्तरे अनेन अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।।छा।

**संसृष्टे** ।। ३।४।५ ।।

**[ संसृष्टे ]** संसृष्ट सप्तमी ङि ।

मिश्रणमात्रं संसर्गः इति पूर्वोक्तात् संस्कृताद्भेदः ।

**[ दाधिकम् ]** दध्ना संसृष्टं = दाधिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ शार्ङ्गवेरिकम् ]** शृङ्गवेरेण संसृष्टं = शार्ङ्गवेरिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ पैष्पलिकम् ]** पिष्पलीभिः संसृष्टं = पैष्पलिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् ।

**[ वैषिका भक्ष्याः ]** विषेण संसृष्टाः = वैषिकाः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । भक्ष्याः ।

**[ आशुचिकमन्नम् ]** अशुचिना संस्कृतं(संसृष्टं) = आशुचिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् । अन्नम् ।।छा।

**लवणादः** ।। ६।४।६ ।।

**[ लवणात् ]** लवण पञ्चमी ङसि ।

**[ अः ]** अ प्रथमा सि ।

**[ लवणः सूपः ]** लवणेन संसृष्टः = लवणः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सूपः ।

**[ लवणः शाकः ]** लवणेन संसृष्टः = लवणः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शाकः ।

**[ लवणा यवागूः ]** लवणेन संसृष्टः = लवणः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । यवागूः ।

लवणशब्दो द्रव्यशब्दो गुणशब्दस्य(श्च), तत्र द्रव्यवाची लवणशब्दः प्रत्ययं प्रयोजयति, न गुणवाची, गुणेन विशेष(श्लेष)पूर्वकस्य संसर्गस्याभावात् ।।छा।

**चूर्ण-मुद्गाभ्यामिनणौ** ।। ६।४।७ ।।

**[ चूर्णमुद्गाभ्याम् ]** चूर्णश्च मुद्गश्च = चूर्णमुद्गौ, ताभ्याम् ।

**[ इनणौ ]** इन् च अण् च = ईनणौ ।

**[ चूर्णिनोऽपूपाः ]** चूर्ण । चूर्णैः संसृष्टाः = चूर्णिनः । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । अपूपाः ।

**[ चूर्णिन्यो धानाः ]** चूर्णैः संसृष्टाः = चूर्णिन्यः । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । प्रथमा जस् । धानाः ।

**[ मौद्ग ओदनः ]** मुद्गैः संसृष्टः = मौद्गः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मौद्गी यवागूः ]** मुद्गैः संसृष्टा = मौद्गी । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृ० औ । 'अवर्णे०' (७।४।६८) अलुक् । 'अणञे०' (२।४।२०) ङी ॥छ॥

**व्यञ्जनेभ्य उपसिक्ते** ॥ ६।४।८ ॥

**[ व्यञ्जनेभ्यः ]** व्यञ्जन पञ्चमी भ्यस् । 'एद् बहुस्भोसि' (१।४।४) ए ।

**[ उपसिक्ते ]** उपसिक्त सप्तमी ङि ।

**[ सौपिक ओदनः ]** सूपेनोपसिक्तः = सौपिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ओदनः

**[ दाधिक ओदनः ]** दध्ना उपसिक्तः = दाधिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । ओदनः ।

**[ घार्तिकः सूपः ]** घृतेन उपसिक्तः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सूपः ।

**[ तैलिकं शाकम् ]** तै(ति)लेनोपसिक्तं = तैलिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । शाकम् ।

व्यञ्जनशब्दो रूढितः सूपादौ वर्त्तते । उपसिक्तमिति यद्भोजनार्थमुपादीयते भोज्यादि तदुच्यते, न स्थाल्यादि । उपसिक्तं संसृष्टमेव । तत्र 'संसृष्टे' (६।४।५) इत्येव सिद्धे नियमार्थं वचनम् । व्यञ्जनैः संसृष्टे उपसिक्त एव, भोक्तव्य एव, उपसिक्ते व्यञ्जनैरेव ॥छ॥

**तरति** ॥ ६।४।९ ॥

**[ तरति ]** 'तॄ प्लवन-तरणयोः (२७) तॄ । तरतीति तरत् । 'शत्रान०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक्, तस्मिन् ।

卐**[ औडुविकः ]** उडुवेन - तरति = औडुविकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ काण्डप्लविकः ]** काण्डप्लवेन तरति = काण्डप्लविकः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ शारप्लविकः ]** शरप्लवेन तरति = शारप्लविकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गौपुच्छिकः ]** गोपुच्छेन तरति = गौपुच्छिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

卐 लघुवृत्तौ - मध्यमवृत्तौ च - औडुपिकः ।

**नौ-द्विस्वरादिकः** ॥ ६।४।१० ॥

**[ नौद्विस्वरात् ]** द्वौ स्वरौ यस्य सः = द्विस्वरः । नौश्च द्विस्वरश्च = नौद्विस्वरम्, तस्मात् ।

**[ इकः ]** इक प्रथमा सि ।

**[ नाविकः, नाविका ]** नौ । नावा तरति = नाविकः । अनेन इकप्र० । 'ओदौतोऽवाव्' (१।२।२४) आव् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अन्यत्र 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

द्विस्वर-**[ घटिकः ]** घटेन तरति = घटिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्लविकः ]** प्लवेन तरति = प्लविकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दृतिकः ]** दृति मण्ड्यते । दृतिना तरति = दृतिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ बाहुकः, बाहुका ]** बाहुभ्यां तरति = बाहुकः, बाहुका । अनेन इकप्र० । 'ऋवर्णोवर्ण०' (७।४।७१) इकस्य इलोपः । अन्यत्र 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

**चरति** ॥ ६।४।११ ॥

**[ चरति ]** 'चर भक्षणे च' (४१०) चर् । चरतीति चरत् । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक्, तस्मिन् ।

चरतिरिह गत्यर्थो भक्ष्यर्थश्च गृह्यते ।

गत्यर्थः-**[ हास्तिकः ]** हस्तिन् । हस्तिना चरति = हास्तिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

**[ शाकटिकः ]** शकटेन चरति-गच्छति = शाकटिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ घाण्टिकः ]** घण्टया चरति-गच्छति = घाण्टिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आकषिकः ]** 'कष हिंसायाम्' (५०७) कष्, आङ्पूर्व० । आकषन्ति सुवर्णे(र्णं) अत्र = आकषः । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । यद्वा आकषन्ति औषधान्यत्र । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । आकषेन चरति = आकषिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आकषः सुवर्णनिकषोपलः औषधपेषणपाषाणश्च ।

भक्ष्यर्थः-**[ दाधिकः ]** दध्ना चरति-भक्षयति = दाधिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णे०' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ शार्ङ्गवेरिकः ]** शृङ्गवेरेण-आर्द्रकेण चरति-भक्षयति = शार्ङ्गवेरिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आर् । 'अवर्णे०' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**पर्पादेरिकट्** ॥ ६।४।१२ ॥

**[ पर्पादेरिकट् ]** पर्प आदिर्यस्य सः = पर्पादिः, तस्मात् । इकट् प्रथमा सि ।

**[ पर्पिकः, पर्पिकी ]** पर्पेण-चापकेन चरति = पर्पिकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ अश्विकः, अश्विकी ]** अश्वेन चरति = अश्विकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी ॥छ॥

**पदिकः** ॥ ६।४।१३ ॥

**[ पदिकः ]** पदिक प्रथमा सि ।

**[ पदिकः ]** पाद । पादाभ्यां चरति = पदिकः । अनेन इकट्प्र० → इक - पादशब्दस्य पद् इति निपात्यते । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**श्वगणाद् वा** ॥ ६।४।१४ ॥

**[ श्वगणात् ]** शुनां गणः = श्वगणः, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ श्वगणिकः, श्वगणिकी, श्वागणिकः, श्वागणिकी ]** श्वन्-गण । शुनां गणः = श्वगणः । श्वगणेन चरति = श्वगणिकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । पक्षे-'चरति' (६।४।११) इत्यनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्यत्र 'अणञेयेकण्-नञ्०' (२।४।२०) ङी । 'श्वादेरिति' (७।४।१०) इति वात्प्रागौर्न भवति ॥छ॥

**वेतनादेर्जीवति** ॥ ६।४।१५ ॥

**[ वेतनादेः ]** वेतनं आदिर्यस्य सः = वेतनादिः, तस्मात् ।

**[ जीवति ]** 'जीव प्राणधारणे' (४६५) । जीव् । जीवतीति जीवत् । 'शत्रनशा०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । तस्मिन् ।

**[ वैतनिकः ]** वेतनेन जीवति = वैतनिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वाहिकः ]** वाहेन जीवति = वाहिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अर्द्धवाह ]** अर्द्धं वाहस्य-अर्द्धस्य वहनं वा = अर्द्धवाह ।

**[ उपनिजस्त ]** उप-नि 'जसूच् मोक्षणे' (१२२३) जस् । उपनिजस्यति स्म = उपनिजस्त । 'गत्यर्थाऽकर्मक०' (५।१।११) क्तप्र० → त ।

**[ स्फिज ]** 'स्फायैङ् वृद्धौ' (८०४) स्फाय् । स्फायते = स्फिज । बाहुलकात् इजप्र० डित् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ॥छ॥

**व्यस्ताच्च क्रय-विक्रयादिकः** ॥ ६।३।१६ ॥

**[ व्यस्तात् ]** व्यस्त पञ्चमी ङसि ।

**[ च ]** च प्रथमा सि ।

**[ क्रयविक्रयात् ]** क्रयश्च विक्रयश्च = क्रयविक्रयम्, तस्मात् ।

**[ इकः ]** इक प्रथमा सि ।

**[ क्रयविक्रयिकः ]** क्रयेण युक्तो विक्रयः = क्रयविक्रयः । क्रयविक्रयेण जीवति = क्रयविक्रयिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ क्रयिकः ]** क्रयेण जीवति = क्रयिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ विक्रयिकः ]** विक्रयेण जीवति = विक्रयिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा।

## वस्नात् ॥ ६।४।१७ ॥

**[ वस्नात् ]** वस्न पञ्चमी ङसि ।

**[ वस्निकः ]** 'वसं निवासे' (९९९) वस् । वसन्ति क्रयाणका(दी)नि वेश्मन्यनेन । प्या-धा-पन्यनि-स्वदि-स्वपि-वस्यज्यति-सिविभ्यो नः (उणा० २५८) नप्र० । वस्नं-मूल्यम्, तेन जीवति = वस्निकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा।

## आयुधादीयश्च ॥ ६।४।१८ ॥

**[ आयुधात् ]** आयुध पञ्चमी ङसि ।

**[ ईयश्च ]** ईय प्रथमा सि । च प्रथमा सि ।

**[ आयुधीयः, आयुधिकः, आयुधिका ]** आयुधेन जीवति = आयुधीयः, आयुधिकः । अनेन ईय - इकश्च प्रत्ययः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अन्यत्र 'आत्' (२।४।१८) आप्प्र० → आ ॥छा।

## व्रातादीनञ् ॥ ६।४।१९ ॥

**[ व्रातात् ]** व्रात पञ्चमी ङसि ।

**[ ईनञ् ]** ईनञ् प्रथमा सि ।

**[ व्रातीनः ]** नानाजातीय(या)-भिन्नजातीया ब्राह्मण-क्षत्रिय-विट्-शूद्राः । अनियत आहरतु-अनियतक्रिया इत्यर्थः । वृत्तयः शरीरमायास्य जीवन्तो मृतकाः = भारवाहका इत्यर्थः । शरीरायासजीविनः सङ्घा व्राताः, तत्साहचर्यात, तत्कर्मापि व्रातम्, तेन जीवति = व्रातीनः । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ व्रातीनाभार्यः ]** व्रातीन 'आत्' (२।४।१८) आप्प्र० → आ । व्रातीना भार्या यस्य सः = व्रातीनाभार्यः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री०' (३।२।४९) इत्यनेन अत्र पुंवत् प्राप्नोति । 'तद्धितः स्वरवृद्धिहेतुररक्त-विकारे' (३।२।५५) इत्यनेन न भवति ॥छा।

**निर्वृत्तेऽक्षद्यूताऽऽदेः** ॥ ६।४।२० ॥

**[ निर्वृत्ते ]** निर्वृत्त सप्तमी ङि ।

**[ अक्षद्यूताऽऽदेः ]** अक्षद्यूत(तं) आदिर्यस्य सः = अक्षद्यूताऽऽदिः, तस्मात् ।

**[ आक्षद्यूतिकं वैरम् ]** अक्षद्यूतेन निर्वृत्तम् = आक्षिकम् (आक्षद्यूतिकम्) । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । वैरम् ।

**[ जाङ्घाप्रहतिकं वैरम् ]** जङ्घाप्रहतेन निर्वृत्तं = जाङ्घाप्रहतिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा॥

**भावादिमः** ॥ ६।४।२१ ॥

**[ भावात् ]** भाव पञ्चमी ङसि ।

**[ इमः ]** इम प्रथमा सि ।

**[ पाकिमम् ]** पाकेन निर्वृत्तं = पाकिमम् । अनेन इमप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ सेकिमम् ]** सेकेन निर्वृत्तं = सेकिमम् । अनेन इमप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ त्यागिमम् ]** त्यागेन निर्वृत्तं = त्यागिमम् । अनेन इमप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ रागिमम् ]** 'रञ्जीं रागे' (८९६) रञ्ज् । रञ्जनं = रागः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'घञि भाव-करणे'(४।२।५२) नलुक् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० । रागेण निर्वृत्तं = रागिमम् । अनेन इमप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ कुट्टिमम् ]** 'कुट्टण् कुत्सने च' (१५९८) कुट्ट् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । कुट्टनं = कुट्टः । 'युवर्ण-वृ-दृ०' (५।३।२८) अल्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लुक् । कुट्टेन निर्वृत्तं = कुट्टिमम् । अनेन इमप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ संमूर्छिमम् ]** संमूछा । संमूर्छया निर्वृत्तं = संमूर्छिमम् । अनेन इमप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा॥

**याचिता-ऽपमित्यात् कण्** ॥ ६।४।२२ ॥

**[ याचिताऽपमित्यात् ]** याचितश्च अपमित्यश्च = याचिताऽपमित्यम्, तस्मात् ।

**[ कण् ]** कण् प्रथमा सि ।

**[ याचितकम् ]** याचितं मण्ड्यते । याचितेन याचनया निर्वृत्तं = याचितकम् । अनेन कण्प्र० → क । वृद्धिः ।

**[ आपमित्यकम् ]** अपमान मण्ड्यते । अपमानं निर्वर्त्तयति = अपमित्य । 'निमील्याऽऽदि-मेङस्तुल्यकर्तृके' (५।४।४६) मित्यनिपात्यते । अपमित्य प्रतिदानेन निर्वृत्तमापमित्यकम् । अनेन कण्प्र० → क । वृद्धिः ॥छा॥

**हरत्युत्सङ्गादेः** ॥ ६।४।२३ ॥

**[ हरति ]** 'हृंग हरणे' (८८५) हृ । हरतीति हरत् । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० अर् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक्, तस्मिन् ।

**[ उत्सङ्गादेः ]** उत्सङ्ग आदिर्यस्य सः = उत्सङ्गादिः, तस्मात् ।

**[ औत्सङ्गिकः ]** उत्सङ्गेन हरति = औत्सङ्गिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औत्रुपिकः ]** उत्रुपेन हरति = औत्रुपिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औडुपिकः ]** उडुपेन हरति = औडुपिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ उत्रुप ]** तुप (३४३) - तुम्प (३४४) - 'त्रुप हिंसायाम्' (३४५) त्रुप्, उत्पूर्व० । उत्त्रोपति । 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० → अ ।

**[ उडुप ]** उत् उटि सौत्रो धातुः । उ(ओ)टतीति । 'पम्पा-शिल्पादयः (उणा० ३००) उडुपनिपात्यते(?) ('उड सङ्घाते' (सौत्र० २९) उड् । ओडति-उड्यते । 'उडेरुपक्' (उणा० ३११) उपक्प्र० → उप) । ।।छा।

## भस्त्रादेरिकट् ॥ ६।४।२४ ॥

**[ भस्त्रादेः ]** भस्त्रा आदिर्यस्य सः = भस्त्रादिः, तस्मात् ।

**[ इकट् ]** इकट् प्रथमा सि ।

**[ भस्त्रिकः, भस्त्रिकी ]** भस्त्रया हरति = भस्त्रिकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ भरटिकः, भरटिकी ]** भरटेन हरति = भरटिकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । भरट उडुप कथ्यते ? ।।छा।

## विवध-वीवधाद् वा ॥ ६।४।२५ ॥

**[ विवधवीवधात् ]** विवधश्च वीवधश्च = विवधवीवधम्, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

'वधि बन्धने' (७४६) वध्, विपूर्व० । विवध्यते दौःस्थ्येनेति विवधः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'न जन-वधः' (४।३।५४) वृद्ध्यभावः । अन्यत्र 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः ।

**[ विवधिकः, विवधिकी ]** विवधेन हरति = विवधिकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ वीवधिकः, वीवधिकी ]** वीवधेन हरति = वीवधिकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ वैवधिकः, वैवधिकी ]** विवधेन हरति = वैवधिकः । इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी ।

विवधवीवधशब्दौ समानार्थौ केटककोष्यां पथि पर्याहारे च वर्त्तेते ।।छा।

## कुटिलिकाया अण् ॥ ६।४।२६ ॥

**[ कुटिलिकाया ]** कुटिल । कुटिलमग्रमस्त्यस्याम् । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कुटिल्येव = कुटिलिका । स्वार्थे कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । पञ्चमी ङसि ।

**[ अण् ]** अण् प्रथमा सि ।

कुटिलिकाशब्देनाग्रे वक्रा लोहादिमयी अङ्गाराकर्षणी यष्टिर्वा, कुटिला गतिर्वा, पलालोत्क्षेपणोऽग्रे वक्रो दण्डो वा, परिव्राजकोपकरणविशेषो वा, चौराणां नौगृहाद्यारोहणार्थं दामाग्रप्रतिबद्ध आयसोऽर्द्धाङ्कुशो वोच्यते ।

**[ कौटिलिकः कर्मारः ]** कुटिलिकया हरत्यङ्गारान् = कौटिलिकः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । कर्म्मारः करोति । लोहादिघट्टनं कुटिलम् । 'कृगो मादिश्च' (उणा० ४०७) आरप्रत्ययो मादिः ।

**[ कौटिलिको मृगः ]** कुटिलिकया हरति व्याधं = कौटिलिकं(को) मृगः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कौटिलिकः कर्षकः ]** कुटिलिकया हरति पलालं = कौटिलिकः कर्षकः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कौटिलिकः परिव्राजकः ]** कुटिलिकया हरति पुष्पाणि = कौटिलिकः परिव्राजकः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कौटिलिकश्चौरः ]** कुटिलिकया हरति नावं = कौटिलिकश्चौरः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । चौरः ॥छ॥

## ओजः-सहो-ऽम्भसो वर्तते ॥ ६।४।२७ ॥

**[ ओजःसहोऽम्भसः ]** ओजाश्च सहाश्च अम्भाश्च = ओजःसहोऽम्भस्, तस्मात् ।

**[ वर्तते ]** वर्त्तते सप्तमी ङि । सूत्रत्वात् लुप् । वृत्तिरात्मयापना चेष्टा वा ।

**[ औजसिकः ]** ओजस् । ओजसा बलेन वर्त्तते = औजसिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ ।

**[ साहसिकः ]** परेणापराजयः = प्रसहनम् । सहसा प्रसहनेन-पराभिभवेन वा वर्त्तते = साहसिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ आम्भसिकः ]** अम्भसा-जलेन वर्त्तते = आम्भसिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

## तं प्रत्यनोर्लोमेप-कूलात् ॥ ६।४।२८ ॥

**[ तम् ]** तम् पञ्चमी ङसि ।

**[ प्रत्यनोः ]** प्रतिश्च अनुश्च = प्रत्यनु, तस्मात् ।

**[ लोमेपकूलात् ]** लोम च ईपश्च कूलश्च = लोमेपकूलम्, तस्मात् ।

तेनेति निवृत्तम् ।

**[ प्रातिलोमिकः ]** लोमानि प्रतिगतम् । 'प्रत्यन्ववात् साम-लोम्नः' (७।३।८२) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । लोमानि प्रति । 'लक्षणेनाऽभि-प्रत्याभिमुख्ये' (३।१।३३) समासः । लोमानि प्रतिगतानि = प्रतिलोममिति बहुव्रीहिः । 'नपुंसकाद् वा' (७।३।८९) अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । प्रतिलोमं वर्त्तते = प्रातिलोमिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आनुलोमिकः ]** अनु-लोमन् मण्ड्यते । लोमान्यनुगतम् = अनुलोमम् । 'प्रत्यन्ववात्०' (७।३।८२) अत्-समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । अनुलोमं वर्त्तते = आनुलोमिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ प्रातीपिकः ]** प्रति-आप् मण्ड्यते । प्रतिगता आपो यत्र = प्रतीपम् । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'द्व्यन्तरनवर्णोपसर्गादप ईप्' (३।२।१०९) आप्० → ईप्० । प्रतीपं वर्त्तते = प्रातीपिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आन्वीपिकः ]** अनु-आप् मण्ड्यते । अनुगता आपो यत्र = अन्वीपम् । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'द्व्यन्तरनवर्णोपसर्गादप ईप्' (३।२।१०९) आप्० → ईप्० । प्रतीपं वर्त्तते = प्रातीपिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ प्रातिकूलिकः ]** प्रतिगतं कूलं = प्रतिकूलम् । प्रतिकूलं वर्त्तते = प्रातिकूलिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आनुकूलिकः ]** अनुगतं कूलम् = अनुकूलम् । अनुकूलं वर्त्तते = आनुकूलिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

अकर्मकस्यापि वृत्तेर्योगे प्रतिलोमादेः क्रियाविशेषणत्वात् द्वितीया । तदिति कृते हि प्रथमान्तमिदं द्वितीयान्तमिति वा संशयः स्यात् । तमिति पुल्लिङ्गनिर्देशोऽसन्देहार्थः ॥छा।

## परेर्मुख-पार्श्वात् ॥ ६।४।२९ ॥

**[ परेः ]** परि पञ्चमी ङसि ।

**[ मुखपार्श्वात् ]** मुखश्च पार्श्वश्च = मुखपार्श्वम्, तस्मात् ।

**[ पारिमुखिकः ]** मुखात् परि = परिमुखम् । 'पर्यपा-ऽऽङ्०' (३।१।३२) अव्ययीभावः । परितः सर्वतो मुखं = परिमुखम् । 'परिमुखादेरव्ययीभावात्' (६।३।१३६) इति वचनात् अव्ययीभावः । परिमुखं वर्त्तते = पारिमुखिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पारिपार्श्विकः ]** परितः पार्श्वं पार्श्वात् परीति वा = परिपार्श्वम् । परिपार्श्वं वर्त्तते = पारिपार्श्विकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

द्वितीयवाक्यं मध्ये सर्वत्र 'क्रियाविशेषणात्' (२।२।४१) इति द्वितीया । परिवर्जने सर्वतोभावे वा । स्वामिनो मुखं वर्जयित्वाच्च वर्त्तमानो अथवा यतो यतः स्वामिमुखं ततस्ततो वर्त्तमानः पारिमुखिकः सेवकः । एवमग्रेऽपि । यस्मात् = यतः । तस्मात् = ततः । 'आद्यादिभ्यः' (७।२।८४) तस्प्र० । पृषोदरादित्वात् दलोपः, ततो द्वित्वम् ॥छा।

**रक्षदुञ्छतोः** ॥ ६।४।३० ॥

**[ रक्षदुञ्छतोः ]** रक्षंश्च उञ्छंश्च = रक्षदुञ्छतौ, तयोः = रक्षदुञ्छतोः ।

**[ सामाजिकः ]** 'अञ्जू(ञ्जौ)प् व्यक्ति-म्रक्षण-गतिषु' (१४८८) अञ्ज् । समा(म)जनं = समाजः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । समाजं रक्षति = सामाजिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सामवायिकः ]** 'वेंग् तन्तुसन्ताने' (९९२) वे, सम्पूर्व० । संवयन्ति जना अत्रेति समवायः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । समवायं रक्षति = सामवायिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नागरिकः ]** नगरं रक्षति = नागरिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सान्निवेशिकः ]** सन्निवेशं रक्षति = सान्निवेशिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बादरिकः ]** बदरम् । बदराण्युञ्छति-उच्चिनोति = बादरिकः ।

**[ श्यामाकिकः ]** श्यामाकमुञ्छति = श्यामाकिकः ।

**[ नैवारिकः ]** 'वृग्ट् वरणे' (१२९४) वृ, निपूर्व० । निव्रियते इति नीवारः । 'नेर्वुः' (५।३।७४) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः । नीवारानुञ्छति - उच्चिनोति = नैवारिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**पक्षि-मत्स्य-मृगार्थाद् घ्नति** ॥ ६।४।३१ ॥

**[ पक्षिमत्स्यमृगार्थात् ]** पक्षी च मत्स्यश्च मृगश्च = पक्षिमत्स्यमृगाः । पक्षिमत्स्यमृगा अर्था यस्य सः = पक्षिमत्स्यमृगार्थस्तस्मात् ।

**[ घ्नति ]** हन्तीति घ्नन्, तस्मिन् ।

**[ पाक्षिकः ]** पक्षिन् । पक्षिणो हन्ति = पाक्षिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । प्रथमा सि । 'सो रुः' ((२।१।७२) स० → र० ।

**[ मात्स्यिकः ]** मत्स्यान् हन्ति = मात्स्यिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' ((२।१।७२) स० → र० ।

**[ मार्गिकः ]** मृगान् हन्ति = मार्गिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' ((२।१।७२) स० → र० ।

**[ शाकुनिकः ]** शकुनीन् हन्ति = शाकुनिकः ।

**[ मायूरिकः ]** मयूरान् हन्ति = मायूरिकः ।

**[ तैत्तिरिकः ]** तित्तिरीन् हन्ति = तैत्तिरिकः ।

**[ मैनिकः ]** मीनान् हन्ति = मैनिकः ।

Shrenik/D/A-Shilchandrasuri/Doondhika Part-5 Folder (10-9-2012) Doondhika Part-6 (D) 1st • 30-7-2013 (2nd - 16-9-2013) (3rd-3-10-2013) [315]

**[ शाफरिकः ]** शफरान् हन्ति = शाफरिकः ।

**[ शाकुलिकः ]** शकुलं हन्ति = शाकुलिकः ।

**[ हारिणिकः ]** हरिणान् हन्ति = हारिणिकः ।

**[ सौकरिकः ]** सूकरान् हन्ति = सौकरिकः ।

**[ नैयङ्कुकः ]** न्यङ्कु । न्यङ्कून् हन्ति = नैयङ्कुकः । सर्वत्र अनेन इकण्प्र० → इक । 'लोकात्' (११३) न् पाठउ विश्लेषियइ । 'न्यङ्कोर्वा' (७।४।८) यकारस्य प्राग् ऐकारः । 'ऋवर्णोवर्ण०' (७।४।७१) इकणः इकारस्य लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

## परिपन्थात् तिष्ठति च ॥ ६।४।३२ ॥

**[ परिपन्थात् ]** परिपन्थ पञ्चमी ङसि ।

**[ तिष्ठति ]** तिष्ठतीति तिष्ठत्, तस्मिन् ।

**[ च ]** च प्रथमा सि ।

**[ पारिपन्थिकश्चौरः ]** परि-पन्थिन् मण्ड्यते । पथः परि = परिपथम् । परिशब्दो वर्जनार्थः तदा 'पर्यपाभ्यां वर्ज्ये' (२।२।७१) इति पञ्चमी । 'पर्यपा-ऽऽङ् बहिरच् पञ्चम्या' (३।१।३२) समासः । यदा तु परितः सर्वतः पन्थानमिति सर्वतोऽर्थः परि तदा 'सर्वोभया-ऽभि-परिणा तसा' (२।२।३५) द्वितीया । सूत्रसामर्थ्यादव्ययीभावः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) इन्लुक् । अत एव सूत्रनिर्देशात् परिपथशब्दस्य इकणोऽन्यत्रापि वा परिपन्थादेशः । 'क्रियाविशेषणात्' (२।२।४१) अम् । परिपन्थं तिष्ठति हन्ति वा = पारिपन्थिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । चौरः ।

अन्यत्र परिपन्थं गच्छतीत्याद्येव भवति ॥छ॥

## परिपथात् ॥ ६।४।३३ ॥

**[ परिपथात् ]** परिपथ पञ्चमी ङसि ।

**[ पारिपथिकः ]** परिपथिन् मांडणीयइ । परि-वर्जने सर्वतोभावे वा । पथः परि = परिपथः(थम् ) । 'पर्यपा-ऽऽङ् बहिरच् पञ्चम्या' (३।१।३२) इति समासः । परितः सर्वतः पन्थानं वा = परिपथम् । सूत्रसामर्थ्यादव्ययीभावः । परिगतं पन्थाः = परिपथः इति वा तत्पुरुषः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) इन्लुक् । परिपन्थं(थं) तिष्ठति = पारिपथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' ((२।१।७२) स० → र० । पन्थानं वर्जयित्वा व्याप्य वा तिष्ठतीत्यर्थः ॥छ॥

## अवृद्धेर्गृह्णति गर्ह्ये ॥ ६।४।३४ ॥

**[ अवृद्धेः ]** न वृद्धिरवृद्धिस्तस्मात् । 'नञत्' (३।२।१२५) न० → अ० ।

**[ गृह्णति ]** गृह्णातीति गृह्णत्, तस्मिन् ।

**[ गर्ह्ये ]** गर्ह्य सप्तमी ङि ।

**[ द्वैगुणिकः ]** द्विगुणं गृह्णाति = द्वैगुणिकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ त्रैगुणिकः ]** त्रिगुणं गृह्णाति = त्रैगुणिकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वार्धुषिकः ]** प्रयुक्त-धन । 'पुषश् पुष्टौ' (१५६४) पुष् । प्रयुक्तं धनं पुष्णाति = प्रयुक्तधनपोषी, तस्य पृषोदरादित्वात् वृधुषी शब्द आदेशः । यद्वा 'वृधूङ् वृद्धौ' (९५७) वृध् । वर्द्धते द्रव्यादिकं दिनं प्रति इति वृधुषी । 'अपुष-धनुषादयः' (उणा० ५५९) उषप्र० । 'गौरादिभ्यो०' (२।४।१९) ङी । 'अस्य ङ्यां लुक् (२।४।८६) अलुक् । वृधुर्षी वृद्धिं गृह्णाति-पर्यायोऽयं कालान्तरमित्यर्थः = वार्धुषिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । अल्पं दत्त्वा प्रभूतं गृह्णन् अन्यायकारी निन्द्यते ॥छ॥

## कुसीदादिकट् ॥ ६।४।३५ ॥

**[ कुसीदात् ]** कुसीद पञ्चमी ङसि ।

**[ इकट् ]** इकट् प्रथमा सि ।

**[ कुसीदिकः कुसीदिकी ]** कुसिः सौत्रो धातुः-कुस् । कुसतीति कुसीदम् । 'कुसेरिदेदौ' (उणा० २४१) कुसीदनिपातः । कुसीदं वृद्धिस्तदर्थमपि द्रव्यं कुसीदम्, तद् गृह्णाति = कुसीदिकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' ((२।१।७२) स० → र० । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी ।

टकारो ङ्यर्थः ॥छ॥

## दशैकादशादिकश्च ॥ ६।४।३६ ॥

**[ दशैकादशात् ]** दशैकादश अस्मादखण्डात् पञ्चमी ङसि ।

**[ इकश्च ]** इक प्रथमा सि । च प्रथमा सि ।

**[ दशैकादशिकः, दशैकादशिका, दशैकादशिकी ]** दशभिरेकादश = दशैकादश, तान् गृह्णाति = दशैकादशिकः । अनेन इकप्र० । प्रथमा सि । 'सो रुः' ((२।१।७२) स० → र० । अन्यत्र 'आत्' (२।४।१८) आप्प्र० → आ । एवम्-दशैकादशिकी । अनेनैव इकट्प्र० → इक । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । दशैकादशादित्यत एव निपातनादकारान्तत्वम् । तच्च वाक्ये प्रयोगार्थम्, दशैकादशान् इत्यत्र ॥छ॥

## अर्थ-पद-पदोत्तरपद-ललाम-प्रतिकण्ठात् ॥ ६।४।३७ ॥

**[ अर्थपदपदोत्तरपदललामप्रतिकण्ठात् ]** पद उत्तरपदं यस्य सः = पदोत्तरपदः । अर्थश्च पदश्च पदोत्तरपदश्च ललामश्च प्रतिकण्ठश्च(प्रतिकण्ठं च) = अर्थपदपदोत्तरपदललामप्रतिकण्ठम्, तस्मात् ।

गृह्यं(गर्ह्ये) इति निवृत्तम्, असंभवात् ।

**[ आर्थिकः ]** अर्थं गृह्णाति = आर्थिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पादिकः ]** पदं गृह्णाति = पादिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पौर्वपदिकः ]** पूर्वं च तत् पदं च = पूर्वपदम् । पूर्वपदं गृह्णाति = पौर्वपदिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औत्तरपदिकः ]** उत्तरं च तत् पदं च = उत्तरपदम् । उत्तरपदं गृह्णाति = औत्तरपदिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आदिपदिकः ]** आदौ पदम् = आदिपदम् । आदिपदं गृह्णाति = आदिपदिकः । अनेन इकण्प्र० → इक ।

**[ आन्तपदिकः ]** अन्तं पदम् = अन्तपदम् । अन्तपदं गृह्णाति = आन्तपदिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ लालामिकः ]** 'ललण् ग्रहणे' (      ) लल् । अनित्यो णिच् । लल्यते = ललः । 'स्थादिभ्यः कः' (५।३।८२) कप्र० → अ० । 'अम गतौ' (३९२) अम् । ललममति-प्राप्नोति = ललामः । 'अच्' (५।१।४९) अच्प्र० → अ । 'समानानां०' (१।२।१) दीर्घः । ललामं-प्रधानं गृह्णाति = लालामिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ प्रातिकण्ठिकः ]** कण्ठं कण्ठं प्रति = प्रतिकण्ठम् । 'योग्यता-वीप्सा-ऽर्थानतिवृत्ति-सादृश्ये' (३।१।४०) इति समासः । प्रतिकण्ठं गृह्णाति = प्रातिकण्ठिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

अव्ययीभावसमासश्रयणादिह न भवति । व्याख्यानतो विशेषप्रतिपत्तिः । प्रतिगतः कण्ठं = प्रतिकण्ठः, तं गृह्णाति । 'प्रात्यव-परि-निरादयो०' (३।१।४७) समासः ।

**[ बहुपदं गृह्णाति ]** ईषदपरिसमाप्तः पदः = बहुपदस्तं गृह्णाति ॥छ॥

## परदारादिभ्यो गच्छति ॥ ६।४।३८ ॥

**[ परदारादिभ्यः ]** परदार(रा) आदिर्येषां ते = परदारादयः, तेभ्यः = परदारादिभ्यः । पञ्चमी भ्यस् ।

**[ गच्छति ]** गच्छतीति गच्छत्, तस्मिन् ।

**[ पारदारिकः ]** परेषां दाराः = परदाराः । यद्वा परे च ते दाराश्च = परदाराः । परदारान् गच्छति = पारदारिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गौरुदारिकः ]** गुरोर्दाराः = गुरुदाराः । गुरुदारान् गच्छति = गौरुदारिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गौरुतल्पिकः ]** गुरूणां तल्पं-शय्या = गुरुतल्पः । गुरुतल्पं गृह्णाति (गच्छति) = गौरुतल्पिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ साभर्तृकिकः ]** सह भर्त्रा गच्छति = सभर्तृकः । 'ॠन्नित्यदितः' (७।३।१७१) कच्प्र० → क । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सहस्य सभावः । 'आत्' (२।४।१८) आप्प्र० → आ । सभर्तृकां गच्छति = साभर्तृकिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ भ्रातृजायिकः ]** भ्रातुर्जाया = भ्रातृजाया । भ्रातृजायां गच्छति = भ्रातृजायिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छा।

**प्रतिपथादिकश्च** ॥ ६।४।३९ ॥

**[ प्रतिपथात् ]** प्रतिपथ पञ्चमी ङसि ।

**[ इकश्च ]** इक प्रथमा सि । च प्रथमा सि ।

**[ प्रतिपथिकः प्रातिपथिको वा ]** प्रतिपथिन् मण्ड्यते । पन्थानं २ प्रति = प्रतिपथम् । यद्वा पथोऽभिमुख्यमिति वा = प्रतिपथम् । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) इन्लुक् । प्रतिपथं गच्छति = प्रतिपथिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-प्रातिपथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छा।

**माथोत्तरपद-पदव्याक्रन्दाद् धावति** ॥ ६।४।४० ॥

**[ माथोत्तरपदपदव्याक्रन्दात् ]** माथ उत्तरपदं यस्य सः = माथोत्तरपदः, माथोत्तरपदश्च पदवी च आक्रन्दश्च = माथोत्तरपदपदव्याक्रन्दम्, तस्मात् ।

**[ धावति ]** धावतीति धावन्, तस्मिन् ।

**[ दाण्डमाथिकः ]** मथन्ति कर्द्दमादिकमनेनास्मिन्निति वा । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । दण्ड इव माथः = दण्डमाथः । दण्डमाथे(थं) धावति = दाण्डमाथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शौक्लमाथिकः ]** शुक्ल इव माथः = शुक्लमाथः । शुक्लमाथं धावति = शौक्लमाथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**माथशब्दः पथिपर्यायः ।**

**[ दण्डमाथः ]** दण्ड इव माथः = दण्डमाथः-ऋजुमार्गः । 'उपमानं सामान्यैः' (३।१।१०१) एवेति नियमात् अप्राप्तोऽपि मयूरव्यंसकादित्वात् समासः । दण्डप्रधानो माथः । मयूरव्यंसकादित्वात् 'नाम नाम्नैकार्थ्ये समासो०' (३।१।१८) इति अनेन वा समासः ।

**[पादविकः]** पदवीति मण्ड्यते । पाद 'वेंग् तन्तुसन्ताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा । पादाभ्यां वीयते = पदवी । 'नी-वी-प्रहृभ्यो डित्' (उणा० ६१६) डिद् इप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अत एव सूत्रनिर्देशात् पदवीत्यत्र पादस्य पद आदेशः । 'इतोऽक्त्यर्थात्' (२।४।३२) ङी । पदवीं धावति = पादविकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ आक्रन्दिकः ]** आ कदुङ् (१००६)-'क्रदुङ् वैक्लव्ये' (१००७)क्रद् । 'उदितः स्वरा०' (४।४।९८) नोऽन्तः । आक्रन्दन्ति(न्ते) यत्र स देशः = आक्रन्दः । आक्रन्द्यते वा । आक्रन्द आर्त्तायनं ........ मयि० । आर्त्तैरय्यते आश्रीयते यत् ........ । 'भुजि-पत्यादिभ्यः कर्मा-ऽपादाने' (५।३।१२८) अनट्प्र० → अन । आर्त्तायनं शरणमुच्यते । आक्रन्दं धावति = आक्रन्दिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छा।

## पश्चात्यनुपदात् ॥ ६।४।४१ ॥

**[ पश्चाति ]** पश्चात् सप्तमी ङि ।

**[ अनुपदात् ]** अनुपद पञ्चमी ङसि ।

**[ आनुपदिकः ]** अनु पदस्य पश्चात् = अनुपदम् । अनुपदं धावति = आनुपदिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रत्यासत्त्या धावतीत्यर्थः । प्रत्यासन्नो भूत्वा धावति ।

**[ अनुपदं धावति ]** पदस्य समीपम् = अनुपदम् । अम् । 'धावूग् गति-शुद्ध्योः' (९२०) धाव् । वर्त्तमाना तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अत्र 'दैर्घ्येऽनुः' (३।१।३४) - 'समीपे' (३।१।३५) - 'प्रात्यव - परि०' (३।१।४७) इत्यादिना वा समासः ॥छ॥

## सुस्नातादिभ्यः पृच्छति ॥ ६।४।४२ ॥

**[ सुस्नातादिभ्यः ]** सुस्नात आदिर्येषां ते = सुस्नातादयः, तेभ्यः ।

**[ पृच्छति ]** पृच्छतीति पृच्छत्, तस्मिन् ।

**[ सौस्नातिकः ]** सु 'ष्णांक् शौचे' (१०६४) ष्णा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्ना । सुस्नाति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । सुस्नातं पृच्छति = सौस्नातिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ ।

**[ सौखरात्रिकः ]** सुखा चासौ रात्रिश्च = सुखरात्रिः । 'परतः स्त्री०' (३।२।४९) पुम्वत् । सुखरात्रिं पृच्छति = सौखरात्रिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ ।

**[ सौखशायनिकः ]** सुखं च तत् शयनं च = सुखशयनम् । सुखशयनं पृच्छति = सौखशायनिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । अनुशतिकाद्वा उभयपदवृद्धिः ।

**[ सौखशाय्यिकः ]** सुखशय्यां पृच्छति = सौखशाय्यिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । अनुशतिकाद्वा उभयपदवृद्धिः ॥छ॥

## प्रभूतादिभ्यो ब्रुवति ॥ ६।४।४३ ॥

**[ प्रभूतादिभ्यः ]** प्रभूत आदिर्येषां ते = प्रभूतादयः, तेभ्यः = प्रभूतादिभ्यः । पञ्चमी भ्यस् ।

**[ ब्रुवति ]** ब्रुवतीति ब्रुवत्, तस्मिन् ।

**[ प्राभूतिकः ]** प्रभूत । प्रभूतं ब्रूते = प्राभूतिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पार्याप्तिकः ]** पर्याप्तं-निषिद्धं ब्रूते = पार्याप्तिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैपुलिकः ]** विपुलं ब्रूते = वैपुलिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैचित्रिकः ]** विचित्रं ब्रूते = वैचित्रिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

---

卐 मध्यमवृत्तौ-सुखा चासौ रात्रिश्च = सुखरात्रः । 'संख्यातैक०' (७।३।११९) अत्समासान्तः । सुखरात्रं पृच्छति ।

**[ नैपुणिकः ]** निपुणं ब्रूते = नैपुणिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

क्रियाविशेषणादयमिष्यते, तेनेह न भवति – **प्रभूतमर्थं ब्रूते ।**

क्वचिदक्रियाविशेषणादपि–

**[ सौवर्गमनिकः ]** स्वर्गमन मण्ड्यते । स्वर्गमनं ब्रूते = सौवर्गमनिकः । अनेन इकण्प्र० → इक । 'लोकात्' (१।१।३) स् पाठउ विश्लेषियइ । 'द्वारादेः' (७।४।६) औ ।

**[ स्वागतिकः ]** स्वागत । स्वागतं ब्रूते = स्वागतिकः । वृद्धिः । औकारायने 'द्वारादेः' (७।४।६) इत्यस्य प्राप्तेः' 'न ञ-स्वङ्गादेः' (७।४।९) निषेधः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौवस्तिकः ]** स्वस्ति । स्वस्तीति ब्रूते = सौवस्तिकः । व्युत्पत्तिपक्षे 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) – अव्युत्पत्तौ तु 'द्वारादेः' (७।४।६) औत् । अनेन इकण्प्र० → इक । 'द्वारादेः (७।४।६) औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छ।।

## माशब्द इत्यादिभ्यः ॥ ६।४।४४ ॥

**[माशब्द इत्यादिभ्यः]** माशब्द इति आदिर्येषां ते = माशब्द इत्यादयः, तेभ्यः = माशब्द इत्यादिभ्यः । पञ्चमी भ्यस् ।

**[ माशब्दिकः ]** मा शब्द इति ब्रूते = माशब्दिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । माशब्दः क्रियतामिति ब्रूते इत्यर्थः ।

**[ कार्यशब्दिकः ]** कार्यः शब्द इति ब्रूते = कार्यशब्दिकः ।

**[ नैत्यशब्दिकः ]** नित्य(ः) शब्द इति ब्रूते = नैत्यशब्दिकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

वाक्यात् प्रत्ययविधानार्थं वचनम् ।।छ।।

## शाब्दिक-दार्दरिक-लालाटिक-कौक्कुटिकम् ॥ ६।४।४५ ॥

**[ शाब्दिकदार्दरिकलालाटिककौक्कुटिकम् ]** शाब्दिकश्च दार्दरिकश्च ल(ला)लाटिकश्च कौक्कुटिकश्च = शाब्दिक-दार्दरिकलालाटिककौक्कुटिकम् ।

**[शाब्दिकः]** शब्दं करोति = शाब्दिकः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यः कश्चिच्छब्दं करोति न स सर्वः शाब्दिकः ? किं तर्हि यः शब्दं जानाति वैयाकरणः स एवाविनष्टं शब्दमुच्चारयन् शाब्दिक उच्यते ।

**[ दार्दरिकः ]** दर्दर 'दॄश् विदारणे' (१५३५) दॄ । 卐दीर्यते लकुटादिना इति दर्दरः । 'ऋतष्टित्' (उणा० ९) अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । येन अप्र० तेनैव द्वित्वं च । घटं वादित्रं वा करोति = दार्दरिकः । अनेन इकण्प्र० → इक । वृद्धिः । दर्दरो घटो वादित्रं च, तत्र वादित्रं कुर्वन्ति(न्ते)वमुच्यते ।

**[ लालाटिकः ]** ललाटं पश्यति = लालाटिकं(कः) । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ललाटदर्शनेन दूरावस्थानं लक्ष्यते, तेन च कार्येष्वनुपस्थानम् । यः सेवको दृष्टं स्वामिनो ललाटमिति दूरतो याति न स्वामिकार्येषूपतिष्ठते स एवमुच्यते । ललाटमेव वा कोपप्रसादलक्षणाय यः पश्यति स लालाटिक उच्यते ।

---

卐 उणादौ– दीर्यते भिद्यतेऽनेन श्रोत्रमिति दर्दरः – वाद्यविशेषः पर्वतश्च ।

**[ कौक्कुटिकः ]** कुक्कुटी । कुक्कुटीं पश्यति = कौक्कुटिकः । अनेन इकण्प्र० → इक । वृद्धिः औ निपात्यते(न्ते) च इकण्प्रत्ययान्तानि अमूनि उदाहरणानि । कुक्कुटीशब्देन कुक्कुटीपातो लक्ष्यते, तेन च देशस्याल्पता ज्ञाप्यते । यो हि भिक्षुरविक्षिप्तदृष्टिः पादविक्षेपदेशे चक्षुः संयम्य पुरो युगमात्रदेशप्रेक्षी गच्छति स एवमुच्यते ।

१. यो वा तथाविधमात्मानमतथाविधोऽपि दर्शयति सोऽपि कौक्कुटिकः ।

२. दाम्भिकस्य चेष्टा वा मिथ्याशौचादिः कुक्कुटी, तामाचरन् कौक्कुटिकः ।

३. हृदयावयवो वा कुक्कुटी, तां पश्यति कौक्कुटिको भिक्षुः । निभृत इत्यर्थः ।

४. तदेतत्सर्वं निपातनाल्लभ्यते ।।छ।।

## **समूहार्थात् समवेते** ॥ ६।४।४६ ॥

**[ समूहार्थात् ]** समूहेऽर्थे ये सः = समूहार्थः, तस्मात् = समूहार्थात् । पञ्चमी ङसि ।

**[ समवेते ]** सम्-अव इंण्क् गतौ (१०७५) इ । समवैति स्म = समवेतस्तस्मिन् । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'अवर्णस्ये०' (१।२।६) ए ।

**[ सामूहिकः ]** समूह आत्मा-स्वभावो यस्यार्थस्य स तदात्मा, तस्य भावस्तादात्म्यम्, तस्मात् । तदैकदेशीभूतेऽस्य पर्यायोऽग्रे समूहैकदेशीभूते । सम् 'ऊहि वितर्के' (८७०) ऊह् । समूहनं = समूहः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । समूहं समवैति = सामूहिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सामाजिकः ]** समाजं समवैति = सामाजिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सांसदिकः ]** सम् 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) सद् । सम्यक् सीदन्ति जना अस्यामिति संसद् । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । संसदं समवैति = सांसदिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ ।

**[ सामवायिकः ]** समवायं समवैति = सामवायिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गौष्ठिकः ]** गोष्ठीं समवैति = गौष्ठिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

तदेकदेशीभावमनुभवन्नेवमुच्यते ।।छ।।

## **पर्षदो ण्यः** ॥ ६।४।४७ ॥

**[ पर्षदः ]** पर्षद् पञ्चमी ङसि ।

**[ ण्यः ]** ण्य प्रथमा सि ।

**[ पार्षद्यः ]** पर्षदं समवैति = पार्षद्यः । अनेन ण्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ ।

**[ पारिषद्यः ]** परिषदं समवैति = पारिषद्यः । अनेन ण्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ ।।छ।।

**सेनाया वा** ॥ ६।४।४८ ॥

**[ सेनायाः ]** सेना पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ सैन्यः, सैनिकः ]** सेनां समवैति = सैन्यः । अनेन ण्यप्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । पक्षे - सैनिकः । 'समूहार्थात् समवेते (६।३।४६) इकण्प्र० → इक ।

**[ सैन्यम् ]** सेनैव = सैन्यम् । स्वार्थे 'भेषजादिभ्यष्ट्यण्' (७।२।१६४) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ॥छ॥

**धर्मा-ऽधर्माच्चरति** ॥ ६।४।४९ ॥

**[ धर्माऽधर्मात् ]** धर्मश्च अधर्मश्च = धर्माऽधर्मम्, तस्मात् ।

**[ चरति ]** चरतीति चरत्, तस्मिन् ।

चरतिस्तात्पर्येणानुष्ठानि(ने) वर्त्तते ।

**[ धार्मिकः ]** धर्मं चरति = धार्मिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आधर्मिकः ]** अधर्मं चरति = आधर्मिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**षष्ठ्या धर्म्ये** ॥ ६।४।५० ॥

**[ षष्ठ्याः ]** षष्ठी पञ्चमी ङसि ।

**[ धर्म्ये ]** धर्म । धर्मादनपेतं = धर्म्यम् । 'हृद्य-पद्य-तुल्य-मूल्य-वश्य-पथ्य-वयस्य-धेनुष्या-गार्हपत्य-जन्य-धर्म्यम्' (७।१।११) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।, तस्मिन् ।

**धर्मो न्यायोऽनुवृत्त आचारस्तस्मादनपेतं = धर्म्यम् ।**

**[ शौल्कशालिकम् ]** शुल्कशालाया धर्म्यं = शौल्कशालिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ गौल्मिकम् ]** गुल्माः स्थानाधिकृताः केतक्यादयो वा । गलन्ति काष्ठप्रधानतां रुक्मेति गुल्माः केतक्यादयः, ते हि काष्ठैः सारा भवन्ति । गुल्मस्य-शुल्कस्थानस्य धर्म्यं = गौल्मिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ आतरिकम् ]** आ 'तॄ प्लवन-तरणयोः' (२७) तॄ । आ एत्य तरन्त्यस्मिन् = आतरम् । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । आतरस्य धर्म्यम् = आतरिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

**ऋन्नरादेरण्** ॥ ६।४।५१ ॥

**[ ऋन्नरादेः ]** ऋच्च नरादिश्च = ऋन्नरादिस्तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ नारम्, नारी ]** नृ । नुर्धर्म्यं = नारम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः आर् । सि-अम् । स्त्रियाम्-नारी । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ मात्रम् ]** मातृ । मातुर्धर्म्यं = मात्रम् । अनेन अण्प्र० → अ । 'इवर्णादेरस्वे०' (१।२।२१) र० । सि-अम् ।

**[ पैत्रम् ]** पितृ । पितुर्धर्म्यं = पैत्रम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'इवर्णादेरस्वे०' (१।२।२१) र० । सि-अम् ।

**[ शास्त्रम् ]** शास्तृ । शास्तुर्धर्म्यं = शास्त्रम् । अनेन अण्प्र० → अ । 'इवर्णादेरस्वे०' (१।२।२१) र० । सि-अम् ।

**[ वैकर्त्रम् ]** विकर्तुः-विकारापन्नस्य धर्म्यं = वैकर्त्रम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'इवर्णादेरस्वे०' (१।२।२१) र० । सि-अम् ।

**[ हौत्रम् ]** होतुर्धर्म्यं = हौत्रम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'इवर्णादेरस्वे०' (१।२।२१) र० । सि-अम् ।

**[ पौत्रम् ]** पोतुर्धर्म्यं = पौत्रम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'इवर्णादेरस्वे०' (१।२।२१) र० । सि-अम् ।

**[ औद्गात्रम् ]** उद्गातृ । उद्गातुर्धर्म्यम् = औद्गात्रम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'इवर्णादेरस्वे०' (१।२।२१) र० । सि-अम् ।

नरादि-**[ नारम्, स्त्रियां-नारी ]** नर । नरस्य धर्म्यं = नारम् । नरस्य धर्म्या वृत्तिः = नारी । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

नृशब्देनैव रूपद्वये सिद्धे नरशब्दादिकण् 'षष्ठ्या धर्म्ये' (६।४।५०) इत्यनेन मा भूदिति तद्ग्रहणम् ।

**[ माहिषम् ]** महिषी । महिष्या धर्म्यं = माहिषम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् ।

**[ होतृयजमानः ]** होतृ च यजमानश्च = होतृयजमानः ।।छ।।

## विभाजयितृ-विशसितुर्णीड्लुक् च ।। ६।४।५२ ।।

**[ विभाजयितृविशसितुः ]** विभाजयिता च विशसिता च = विभाजयितृविशसितृ, तस्मात् । 'ऋतो डुर्' (१।४।३७) ङसि० → डुर्० → उर्० ।

**[ णीड्लुक् ]** णिश्च इट् च । णीटो लुक् = णीड्लुक् । प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ वैभाजित्रम् ]** विपूर्व० 'भजण् विश्राणने' (१७३३) भज् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । विभाजयतीति विभाजयिता । 'णक-तृचौ' (५।१।४८) तृचप्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । विभाजयितुर्धर्म्यं = वैभाजित्रम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । अनेनैव णिच्लुग् । णिलुक्स्थानित्वात् 'ञ्णिति' (४।३।५०) वृद्धिः ।

**[ वैशस्त्रम् ]** 'शसू हिंसायाम्' (५४९) शस्, विपूर्व० । विशसति । 'णक-तृचौ' (५।१।४८) तृच्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । विशसितुर्धर्म्यं = वैशस्त्रम् । अनेन अण्प्र० → अ - इट्लुक् च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'इवर्णादेरस्वे०' (१।२।२१) र० ॥छा।

**अवक्रये** ॥ ६।४।५३ ॥

अवक्रीयते-स्वीक्रियते येनेच्छानियमे(मि)तेन द्रव्येण कियन्तमपि कालमापणादि सोऽवक्रयः ।

'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुज्यते इति भोगो गृहादिः । निर्विश्यतेऽनेन = निर्वेश उपभोगः । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए, तस्मिन् ।

**[ आपणिकः ]** आपणस्यावक्रयः = आपणिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ शौल्कशालिकः ]** शुल्कशालाया अवक्रयः = शौल्कशालिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आतरिकः ]** आ एत्य तरन्त्यस्मिन् = आतरः । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । 'नामिनो०' (४।३।१) गु० अर् । आतरस्यावक्रयः = आतरिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गौल्मिकः ]** गुल्मस्य-शुल्कस्थानस्यावक्रयः = गौल्मिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

लोकपीडया धर्मातिक्रमेणाप्यवक्रयो भवतीत्ययमवक्रयो धर्म्याद् भिद्यते ॥छा।

**तदस्य पण्यम्** ॥ ६।४।५४ ॥

**[ तद् ]** तद् पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ अस्य ]** अस्य सप्तमी ङि । सूत्रत्वाल्लुप् ।

**[ पण्यम् ]** पण्य प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[ आपूपिकः ]** 'अशश् भोजने' (१५५८) अश् । अश्यन्ते-भक्ष्यन्ते पर्वणि जनैरिति अपूपाः । 'अश ऊपः पश्च' (उणा० ३१२) ऊपप्र० → श० → पदेशश्च । अपूपाः पण्यमस्य = आपूपिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

पण्यार्थो वृत्तावन्तर्भूत इति पण्यशब्दस्याप्रयोगः ।

**[ शाष्कुलिकः ]** शष्कुल्यः पण्यमस्य = शाष्कुलिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मौदकिकः ]** मोदकाः पण्यमस्य = मौदकिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ लावणिकः ]** लवणं पण्यमस्य = लावणिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा।

**किशरादेरिकट्** ॥ ६।४।५५ ॥

**[ किशरादेः ]** किस(श)रं-किशरो वा आदिर्यस्य सः = किशरादिः, तस्मात् ।

**[ इकट् ]** इकट् प्रथमा सि ।

किशरादयो गन्ध**द्रव्यविशेषवचनाः** । गन्धद्रव्यविशेषं वचन्तीति । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । प्रथमा जस् ।

**[ किशरिकः, किशरिकी स्त्री ]** किम् कृ (१५२९)-मृ (१५३०)- 'शृश् हिंसायाम्' (१५३१) शृ । किमपि शृणाति = किशरः । 'मूलविभुजादयः' (५।१।१४४) निपात्यते । बाहुलकात् लिङ्गव्यवस्था । किस(श)रं किस(श)रो वा पण्यमस्य = किशरिकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ तगरिकः, तगरिकी स्त्री ]** तगरः पण्यमस्य सः = तगरिकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छा॥

**शलालुनो वा** ॥ ६।४।५६ ॥

**[ शलालुनः ]** शलालु पञ्चमी ङसि । 'अनाम्स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः ।

**[ वा ]** वा प्रथमा सि ।

**[ शलालुकः, शलालुकी, शालालुकी ]** शलालु(:) पण्यमस्य = शलालुकः । अनेन इकट्प्र० → इक । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । पक्षे 'तदस्य पण्यम्' (६।४।५४) इकण्प्र० → इक् । **'वृद्धिः स्वरेष्वादेञ्णिति०'** (७।४।१) वृद्धिः आ । **'ऋवर्णोवर्ण-दोसिसुस०'** (७।४।७१) इकस्य इलुक् । **'अणञेयेकण्०'** (२।४।२०) ङी । **'अस्य ङ्यां लुक्'** (२।४।८६) अलुक् ॥छा॥

**शिल्पम्** ॥ ६।४।५७ ॥

**[ शिल्पम् ]** शिल्प सि-अम् ।

तदस्येति वर्त्तते । **शिल्पं-कौशलं-विज्ञानप्रकर्षः** । अनेन शिल्पेन नृत्तेन अङ्गविन्यासादिक्रिया विशेषो लक्ष्यते ।

**[ नार्त्तिकः ]** नृत्तं शिल्पमस्य = नार्त्तिकः । अनेन इकण्प्र० → इक । 'वृद्धिः०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गैतिकः ]** गीतं शिल्पमस्य = गैतिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वादनिकः ]** वादनं शिल्पमस्य = वादनिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मार्दङ्गिकः ]** मृदिषु मर्दने ? 'मृदश् क्षोदे' (१५५०) मृद् । मृद्यते भो(भा)जनमत्र । 'विडि-विलि-कुरि-मृदि-पिशिभ्यः कित्' (उणा० १०१) किद् अङ्गप्र० । मृदङ्गो मृदङ्गवादनं शिल्पमस्य = मार्दङ्गिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पाणविकः ]** पणवः पणववादनं शिल्पमस्य = पाणविकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मौरजिकः ]** मुरजो मुरजवादनं शिल्पमस्य = मौरजिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वैणिकः ]** वीणावादनं शिल्पमस्य = वैणिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

उत्पादनार्थवृत्तिभ्यस्त्वनभिधानान्न भवति । ते के शब्दाः ? व्याकरणकरणादिशिल्पमस्य वैयाकरणिकादयोऽमी । अत एव कुम्भकारादावभिधेये मृदङ्गकरणादिभ्य एव प्रत्ययः, न तु मृदङ्गादिशब्देभ्यः । केषुचिद् ग्रामेषु मृन्मया मृदङ्गा भवन्ति, तेषां कुम्भकारादुत्पत्तिः ।

**[ मार्दङ्गकरणिकः ]** मृदङ्गकरणं शिल्पमस्य = मार्दङ्गकरणिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैणाकरणिकः ]** वीणाकरणं शिल्पमस्य = वैणाकरणिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

### मड्डुक-झर्झराद् वाऽण् ॥ ६।४।५८ ॥

**[ मड्डुकझर्झरात् ]** मड्डुकश्च झर्झरश्च = मड्डुकझर्झरम्, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ अण् ]** अण् प्रथमा सि ।

**[ माड्डुकः, माड्डुकिकः ]** मड्डुकवादनं शिल्पमस्य = माड्डुकः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-माड्डुकिकः । 'शिल्पम्' (६।४।५७) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ झार्झरः, झार्झरिकः ]** झर्झरवादनं शिल्पमस्य = झार्झरः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-झार्झरिक इत्यत्र 'शिल्पम्' (६।४।५७) इत्यनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

### शीलम् ॥ ६।४।५९ ॥

**[ शीलम् ]** शील सि-अम् ।

**शीलं प्राणिनां स्वभावः ।** फलनिरपेक्षा प्रवृत्तिरिति यावत् ।

**[ आपूपिकः ]** अपूप । अपूपभक्षणं शीलमस्य = आपूपिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शाष्कुलिकः ]** शष्कुली । शष्कुलीभक्षणं शीलमस्य = शाष्कुलिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ मौदकिकः ]** मोदक । मोदकभक्षणं शीलमस्य = मौदकिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ताम्बूलिकः ]** ताम्बूल । ताम्बूलभक्षणं शीलमस्य = ताम्बूलिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पारुषिकः ]** परुष । परुषवचनं शीलमस्य = पारुषिकः । निडरवचन इत्यर्थः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आक्रोशिकः ]** आक्रोशवचनं शीलमस्य = आक्रोशिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छ।।

**अङ्स्थाच्छत्रादेरञ्** ॥ ६।४।६० ॥

**[ अङ्स्थाच्छत्रादेः ]** 卐अङ्प्रत्ययान्तः स्था(:) = अङ्स्था(:) । स्फुटः कर्मधारयो वा । छत्रं आदिर्यस्य सः = छत्रादिः । अङ्स्थाश्च छत्रादिश्च = अङ्स्थाच्छत्रादि(:), तस्मात् ।

**[ अञ् ]** अञ् प्रथमा सि ।

**[ आस्थः ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) स्था । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (न्या०सं० वक्ष०(१)/सूत्र (२९) । स्था, आङ्पूर्व० । आस्थानम् = आस्था । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० । आस्था शीलमस्य आस्थः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छ।।

**[ सास्थः ]** स्था, सम्पूर्व० । संस्थानं = संस्था । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । संस्था शीलमस्य = सांस्थः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आवस्थः ]** स्था, अवपूर्व० । अवस्थानम् = अवस्था । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । अवस्था शीलमस्य = आवस्थः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सामस्थः ]** स्था, समपूर्व० । समस्थानं = समस्था । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । समस्था शीलमस्य = सामस्थः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वैयवस्थः ]** स्था, वि-अवपूर्व० । व्यवस्थानं = व्यवस्था । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । व्यवस्था शीलमस्य = वैयवस्थः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ नैष्ठः ]** निष्ठानं = निष्ठा । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० । निष्ठा शीलमस्य = नैष्ठः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

卐 हैमप्रकाशे - अङ् चासौ स्थाश्च ।

**[ वैष्ठः ]** विस्थानं(विष्ठानं) = विष्ठा । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० । विष्ठा शीलमस्य = वैष्ठः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आन्तस्थः ]** अन्त 'ष्ठां' गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या०सं० वक्ष०(१)/सूत्र(२९) । स्था । अविसर्गान्तो द्रष्टव्यः । अन्ते स्थानम् = अन्तस्था । 'भिदादयः' (५।३।१०८) अङ्प्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । अन्तस्था शीलमस्य = आन्तस्थः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ छात्रः ]** छत्र । छत्रं शीलमस्य = छात्रः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । छत्रशब्देन गुरुकार्येष्ववहितस्य शिष्यस्य छत्रक्रियातुल्या गुरुच्छिद्राच्छादना-ऽपायरक्षणादिका क्रियोच्यते । उपचारात् शिष्यो हि छत्रवद् गुरुच्छिद्रावरणादिप्रवृत्तश्छात्र इत्युच्यते । अभ्यासापेक्षाऽपि क्रिया शीलमित्युच्यते ।

**[ चौरः, चौरी ]** 'चुरण् स्तेये' (१५६८) चुर् । अनित्यो णिच् अत्र नागतः । चोरणं = चुरा । 'भिदादयः' (५।३।१०८) अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० । चुरा शीलोऽस्य (शीलमस्य) = चौरः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । स्त्रियाम्-'अणञेयेकण्०' (२।४।२०) ङी ।

**[ तापसः, तापसी ]** तपः शीलोऽस्य(शीलमस्य) = तापसः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । स्त्रियाम्-'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ कार्मः ]** कर्मन् मण्ड्यते । कर्म शीलोऽस्य(शीलमस्य) = कार्मः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ विश्वधा ]** विश्व 'डुधांग्क् धारणे च' (११३९) धा । विश्वं दधाति क्रिया । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । 'आत्' (२।४।१८) आप्प्र० ।

**[ पुरोडा ]** पुरस् 'अट गतौ' (१९४) अट् । पुरोऽटति = पुरोडा । 'अच्' (५।१।४९) अच्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० । क्रिया ।

**[ विशिका ]** विशिं कायति = विशिका । 'आतो डोऽह्वा०' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । 'आत्' (२।४।१८) आप्प्र० ।

**[ विशिखा ]** विशिखा प्रत्योली कथ्यते ।

**[ चुक्षा ]** चुक्षिः सौत्रो धातुः-निर्मलीकरणे । चुक्ष् । चुक्षणं = चुक्षा शौचम् । 'अच्' (५।१।४९) अच्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० ।

**[ चिक्षा ]** चिक्षिर्विज्ञाने-चिक्ष् । चिक्षणं = चिक्षा-शिक्षा उच्यते । 'अच्' (५।१।४९) अच्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० ॥छ॥

## तूष्णीकः ॥ ६।४।६१ ॥

**[ तूष्णीकः ]** तूष्णीक प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ तूष्णीकः ]** 'तूष तुष्टौ' (४९९) तूष् । तूषन्ति देवा अनेन-तूष्णीम् । 'तूषेरीम् णोऽन्तश्च' (उणा० ९४०) इम्प्र०-णोऽन्तश्च → ण् - ईपश्चात् । तूष्णींभावः शीलमस्य । अनेन कप्र० - म्लोपश्च निपात्यते । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**प्रहरणम्** ॥ ६।४।६२ ॥

**[ प्रहरणम् ]** प्रहरण सि-अम् ।

**[ आसिकः ]** असि । असिः प्रहरणमस्य = आसिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ प्रासिकः ]** प्र 'असूच् क्षेपणे' (१२२१) अस् । प्रास्यते = प्रासः । 'भावा-ऽकर्त्रोः (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्रासः प्रहरणमस्य = प्रासिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ चाक्रिकः ]** चक्रं प्रहरणमस्य = चाक्रिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मौष्टिकः ]** मुष्टिः प्रहरणमस्य = मौष्टिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मौद्गरिकः ]** मुद्गरः प्रहरणमस्य = मौद्गरिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मौसलिकः ]** मुसलः प्रहरणमस्य = मौसलिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ धानुष्कः ]** धनुस् । धनुः प्रहरणमस्य = धानुष्कः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'ऋवर्णोवर्ण०' (७।४।७१) इलुक् । 'सो रुः' (२।१।७२) स० → र० । 'नामिनस्तयोः षः' (२।३।८) षत्वम् ॥छ॥

**परश्वधाद्वाऽण्** ॥ ६।४।६३ ॥

**[ परश्वधात् ]** परश्वध पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ अण् ]** अण् प्रथमा सि ।

**[ पारश्वधः, पारश्वधिकः ]** पर कॄ (१५२९)-मॄ (१५३०)-'शॄश् हिंसायाम्' (१५३१) शॄ । परान् शृणातीति परश्वधः । 'परात् श्रो डित्' (उणा० २५५) वधप्र० डित् । 'डित्यन्त्यस्वरादेः' (२।१।११४) ॠलुक् । परश्वधः प्रहरणमस्य = पारश्वधः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-पारश्वधिकः । 'इकण्' (६।४।१) इत्यनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**शक्ति-यष्टेष्टीकण्** ॥ ६।४।६४ ॥

**[ शक्तियष्टेः ]** शक्तिश्च यष्टिश्च = शक्तियष्टि, तस्मात् ।

**[ टीकण् ]** टीकण् प्रथमा सि ।

**[ शाक्तीकः, शाक्तीकी ]** शक्तिः प्रहरणमस्य = शाक्तीकः ।अनेन टीकण्प्र० → ईक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्  (२।४।८६) अलुक् ।

**[ याष्टीकः, याष्टीकी ]** यष्टिः प्रहरणमस्य = याष्टीकः । अनेन टीकण्प्र० → ईक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्  (२।४।८६) अलुक् ।

**[ शाक्तिकः ]** शक्त्या जीवति = शाक्तिकः । 'वेतनादेर्जीवति' (६।४।१५) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा॥

## वेष्ट्यादिभ्यः ॥ ६।४।६५ ॥

**[ वा ]** वा प्रथमा सि ।

**[ इष्ट्यादिभ्यः ]** इष्टिरादिर्येषां ते = इष्ट्यादयः, तेभ्यः ।

**[ ऐष्टीकः, ऐष्टीकी, ऐष्टिकः ]** इष्टि । इष्टिः प्रहरणमस्य = ऐष्टीकः । अनेन टीकण्प्र० → ईक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'अणञेयेकण्०' (२।४।२०) ङी । पक्षे-ऐष्टिकः । 'प्रहरणम्' (६।४।६२) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

टकारो हि ङ्यर्थः, स तु इकण्द्वारादेः सिद्ध इत्यधिकारस्य टकारस्य एतदेव फलम् । यद् 'अवर्णेवर्णस्य' (७।४।६८) इति इलोपं बाधित्वा 'समानानां तेन दीर्घः' (१।२।१) इति दीर्घे टीकणि अकृतेऽपि शाक्तीकादयो भवन्ति, परमुत्तरत्र आम्भसीक इति सिद्ध्यर्थं टीकण्ग्रहणम् ।

**[ ऐषीकः, ऐषीकी, ऐषिकः ]** ईषा । ईषा प्रहरणमस्य = ऐषीकः । अनेन टीकण्प्र० → ईक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । पक्षे-ऐषिकः । 'प्रहरणम्' (६।४।६२) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ काम्पनीकः, काम्पनीकी, काम्पनिकः ]** 'कपुङ् चलने' (७५७) कप् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः-कम्प् । कम्पते = कम्पनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । कम्पनं प्रहरणमस्य = काम्पनीकः । अनेन टीकण्प्र० → ईक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । एवम्-काम्पनिकः । 'प्रहरणम्' (६।४।६२) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आम्भसीकः, आम्भसीकी, आम्भसिकः ]** अम्भस् । अम्भः प्रहरणोऽस्य(प्रहरणमस्य) = आम्भसीकः । अनेन टीकण्प्र० । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । एवम्-आम्भसिकः । 'प्रहरणम्' (६।४।६२) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ ।

**[ दाण्डीकः, दाण्डीकी, दाण्डिकः ]** दण्डः प्रहरणोऽस्य(प्रहरणमस्य) = दाण्डीकः । अनेन टीकण्प्र० → ईक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी । एवम्-दाण्डिकः । 'प्रहरणम्' (६।४।६२) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा॥

## नास्तिका-ऽऽस्तिक-दैष्टिकम् ॥ ६।४।६६ ॥

**[ नास्तिकाऽऽस्तिकदैष्टिकम् ]** नास्तिकश्च आस्तिकश्च दैष्टिकश्च = नास्तिकाऽऽस्तिकदैष्टिकम् ।

निपातनं रूढ्यर्थम् ।

**[ नास्तिकः ]** नास्ति परलोकः पुण्यं पापमिति वा मतिरस्य = नास्तिकः ।

**[ आस्तिकः ]** अस्ति परलोकः पुण्यं पापमिति वा मतिरस्य = आस्तिकः ।

**[ दैष्टिकः ]** दिष्टं - दैवं तत्प्रमाणमिति वा मतिरस्य । दिष्टा वा प्रमाणानुयायिनी मार्गानुयायिनी वा प्रमाणानुपातिनी मतिरस्य = दैष्टिकः । अनेन इकण्प्रत्ययान्ता निपात्यन्ते । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ॥छ॥

## वृत्तोऽपपाठोऽनुयोगे ॥ ६।४।६७ ॥

**[ वृत्तः ]** वृत्त प्रथमा सि ।

**[ अपपाठः ]** अपपाठ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अनुयोगे ]** अनुयोजनं अनुयुज्यत इति वा = अनुयोगस्तस्मिन् । **अनुयोगः परीक्षा ।**

**[ ऐकान्यिकः ]** एक-अन्य मण्ड्यते । एकमन्यत् अपपाठोऽनुयोगे वृत्तमस्य = ऐकान्यिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ द्वैयन्यिकः ]** द्वि-अन्य । द्वेऽन्येऽपपाठे(ठौ)ऽवनुयोगे वृत्तेऽस्मा(स्य) = द्वैयन्यिकः । अनेन इकण्प्र० → इक । 'लोकात्' (१।१।३) द्व् पाठउ, विश्लेषियइ । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ त्रैयन्यिकः ]** त्रि-अन्य । त्रीणि अन्यानि अपपाठा अनुयोगे वृत्तान्यस्य । अनेन इकण्प्र० → इक । 'लोकात्' (१।१।३) त्र् पाठउ विश्लेषयइ । 'य्वः पदान्तात्०' (७।४।५) ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ ऐकरूपिकः ]** एकं रूपमध्ययने वृत्तमस्य = ऐकरूपिकः । मतान्तरे अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## बहुस्वरपूर्वादिकः ॥ ६।४।६८ ॥

**[ बहुस्वरपूर्वात् ]** बहुस्वरं पूर्वपदं यस्य सः = बहुस्वरपूर्वपदस्तस्मात् । 'ते लुग्वा' (३।२।१०८) पदलोपः ।

**[ इकः ]** इक प्रथमा सि ।

**[ एकादशान्यिकः, एकादशान्यिका स्त्री ]** एकेनाधिका दश = एकादश । 'एकादश-षोडश-षोढन्०' (३।२।९१) एकादशन्निपातः । एकादशान्यपपाठरूपाण्यनुयोगेऽस्य वृत्तानि = एकादशान्यिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ द्वादशान्यिकः, द्वादशान्यिका स्त्री ]** द्वि-दशन् । द्वाभ्यामधिका दश = द्वादश । 'द्वि-त्र्यष्टानां द्वा-त्रयोऽष्टाः प्राक् शतादनशीति-बहुव्रीहौ' (३।२।९२) द्वि० → द्वा० निपातः । द्वादशान्यपपाठरूपाण्यनुयोगेऽस्य वृत्तानि = द्वादशान्यिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ त्रयोदशान्यिकः, त्रयोदशान्यिका स्त्री ]** त्रि-दशन् । त्रिभिरधिका दश = त्रयोदश । 'द्वि-त्र्यष्टानां द्वा०' (३।२।९२) त्रि० → त्रयो निपातः । त्रयोदशान्यपपाठरूपाण्यनुयोगेऽस्य वृत्तानि = त्रयोदशान्यिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ ऐकग्रन्थिकः ]** एको ग्रन्थो अध्ययने वृत्तोऽस्य = ऐकग्रन्थिकः । मतान्तरे अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णे०' (७।४।६८) अलुक् ।

**[ चतुर्दशान्यिकः, चतुर्दशान्यिका स्त्री ]** चतुर्भिरधिका दश । चतुर्दशान्यपपाठरूपाण्यनुयोगेऽस्य वृत्तानि = चतुर्दशान्यिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ द्वादशरूपिकः ]** द्वादशरूपाण्यध्ययने वृत्तान्यस्य = द्वादशरूपिकः । मतान्तरे अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि ॥छ॥

### भक्ष्यं हितमस्मै ॥ ६।४।६९ ॥

**[ भक्ष्यम् ]** भक्ष्य सि-अम् ।

**[ हितम् ]** हित सि-अम् ।

**[ अस्मै ]** अस्मै सप्तमी ङि । सूत्रत्वाल्लुप् ।

तदिति वर्त्तते ।

**[ आपूपिकः ]** अपूपा भक्ष्यं हितमस्मै = आपूपिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ शाष्कुलिकः ]** शष्कुली । शष्कुल्यो भक्ष्यं हितमस्मै = शाष्कुलिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मौदकिकः ]** मोदक । मोदका भक्ष्यं हितमस्मै = मौदकिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

हितार्थो भक्षणक्रिया च तद्धितवृत्तावेवान्तर्भवति ॥छ॥

### नियुक्तं दीयते ॥ ६।४।७० ॥

**[ नियुक्तम् ]** नियुक्त 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[ दीयते ]** दीयते सप्तमी ङि ।

तदिति अस्मै इति च वर्त्तते ।

**[ आग्रभोजनिकः ]** अग्रभोजन । अग्रे(ग्र)भोजनमस्मै नियुक्तं दीयते = आग्रभोजनिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मांसिकः ]** मांस । मांसमस्मै नियुक्तं दीयते = मांसिकः ।

**[ आपूपिकः ]** अपूपा अस्मै नियुक्तं दीयते = आपूपिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ग्रामिकः ]** ग्राममस्मै(ग्रामोऽस्मै) नियुक्तं दीयते = ग्रामिकः ।

**[ आग्रहारिकः ]** अग्रहारब्राह्मणादयो ग्रामः । अग्रहारमस्मै नियुक्तं दीयते = आग्रहारिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

यत्र प्रतिपन्नं दिने तत्र ददाति न व्यभिचरति, व्यभिचारस्य अयं पर्यायः । नित्यमिति कोऽर्थः ? नित्यब्राह्मणेभ्यो(यः) पञ्चभ्यो भोजनं दातव्यमिति नियमः ॥छ॥

**श्राणा-मांसौदनादिको वा** ॥ ६।४।७१ ॥

**[ श्राणामांसौदनात् ]** श्राणाश्च मांसौदनश्च = श्राणामांसौदनम्, तस्मात् ।

**[ इकः ]** इक प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ श्राणिकः पथ्याशी, श्राणिका, श्राणिकी ]** श्राणा । श्राणा-यवागूः नियुक्तमस्मै दीयते = श्राणिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० । इकेकणोः स्त्रियां विशेषः । यथा-श्राणिकी । अत्र 'इकण्' (६।४।१) इत्यनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ मांसौदनिकः, मांसौदनिका, मांसौदनिकी ]** मांसश्च ओदनश्च = मांसौदनः । मांसौदनो नियुक्तमस्मै दीयते = मांसौदनिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० । इकेकणोः स्त्रियां विशेषः । यथा-मांसौदनिकी । अत्र 'इकण्' (६।४।१) इत्यनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छ॥

**भक्तौदनाद्वाऽणिकट्** ॥ ६।४।७२ ॥

**[ भक्तौदनात् ]** भक्तं च ओदनं च = भक्तौदनम्, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ अणिकट् ]** अण् च इकट् च = अणिकट् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ भाक्तः, भाक्तिकः ]** भक्तमस्मै नियुक्तं दीयते = भाक्तः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-भाक्तिकः । 'इकण्' (६।४।१) इत्यनेन इकण्प्र० इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ओदनिकः, ओदनिकी, औदनिकः ]** ओदनमस्मै नियुक्तं दीयते = ओदनिकः । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी । एवम्-औदनिकः । 'इकण्' (६।४।१) इत्यनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**नवयज्ञादयोऽस्मिन् वर्त्तन्ते** ॥ ६।४।७३ ॥

**[ नवयज्ञादयः ]** नवयज्ञ आदिर्येषां ते-तेभ्यो वा । पञ्चमी भ्यस् । सूत्रत्वाल्लुप् ।

**[ अस्मिन् ]** अस्मिन् सप्तमी ङि । सूत्रत्वाल्लुप् ।

**[ वर्त्तन्ते ]** वर्त्तन्ते क्रिया प्रथमा सि । सूत्रत्वाल्लुप् ।

**[ नावयज्ञिकः ]** नवा यज्ञा(नवयज्ञाः) अस्मिन् वर्त्तन्ते = नावया(य)ज्ञिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पाकयज्ञिकः ]** पाकेन-हविर्विशेषेण साध्यो यज्ञः = पाकयज्ञः । यद्वा पाकप्रधाना यज्ञाः = पाकयज्ञाः । पाकयज्ञा अस्मिन् वर्त्तन्ते = पाकयज्ञिकः ।अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

### तत्र नियुक्ते ॥ ६।४।७४ ॥

**[ तत्र ]** तत्र पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ नियुक्ते ]** नियुक्त सप्तमी ङि ।

नियुक्तोऽधिकृतो व्यापारित इत्यर्थः । पूर्वकस्य नियुक्तमित्यस्य क्रियाविशेषणरूपस्याव्यभिचारो नित्यमिति चार्थः । एतत्सूत्रोपात्तः प्रत्ययार्थश्चायम् । **नियुक्तः पूर्वसूत्रोपात्तः, स तु प्रकृत्यर्थोपाधिः ।**

**[ शौल्कशालिकः ]** शुल्कशालायां नियुक्तः = शौल्कशालिकः ।

**[ आपणिकः ]** आपणे नियुक्तः = आपणिकः ।

**[ आतरिकः ]** आतरे नियुक्तः = आतरिकः ।

**[ दौवारिकः ]** द्वारे नियुक्तः = द्वौवारिकः । अनेन इकण्प्र० → इक । 'लोकात्' (१।१।३) द् पाठउ विश्लेषियइ । 'द्वारादेः' (७।४।६) औ ।

**[ आक्षपटलिकः ]** अक्षाणां-व्यवहाराणां पटलं-समूहः, तत्र नियुक्तः = आक्षपटलिकः । आखण्डलिउ इति यस्य प्रसिद्धिः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

### अगारान्तादिकः ॥ ६।४।७५ ॥

**[ अगारान्तात् ]** अगारो अन्ते यस्य सः = अगारान्तस्तस्मात् ।

**[ इकः ]** इक प्रथमा सि ।

**[ देवागारिकः, देवागारिका ]** देवस्यागारं = देवागारम्, तत्र नियुक्तः = देवागारिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ भाण्डागारिकः, भाण्डागारिका ]** भाण्डानां-पात्राणामगारं = भाण्डागारम्, तत्र नियुक्तः = भाण्डागारिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आयुधागारिकः, आयुधागारिका ]** आयुधानामगारमायुधागारम्, तत्र नियुक्तः = आयुधागारिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कोष्ठागारिकः, कोष्ठागारिका ]** कोष्ठागारे नियुक्तः = कोष्ठागारिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

### अदेश-कालादध्यायिनि ॥ ६।४।७६ ॥

**[ अदेशकालात् ]** देशश्च कालश्च = देशकालम् । न देशकालमदेशकालम्, तस्मात् ।

**[ अध्यायिनि ]** अध्यायिन् । अध्य(अ)धीयत इत्येवंशीलः = अध्यायी, तस्मिन् ।

अदेश- **[ आशुचिकः ]** अशुचि । अशुचावध्यायी = आशुचिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ श्माशानिकः ]** श्मशानेऽध्यायी = श्माशानिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ श्माशानाभ्यासिकः ]** श्मशानस्याभ्यासं निकटं-समीपं = श्मशानाभ्यासम्, तत्राध्यायी = श्माशानाभ्यासिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

अकाल-**[ सान्ध्यिकः ]** सन्ध्या । सन्ध्यायामध्यायी = सान्ध्यिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

卐**[ औल्कापातिकः ]** उल्कापातेऽध्यायी = औल्कापातिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आनध्यायिकः ]** न अध्यायः = अनध्यायः । अनध्यायेऽध्यायी = आनध्यायिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## निकटादिषु वसति ॥ ६।४।७७ ॥

**[ निकटादिषु ]** निकटमादिर्येषां ते = निकटादयः, तेषु = निकटादिषु । पञ्चमी भ्यस् । सूत्रत्वाल्लुप् ।

**[ वसति ]** वसतीति वसत्, तस्मिन् ।

**[ नैकटिकः ]** निकट । निकटे वसति = नैकटिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आरण्यिकः ]** अरण्ये भवः = आरण्यकः । 'अरण्यात् पथि-न्यायाऽध्यायेभ-नर-विहारे' (६।३।५१) अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आरण्यकेन भिक्षुणा ग्रामात् क्रोशे वस्तव्यमिति यस्य शास्तुरितः शास्त्र(त्रं) सञ्जातमस्य नियमस्यानियमस्य । 'तदस्य सञ्जातं तारकादिभ्य इतः (७।१।१३८) इतस्प्र० । शास्त्रितो वासः स एवोच्यते । एतदर्थ एव च तत्रेत्यधिकारे सप्तमी निर्देशः ।

**[ वार्क्षमूलिकः ]** वृक्षमूले वसति = वार्क्षमूलिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ श्माशानिकः ]** श्मशाने वसति = श्माशानिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आभ्यवकाशिकः ]** अभिगतोऽवकाशः = अभ्यवकाशः-मुत्कलप्रदेशः, तत्र वसति = आभ्यवकाशिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आवसथिकः ]** अवसथे वसति = आवसथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

---

卐 बृहद्वृत्तौ - औत्पातिकः ।

**सतीर्थ्यः** ॥६।४।७८ ॥

**[ सतीर्थ्यः ]** सतीर्थ्य प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सतीर्थ्यः ]** समानतीर्थे वसति । अनेन यप्र० - समानस्य च सभावः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । **तीर्थमिह गुरुरुच्यते** ॥छ॥

**प्रस्तार-संस्थान-तदन्त-कठिनान्तेभ्यो व्यवहरति** ॥ ६।४।७९ ॥

**[ प्रस्तारसंस्थानतदन्तकठिनान्तेभ्यः ]** प्र'स्तृगृश् आच्छादने' (१५२१) स्तृ । प्रस्तरणं = प्रस्तारः । 'अयज्ञे स्त्रः' (५।३।६८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । प्रस्तारश्च संस्थानश्च = प्रस्तारसंस्थानौ । ते अन्ते येषां ते = तदन्ताः । कठिनोऽन्ते येषां ते = कठिनान्ताः । प्रस्तारसंस्थानौ च तदन्ताश्च कठिनान्ताश्च = प्रस्तारसंस्थानतदन्तकठिनान्ताः, तेभ्यः ।

**[ व्यवहरति ]** व्यवहरतीति व्यवहरत्, तस्मिन् ।

**[ प्रास्तारिकः ]** प्रस्तारे व्यवहरति = प्रास्तारिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यथावस्थानं करोतीत्यर्थः ।

**[ सांस्थानिकः ]** संस्थाने व्यवहरति = सांस्थानिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कांस्यप्रस्तारिकः ]** कांस्यप्रस्तारे व्यवहरति = कांस्यप्रस्तारिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ लौहप्रस्तारिकः ]** लोहप्रस्तारे व्यवहरति = लौहप्रस्तारिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गौसंस्थानिकः ]** गवां संस्थानं = गोसंस्थानम् । गोसंस्थाने व्यवहरति = गौसंस्थानिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आश्वसंस्थानिकः ]** अश्वानां संस्थानमश्वसंस्थानम् । अश्वसंस्थाने व्यवहरति = आश्वसंस्थानिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

कठिनान्त-**[ वांशकठिनिकः ]** वंशकठिने व्यवहरति = वांशकठिनिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वार्ध्रकठिनिकः ]** वर्ध्रकठिने भवः(व्यवहरति) = वार्ध्रकठिनिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**संख्यादेश्चाऽऽर्हदलुचः** ॥ ६।४।८० ॥

**[ संख्यादेश्च ]** संख्या आदिर्यस्य सः = संख्यादिः, तस्मात् । च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ आर्हत् ]** 卐अर्हत आ = आर्हत् । तस्मात् । पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ अलुचः ]** न विद्यते लुप्(ग्) यस्याः सा = अलुक्, तस्याः ।

卐 श० म० न्या० - आ अर्हतः = आर्हत् ।

**[ चान्द्रायणिकः ]** चन्द्र 'अयि गतौ' (७९०) अय् । चन्द्रेण अय्यते-ज्ञायते = चन्द्रायणम् । अनट्प्र० → अन । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) णत्वम् । चान्द्रायणं चरति = चान्द्रायणिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्वैचन्द्रायणिकः ]** द्वे चन्द्रायणे चरति = द्वैचन्द्रायणिकः । अनेन इकण्प्र० → इक । वृद्धिः । आर्हदर्थानुवृत्त्या 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् न भवति ।

**[ पारायणिकः ]** पारायणमधीते = पारायणिकः । 'तुरायण-पारायणं यजमाना-ऽधीयाने' (६।४।९२) इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्वैपारायणिकः ]** द्वे पारायणे अधीते = द्वैपारायणिकः । 'तुरायण-पारायणं यजमाना-ऽधीयाने' (६।४।९२) इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ परमपारायणमधीते ]** परमं च तत् पारायणं च = परमपारायणम्, तमधीते ।

**[ महापारायणमधीते ]** महत्-पारायण । महच्च तत् पारायणं च = महापारायणः(णम्), तमधीते । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डा० → आ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अल्लुक् ।

**[ द्विसाहस्रः ]** द्वि-सहस्र । द्वे सहस्रे, द्वाभ्यामधिकं सहस्रं = द्विसहस्रम् । 'मयूरव्यंसकेत्यादयः' (३।१।११६) समासः । 'सहस्र-शतमानादण्' (६।४।१३६) । अण्प्र० । 'नवाऽणः' (६।४।१४२) वाऽण् लुप् । द्वयोः सहस्रं, द्वे सहस्रे यस्येति वा द्विसहस्रं वा अर्हति = द्विसाहस्रः । आर्हदर्थे अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्विशौर्पिकम् ]** द्वाभ्यां शूर्पाभ्यां क्रीतं = द्विशूर्पम् । 'शूर्पाद् वाऽञ्' (६।४।१३७) अञ्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) अञ्लुप् । द्विशूर्पेण क्रीतं = द्विशौर्पिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'मान-संवत्सरस्याशाण-कुलिजस्याऽनाम्नि' (७।४।१९) उत्तरपदवृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ त्रिशौर्पिकम् ]** त्रिभिः शूर्पैः क्रीतं = त्रिशूर्पम् । 'शूर्पाद् वाऽञ्' (६।४।१३७) अञ्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) अञ्लुप् । पुनरपि त्रिशूर्पेण क्रीतं = त्रिशौर्पिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'मान-संवत्सर०' (७।४।१९) उत्तरपदवृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । पुनरपि 'शूर्पाद् वाऽञ्' (६।४।१३७) इत्यञ् न भवति ॥छ॥

## गोदानादीनां ब्रह्मचर्ये ॥ ६।४।८१ ॥

**[ गोदानादीनाम् ]** गोदान(नं) आदिर्येषां ते = गोदानादयः तेषाम् ।

**[ ब्रह्मचर्ये ]** ब्रह्मचर्य सप्तमी ङि ।

**[ गौदानिकम् ]** गोदान । गोदानस्य ब्रह्मचर्यं = गौदानिकम् । यावद् गोदानं न करोमि तावद् ब्रह्मचर्यमित्यर्थः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आदित्यव्रतिकम् ]** आदित्यव्रतानां ब्रह्मचर्यं करोति = आदित्यव्रतिकम् ।

**[ माहानाम्निकम् ]** महानाम्न्यो नाम तं व्रतमपि महानाम्न्यः । महानाम्नीनां ब्रह्मचर्यं = माहानाम्निकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । 'तद्धिताऽककोपान्त्य-पूरण्याख्याः' (३।२।५४) इति द्वारेण पुंवन्निषेधः ॥छ॥

## चन्द्रायणं च चरति ॥ ६।४।८२ ॥

**[ चन्द्रायणम् ]** चन्द्रायणम् पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ च ]** च प्रथमा सि ।

**[ चरति ]** चरति सप्तमी ङि । सूत्रत्वाल्लुप् ।

**[ चान्द्रायणिकः ]** चन्द्र इवाचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । चन्द्रायते = चन्द्रायणम् । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । 'अतः' (४।३।८२) अलोपः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । चन्द्रायणं चरति = चान्द्रायणिकः । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गौदानिकः ]** गोदानं चरति = गौदानिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आदित्यव्रतिकः ]** आदित्यव्रतं चरति = आदित्यव्रतिकः । आदित्यव्रतसंज्ञा ऋचः, तासामध्ययनं ब्रह्मचर्यं, तेन अधीयते इत्यर्थः ।

**[ माहानाम्निकः ]** महत् नाम यस्याम् । 'नाम्नि' (२।४।१२) ङी । 'अनो वा' (२।४।११) ङी । 'ई-ङौ वा' (२।१।१०९) अलुक् । महानाम्न्यो नाम ऋचस्तत्साहचर्यात्तासां व्रतमपि महानाम्न्यः । महानाम्नीव्रतं चरति = माहानाम्निकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । 'तद्धिताऽककोपान्त्य०' (३।२।५४) इत्यादिद्वारेण पुंवन्निषेधः ॥छा॥

## देवव्रतादीन् डिन् ॥ ६।४।८३ ॥

**[ देवव्रतादीन् ]** देवानां व्रतं = देवव्रतम् । देवव्रतमादिर्येषां ते = देवव्रतादयः, तान् ।

**[ डिन् ]** डिन् प्रथमा सि ।

**[ देवव्रती ]** देवव्रतं चरति = देवव्रती । अनेन डिन्प्र० → इन् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ तिलव्रती ]** तिलव्रतं चरति = तिलव्रती । अनेन डिन्प्र० → इन् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ अवान्तरदीक्षी ]** अवगतमन्तरं यस्या दीक्षायाः सा = अवान्तरदीक्षा, तां चरति = अवान्तरदीक्षी । अनेन डिन्प्र० → इन् । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ महाव्रती ]** महच्च तद् व्रतं च = महाव्रतम् । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डा० → आ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अल्लुक् । महाव्रतं चरति = महाव्रती । अनेन डिन्प्र० → इन् । 'डित्यन्त्य०' (२।१।११४) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ॥छा॥

## डकश्चाष्टाचत्वारिंशतं वर्षाणाम् ॥ ६।४।८४ ॥

**[ डकश्च ]** डक प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ अष्टाचत्वारिंशतम् ]** अष्टाचत्वारिंशतम् । पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ वर्षाणाम् ]** वर्षा षष्ठी आम । 'ह्रस्वाऽऽपश्च' (१।४।३२) आम्० → नाम्० ।

**[ अष्टाचत्वारिंशकः, अष्टाचत्वारिंशी ]** अष्टौ च चत्वारिंशश्च(च्च) = अष्टाचत्वारिंशत् । 'चत्वारिंशदादौ वा' (३।२।९३) अष्टन्शब्दस्य अष्टादेशः । प्रतिवेदं द्वादशवर्षब्रह्मचर्यक्रियाविधिः । अष्टाचत्वारिंशद्वर्षसहितं व्रतमष्टाचत्वारिंशत्, तच्चरति । अनेन डकप्र० → अक-डिन्प्र० → इन् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।।छ।।

## चातुर्मास्यं तौ यलुक् च ॥ ६।४।८५ ॥

**[ चातुर्मास्यम् ]** चातुर्मास्य द्वितीया अम् । 'अतः स्यमोऽम् (१।४।५७) अम् ।

**[ तौ ]** तद् । औ । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[ यलुक् ]** यस्य लुक् = यलुक् । प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ चातुर्मासकः, चातुर्मासी ]** चतुर्मास । चतुर्षु मासेषु भवानि = चातुर्मास्यानि । 'यज्ञे ञ्यः' (६।३।१३४) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । चातुर्मास्यानि नाम यज्ञाः तत्सहचरितानि व्रतानि = चातुर्मास्यानि, तानि चरति = चातुर्मासकः, चातुर्मासी । अनेन डकप्र० → अक - डिन्प्र० → इन् - यलोपश्च । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।।छ।।

## क्रोश-योजनपूर्वाच्छताद् योजनाच्चाऽभिगमार्हे ॥ ६।४।८६ ॥

**[ क्रोशयोजनपूर्वात् ]** क्रोशश्च योजनं च = क्रोशयोजने । क्रोशयोजने पूर्वे यस्य सः = क्रोशयोजनपूर्वस्तस्मात् ।

**[ शतात् ]** शत पञ्चमी ङसि ।

**[ योजनात् ]** योजन पञ्चमी ङसि ।

**[ च ]** च प्रथमा सि ।

**[ अभिगमार्हे ]** अभिगम 'अर्ह पूजायाम्' (५६४) अर्ह् । अभिगममर्हति = अभिगमार्हस्तस्मिन् । 'अर्होऽच्' (५।१।९१) अच्प्र० → अ ।

**[ क्रौशशतिको मुनिः ]** क्रोशशत । क्रोशशतादभिगमनमर्हति = क्रौशशतिको मुनिः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ यौजनशतिको मुनिः ]** योजनशत । योजनशतादभिगमनमर्हति = यौजनशतिको मुनिः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छ।।

**[ यौजनिकः साधुः ]** योजन । योजनादभिगमनमर्हति = यौजनिकः साधुः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## तद् यात्येभ्यः ॥ ६।४।८७ ॥

**[ तद् ]** तद् अम् । 'अनतो लुप्' (१।४।५९) अम्लुप् ।

**[ याति ]** याति-गच्छतीति यान्, तस्मिन् । याति सप्तमी ङि । सूत्रत्वात् वा ।

**[ एभ्यः ]** इदम् पञ्चमी भ्यस् । 'अनक्' (२।१।३६) अ० । 'एद् बहुस्भोसि' (१।४।४) ए ।

**[ क्रौशशतिकः ]** क्रोशशतं याति = क्रौशशतिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ यौजनशतिकः ]** योजनशतं याति = यौजनशतिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ यौजनिको दूतः ]** योजनं याति = यौजनिको दूतः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## पथ इकट् ॥ ६।४।८८ ॥

**[ पथः ]** पथिन् पञ्चमी ङसि । 'इन् ङी-स्वरे लुक्' (१।४।७९) इन्लुक् ।

**[ इकट् ]** इकट् प्रथमा सि ।

**[ पथिकः, पथिकी स्त्री ]** पथिन् । पन्थानं याति = पथिकः । अनेन इकट्प्र० → इक । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ द्विपथिकः, द्विपथिकी स्त्री ]** द्वौ पन्थानौ याति = द्विपथिकः । अनेन इकट्प्र० → इक । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी ।

कटमकृत्वा इकड्वचनं परत्वात् 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) इत्यादिना अत्समासान्ते कृतेऽपि यथास्यादित्येवमर्थः ॥छ॥

## नित्यं णः पन्थश्च ॥ ६।४।८९ ॥

**[ नित्यम् ]** नित्य 'क्रियाविशेषणात्' (२।२।४१) अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ णः ]** ण प्रथमा सि ।

**[ पन्थश्च ]** पन्थ प्रथमा सि । च प्रथमा सि ।

**[ पान्थः, पान्था स्त्री ]** पथिन् । पन्थानं नित्यं याति = पान्थः । अनेन णप्र० → अ-पन्थादेशश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ।

**[ द्वैपन्थः, द्वैपन्था स्त्री ]** द्वौ पन्थानौ नित्यं याति । अनेन णप्र० → अ-पन्थादेशश्च । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पथिकः ]** पन्थानं याति = पथिकः । 'पथ इकट्' (६।४।८८) इकट्प्र० → इक । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**शङ्कूत्तर-कान्तारा-ऽज-वारि-स्थल-जङ्गलादेस्तेनाऽऽहृते च** ॥ ६।४।९० ॥

**[ शङ्कूत्तरकान्ताराऽजवारिस्थलजङ्गलादेः ]** शङ्कुश्च उत्तरश्च कान्तारश्च अजश्च वारिश्च(वारि च) स्थलश्च जङ्गलश्च = शङ्कूत्तरकान्ताराऽजवारिस्थलजङ्गलाः । शङ्कूत्तरकान्ताराऽजवारिस्थलजङ्गला आदयो यस्य सः = शङ्कूत्तरकान्ताराऽजवारिस्थलजङ्गलादिः, तस्मात् ।

**[ तेन ]** तेन पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ आहृते ]** आहृत सप्तमी ङि ।

**[ च ]** च प्रथमा सि ।

**[ शाङ्कुपथिकः ]** शङ्कूनां पन्थाः = शङ्कुपथः । यद्वा शङ्कुप्रधानः पन्थाः = शङ्कुपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । शङ्कुपथेन आहृतो याति वा = शाङ्कुपथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ औत्तरपथिकः ]** उत्तरस्य देशस्य पन्थाः = उत्तरपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । उत्तरपथेन आहृतो याति वा = औत्तरपथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कान्तारपथिकः ]** कान्तारस्य पन्थाः = कान्तारपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । कान्तारपथेन आहृतो याति वा = कान्तारपथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आजपथिकः ]** अजस्य पन्थाः = अजपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) इन्लुक् । अजपथेन आहृतो याति वा = आजपथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वारिपथिकः ]** वारिणः पन्थाः = वारिपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) इन्लुक् । वारिपथेन आहृतो याति वा = वारिपथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ स्थालपथिकः ]** 卐स्थलस्य पन्थाः = स्थलपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) इन्लुक् । स्थलपथेन आहृतो याति वा = स्थालपथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ जाङ्गलपथिकः ]** जङ्गलश्चासौ पन्थाश्च = जङ्गलपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) इन्लुक् । जङ्लपथेन आहृतो याति वा = जाङ्गलपथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः

卐 मध्यमवृत्तौ – स्थलं चासौ पन्थाश्च ।

स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । जाङ्गलो निर्जलप्रदेश उच्यते ॥छा॥

## स्थलादेर्मधुक-मरिचेऽण् ॥ ६।४।९१ ॥

**[ स्थलादेः ]** स्थल(स्थलं) आदिर्यस्य सः = स्थलादिः, तस्मात् ।

**[ मधुकमरिचे ]** मधुकश्च(कं च) मरिचश्च(चं च) = मधुकमरिचम्, तस्मिन् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ स्थालपथम् ]** स्थलस्य पन्थाः = स्थलपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) इन्लुक् । स्थलपथेन आहृतं मधुकं मरिचं वा = स्थालपथम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ स्थालपथिकमन्यत् ]** स्थलपथेन आहृतो याति वा = स्थालपथिकः । 'शङ्कूत्तर-कान्तारा-ऽज-वारि-स्थल-जङ्गलादेस्तेनाऽऽहृते च' (६।४।९०) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । अन्यत् ॥छा॥

## तुरायण-पारायणं यजमाना-ऽधीयाने ॥ ६।४।९२ ॥

**[ तुरायणपारायणम् ]** तुरायणश्च(णं च) पारायणश्च(णं च) = तुरायणपारायणम् । पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ यजमानाऽधीयाने ]** यजमानश्च अधीयानश्च = यजमानाऽधीयानम्, तस्मिन् ।

**[ तौरायणिकः ]** तुर 'अयि गतौ' (७९०) अय् । तुरैरय्यते स्वर्गोऽनेन = तुरायणः । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) णत्वम् । तुरायणं नाम यज्ञस्तं यजते = तौरायणिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पारायणिकः ]** पारोऽय्यतेऽनेन = पारायणः । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) न० → ण० । पारायणमधीते = पारायणिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा॥

## संशयं प्राप्ते ज्ञेये ॥ ६।४।९३ ॥

**[ संशयम् ]** संशयं पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ प्राप्ते ]** प्राप्नोति स्म = प्राप्तः, तस्मिन् ।

**[ ज्ञेये ]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । ज्ञायते = ज्ञेयः । 'य एच्चातः' (५।१।२८) यप्र० - ज्ञा० → ज्ञे०, तस्मिन् ।

**[ सांशयिकोऽयमूर्ध्वो न जाने स्थाणुरुत पुरुष इति ]** संशयं प्राप्तः = सांशयिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सांशयिकोऽयमूर्ध्वो न जाने स्थाणुरुत पुरुष इति ।

**[ सांशयिकश्चैत्रो न जाने जीवति उत मृत इति ]** संशयं प्राप्तः = सांशयिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सांशयिकश्चैत्रो न जाने जीवति उत मृत इति ॥छ॥

## तस्मै योगादेः शक्ते ॥ ६।४।९४ ॥

**[ तस्मै ]** तस्मै पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ योगादेः ]** योग आदिर्यस्य सः = योगादिः, तस्मात् ।

**[ शक्ते ]** शक्त सप्तमी ङि ।

**[ यौगिकः ]** योगाय शक्तः = यौगिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सान्तापिकः ]** सन्तापाय शक्तः = सान्तापिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## योग-कर्मभ्यां योकञौ ॥ ६।४।९५ ॥

**[ योगकर्मभ्याम् ]** योगश्च कर्मा च = तौ, ताभ्याम् ।

**[ योकञौ ]** यश्च उकञ् च = योकञौ ।

**[ योग्यः ]** योगाय शक्तः = योग्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कार्मुकम् ]** कर्मन् । कर्मणे शक्तं = कार्मुकम् । अनेन उकञ्प्र० → उक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य' (७।४।६१) अन्लुक् । सि-अम् ॥छ॥

## यज्ञानां दक्षिणायाम् ॥ ६।४।९६ ॥

**[ यज्ञानाम् ]** यज्ञानाम् पञ्चमी भ्यस् । सूत्रत्वाल्लुप् ।

**[ दक्षिणायाम् ]** दक्षिणा सप्तमी ङि ।

**यज्ञकर्मकृतां वेतनादानं दक्षिणा ।**

**[ आग्निष्टोमिकी ]** अग्निष्टोमस्य दक्षिणा = आग्निष्टोमिकी । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ वाजपेयिकी ]** वाजपेय मण्ड्यते । वाजपेयस्य दक्षिणा = वाजपेयिकी ।

**[ राजसूयिकी ]** राजसूयस्य दक्षिणा = राजसूयिकी ।

**[ नावयज्ञिकी ]** नवानां यज्ञानां दक्षिणा = नावयज्ञिकी । तद्धितविषये समासः ।

**[ पाञ्चौदनिकी ]** पञ्च ओदना यत्र तत् । पञ्चौदनस्य दक्षिणा = पाञ्चौदनिकी । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ ऐकादशाहिकी ]** एकेनाधिका दश = एकादश । 'एकादश-षोडश-षोडन्०' (३।२।९१) एकादश निपात्यते । एकादशानामह्नां समाहारः । 'द्विगोरन्नह्नोऽट्' (७।३।९९) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । एकादशाहेन निर्वृत्त्यो यज्ञोऽप्युचारात् = एकादशाहः । एकादशाहस्य दक्षिणा = ऐकादशाहिकी । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ द्वादशाहिकी ]** द्वाभ्यामधिका दश = द्वादश । द्वादशानामह्नां समाहारः । द्विगोरन्नह्नोऽट्' (७।३।९९) अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । द्वादशाहस्य दक्षिणा = द्वादशाहिकी । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ द्वैवाजपेयिकी ]** द्वयोर्वाजपेययोर्दक्षिणा = द्वैवाजपेयिकी । तद्धितविषये द्विगुः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छ॥

## तेषु देये ॥ ६।४।९७ ॥

**[ तेषु ]** तेषु पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ देये ]** देय सप्तमी ङि ।

**[ आग्निष्टोमिकम् ]** अग्निष्टोमे देयम् = आग्निष्टोमिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ वाजपेयिकं भक्तम् ]** वाजपेये देयं = वाजपेयिकं भक्तम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## काले कार्ये च भववत् ॥ ६।४।९८ ॥

**[ काले ]** काले पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ कार्ये ]** कार्य सप्तमी ङि ।

**[ च ]** च प्रथमा सि ।

**[ भववत् ]** भवे इव = भववत् । 'तत्र' (७।१।५३) वत्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ वार्षिकम् ]** वर्षा । वर्षासु भवं = वार्षिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ मासिकम् ]** मासे भवं = मासिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शारदिकं श्राद्धं कर्म ]** शरद् । शरदि भवं = शारदिकं श्राद्धं कर्म । 'शरदः श्राद्धे कर्मणि' (६।३।८१) इकण्प्र० → इक । वृद्धिः ।

**[ शारदिकः, शारदो वा रोग आतपो वा ]** शरदि भवः = शारदिकः । 'नवा रोगा-ऽऽतपे' (६।३।८२) इकण्प्र० → इक । वृद्धिः । शरदि भवः = शारदः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । रोग आतपो वा ।

**[ नैशम्, नैशिकम् ]** निशायां भवं = नैशिकम् । 'निशा-प्रदोषात्' (६।३।८३) इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ प्रादोषम्, प्रादोषिकम् ]** प्रदोषे भवं = प्रादोषिकम्, प्रादोषम् । 'निशा-प्रदोषात्' (६।३।८३) इकण्प्र० → इक । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शौवस्तिकम् ]** श्वस् मण्ड्यते । श्वो भवं = शौवस्तिकम् । 'श्वसस्तादिः' (६।३।८४) तादि इकण्प्र० → इक । 'लोकात्' (१।१।३) श् पाठउ विश्लेषियइ । 'द्वारादेः' (७।४।६) औ ।

**[ चिरत्नम् ]** चिरे भवं = चिरत्नम् । 'चिर-परुत्-परारेस्त्नः' (६।३।८५) त्नप्र० ।

**[ परुत्नम् ]** परुत् । परुद्भवं = परुत्नम् । 'चिर-परुत्-परारेस्त्नः' (६।३।८५) त्नप्र० ।

**[ पुराणम् ]** पुरा भवं = पुराणम् । 'पुरो नः' (६।३।८६) नप्र० । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ पूर्वाह्णेतनम् ]** पूर्वमहनः = पूर्वाह्णः । 'सर्वांऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः-अह्नदेशश्च । सप्तमी ङि । पूर्वाह्णे भवं = पूर्वाह्णेतनम् । 'सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात्' (६।३।८८) तनट्प्र० → तन ।

**[ सायंतनम् ]** सायं भवं = सायंतनम् । 'सायं-चिरं-प्राह्णे०' (६।३।८८) तनट्प्र० → तन ।

**[ चिरंतनम् ]** चिरे भवं = चिरंतनम् । 'सायं-चिरं-प्राह्णे०' (६।३।८८) तनट्प्र० → तन । अत एव निर्देशाद् मान्तत्वं निपात्यते । म् आनीयते इत्यर्थः ।

**[ पौषम् ]** पुष्य । पुष्येण चन्द्रयुक्तेन युक्तः कालोऽपि = पुष्यः । 'चन्द्रयुक्तात्०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण्लुप् । पुष्ये भवं = पौषम् । 'भर्तु-सन्ध्या०' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ शैशिरम् ]** शिशिरे भवं = शैशिरम् । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ सान्ध्यम् ]** सन्ध्यायां भवं = सान्ध्यम् । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ सांवत्सरं फलं पर्व वा ]** संवत्सरे भवं = सांवत्सरं फलं पर्व वा । 'संवत्सरात् फल-पर्वणोः' (६।३।९०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ हैमन्तम्, हैमनम् ]** हेमन्त । हेमन्ते भवं = हैमन्तम् । 'हेमन्ताद् वा तलुक् च' (६।३।९१) अण्प्र० → अ - विकल्पेन तलुक् च । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रावृषेण्यम् ]** प्रावृष् । प्रावृषि भवं = प्रावृषेण्यम् । 'प्रावृष एण्यः' (६।३।९२) एण्यप्र० । सि-अम् ।

**[ वार्षिकम् ]** वर्षासु देयं कार्यं वा = वार्षिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ मासिकम् ]** मासे देयं कार्यं वा = मासिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्वैमासिकम् ]** द्वयोर्मासयोर्देयं कार्यं वा = द्वैमासिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ त्रैमासिकम् ]** त्रिषु मासेषु देयं कार्यं वा = त्रैमासिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

### व्युष्टादिष्वण् ॥ ६।४।९९ ॥

**[ व्युष्टादिषु ]** व्युष्टादि सप्तमी सुप् । पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ वैयुष्टम् ]** व्युष्टे प्रभाते देयं कार्यं वा = वैयुष्टम् । अनेन अण्प्र० → अ । 'लोकात्' (१।१।३) व् पाठउ विश्लेषियइ । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ नैत्यम् ]** नित्ये देयं कार्यं वा = नैत्यम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

व्युष्टसाहचर्यान्नित्यशब्दः कालवाची गृह्यते । 'उषू दाहे' (५२९) उष्, विपूर्व० । व्युष्यते स्माऽस्मिन्निति व्युष्टम् । 'अद्यर्थाच्चाऽऽधारे' (५।१।१२) क्तप्र० → त । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[ नैत्यम् ]** नित्ये विषुवति षड्भिश्चराचरैर्मुहूर्त्तैरनाक्रम्यमाणे देयं कार्यं वा = नैत्यम् । मतान्तरेऽनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

विषुर्नाम मुहूर्त्तः, सोऽस्यास्ति = विषुवत् । समरात्रिंदिवः कालः । पुं-नपुंसकः । यद्वैजयन्ती-पुरीतत् महिमा हेम, विषुवत् कर्म लोम दोः । नृषण्ढलिङ्गाः । अमी लिङ्गाः ॥छ॥

### यथाकथाचाणणः ॥ ६।४।१०० ॥

**[ यथाकथाचात् ]** यथाकथाच पञ्चमी ङसि । अव्ययात् ।

**[ णः ]** ण प्रथमा सि ।

यथाकथाचशब्दोऽव्ययसमुदायोऽनादरेणेत्यर्थे वर्त्तते ।

**[ याथाकथाचम्, याथाकथाचा दक्षिणा ]** यथाकथाच दीयते = याथाकथाचम् । अनेन णप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० । दक्षिणा ॥छ॥

### तेन हस्ताद् यः ॥ ६।४।१०१ ॥

**[ तेन ]** तेन पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ हस्तात् ]** हस्त पञ्चमी ङसि ।

**[ यः ]** य प्रथमा सि ।

**[ हस्त्यम् ]** हस्तेन देयं कार्यं वा = हस्त्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## शोभमाने ॥ ६।४।१०२ ॥

**[ शोभमाने ]** शोभमान सप्तमी ङि ।

**[ कार्णवेष्टकिकं मुखम् ]** कर्णौ वेष्टेते । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । कर्णवेष्टावेव = कर्णवेष्टकौ । 'शेषाद् वा' (७।३।१७५) कच्प्र० → क । अथवा-वेष्टेते । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । कर्णयोर्वेष्टकौ = कर्णवेष्टकौ । कर्णवेष्टकाभ्यां शोभते = कार्णवेष्टकिकं मुखम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ वास्त्रयुगिकं शरीरम् ]** वस्त्रयुगेन शोभते = वास्त्रयुगिकं शरीरम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ औपानहिकौ पादौ ]** उप 'णहींच् बन्धने' (१२८५) णह् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नह् । उपनह्यत इति उपानहौ । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'गति-कारकस्य नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनौ क्वौ' (३।२।८५) दीर्घः उपस्य । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । उपानद्भ्यां शोभते = औपानहिकौ पादौ । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । औ ।

**[ अकार्णवेष्टकिकम् ]** कर्णवेष्टकाभ्यां न शोभते = अकार्णवेष्टकिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'नञत्' (३।२।१२५) न० → अ० । सि-अम् । कर्णवेष्टकशब्देन नञोऽसंबद्धत्वात् नञोऽकारस्य न वृद्धिः । एवमग्रेतनेऽपि ।

**[ अवास्त्रयुगिकम् ]** वस्त्रयुगेन न शोभते = अवास्त्रयुगिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'नञत्' (३।२।१२५) न० → अ० । सि-अम् ॥छ॥

## कर्म-वेषाद् यः ॥ ६।४।१०३ ॥

**[ कर्मवेषात् ]** कर्म च वेषश्च = कर्मवेषम्, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

**[ कर्मण्यं शौर्यम् ]** कर्मन् । कर्मणा शोभते = कर्मण्यम् । अनेन यप्र० । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् । शूरस्य भावः कर्म वा = शौर्यम् । 'पति-राजान्त-गुणाङ्ग-राजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ वेष्यो नटः ]** वेषेण शोभते = वेष्यो नटः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अकर्मण्यः ]** कर्मणा न शोभते = अकर्मण्यः । अनेन यप्र० । 'नञत्' (३।२।१२५) न० → अ० ।

**[ अवेष्यः ]** वेषेण न शोभते = अवेष्यः । अनेन यप्र० । 'नञत्' (३।२।१२५) न० → अ० ।

**[ वेश्या नर्तकी ]** वेशेन शोभते = वेश्या । मतान्तरे अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० ॥छ॥

## कालात् परिजय्य-लभ्य-कार्य-सुकरे ॥ ६।४।१०४ ॥

**[ कालात् ]** काल पञ्चमी ङसि ।

**[ परिजय्यलभ्यकार्यसुकरे ]** परिजय्यश्च लभ्यश्च कार्यश्च सुकरश्च = परिजय्यलभ्यकार्यसुकरम्, तस्मिन् ।

**[ मासिको व्याधिः ]** परि 'जिं अभिभवे' (८) जि । परितो जेतुं शक्यं = परिजय्यम् । 卐'शक्तार्हे कृत्याश्च' (५।४।३५) यप्र० । 'क्षय्य-जय्यौ शक्तौ' (४।३।९०) परिजय्य निपातः । सि-अम् । मास । मासेन परिजय्यः = मासिको व्याधिः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आर्द्धमासिकः ]** अर्द्धमासेन परिजय्यः = आर्द्धमासिकः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सांवत्सरिकः ]** संवत्सरेण परिजय्यः = सांवत्सरिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मासिकः पटः ]** मासेन लभ्यः = मासिकः पटः । अनेन इकण्प्र० → इक । वृद्धिः ।

**[ मासिकं चान्द्रायणम् ]** मासेन कार्यं = मासिकं चान्द्रायणम् । अनेन इकण्प्र० → इक । वृद्धिः । चन्द्रायणस्येदं = चान्द्रायणम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मासिकः प्रासादः ]** अकृच्छ्रेण-अकष्टेन क्रियते यत् तत् = सुकरम् । 'दुः-स्वीषतः कृच्छ्रा०' (५।३।१३९) खल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । सि-अम् । मासेन सुकरः = मासिकः प्रासादः । अनेन इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

### निर्वृत्ते ॥ ६।४।१०५ ॥

**[ निर्वृत्ते ]** निर्वृत्त सप्तमी ङि ।

तेनेति कालादिति च वर्त्तते ।

**[ आह्निकम् ]** अहन् । अह्ना निर्वृत्तम् = आह्निकम् । अनेन इकण्प्र० → इक । 'अनीना-ऽदट्यह्नोऽतः' (७।४।६६) अलुक् । वृद्धिः ।

**[ मासिकम् ]** मासेन निर्वृत्तं = मासिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आर्द्धमासिकम् ]** अर्द्धमासेन निर्वृत्तम् = आर्द्धमासिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सांवत्सरिकम् ]** संवत्सरेण निर्वृत्तं = सांवत्सरिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

### तं भावि-भूते ॥ ६।४।१०६ ॥

**[ तम् ]** तम् पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ भाविभूते ]** भावी च भूतश्च = भाविभूतम्, तस्मिन् ।

कालादित्यनुवर्त्तते । **स्वसत्तया व्याप्स्यमानः कालो येन भाविना उत्सवेन स व्याप्स्यमानः कालो भावी । स्वसत्तया व्याप्तकालो भूत उच्यते ।**

**[ मासिक उत्सवः ]** मासं भावी = मासिक उत्सवः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मासिको व्याधिः ]** मासं भूतः = मासिको व्याधिः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । वाक्ये 'काला-ऽध्वनोर्व्याप्तौ' (२।२।४२) द्वितीया ॥छ॥

---

卐 मध्यमवृत्तौ - 'य एच्चातः' (५।१।२८) यप्र० ।

## तस्मै भृता-ऽधीष्टे च ॥ ६।४।१०७ ॥

**[ तस्मै ]** तस्मै पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ भृताऽधीष्टे ]** भृतश्च अधीष्टश्च = भृताऽधीष्टम्, तस्मिन् ।

**[ च ]** च प्रथमा सि ।

**भृतः - वेतनेन क्रीतः । अधीष्टः सत्कृत्य-पूजयित्वा व्यापारितः ।**

**[ मासिकः कर्मकरः ]** मासाय भृतः = मासिकः कर्मकरः । 'भृतौ कर्मणः' (५।१।१०४) टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । मासं कर्मणे भृत इत्यर्थः ।

**[ मासिक उपाध्यायः ]** मासाय अधीष्टः = मासिक उपाध्यायः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 卐मासमध्यापनाय अधीष्ट इत्यर्थः ।

**[ वार्षिकः ]** वर्षायाधीष्टः = वार्षिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सांवत्सरिकः ]** संवच्छरायाधीष्टः = सांवच्छरिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

चकारस्तेन 'निर्वृत्ते' (६।४।१०५)- 'तं भावि-भूते' (६।४।१०६) - 'तस्मै भृता-ऽधीष्टे च' (६।४।१०७) इति सूत्रत्रयस्याप्युत्तरत्रानुवृत्त्यर्थः ॥छ॥

## षण्मासादवयसि ण्येकौ ॥ ६।४।१०८ ॥

**[ षण्मासात् ]** षण्मास पञ्चमी ङसि ।

**[ अवयसि ]** 'वेंग् तन्तुसन्ताने' (९९२) वे । वयते = वयः । 'अस्' (उणा० ९५२) अस्प्र० । 'एदैतोऽयाय्' (१।२।२३) अय् । न वयः = अवयस्तस्मिन् ।

**[ ण्येकौ ]** ण्यश्च इकश्च = ण्येकौ ।

**[ षाण्मास्यः, षण्मासिकः ]** षष्-मास । षड्भिर्मासैर्निर्वृत्तः । षण्मासान् भावी भूतो वा । षड्भ्यो मासेभ्यो भृतोऽधीष्टो वा = षाण्मास्यः-षण्मासिकः । अनेन ण्यप्र० → य - इकप्र० । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'तृतीयस्य पञ्चमे'(१।३।१) ड० → ण० ।

**[ षण्मास्यः ]** षण्मासान् भृतः = षण्मास्यः । 'षण्मासाद् य-यणिकण्' (६।४।११५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## समाया ईनः ॥ ६।४।१०९ ॥

**[ समायाः ]** समा पञ्चमी ङसि ।

**[ ईनः ]** ईन प्रथमा सि ।

**[ समीनः ]** समा । समया निर्वृत्तः । समां भूतो भावी वा । समायै भृतोऽधीष्टो वा = समीनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

---

卐 हैमप्रकाशे - मासमध्ययनाय......।

## राव्यहः-संवत्सराच्च द्विगोर्वा ॥ ६।४।११० ॥

**[ राव्यहःसंवत्सरात् ]** रात्रिश्च अहश्च संवच्छरश्च (संवत्सरश्च) = रात्र्यहःसंवच्छरम्(संवत्सरम्), तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ द्विगोर्वा ]** द्विगु पञ्चमी ङसि । वा प्रथमा सि ।

**[ द्विरात्रीणः ]** द्वाभ्यां रात्रिभ्यां निर्वृत्तः । द्वे रात्री भूतो भावी वा । द्वाभ्यां रात्रिभ्यां भृतोऽधीष्टो वा = द्विरात्रीणः ।

**[त्रिरात्रीणः]** तिसृभी रात्रिभिर्निर्वृत्तः । तिस्रौ रात्री भूतो भावी वा । तिसृभ्यः रात्रिभ्यो भृतोऽधीष्टो वा = त्रिरात्रीणः ।

**[ द्व्यहीनः ]** द्वाभ्यामहोभ्यां निर्वृत्तः । द्वेऽह्नी भूतो भावी वा । द्वाभ्यामहोभ्यां भृतोऽधीष्टो वा = द्व्यहीनः ।

**[ द्विसंवत्सरीणः ]** द्वाभ्यां संवत्सराभ्यां निर्वृत्तः । द्वे संवत्सरे भूतो भावी वा । द्वाभ्यां संवत्सराभ्यां भृतोऽधीष्टो वा = द्विसंवच्छरीणः ।

**[ द्विसमीनः ]** द्वाभ्यां समाभ्यां निर्वृत्तः । द्वे समे भूतो भावी वा । द्वाभ्यां समाभ्यां भृतोऽधीष्टो वा = द्विसमीनः । अनेन सर्वत्र ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । रात्र्यन्तादहरन्ताच्च परमपि समासान्तं बाधित्वा अनवकाशत्वादीन अट् अभावे अह्नादेशोऽपि न भवति ।

**[ द्वैरात्रिकः ]** द्वाभ्यां रात्रिभ्यां निर्वृत्तः । द्वे रात्री भूतो भावी वा । द्वाभ्यां रात्रिभ्यां भृतोऽधीष्टो वा = द्विरात्रः । 'संख्यातैक-पुण्य-वर्षा-दीर्घाच्च रात्रेरत्' (७।३।११९) इत्यादिना अत्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) इलोपे सति [तेन] 'निर्वृत्ते' (६।४।१०५) इत्यादिसूत्रैः इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्वैयह्निकः ]** द्वाभ्यामहोभ्यां निर्वृत्तः । द्वेऽह्नी भूतो भावी वा । द्वाभ्यामहोभ्यां भृतोऽधीष्टो वा = द्वैयहः । 'सर्वांऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः-अह्नादेशश्च । [तेन] 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । लोकात् द्व् पाठउ विश्लेषियइ । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्वैयहिकः ]** द्वयोरह्नोः समाहारः । 'द्विगोरन्नह्नोऽट्' (७।३।९९) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् । द्व्यहेन निर्वृत्तः । द्व्यहं भूतो भावी वा । द्व्यहाभ्यां भृतोऽधीष्टो वा = द्वैयहिकः । [तेन] 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्विसांवत्सरिकः ]** द्वाभ्यां संवत्सराभ्यां निर्वृत्तः । द्वौ संवत्सरौ भूतो भावी वा । द्वाभ्यां संवत्सराभ्यां भृतोऽधीष्टो वा = द्विसांवत्सरिकः । [तेन] 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । 'मान-संवत्सरस्या०' (७।४।१९) इत्यादिना उत्तरपदवृद्धिः ।

**[ द्वैसमिकः ]** द्वाभ्यां समाभ्यां निर्वृत्तः । द्वे समे भूतो भावी वा । द्वाभ्यां समाभ्यां भृतोऽधीष्टो वा = द्वैसमिकः । [तेन] 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

समान्तात् पूर्वेण नित्ये प्राप्ते शेषेभ्योऽप्राप्ते विकल्पः ॥छ॥

## वर्षादश्च वा ॥ ६।४।१११ ॥

**[ वर्षात् ]** वर्ष पञ्चमी ङसि ।

**[ अश्च ]** अ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ द्विवर्षः, द्विवर्षीणः, द्विवार्षिकः ]** द्वाभ्यां वर्षाभ्यां निर्वृत्तः । द्वौ वर्षौ द्वे वर्षे वा भूतो भावी वा । द्वाभ्यां वर्षाभ्यां भृतोऽधीष्टो वा = द्विवर्षः-द्विवर्षीणः । अनेन अ-ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । एवम्- द्विवार्षिकः । [तेन] 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । 'संख्या-ऽधिकाभ्यां वर्षस्याऽभाविनि' (७।४।१८) इत्यनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ त्रिवर्षः, त्रिवर्षीणः, त्रिवार्षिकः ]** त्रिभिर्वर्षैर्निर्वृत्तः । त्रयो वर्षा (त्रीन् वर्षान्) तिस्रो वर्षा वा भूतो भावी वा । त्रिभिः(त्रिभ्यः) वर्षैः(वर्षेभ्यः) भृतोऽधीष्टो वा = त्रिवर्षः-त्रिवर्षीणः । अनेन अ-ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । एवम्-त्रिवार्षिकः । [तेन] 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । 'संख्या-ऽधिकाभ्यां ०' (७।४।१८) इत्यनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

भाविनि तु उत्तरपदवृद्धिर्निषेधात्-

**[ द्वैवर्षिकः ]** द्वौ वर्षौ भावी = द्वैवर्षिकः । 'तं भावि-भूते' (६।४।१०६) इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छ।।

## प्राणिनि भूते ॥ ६।४।११२ ॥

**[ प्राणिनि ]** प्राणिन् सप्तमी ङि ।

**[ भूते ]** भूत पञ्चमी ङसि ।

**[ द्विवर्षो दारकः ]** द्वे वर्षे भूतः प्राप्तः = द्विवर्षः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'दॄश् विदारणे' (१५३५) दॄ । दृणाति-विदारयति शोकं जनकादीनामिति दारकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ त्रिवर्षो वत्सः ]** त्रीणि वर्षाणि भूतः प्राप्तः = त्रिवर्षः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वत्सः ।

**[ द्विवर्षः, द्विवर्षीणः, द्विवार्षिकः सरकः ]** द्वौ वर्षौ, द्वे वर्षे वा भूतः प्राप्तः = द्विवर्षः, द्विवर्षीणः । 'वर्षादश्च वा' (६।४।१११) अ-ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । एवम्-द्विवार्षिकः । 'निर्वृत्ते' (६।४।१०५) 'तं भावि-भूते' (६।४।१०६) इकण्प्र० → इक । 'संख्या-ऽधिकाभ्यां वर्षस्याऽभाविनि' (७।४।१८) उत्तरपदवृद्धिः ।

**[ द्विवर्षः, द्विवर्षीणः, द्विवार्षिको मनुष्यः ]** द्वे वर्षे भावी । द्वाभ्यां वर्षाभ्यां भृतोऽधीष्टो वा = द्विवर्षः । 'वर्षादश्च वा' (६।४।१११) अ-ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । एवम्-द्विवार्षिकः । [तेन] 'निर्वृत्ते' (६।४।१०५) इत्यादिसूत्रैः इकण्प्र० → इक । 'संख्या-ऽधिकाभ्यां ०' (७।४।१८) उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । मनुष्यः ।।छ।।

## मासाद् वयसि यः ॥ ६।४।११३ ॥

**[ मासात् ]** मास पञ्चमी ङसि ।

**[ वयसि ]** वयस् सप्तमी ङि ।

**[ यः ]** य प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ द्विमास्यो दारकः ]** द्वौ मासौ भूतः = द्विमास्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । दारकः ।

**[ त्रिमास्यो दारकः ]** त्रीन् मासान् भूतः-प्राप्तः = त्रिमास्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । दारकः ।

**[ द्वैमासिको व्याधिः ]** द्वौ मासौ भावी । 'तं भावि-भूते' (६।४।१०६) इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ द्वैमासिको युवा ]** द्वौ मासौ भावी = द्वैमासिको युवा । 'तं भावि-भूते' (६।४।१०६) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । युवन् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ॥छा॥

## ईनञ् च ॥ ६।४।११४ ॥

**[ ईनञ् ]** ईनञ् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

द्विगोरिति निवृत्तम् ।

**[ मासीनः, मास्यो दारकः ]** मासं भूतः = मासीनः, मास्यः । अनेन ईनञ् → ईन-यश्च प्रत्ययः । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दारकः ।

**ञकारो वृद्धिहेतुत्वेन पुंवद्भावाभावार्थः ।**

**[ मासीनास्वसृकः ]** मासीना स्वसा यस्य सः = मासीनास्वसृकः । 'ऋन्नित्यदितः' (७।३।१७१) कच्प्र० → क ।

**[ मासिको नायकः ]** मासेन निर्वृत्तः = मासिकः । [तेन] 'निर्वृत्ते' (६।४।१०५) इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । नायकः ॥छा॥

## षण्मासाद् य-यणिकण् ॥ ६।४।११५ ॥

**[ षण्मासात् ]** षण्मास पञ्चमी ङसि ।

**[ ययणिकण् ]** यश्च यण् च इकण् च = ययणिकण् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ षण्मास्यः, षाण्मास्यः, षाण्मासिकः ]** षण्मासान् भूतः = षण्मास्यः, षाण्मास्यः, षाण्मासिकः । अनेन य-यण् → य- इकण् → इकप्र० । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ षाण्मास्यः, षण्मासिको नायकः ]** षण्मासान् भावी भूतो वा । 'षण्मासादवयसि ण्येकौ' (६।४।१०८) ण्यप्र० → य-इकश्च प्रत्ययः । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । नायकः ॥छा॥

## सोऽस्य ब्रह्मचर्य-तद्वतोः ॥ ६।४।११६ ॥

**[ सोऽस्य ]** तद् प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'तः सौ सः' (२।१।४२) त० → स० क्रियते । 'सो रुः' (२।१।७२) स० → र० । अथवा सो मण्ड्यते । पञ्चमी ङसि । सूत्रत्वाल्लोपः । अस्य सप्तमी ङि । सूत्रत्वाल्लोपः ।

**[ ब्रह्मचर्यतद्वतोः ]** तद् विद्यते यस्य = तद्वान् । ब्रह्मचर्यं च तद्वांश्च = ब्रह्मचर्यतद्वन्तौ, तयोः = ब्रह्मचर्यतद्वतोः । सप्तमी ओस् ।

**[ मासिकं ब्रह्मचर्यम् ]** मासोऽस्य ब्रह्मचर्यस्य = मासिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । ब्रह्मचर्यम् ।

**[ आर्द्धमासिकम् ]** अर्द्धमासोऽस्य ब्रह्मचर्यस्य = आर्द्धमासिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सांवत्सरिकम् ]** संवत्सरो जातोऽस्य ब्रह्मचर्यस्य = सांवत्सरिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मासिको ब्रह्मचारी ]** मासोऽस्य ब्रह्मचारिणः = मासिको ब्रह्मचारी । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मासं ब्रह्मचर्यमित्यर्थः ।

**[ आर्द्धमासिकः ]** अर्द्धमासोऽस्य ब्रह्मचारिणः = आर्द्धमासिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सांवत्सरिकः ]** संवत्सरोऽस्य ब्रह्मचारिणः = सांवत्सरिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## प्रयोजनम् ॥ ६।४।११७ ॥

**[ प्रयोजनम् ]** प्र 'युजूंपी योगे' (१४७६) युज् । प्रयुङ्क्ते प्रयोजयति वा = प्रयोजनम् । रम्यादित्वात् अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । सि-अम् ।

सोऽस्येति वर्त्तते । प्रयोजनम्, प्रयोजकम्, प्रवर्त्तकम्, जनकं तुर्यनाम्नः ।

**[ जैनमहिकम् ]** जिनमह मण्ड्यते । जिनमहः प्रयोजनमस्य तत् = जैनमहिकं देवागमनम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ ऐन्द्रमहिकम् ]** इन्द्रमहः प्रयोजनमस्य तत् = ऐन्द्रमहिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ आभिषेचनिकम् ]** अभिषेचनं प्रयोजनमस्य तत् = आभिषेचनिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ दैपोत्सविकम् ]** दीपप्रधान उत्सवः = दीपोत्सवः । दीपोत्सवः प्रयोजनमस्य तत् = दैपोत्सविकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## एकागाराच्चौरे ॥ ६।४।११८ ॥

**[ एकागारात् ]** एकं च तद् अगारं च = एकागारम्, तस्मात् ।

**[ चौरे ]** चौर सप्तमी ङि ।

**[ ऐकागारिकश्चौरः, ऐकागारिकी ]** एकमसहायमगारं प्रयोजनमस्य = ऐकागारिकः, ऐकागारिकी चौर्य-कर्त्री । 'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (न्या०सं०वक्ष०(१)/सूत्र(१६)) इति अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

चौरे नियमार्थं वचनम् ॥छ॥

## चूडादिभ्योऽण् ॥ ६।४।११९ ॥

**[ चूडादिभ्यः ]** चूडा आदिर्येषां ते = चूडादयः, तेभ्यः ।

**[ अण् ]** अण् प्रथमा सि ।

**[ चौडम् ]** चूडा प्रयोजनमस्य = चौडम्-मुण्डनम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ चौलम् ]** चूला प्रयोजनमस्य = चौलम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ औपनयनम् ]** उपनयनं प्रयोजनमस्य = औपनयनम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्राद्धम् ]** श्रद्धा, प्रयोजनमस्य = श्राद्धम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ॥छ॥

## विशाखा-ऽऽषाढान्मन्थ-दण्डे ॥ ६।४।१२० ॥

**[ विशाखाऽऽषाढात् ]** विशाखा च आषाढा च = विशाखाऽऽषाढम्, तस्मात् । 'क्लीबे' (२।४।९७) ह्रस्वत्वम् ।

**[ मन्थदण्डे ]** मन्थश्च दण्डश्च = मन्थदण्डम्, तस्मिन् ।

**मन्थो विलोडनं दण्डो वा । "व्रतिनामाषाढो दण्ड" इत्युच्यते ।**

**[ वैशाखो मन्थः ]** विशाखा प्रयोजनमस्य = वैशाखो मन्थः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ आषाढो दण्डः ]** आषाढा आषाढे आषाढाः प्रयोजनमस्य = आषाढो दण्डः । अनेन अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## उत्थापनादेरीयः ॥ ६।४।१२१ ॥

**[ उत्थापनादेः ]** उत्थापन(नं) आदिर्यस्य सः = उत्थापनादिः, तस्मात् ।

**[ ईयः ]** ईय प्रथमा सि ।

**[ उत्थापनीयः ]** उत् 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या०सं०वक्ष०(१)/सूत्र(२९)) स्था । उत्तिष्ठन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली०' (४।२।१) पोऽन्तः । 'उदः स्था-स्तम्भः सः' (१।३।४४) सलुक् । उत्थाप्यते = उत्थापनम् । अनट्प्र० → अन ।

'णेरनिटि' (४।३।८३) णिग्लुक् । उत्थापनं प्रयोजनमस्य = उत्थापनीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छ।।

## विशि-रुहि-पदि-पूरि-समापेरनात् सपूर्वपदात् ।। ६।४।१२२ ।।

**[ विशिरुहिपदिपूरिसमापेः ]** विशिश्च रुहिश्च पदिश्च पूरिश्च समापिश्च = विशिरुहिपदिपूरिसमापि, तस्मात् ।

**[ अनात् ]** अन पञ्चमी ङसि ।

**[ सपूर्वपदात् ]** सह पूर्वपदेन वर्त्तत इति सपूर्वपदस्तस्मात् । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सह० → सभावः ।

**[ गृहप्रवेशनीयम् ]** गृह प्र 'विशंत् प्रवेशने' (१४१५) विश् । प्रविश्यते = प्रवेशनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । गृहस्य गृहे वा प्रवेशनं प्रयोजनमस्य तत् = गृहप्रवेशनीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ संवेशनीयम् ]** संवेशनं दानं-प्रयोजनमस्य = संवेशनीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अनुवेशनीयम् ]** अनु-पश्चात् वेशनं-गमनं प्रयोजनमस्य = अनुवेशनीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अनुप्रवेशनीयम् ]** अनुप्रवेशनं प्रयोजनमस्य = अनुप्रवेशनीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ समावेशनीयम् ]** समावेशनं प्रयोजनमस्य = समावेशनीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ प्रासादारोहणीयम् ]** प्रासाद 'रुहं जन्मनि' (९८८) रुह्, आङ्पूर्व० । प्रासादे आरुह्यते = प्रासादारोहणम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रासादारोहणं प्रयोजनमस्य = प्रासादारोहणीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ आरोहणीयम् ]** आरोहणं प्रयोजनमस्य = आरोहणीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ प्ररोहणीयम् ]** प्ररोहणं प्रयोजनमस्य = प्ररोहणीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अनुरोहणीयम् ]** अनुरोहणं प्रयोजनमस्य = अनुरोहणीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अन्वारोहणीयम् ]** अन्वारोहणं प्रयोजनमस्य = अन्वारोहणीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम्।

**[ अश्वप्रपदनीयम् ]** 'पदिंच् गतौ' (१२५७) पद्, प्रपूर्व० । प्रपद्यते = प्रपदनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । अश्वानां प्रपदनं = अश्वप्रपदनम् । अश्वप्रपदनं प्रयोजनमस्य = अश्वप्रपदनीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम्।

**[ गोप्रपदनीयम् ]** गवां प्रपदनं = गोप्रपदनम् । गोप्रपदनं प्रयोजनमस्य = गोप्रपदनीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ प्रपापूरणीयम् ]** पूरी(रैं)चि आप्यायने' (१२६८) पूर् । पूर्यते = पूरणम् । अनट्प्र० → अन । प्रपायाः पूरणं प्रयोजनमस्य = प्रपापूरणीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ महापूरणीयम् ]** महच्च तत् पूरणं च = महापूरणम् । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डा० → आ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अल्लुक् । महापूरणं प्रयोजनमस्य = महापूरणीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम्।

**[ अङ्गसमापनीयम् ]** सम् 'आप्लृंट् व्याप्तौ' (१३०७) आप् । समाप्यते = समापनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । अङ्गस्य समापनं प्रयोजनमस्य = अङ्गसमापनीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम्।

**[श्रुतस्कन्धसमापनीयम्]** श्रुतस्य स्कन्धः = श्रुतस्कन्धः । श्रुतस्कन्धस्य समापनं प्रयोजनमस्य = श्रुतस्कन्धसमापनीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम्।

**[ व्याकरणसमापनीयम् ]** व्याकरणस्य समापनं प्रयोजनमस्य = व्याकरणसमापनीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम्।।छ।।

**स्वर्ग-स्वस्तिवाचनादिभ्यो य-लुपौ** ॥ ६।४।१२३ ॥

**[स्वर्गस्वस्तिवाचनादिभ्यः]** 卐स्वर्गश्च स्वस्तिवाचनादिश्च = स्वर्गस्वस्तिवाचनादयस्तेभ्यः = स्वर्गस्वस्तिवाचनादिभ्यः । पञ्चमी भ्यस्।

**[ यलुपौ ]** यश्च लुप् य = यलुपौ ।

**[ स्वर्ग्यम् ]** स्वर्गः प्रयोजनमस्य = स्वर्ग्यः(स्वर्ग्यम्) । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ यशस्यम् ]** यशः प्रयोजनमस्य = यशस्यम् । अनेन यप्र० ।

**[ आयुष्यम् ]** आयुस् मण्ड्यते । आयुः प्रयोजनमस्य = आयुष्यम् । अनेन यप्र० । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम्।

**[ काम्यम् ]** कामं प्रयोजनमस्य = काम्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ धन्यम् ]** धनं प्रयोजनमस्य = धन्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ स्वस्तिवाचनम् ]** स्वस्तिवाचनं प्रयोजनमस्य = स्वस्तिवाचनम् । 'प्रयोजनम्' (६।४।११७) इकण्प्र० । अनेन लुप् । सि-अम् ।

**[ शान्तिवाचनम् ]** शान्तिवाचनं प्रयोजनमस्य = शान्तिवाचनम् । 'प्रयोजनम्' (६।४।११७) इकण्प्र० । अनेन लुप् । सि-अम् ।

---

卐 श०म० न्या०-स्वर्गश्च स्वस्तिवाचनं च चेति इतरेतरयोगद्वन्द्वस्यादिशब्देन बहुव्रीहिः ।
मध्यमवृतौ-स्वर्गश्च स्वस्तिवाचनं च, ते आदी यस्य गणस्य, तेभ्यः ।

**[ पुण्याहवाचनम् ]** पुण्य-अहन् । पुण्यं च तद् अहश्च = पुण्याहम् । 'अह्नः' (७।३।११६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । पुण्याहस्य वाचनं प्रयोजनमस्य = पुण्याहवाचनम् । 'प्रयोजनम्' (६।४।११७) इकण्प्र० । अनेन लुप् । सि-अम् ।।छ।।

## समयात् प्राप्तः ।। ६।४।१२४ ।।

**[ समयात् ]** समय पञ्चमी ङसि ।

**[ प्राप्तः ]** प्राप्त प्रथमा सि ।

सोऽस्येत्यनुवर्त्तते ।

**[ सामयिकं कार्यम् ]** समयः प्राप्तोऽस्य = सामयिकं कार्यम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । उपनतकालमित्यर्थः ।।छ।।

## ऋत्वादिभ्योऽण् ।। ६।४।१२५ ।।

**[ ऋत्वादिभ्यः ]** ऋतुरादिर्येषां ते = ऋत्वादयः, तेभ्यः = ऋत्वादिभ्यः । पञ्चमी भ्यस् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ आर्तवं पुष्पफलम् ]** ऋतुः प्राप्तोऽस्य = आर्तवं पुष्पफलम् । अनेन अण्प्र० → अ । वृद्धिः आर् ।

**[ औपवस्त्रम् ]** उपवस्तृ मण्ड्यते । उपवस्ता प्राप्तोऽस्य = औपवस्त्रम् । अनेन अण्प्र० → अ । वृद्धिः औ । सि-अम् ।

**[ प्राशित्रम् ]** प्राश्नातीति प्राशिता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् → इ । प्राशिता वाटनं वालेन यत् प्रथममन्नं भुज्यते तदित्यर्थः । प्राशिता प्राप्तोऽस्य = प्राशित्रम् । अनेन अण्प्र० → अ । वृद्धिः । तृ० → त्र० । सि-अम् ।।छ।।

## कालाद् यः ।। ६।४।१२६ ।।

**[ कालात् ]** काल पञ्चमी ङसि ।

**[ यः ]** य प्रथमा सि ।

**[ काल्यस्तापसः ]** कालः प्राप्तोऽस्य = काल्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तपस् । तपोऽस्मिन्नस्ति = तापसः । 'ज्योत्स्नादिभ्योऽण्' (७।२।३४) अण्प्र० → अ । वृद्धिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ काल्या मेघाः ]** कालः प्राप्त एषां = काल्याः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा जस् । मेघाः ।।छ।।

## दीर्घः ।। ६।४।१२७ ।।

**[ दीर्घः ]** दीर्घ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कालिकमृणम्, कालिकं वैरम्, कालिकी संपत् ]** दीर्घः कालोऽस्य = कालिकमृणम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । ऋणं-वैरं च । तृतीये 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।।छ।।

## आकालिकमिकश्चाद्यन्ते ॥ ६।४।१२८ ॥

**[ आकालिकम् ]** आकालिक प्रथमा सि ।

**[ इकश्च ]** इक प्रथमा सि । च प्रथमा सि ।

**[ आद्यन्ते ]** 卐आदिश्चासावन्तश्च । आदिश्च अन्तश्च इति द्वन्द्वे धर्मार्थादित्वात् एकत्वम्, तस्मिन् ।

**[ आकालिकोऽनध्यायः, आकालिका-आकालिकी वा वृष्टिः ]** आकालं भवति = आकालिकः । अनेन इकप्र० निपात्यते । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पूर्वेद्युर्यस्मिन् काले तृतीये चतुर्थे वा यामे प्रवृत्तः पुनरपरेद्युरपि आ तस्मात् कालाद्भवन् आकालिकोऽनध्याय उच्यते । एवम्-आकालिका, आकालिकी वा । अनेन इकण्प्र० → इक । वृद्धिः - निपात्यते च । 'अणञेयेकण्०' (२।४।२०) ङी । एवं स्त्रियामिकेकणोर्विशेषो ज्ञेयः ।

**[ आकालिका आकालिकी वा विद्युत् ]** आकालिका वाक्यं पूर्ववत् । अनेन इकप्रत्ययान्ते निपात्यते । 'आत्' (२।४।१८) आप्प्र० । आकालिकी वाक्यं पूर्ववत् । अनेन इकण्प्र० → इक । वृद्धिः - निपात्यते च । 'अणञेयेकण्०' (२।४।२०) ङी । विद्युत् । आजन्मकालमेव भवन्ती जन्मानन्तरविनाशिनी ऊर्ध्वमननुवर्त्तमाना एवमुच्यते । एवं च द्वेधाप्यादिरेवान्तो भवति । अथवा-

**[ आकालिकोऽनध्यायः, आकालिका आकालिकी वा विद्युत् ]** समानकाल मण्ड्यते । समान-कालावाद्यन्तावस्य = आकालिकोऽनध्यायः । अनेन इक-इकण्प्र० → इक - समानकालशब्दस्य अकाल आदेशः । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० । तृतीये 'अणञेयेकण्०' (२।४।२०) ङी । विद्युत् । समानकालता चाद्यन्तयोः पूर्ववद्वेदितव्या ॥छ॥

## त्रिंशद्-विंशतेर्डकोऽसंज्ञायामाईदर्थे ॥ ६।४।१२९ ॥

**[ त्रिंशद्विंशतेः ]** त्रिंशच्च विंशतिश्च = त्रिंशद्विंशति, तस्मात् ।

**[ डकः ]** डक प्रथमा सि ।

**[ असंज्ञायाम् ]** न संज्ञा = असंज्ञा, तस्याम् ।

**[ आर्हदर्थे ]** अर्हंश्चासावर्थश्च = अर्हदर्थस्तस्मात् = आर्हदर्थात् आ = आर्हदर्थम्, तस्मिन् ।

**[ त्रिंशकम् ]** त्रिंशत् । त्रिंशता क्रीतं = त्रिंशकम् । अनेन डकप्र० → अक । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यलुक् ।

**[ विंशकम् ]** विंशत् । विंशत्या क्रीतं = विंशकम् । अनेन डकप्र० → अक । 'विंशतेस्तेर्डिति' (७।४।६७) तिलोपः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ।

**[ त्रिंशकः ]** त्रिंशत् । त्रिंशतमर्हति = त्रिंशकः । अनेन डकप्र० → अक । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यलुक् ।

**[ विंशकः ]** विंशतिमर्हति = विंशकः । अनेन डकप्र० → अक । 'विंशतेस्तेर्डिति' (७।४।६७) तिलोपः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

आर्हदर्थ इत्यभिविधानाकारः ।

---

卐 मध्यमवृत्तौ - आदिश्चासावन्तश्च आद्यन्त इति कर्मधारय एव कर्त्तव्यः, न तु आदिश्चान्तश्च इति द्वन्द्वः ।

**[ त्रिंशत्कम् ]** त्रिंशता क्रीतं = त्रिंशत्कम् । 'सङ्ख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० । सि-अम् ।

**[ विंशतिकम् ]** विंशत्या क्रीतं = विंशतिकम् । 'सङ्ख्या-डतेश्चाऽशत्०' (६।४।१३०) कप्र० । सि-अम् ।

वैद्यशास्त्रयोः कयोश्चिन्नाम्नी ॥छ॥

**सङ्ख्या-डतेश्चाऽशत्-ति-ष्टेः कः** ॥ ६।४।१३० ॥

**[ सङ्ख्याडतेः ]** सङ्ख्या च डतिश्च = सङ्ख्याडति, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ अशत्तिष्टेः ]** शच्च तिश्च ष्टिश्च = शत्तिष्टिः । न शत्तिष्टिरशत्तिष्टिः, तस्मात् ।

**[ कः ]** क प्रथमा सि ।

**[ द्विकम् ]** द्वाभ्यां क्रीतं = द्विकम् ।

**[ त्रिकम् ]** त्रिभिः क्रीतं = त्रिकम् ।

**[ पञ्चकम् ]** पञ्चभिः क्रीतं = पञ्चकम् ।

**[ बहुकम् ]** बहुभिः क्रीतं = बहुकम् ।

**[ गणकम् ]** गणैः क्रीतं = गणकम् । 'बहु-गणं भेदे' (१।१।४०) इत्यनेन सङ्ख्या, तस्याः फलमनेन कप्र० ।

**[ यावत्कम् ]** यद् । यत् परिमाणमेषां = यावन्तः । 'यत्-तदेतदो डावादिः' (७।१।१४९) डावतुप्र० → आवत् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अल्लुक् । यावद्भिः क्रीतं = यावत्कम् । अनेन कप्र० ।

**[ तावत्कम् ]** तद् । तत् परिमाणमेषां = तावन्तः । 'यत्-तदेतदो डावादिः' (७।१।१४९) डावतुप्र० → आवत् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अल्लुक् । तावद्भिः क्रीतं = तावत्कम् । अनेन कप्र० ।

**[ अध्यर्द्धकम् ]** अधिकं अर्द्धं यस्याऽसौ अध्यर्द्धः । अध्यर्द्धेन क्रीतम् = अध्यर्द्धकम् । अनेन कप्र० ।

**[ अर्द्धपञ्चमकम् ]** अर्द्धं पञ्चमं येषां ते = अर्द्धपञ्चमाः । अर्द्धपञ्चमैः क्रीतम् = अर्द्धपञ्चमकम् । अनेन कप्र० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ कतिकम् ]** किम् । का सङ्ख्या मानमेषां = कति । 'यत्-तत्-किमः सङ्ख्याया डतिर्वा' (७।१।१५०) अतिप्र०-डतिसंज्ञकः । 'डित्यन्त्य०' (२।१।११४) इम्लुक् । कतिभिः क्रीतं = कतिकम् । अनेन कप्र० । सि-अम् ।

**[ त्रिंशत्कम् ]** त्रिंशत् । त्रिंशता क्रीतं = त्रिंशत्कम् । अनेन कप्र० । सि-अम् ।

**[ विंशतिकम् ]** विंशति । विंशत्या क्रीतं = विंशतिकम् । अनेन कप्र० । सि-अम् ।

**[ चात्वारिंशत्कम् ]** चत्वारिंशता क्रीतं = चात्वारिंशत्कम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । वृद्धिः । 'ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त०' (७।४।७१) इकणः इलुक् । सि-अम् ।

**[ पाञ्चाशत्कम् ]** पञ्चाशता क्रीतं = पाञ्चाशत्कम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । वृद्धिः । 'ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त०' (७।४।७१) इकणः इलुक् । सि-अम् ।

**[ साप्ततिकम् ]** सप्तत्या क्रीतं = साप्ततिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ आशीतिकम् ]** अशीत्या क्रीतम् = आशीतिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ नावतिकम् ]** नवत्या क्रीतं = नावतिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ षाष्टिकम् ]** षष्ट्या क्रीतं = षाष्टिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ॥छा॥

## **शतात् केवलादतस्मिन् येकौ** ॥ ६।४।१३१ ॥

**[ शतात् ]** शत पञ्चमी ङसि ।

**[ केवलात् ]** केवल पञ्चमी ङसि ।

**[ अतस्मिन् ]** न सः = असस्तस्मिन् = अतस्मिन् । सप्तमी ङि । 'नञत्' (३।२।१२५) न० → अ० । 'ङेः स्मिन्'(१।४।८) ङि० → स्मिन्देशः ।

**[ येकौ ]** यश्च इकश्च = येकौ ।

अतस्मिन् = स चेदर्थः - आर्हदर्थः वस्तुतः-परमार्थतः प्रकृत्यर्थादभिन्नो न भवति । भिन्नो भवतीत्यर्थः ।

**[ शत्यम्, शतिकम् ]** शतेन क्रीतं = शत्यम् । अनेन यप्र० । एवम्-शतिकम् । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्।

**[ शत्यः, शतिकः पुरुषः ]** शतं वर्षाणि मानमस्य = शत्यः, शतिकः । अनेन य-इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ द्विशतकम् ]** द्वाभ्यामुत्तरं = द्व्युत्तरम् । द्व्युत्तरं शतं = द्विशतम् । द्विशतेन क्रीतं = द्विशतकम् । 'सङ्ख्या०' (६।४।१३०) कप्र० । सि-अम् ।

केवलात् 'सङ्ख्यादेश्चाऽऽर्हदलुचः' (६।४।८०) इति प्राप्नोत्यस्य बाधनार्थमिदं वचनम् ।

**[ शतकं स्तोत्रम् ]** शतं मानमस्य = शतकं स्तोत्रम् । 'सङ्ख्या-डतेश्चाऽशत्ति-ष्टेः कः' (६।४।१३०) कप्र० । सि-अम् ।

**[ शतकं निदानम् ]** शतमध्याया मानमस्य = शतकम् । 'सङ्ख्या०' (६।४।१३०) कप्र० । सि-अम् । निदानं-कारणप्रतिपादकं वैद्यशास्त्रमुच्यते । अत्र हि प्रकृत्यर्थ एव श्लोकाध्यायशतं प्रत्ययान्तेनाभिधीयते । अन्यस्मिंस्तु शते भवत्येव ।

**[ शत्यम्, शतिकम् ]** शतेन क्रीतं शाटकस्य शतं = शत्यम्, शतिकम् । अनेन य-इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्। सि-अम् ॥छा॥

## **वाऽतोरिकः** ॥ ६।४।१३२ ॥

**[ वा ]** वा प्रथमा सि ।

**[ अतोरिकः ]** अतु पञ्चमी ङसि । इक प्रथमा सि ।

**[ यावतिकम्, यावत्कम् ]** यावत् मण्ड्यते । यावद्भिः क्रीतं = यावतिकम् । अनेन इकप्र० । एवम्-यावत्कम् । 'सङ्ख्या०' (६।४।१३०) कप्र० । सि-अम् ।

**[ तावतिकम्, तावत्कम् ]** तावत् मण्ड्यते । तावद्भिः क्रीतं = तावतिकम् । अनेन इकप्र० । एवम्-तावत्कम् । 'सङ्ख्या०' (६।४।१३०) कप्र० । सि-अम् । विधानसामर्थ्यात् 'ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त इकस्येतो लुक्' (७।४।७१) इत्यादिना इकारस्य लोपो न भवति ॥छा॥

## कार्षापणादिकट् प्रतिश्चास्य वा ॥ ६।४।१३३ ॥

**[ कार्षापणात् ]** कर्ष 'आप्लृंट व्याप्तौ' (१३०७) आप् । कर्षेण आप्यते = कर्षापणम् । अनट्प्र० → अन । 'र-षृवर्णान्नो ण०' (२।३।६३) न० णत्वे कर्षापणमेव = कार्षापणम् । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तस्मात् ।

**[ इकट् ]** इकट् प्रथमा सि ।

**[ प्रतिश्च ]** प्रति प्रथमा सि । च प्रथमा सि ।

**[ अस्य ]** इदम् षष्ठी ङस् । 'आ द्वेरः' (२।१।४१) म० → अ । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'अनक्' (२।१।३६) अ । 'टा-ङसोरिन-स्यौ' (१।४।५) स्यदेशः ।

**[ वा ]** वा प्रथमा सि ।

**[ कार्षापणिकम्, कार्षापणिकी, प्रतिकम्, प्रतिकी ]** कार्षापणेन क्रीतः(तं) क्रीता वा = कार्षापणिकम्, कार्षापणिकी । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । एवम्-प्रतिकम्, प्रतिकी । अनेन इकट्प्र० → इक - कार्षापणस्य च प्रतिरादेशः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् । 'अणञेयेकण्०' (२।४।२०) ङी ।

चकार आदेशस्य प्रत्ययसन्नियोगशिष्टत्वार्थः भणनार्थः ।

**[ द्विकार्षापणम् ]** द्वाभ्यां कार्षापणाभ्यां क्रीतं = द्विकार्षापणम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इकण्लुप् । सि-अम् ।

**[ अध्यर्द्धकार्षापणम् ]** अध्यर्द्धेन कार्षापणेन क्रीतम् = अध्यर्द्धकार्षापणम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इकण्लुप् । सि-अम् ॥छा॥

## अर्द्धात् पल-कंस-कर्षात् ॥ ६।४।१३४ ॥

**[ अर्द्धात् ]** अर्द्ध पञ्चमी ङसि ।

**[ पलकंसकर्षात् ]** पलश्च कंसश्च कर्षश्च = पलकंसकर्षम्, तस्मात् ।

**[ अर्द्धपलिकम्, अर्द्धपलिकी ]** पलस्य अर्द्धम् = अर्द्धपलम् । अर्द्धपलेन क्रीतम् = अर्द्धपलिकम् । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ अर्द्धकंसिकम्, अर्द्धकंसिकी ]** अर्द्धकंसेन क्रीतम् = अर्द्धकंसिकम् । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ अर्द्धकर्षिकम्, अर्द्धकर्षिकी ]** अर्द्धकर्षेण क्रीतम् = अर्द्धकर्षिकम् । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी ॥छ॥

## कंसा-ऽर्द्धात् ॥ ६।४।१३५ ॥

**[ कंसाऽर्द्धात् ]** कंसश्च अर्द्धश्च = कंसाऽर्द्धस्तस्मात् ।

**[ कंसिकम्, कंसिकी ]** कंसेन क्रीतं = कंसिकम् । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ अर्द्धिकम्, अर्द्धिकी ]** अर्द्धेन क्रीतम्-अर्द्धिकम् । अनेन इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । द्वितीये 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ॥छ॥

## सहस्र-शतमानादण् ॥ ६।४।१३६ ॥

**[ सहस्रशतमानात् ]** सहस्रश्च शतमानश्च = सहस्रशतमानम्, तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ साहस्रः ]** सहस्रेण क्रीतः = साहस्रः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ शातमानः ]** शतमान । शतमानेन क्रीतः = शातमानः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## शूर्पाद् वाऽञ् ॥ ६।४।१३७ ॥

**[ शूर्पात् ]** शूर्प पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ अञ् ]** अञ् प्रथमा सि ।

**[ शौर्पम्, शौर्पिकम् ]** शूर्पेण क्रीतं = शौर्पम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-शौर्पिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । छ ॥

## वसनात् ॥ ६।४।१३८ ॥

**[ वसनात् ]** वसन पञ्चमी ङसि ।

**[ वासनम् ]** वसनेन क्रीतं = वासनम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## विंशतिकात् ॥ ६।४।१३९ ॥

**[ विंशतिकात् ]** विंशतिक पञ्चमी ङसि ।

**[ वैंशतिकम् ]** विंशति । विंशतिर्मानमस्य = विंशतिकम् । 'सङ्ख्या-डतेश्चाऽशत्०' (६।४।१३०) कप्र० । विंशतिकेन क्रीतं = वैंशतिकम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

**द्विगोरीनः** ॥ ६।४।१४० ॥

**[ द्विगोरीनः ]** द्विगु पञ्चमी ङसि । ईन प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ द्विविंशतिकीनम् ]** विंशतिर्मानमस्य = विंशतिकः । 'सङ्ख्या-डतेश्चाऽशत् ति-ष्टेः कः' (६।४।१३०) कप्र० । द्विपूर्व० । द्वाभ्यां विंशतिकाभ्यां क्रीतं = द्विविंशतिकीनम् ।

**[ त्रिविंशतिकीनम् ]** त्रिभिर्विंशतिकैः क्रीतं = त्रिविंशतिकीनम् ।

**[ अध्यर्द्धविंशतिकीनम् ]** अधि-अर्द्ध । अधिकमर्द्धं यस्य सः = अध्यर्द्धः । अध्यर्द्धेन विंशतिकेन क्रीतम् = अध्यर्द्धविंशतिकीनम् ।

**[ अर्द्धपञ्चमविंशतिकीनम् ]** अर्द्धं पञ्चमं येषां ते = अर्द्धपञ्चमाः । अर्द्धपञ्चमैः विंशतिकैः क्रीतम् = अर्द्धपञ्चमविंशतिकीनम् । अनेन ईनप्र० । विधानसामर्थ्याद् अस्य = ईनस्य न लुप् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

**अनाम्न्यद्विः प्लुप्** ॥ ६।४।१४१ ॥

**[ अनाम्नि ]** न नाम = अनाम, तस्मिन् ।

**[ अद्विः ]** द्वि । द्वौ वारावस्य = द्विः । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र० । न द्विः = अद्विः । 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अनतो लुप्' (१।४।५९) लुप् ।

**[ प्लुप् ]** पकारेण उपलक्षितो लुप् = प्लुप् । प्रथमा सि ।

**[ द्विकंसम् ]** द्वाभ्यां कंसाभ्यां क्रीतं = द्विकंसम् । द्वयोः कंसयोः समाहारः = द्विकंसी । 'द्विगोः समाहारात्' (२।४।२२) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । द्विकंस्या क्रीतं वा । 'कंसा-ऽर्द्धात्' (६।४।१३५) इकट्प्र० । अनेन चतुर्ष्वपि लुप् । प्रथमे 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् । एवमग्रेऽपि । 'ङ्यादेर्गौणस्या०' (२।४।९५) ङीनिवृत्तिः ।

**[ त्रिकंसम् ]** त्रिभिः कंसैः क्रीतं = त्रिकंसम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् । द्वितीयपक्षे त्रयोः कंसयोः समाहारः । शेषं पूर्ववत् । 'ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणीसूच्योः' (२।४।९५) ङीनिवृत्तिः ।

**[ अध्यर्द्धकंसम् ]** अध्यर्द्धेन कंसेन क्रीतम् = अध्यर्द्धकंसम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् । द्वितीयपक्षे अध्यर्द्धयोः कंसयोः समाहारः । शेषं पूर्ववत् । 'ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणीसूच्योः' (२।४।९५) ङीनिवृत्तिः ।

**[ अर्द्धपञ्चमकंसम् ]** अर्द्धपञ्चमैः कंसैः क्रीतम् = अर्द्धपञ्चमकंसम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् । द्वितीयपक्षे अर्द्धपञ्चमयोः कंसयोः समाहारः । शेषं पूर्ववत् । 'ङ्यादेर्गौण०' (२।४।९५) ङीनिवृत्तिः ।

**[ द्विशूर्पम् ]** द्वाभ्यां शूर्पाभ्यां क्रीतं = द्विशूर्पम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् । द्वितीयपक्षे 'ङ्यादेर्गौण०' (२।४।९५) ङीनिवृत्तिः ।

**[ त्रिशूर्पम् ]** त्रिभिः शूर्पैः क्रीतं = त्रिशूर्पम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् । द्वितीयपक्षे 'ङ्यादेर्गौण०' (२।४।९५) ङीनिवृत्तिः ।

**[ अध्यर्द्धशूर्पम् ]** अध्यर्द्धेन शूर्पेण क्रीतम् = अध्यर्द्धशूर्पम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् । द्वितीयपक्षे 'ङ्यादेर्गौणस्या०' (२।४।९५) ङीनिवृत्तिः ।

**[ अर्द्धपञ्चमशूर्पम् ]** अर्द्धपञ्चमैः शूर्पैः क्रीतम् = अर्द्धपञ्चमशूर्पम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् । द्वितीयपक्षे 'ङ्यादेर्गौणस्या०' (२।४।९५) ङीनिवृत्तिः ।

**[ द्विशूर्पम् ]** द्वाभ्यां शूर्पाभ्यां क्रीतं = द्विशूर्पम् । 'शूर्पाद् वाऽञ्' (६।४।१३७) अञ्प्र० । पक्षे 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् । सि-अम् ।

**[ अध्यर्द्धशूर्पम् ]** अध्यर्द्धेन शूर्पेण क्रीतम् = अध्यर्द्धशूर्पम् । 'शूर्पाद् वाऽञ्' (६।४।१३७) अञ्प्र० । पक्षे 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् । सि-अम् ।

**[ अर्द्धपञ्चमशूर्पम् ]** अर्द्धपञ्चमैः शूर्पैः क्रीतम् = अर्द्धपञ्चमशूर्पम् । 'शूर्पाद् वाऽञ्' (६।४।१३७) अञ्प्र० । पक्षे 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् । सि-अम् ।

**[ द्विशौर्पिकम् ]** द्वाभ्यां शूर्पाभ्यां क्रीतं = द्विशूर्पम् । 'शूर्पाद् वाऽञ्' (६।४।१३७) अञ्प्र० । अनेन लुप् । द्विशूर्पेण क्रीतं = द्विशौर्पिकम् । 'सङ्ख्यादेश्चाऽऽर्हदलुचः' (६।४।८०) इत्यत्र अलुच इति भणनात् लुचि सत्यां 'शूर्पाद् वाऽञ्' (६।४।१३७) न भवति, ततः 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'मान-संवत्सरस्याशाण०' (७।४।१९) उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[पाञ्चमलोहितिकम्]** पञ्चन्-लोहित । 'श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नश्च' (२।४।३६) ङी - तस्य नदेशः । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । पञ्च लोहिन्यः परिमाणमस्य = पाञ्चलोहितिकम् । अनेन 'मानम्' (६।४।१६९) इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । 'जातिश्च-णि-तद्धितय-स्वरे' (३।२।५१) पुंवद्भावः ।

**[ पाञ्चकलायिकम् ]** पञ्चन्-कला । पञ्च कलायाः परिमाणमस्य = पाञ्चकलायिकम् । 'मानम्' (६।४।१६९) इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ पञ्चगर्गः ]** पञ्चन्-गर्ग । गर्गस्यापत्यं वृद्धं स्त्री = गार्गी । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'यञो डायन् च वा' (२।४।६७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । पञ्चभिः गार्गीभिः क्रीतः = पञ्चगर्गः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन इकण्लुप् । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः, ततो 'यञञोऽश्यापर्णान्त०' (६।१।१२६) यञो लुप् । न तु अत्र पुंवद्भावेनापि ङीनिवृत्तिः साध्या, सा च 'ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणी-सूच्योः' (२।४।९५) इत्यनेनापि न भविष्यति, ततः किं लुपः पित्त्वेन ? सत्यम् - 'ङ्यादेर्गौणस्या०' (२।४।९५) इति ङीनिवृत्तिरेव न स्त्रीनिवृत्तिः, अतः पित्त्वं कृत्वा 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) इति स्त्रीत्य(व)निवृत्त्यर्थः पुंवद्भावः कार्यः, तस्मिन् सति 'यञञोऽश्यापर्णान्त-गोपवनादेः' (६।१।१२६) इति यञो लुप् भवतीति शेषः ।

**[ द्विषाष्टिकम् ]** द्वाभ्यां षष्टिभ्यां क्रीतं = द्विषाष्टिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'मान-संवत्सरस्याशाण०' (७।४।१९) उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ त्रिषाष्टिकम् ]** त्रिभिः तिसृभिर्वा षष्टिभिः क्रीतं = त्रिषाष्टिकम् । पुं-स्त्री-क्लीबत्वात् षष्टेः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'मान-संवत्सरस्याशाण०' (७।४।१९) उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ॥छ॥

### नवाऽणः ॥ ६।४।१४२ ॥

**[ नवा ]** नवा प्रथमा सि ।

**[ अणः ]** अण् षष्ठी ङस् ।

**[ द्विसहस्त्रम्, द्विसाहस्त्रम् ]** द्वाभ्यां सहस्राभ्यां क्रीतं = द्विसहस्त्रम् । 'सहस्र-शतमानादण्' (६।४।१३६) अण्प्र० । अनेन लुप् । एवम्-द्विसाहस्त्रम् । अणोऽलोपे सति 'मान-संवत्सरस्याशाण-कुलिजस्याऽनाम्नि' (७।४।१९) उत्तरपदवृद्धिः ।

**[ अध्यर्द्धसहस्त्रम्, अध्यर्द्धसाहस्त्रम् ]** अध्यर्द्धेन सहस्त्रेण क्रीतम् = अध्यर्द्धसहस्त्रम् । 'सहस्र-शतमानादण्' (६।४।१३६) अण्प्र० । अनेन लुप् । एवम्-अध्यर्द्धसाहस्त्रम् । अणोऽलोपे सति 'मान-संवत्सरस्या०' (७।४।१९) उत्तरपदवृद्धिः ।

**[ अर्द्धषष्ठसहस्त्रम्, अर्द्धषष्ठसाहस्त्रम् ]** अर्द्धं षष्ठं येषां ते = अर्द्धषष्ठाः । अर्द्धषष्ठैः सहस्रैः क्रीतम् = अर्द्धषष्ठसहस्त्रम्। 'सहस्त्र-शतमानादण्' (६।४।१३६) अण्प्र० । अनेन लुप् । द्वितीये न लुप् । शेषं पूर्ववत् ।

**[ द्विशतमानम्, द्विशातमानम् ]** द्वाभ्यां शतमानाभ्यां क्रीतं = द्विशतमानम् । 'सहस्र-शतमानादण्' (६।४।१३६) अण्प्र० । अनेन लुप् । द्वितीये न अण्लुप् । 'मान-संवत्सरस्या०' (७।४।१९) उत्तरपदवृद्धिः । सि-अम् ।

**[ अध्यर्द्धशतमानम्, अध्यर्द्धशातमानम् ]** अध्यर्द्धेन शतमानेन क्रीतम् = अध्यर्द्धशतमानम् । 'सहस्र-शतमानादण्' (६।४।१३६) अण्प्र० । अनेन लुप् । द्वितीये न लुप् । 'मान-संवत्सरस्याशाण०' (७।४।१९) उत्तरपदवृद्धिः । सि-अम् ।

**[ अर्द्धषष्ठशतमानम्, अर्द्धषष्ठशातमानम् ]** अर्द्धषष्ठैः शतमानैः क्रीतम् = अर्द्धषष्ठशतमानम् । 'सहस्र-शतमानादण्' (६।४।१३६) अण्प्र० । अनेन लुप् । द्वितीये न अण्लुप् । 'मान-संवत्सरस्याशाण०' (७।४।१९) उत्तरपदवृद्धिः । सि-अम् ।

**[ द्विद्रोणः ]** द्वौ द्रोणौ पचति = द्विद्रोणः । 'तं पचति द्रोणाद् वाऽञ्' (६।४।१६१) अञ्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) अञ्लुप् ।

**[ अध्यर्द्धद्रोणः ]** अध्यर्द्धं द्रोणं पचति = अध्यर्द्धद्रोणः । 'तं पचति द्रोणाद् वाऽञ्' (६।४।१६१) अञ्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) अञ्लुप् ॥छ॥

## सुवर्ण-कार्षापणात् ॥ ६।४।१४३ ॥

**[ सुवर्णकार्षापणात् ]** सुवर्णश्च कार्षापणश्च = सुवर्णकार्षापणम्, तस्मात् ।

**[ द्विसुवर्णम्, द्विसौवर्णिकम् ]** द्वाभ्यां सुवर्णाभ्यां क्रीतं = द्विसुवर्णम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् । एवम्-द्विसौवर्णिकम् । अत्र न लुप् । 'मान-संवत्सरस्याशाण०' (७।४।१९) उत्तरपदवृद्धिः ।

**[ द्विकार्षापणम्, द्विकार्षापणिकम् ]** द्वाभ्यां कार्षापणाभ्यां क्रीतं = द्विकार्षापणम् । एवम्-द्विकार्षापणिकम् । 'कार्षापणादिकट्०' (६।४।१३३) इकट्प्र० उभयत्र । अनेन प्रथमे लुप् ।

**[ द्विप्रतिकम् ]** द्वाभ्यां प्रतिभ्यां(कार्षापणाभ्यां) क्रीतं = द्विप्रतिकम् । 'प्रतिश्चास्य वा' (६।४।१३३) इकट्प्र० → इक । 'ऋवर्णोवर्ण-दोसिसुस०' (७।४।७१) इलुक् ।

**[ अध्यर्द्धकार्षापणम्, अध्यर्द्धकार्षापणिकम् ]** अध्यर्द्धेन कार्षापणेन क्रीतम् = अध्यर्द्धकार्षापणम् । 'कार्षापणादिकट्०' (६।४।१३३) इकट्प्र० । अनेन लुप् । एवम्-अध्यर्द्धकार्षापणिकम् । अत्र न लुप् ।

**[ अध्यर्द्धप्रतिकम् ]** अध्यर्द्धेन प्रतिना(कार्षापणेन) क्रीतम् = अध्यर्द्धप्रतिकम् । 'प्रतिश्चास्य वा' (६।४।१३३) इकट्प्र० → इक । 'ऋवर्णोवर्ण०' (७।४।७१) इलुक् । सि-अम् ॥छ॥

**द्वि-त्रि-बहोर्निष्क-विस्तात्** ॥ ६।४।१४४ ॥

**[ द्वित्रिबहोः ]** द्विश्च त्रिश्च बहुश्च = द्वित्रिबहु, तस्मात् ।

**[ निष्कविस्तात् ]** निष्कश्च विस्तश्च = निष्कविस्तम्, तस्मात् ।

**[ द्विनिष्कम्, द्विनैष्किकम् ]** नि 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । निषीदन्ति गुणा अत्र = निष्कः । 'निष्क-तुरुष्कोदर्का-ऽलर्क-शुल्क-श्वल्क-किञ्जल्कोल्का-वृक्क-च्छेक-केका-यस्काऽऽदयः' (उणा० २६) निष्कं निपात्यते । द्वाभ्यां निष्काभ्यां क्रीतं = द्विनिष्कम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन वा लुप् । द्वितीये 'मान-संवत्सरस्याशाण-कुलिजस्याऽनाम्नि' (७।४।१९) उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ त्रिनिष्कम्, त्रिनैष्किकम् ]** त्रिभिर्निष्कैः क्रीतं = त्रिनिष्कम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन वा लुप् । द्वितीये 'मान-संवत्सरस्याशाण०' (७।४।१९) उत्तरपदवृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ बहुनिष्कम्, बहुनैष्किकम् ]** बहुभिर्निष्कैः क्रीतं = बहुनिष्कम् ।'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन वा लुप् । द्वितीये 'मान-संवत्सरस्या०' (७।४।१९) उत्तरपदवृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ द्विविस्तम्, द्विवैस्तिकम् ]** द्वाभ्यां विस्ताभ्यां क्रीतं = द्विविस्तम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन वा लुप् । द्वितीये 'मान-संवत्सरस्याशाण०' (७।४।१९) उत्तरपदवृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ त्रिविस्तम्, त्रिवैस्तिकम् ]** त्रिभिर्विस्तैः क्रीतं = त्रिविस्तम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन वा लुप् । द्वितीये 'मान-संवत्सरस्याशाण०' (७।४।१९) उत्तरपदवृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ बहुविस्तम्, बहुवैस्तिकम् ]** बहुभिर्विस्तैः क्रीतं = बहुविस्तम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन वा लुप् । द्वितीये 'मान-संवत्सरस्याशाण०' (७।४।१९) उत्तरपदवृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा॥

**शताद् यः** ॥ ६।४।१४५ ॥

**[ शतात् ]** शत पञ्चमी ङसि ।

**[ यः ]** य प्रथमा सि ।

**[ द्विशत्यम्, द्विशतम् ]** द्वाभ्यां शताभ्यां क्रीतं = द्विशत्यम् । अनेन यप्र० । एवम्-द्विशतम् । 'सङ्ख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० । 'अनाम्न्यद्विः प्लुप्'(६।४।१४१) लुप् । विधानसामर्थ्याद् यकारस्य न लुप् ।

**[ अध्यर्द्धशत्यम्, अध्यर्द्धशतम् ]** अध्यर्द्धेन शतेन क्रीतम् = अध्यर्द्धशत्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'सङ्ख्या-डतेश्चाऽशत्०' (६।४।१३०) कप्र० । 'अनाम्न्यद्विः प्लुप्'(६।४।१४१) लुप् । सि-अम् ।

**[ अर्द्धषष्ठशत्यम्, अर्द्धषष्ठशतम् ]** अर्द्धं षष्ठं येषां तानि-तैः = अर्द्धषष्ठैः शतैः क्रीतम् = अर्द्धषष्ठशत्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'सङ्ख्या-डतेश्चाऽशत्०' (६।४।१३०) कप्र० । 'अनाम्न्यद्विः प्लुप्'(६।४।१४१) लुप् । सि-अम् ॥छा॥

**शाणात्** ॥ ६।४।१४६ ॥

**[ शाणात् ]** शाण पञ्चमी ङसि ।

**[ पञ्चशाण्यम्, पञ्चशाणम् ]** पञ्चभिः शाणैः क्रीतं = पञ्चशाण्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । सि-अम् ।

**[ अध्यर्द्धशाण्यम्, अध्यर्द्धशाणम् ]** अध्यर्द्धेन शाणेन क्रीतम् = अध्यर्द्धशाण्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । सि-अम् ।

**[ अर्द्धपञ्चमशाण्यम्, अर्द्धपञ्चमशाणम् ]** अर्द्धपञ्चमैः शाणैः क्रीतम् = अर्द्धपञ्चमशाण्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । सि-अम् ॥छ॥

**द्वि-त्र्यादेर्याऽण् वा** ॥ ६।४।१४७ ॥

**[ द्वित्र्यादेः ]** द्विश्च त्रिश्च = द्वित्री । द्वित्री आदिः(आदी) यस्य सः = द्वित्र्यादिः, तस्मात् ।

**[ याऽण् ]** यश्च अण् च = याऽण् । प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

वाग्रहणमुत्तरत्र नवानिवृत्त्यर्थम् ।

**[ द्विशाण्यम्, द्वैशाणम्, द्विशाणम् ]** द्वाभ्यां शाणाभ्यां क्रीतं = द्विशाण्यम्, द्वैशाणम् । अनेन य-अण्प्र० → अ । वृद्धिः ऐ । एवम्-द्विशाणम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् ।

**[ त्रिशाण्यम्, त्रैशाणम्, त्रिशाणम् ]** त्रिभिः शाणैः क्रीतं = त्रिशाण्यम्, त्रैशाणम् । अनेन य-अण्प्र० → अ । वृद्धिः ऐ । एवम्-त्रिशाणम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् ॥छ॥

**पण-पाद-माषाद् यः** ॥ ६।४।१४८ ॥

**[ पणपादमाषात् ]** पणश्च पादश्च माषश्च = पणपादमाषम्, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

विधानसामर्थ्यान्न लुप् ।

**[ द्विपण्यम् ]** द्वाभ्यां पणाभ्यां क्रीतं = द्विपण्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ त्रिपण्यम् ]** त्रिभिः पणैः क्रीतं = त्रिपण्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अध्यर्द्धपण्यम् ]** अध्यर्द्धेन पणेन क्रीतम् = अध्यर्द्धपण्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अर्द्धषष्ठपण्यम् ]** अर्द्धषष्ठेन पण्येन क्रीतम् = अर्द्धषष्ठपण्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ द्विपाद्यम् ]** द्वाभ्यां पादाभ्यां क्रीतं = द्विपाद्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ त्रिपाद्यम् ]** त्रिभिः पादैः क्रीतं = त्रिपाद्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अध्यर्द्धपाद्यम् ]** अध्यर्द्धेन पादेन क्रीतम् = अध्यर्द्धपाद्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

माष-पणसाहचर्यात् पादः परिमाणं गृह्यते, न प्राण्यङ्गम् । तेन 'हिम-हति-काषि-ये पद्'(३।२।९६) इति पद्भावो न भवति । तत्र प्राण्यङ्गस्यैव ग्रहणात् । यद्वा पादसम्बन्धी यकारस्तत्र गृह्यते । अयं तु द्विगुसंबन्धीति न भवति ।

**[ द्विमाष्यम् ]** द्वाभ्यां माषाभ्यां क्रीतं = द्विमाष्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ त्रिमाष्यम् ]** त्रिभिर्माषैः क्रीतं = त्रिमाष्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अध्यर्द्धमाष्यम् ]** अध्यर्द्धेन माषेण क्रीतम् = अध्यर्द्धमाष्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छ॥

## **खारी-काकणीभ्यः कच्** ॥ ६।४।१४९ ॥

**[ खारीकाकणीभ्यः ]** खार्यश्च काकण्यश्च = खारीकाकण्यस्ताभ्यः ।

**[ कच् ]** कच् प्रथमा सि ।

**[ द्विखारीकम् ]** द्वाभ्यां खारीभ्यां क्रीतं = द्विखारीकम् । अनेन कच्प्र० → क । सि-अम् ।

**[ त्रिखारीकम् ]** तिसृभिः खारीभिः क्रीतं = त्रिखारीकम् । अनेन कच्प्र० → क । सि-अम् ।

**[ अध्यर्द्धखारीकम् ]** अध्यर्द्धया खार्या क्रीतम् = अध्यर्द्धखारीकम् । अनेन कच्प्र० → क । सि-अम् ।

**[ अर्द्धतृतीयखारीकम् ]** अर्द्धं तृतीयं यस्याः सा = अर्द्धतृतीया । अर्द्धतृतीयया खार्या क्रीतम् = अर्द्धतृतीयखारीकम् । अनेन कच्प्र० → क । सि-अम् ।

**[ द्विकाकणीकम् ]** द्वाभ्यां काकणीभ्यां क्रीतं = द्विकाकणीकम् । अनेन कच्प्र० → क । सि-अम् ।

**[ त्रिकाकणीकम् ]** तिसृभिः काकणीभिः क्रीतं = त्रिकाकणीकम् । अनेन कच्प्र० → क । सि-अम् ।

**[ अध्यर्द्धकाकणीकम् ]** अधिकं अर्द्धं यस्याः सा = अध्यर्द्धा । अध्यर्द्धया काकण्या क्रीतम् = अध्यर्द्धकाकणीकम् । अनेन कच्प्र० → क । सि-अम् ।

**[ अर्द्धतृतीयकाकणीकम् ]** अर्द्धं तृतीयं यस्याः सा = अर्द्धतृतीया । अर्द्धतृतीयाभिः काकणीभिः क्रीतम् = अर्द्धतृतीयकाकणीकम् । अनेन कच्प्र० → क । सि-अम् ।

केवलाभ्याम् - **[ खारीकम् ]** खार्या क्रीतं = खारीकम् । अनेन कच्प्र० → क । सि-अम् ।

**[ काकणीकम् ]** काकण्या क्रीतं = काकणीकम् । अनेन कच्प्र० → क । सि-अम् ।

चकारो 'न कचि' (२।४।१०५) इत्यनेन विहितह्रस्वत्वस्य निषेधार्थः ॥छ॥

## **मूल्यैः क्रीते** ॥ ६।४।१५० ॥

**[ मूल्यैः ]** मूल्य तृतीया भिस् । 'भिस ऐस्' (१।४।२) भिस्० → ऐस्० ।

**[ क्रीते ]** 'डुक्रींग्श् द्रव्यविनिमये' (११५०८) क्री । क्रीयते स्म = क्रीतः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त, तस्मिन् ।

**[ प्रास्थिकम् ]** प्रस्थेन क्रीतं = प्रास्थिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ साप्ततिकम् ]** सप्तत्या क्रीतं = साप्ततिकम् । अनेन इकण्प्र० → इक । वृद्धिः ।

**[ आशीतिकम् ]** अशीत्या क्रीतम् = आशीतिकम् । अनेन इकण्प्र० → इक । वृद्धिः । 'ऋवर्णोवर्ण-दोसिसुसश्वदकस्मात्त इकस्येतो लुक्' (७।४।७१) - अथवा 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ नैष्किकम् ]** निष्केण क्रीतम् ।

**[ पाणिकम् ]** पणेन क्रीतम् ।

**[ पादिकम् ]** पादेन क्रीतं = पादिकम् ।

**[ त्रिंशकम् ]** त्रिंशत् । त्रिंशता क्रीतं = त्रिंशकम् । 'त्रिंशद्-विंशतेर्डकोऽसंज्ञायामार्हदर्थे' (६।४।१२९) डकप्र० → अक । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

**[ विंशकम् ]** विंशत्या क्रीतं = विंशकम् । 'त्रिंशद्-विंशतेर्डकोऽसंज्ञायामार्हदर्थे' (६।४।१२९) डकप्र० → अक । 'विंशतेस्तेर्डिति' (७।४।६७) तिलोपः ।

**[ द्विकम् ]** द्वि मण्ड्यते । द्वाभ्यां क्रीतं = द्विकम् । 'सङ्ख्या-डते०' (६।४।१३०) कप्र० । सि-अम् ।

**[ त्रिकम् ]** त्रि मण्ड्यते । त्रिभिः क्रीतं = त्रिकम् । 'सङ्ख्या-डते०' (६।४।१३०) कप्र० । सि-अम् ।

**[ शत्यम् ]** शतेन क्रीतं = शत्यम् । 'शतात् केवलादतस्मिन् येकौ' (६।४।१३१) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ शतिकम् ]** शतेन क्रीतं = शतिकम् । 'शतात् केवलादतस्मिन् येकौ' (६।४।१३१) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ द्विकम् ]** द्वाभ्यां क्रीतं = द्विकम् । 'सङ्ख्या-डतेश्चाऽशत्०' (६।४।१३०) कप्र० ।

**[ त्रिकम् ]** त्रिभिः क्रीतं = त्रिकम् । 'सङ्ख्या-डतेश्चाऽशत्०' (६।४।१३०) कप्र० ।

**[ द्विप्रस्थम् ]** द्वाभ्यां प्रस्थाभ्यां क्रीतं = द्विप्रस्थम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप्।

**[ त्रिप्रस्थम् ]** त्रिभिः प्रस्थैः क्रीतं = त्रिप्रस्थम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन लुप् ।

**[ मौद्गिकम् ]** मुद्गैः क्रीतं = मौद्गिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माषिकम् ]** माषेण क्रीतं = माषिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

नह्येकेन मुद्गेन माषेण वा क्रयः संभवति ॥छा।

## तस्य वापे ॥ ६।४।१५१ ॥

**[ तस्य ]** तस्य पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ वापे ]** 'डुवपीं बीजसन्ताने' (९९५) वप् । उप्यतेऽस्मिन्निति वापस्तस्मिन् । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[ प्रास्थिकम् ]** प्रस्थस्य वापः = प्रास्थिकम् । अनेन इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ मौद्गिकम् ]** मुद्गस्य वापः = मौद्गिकः(कम्) । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्।

**[ शत्यम् ]** शतेन क्रीतं (शतस्य वापः) = शत्यम् । यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्।

**[ शतिकम् ]** शतेन क्रीतं (शतस्य वापः) = शतिकम् । इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्।

**[ खारीकम् ]** खारी । खार्या क्रीतं (खार्या वापः) = खारीकम् । 'खारी-काकणीभ्यः कच्' (६।४।१४९) कच्प्र० → क । सि-अम् ॥छ॥

### वात-पित्त-श्लेष्म-सन्निपाताच्छमन-कोपने ॥ ६।४।१५२ ॥

**[ वातपित्तश्लेष्मसन्निपातात् ]** वातश्च पित्तश्च (पित्तं च) श्लेष्मा च सन्निपातश्च = वातपित्तश्लेष्मसन्निपातम्, तस्मात् ।

**[ शमनकोपने ]** शम्यतेऽनेन = शमनम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'कुपच् क्रोधे' (११९१) कुप् । कुप्यते येन तत् = कोपनम् । अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । शमनं च कोपनं च = शमनकोपनम्, तस्मिन् ।

**[ वातिकम् ]** वातस्य शमनं कोपनं वा = वातिकम् । अनेन इकण्प्र० → इक । वृद्धिः ।

**[ पैत्तिकम् ]** पित्तस्य शमनं कोपनं वा = पैत्तिकम् । अनेन इकण्प्र० → इक । वृद्धिः ऐ ।

**[ श्लैष्मिकम् ]** श्लेष्मन् । श्लेष्मणः शमनं कोपनं वा = श्लैष्मिकम् । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ सान्निपातिकम् ]** 'पत्लृ गतौ' (९६२) पत्, सम्-निपूर्व० । सन्निपतति वातपित्तश्लेष्मादयोऽस्मिन्निति सन्निपातः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सन्निपातस्य शमनं कोपनं वा = सान्निपातिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

पथ्यमपथ्यं च द्रव्याद्येवमभिधीयते वैद्यशास्त्रे/प्रकरणात् प्रस्तावात् शमने कोपने च प्रत्ययो ज्ञेय इत्यर्थः ॥छ॥

### हेतौ संयोगोत्पाते ॥ ६।४।१५३ ॥

**[ हेतौ ]** हेतु सप्तमी ङि । 'ङिडौँ' (१।४।२५) ङि० → डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) उलुक् ।

**[ संयोगोत्पाते ]** संयोगश्च उत्पातश्च = संयोगोत्पातम्, तस्मिन् ।

**हेतुः = निमित्तम् । संयोगः = सम्बन्धः । प्राणिनां शुभाशुभसूचकः पृथिव्यप्तेजोवायुआकाशरूपाणि महाभूतानि पञ्चमहाभूतपरिणामः = उत्पातः ।**

**[ शत्यः, शतिकः ]** शतस्य हेतुरीश्वरसंयोगः = शत्यः, शतिकः । अनेन 'शतात् केवलादतस्मिन् येकौ' (६।४।१३१) य-इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ साहस्रः ]** सहस्रस्य हेतुरीश्वरसंयोगः = साहस्रः । अनेन अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौमग्रहणिको भूमिकम्पः ]** सोमग्रहणस्य हेतुरुत्पातः = सौमग्रहणिको भूमिकम्पः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सांग्रामिकमिन्द्रधनुः ]** संग्रामस्य हेतुरुत्पातः = सांग्रामिकम् । अनेन इकण्प्र० → इक । वृद्धिः । इन्द्रधनुः ।

**[ सौभिक्षिकः परिवेषः ]** शोभना भिक्षा यत्र काले तत् = सुभिक्षम् । सुभिक्षस्य हेतुरुत्पातः = सौभिक्षिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शत्यम्, शतिकम ]** शतस्य हेतुर्दक्षिणाक्षिस्पन्दनं स्फुरणमित्यर्थः = शत्यम्, शतिकम् । 'शतात् केवलादतस्मिन् येकौ' (६।४।१३१) य-इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ साहस्रम् ]** सहस्रस्य हेतुर्दक्षिणाक्षिस्पन्दनं = साहस्रम् । 'सहस्र-शत०' (६।४।१३६) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छा।

## पुत्राद् येयौ ॥ ६।४।१५४ ॥

**[ पुत्रात् ]** पुत्र पञ्चमी ङसि ।

**[ येयौ ]** यश्च ईयश्च = येयौ ।

**[ पुत्र्यः, पुत्रीयः ]** पुत्रस्य हेतुः संयोग उत्पातो वा = पुत्र्यः, पुत्रीयः । अनेन य-ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छा।

## द्विस्वर-ब्रह्मवर्चसाद् योऽसङ्ख्या-परिमाणा-ऽश्वादेः ॥ ६।४।१५५ ॥

**[ द्विस्वरब्रह्मवर्चसात् ]** द्विस्वरं च ब्रह्मवर्चसं च = द्विस्वरब्रह्मवर्चसम्, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

**[ असङ्ख्यापरिमाणाऽश्वादेः ]** सङ्ख्या च परिमाणश्च(णं च) अश्वादिश्च = सङ्ख्यापरिमाणाऽश्वादि । न सङ्ख्यापरिमाणाऽश्वादि = असङ्ख्यापरिमाणाऽश्वादि, तस्मात् । 'नञत्' (३।२।१२५) न० → अ० ।

**[ धन्यः ]** धनस्य हेतुः संयोग उत्पातो वा = धन्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ यशस्यः ]** यशस् । यशसो हेतुः संयोग उत्पातो वा = यशस्यः । अनेन यप्र० ।

**[ आयुष्यः ]** आयुस् । आयुषो हेतुः संयोग उत्पातो वा = आयुष्यः । अनेन यप्र० । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् ।

**[ वात्या विद्युत् ]** वातस्य हेतुः संयोग उत्पातो वा = वात्या विद्युत् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ब्रह्मवर्चस्यः ]** ब्रह्मन्-वर्चस् । ब्रह्मणो वर्चः = ब्रह्मवर्चसः(सम्) । 'ब्रह्म हस्ति- 'राजपल्याद् वर्चसः' (७।३।८३) अत्समासान्तः → अ । ब्रह्मवर्चसस्य हेतुः संयोग उत्पातो वा = ब्रह्मवर्चस्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गव्यः ]** गोर्हेतुः संयोग उत्पातो वा = गव्यः । 'गोः स्वरे यः' (६।१।२७) यप्र० । 'य्यक्ये' (१।२।२५) अव् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वैजयिकः ]** विजयस्य हेतुः संयोग उत्पातो वा = वैजयिकः । 'हेतौ संयोगोत्पाते' (६।४।१५३) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आभ्युदयिकः ]** अभ्युदयस्य हेतुः संयोग उत्पातो वा = आभ्युदयिकः । 'हेतौ संयोगोत्पाते' (६।४।१५३) इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पञ्चकः ]** पञ्चानां हेतुः संयोग उत्पातो वा = पञ्चकः । 'सङ्ख्या०' (६।४।१३०) कप्र० ।

**[ सप्तकः ]** सप्तानां हेतुः संयोग उत्पातो वा = सप्तकः । 'सङ्ख्या-डतेश्चा०' (६।४।१३०) कप्र० ।

**[ प्रास्थिकः ]** प्रस्थस्य हेतुः संयोग उत्पातो वा = प्रास्थिकः । 'हेतौ संयोगोत्पाते' (६।४।१५३) इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ खारीकः ]** खारी । खार्या क्रीतः = खारीकः । 'खारी-काकणीभ्यः कच्' (६।४।१४९) कच्प्र० → क । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आश्विकः ]** अश्वस्य हेतुः संयोग उत्पातो वा = आश्विकः । 'हेतौ संयोगोत्पाते' (६।४।१५३) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गाणिकः ]** गणस्य हेतुः संयोग उत्पातो का = गाणिकः । 'हेतौ संयोगोत्पाते' (६।४।१५३) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वासुकः ]** वसु । वसुनो-द्रव्यस्य हेतुः = वासुकः । 'हेतौ संयोगोत्पाते' (६।४।१५३) इकण्प्र० → इक । 'ऋवर्णोवर्ण-दोसिसुसशश्वद०' (७।४।७१) इकणः इकारस्य लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा।

**पृथिवी-सर्वभूमेरीश-ज्ञातयोश्चाञ्** ॥ ६।४।१५६ ॥

**[ पृथिवीसर्वभूमेः ]** पृथिवी च सर्वभूमिश्च = तत्, तस्मात् ।

**[ ईशज्ञातयोः ]** 'ईशिक् ऐश्वर्ये' (१११६) ईश् । ईष्टे । 'नाम्युपान्त्य०' (५।१।५४) कप्र० । 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । ज्ञायते । 'ज्ञानेच्छा०' (५।२।९२) क्तप्र० → त । ईशश्च ज्ञातश्च = ईशज्ञातौ, तयोः = ईशज्ञातयोः । सप्तमी ओस् ।

**[ च ]** च प्रथमा सि ।

**[ अञ् ]** अञ् प्रथमा सि ।

**[ पार्थिवः ]** 'ईशिक् ऐश्वर्ये' (१११६) ईश् । ईष्टे । नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० → अ । 'प्रथिष् प्रख्याने' (१००३) प्रथ् । प्रथते = पृथिवी । 'प्रथेरिवट् पृथ् च' (उणा० ५२१) इवट्प्र० → इव - पृथ्देशश्च । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । पृथिव्या ईशः-स्वामी = पार्थिवः । अनेन अञ्प्र० → अ । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ सार्वभौमः ]** सर्वा चासौ भूमिश्च = सर्वभूमिः । 'परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) पुंवत् । सर्वभूमेरीशः = सार्वभौमः । अनेन अञ्प्र० → अ । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ पार्थिवः ]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । ज्ञायते = ज्ञातः । 'ज्ञानेच्छा०' (५।२।९२) क्तप्र० → त । पृथिव्या ज्ञातः = पार्थिवः । अनेन अञ्प्र० → अ । वृद्धिः आर् ।'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । कर्त्तरि षष्ठी सम्बन्धविवक्षायां वा ।

**[ सार्वभौमः ]** सर्वभूमेर्ज्ञातः = सार्वभौमः । अनेन अञ्प्र० → अ । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ पार्थिवः ]** पृथिव्या हेतुः संयोग उत्पातो वा = पार्थिवः । अनेन अञ्प्र० → अ । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सार्वभौमः ]** सर्वभूमेर्हेतुः संयोग उत्पातो वा = सार्वभौमः । अनेन अञ्प्र० → अ । 'अनुशतिकादीनाम्' (७।४।२७) उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

ईशज्ञातयोरिति द्विवचनं हेतुविशेषणत्वशङ्काव्यवच्छेदार्थम् ॥छा।

**लोक-सर्वलोकाज्ज्ञाते** ॥ ६।४।१५७ ॥

**[ लोकसर्वलोकात् ]** लोकश्च सर्वलोकश्च = लोकसर्वलोकम्, तस्मात् ।

**[ ज्ञाते ]** ज्ञात सप्तमी ङि ।

**[ लौकिकः ]** लोकस्य ज्ञातः = लौकिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सार्वलौकिकः ]** सर्वलोकस्य ज्ञातः = सार्वलौकिकः । अनेन इकण्प्र० → इक । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा।

**तदत्राऽस्मै वा वृद्ध्याय-लाभोपदा-शुल्कं देयम्** ॥ ६।४।१५८ ॥

**[ तद् ]** तद् पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ अत्र ]** अत्र सप्तमी ङि । सूत्रत्वाल्लुप् ।

**[ अस्मै ]** अस्मै चतुर्थी ङे । सूत्रत्वाल्लुप् ।

**[ वा ]** वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ वृद्ध्यायलाभोपदाशुल्कम् ]** वृद्धिश्च आयश्च लाभश्च उपदा च शुल्कं च = वृद्ध्यायलाभोपदाशुल्कम् ।

**[ देयम् ]** देय प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**अधमर्णेनोत्तमर्णाय गृहीतधनातिरिक्तं देयं वृद्धिः । ग्रामादिषु स्वामिग्राह्यो भाग आयः । पटादीनामुपादानं मूल्यातिरिक्तं प्राप्तं द्रव्यं लाभः । उपदा उत्कोचः-लञ्च उत्कोट इति यावत् । निर्विश्यते-उपभुज्यते सुखमनेन वणिग्भिः = निर्वेशः । 'अच्' (५।१।४९) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । रक्षायै निर्वेशो भाटकं रक्षानिर्वेशः । वणिजां रक्षानिर्वेशो-राजभागः शुल्कम् ।**

**[ पञ्चकं शतम् ]** पञ्चास्मिन् शते वृद्धिः = पञ्चकं शतम् । 'सङ्ख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ पञ्चको ग्रामः ]** पञ्चास्मिन् ग्रामे आयः = पञ्चको ग्रामः । 'सङ्ख्या०' (६।४।१३०) कप्र० ।

**[ पञ्चकः पटः ]** पञ्चास्मिन् पटे लाभः = पञ्चकः पटः । 'सङ्ख्या०' (६।४।१३०) कप्र० ।

**[ पञ्चको व्यवहारः ]** पञ्चास्मिन् व्यवहारे उपदा = पञ्चको व्यवहारः । 'सङ्ख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० ।

**[ पञ्चकं शतम् ]** पञ्चास्मिन् शते शुल्कं = पञ्चकं शतम् । 'सङ्ख्या-डतेश्चाऽशत्०' (६।४।१३०) कप्र० ।

**[ शत्यम्, शतिकम् ]** शतमस्मिन् वृद्धिरायो लाभ उपदा शुल्कं वा देयं = शत्यम्, शतिकम् । 'शतात् केवलादतस्मिन् येकौ' (६।४।१३१) य-इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ साहस्रम् ]** सहस्रमस्मिन् वृद्धिरायो लाभ उपदा शुल्कं वा देयं = साहस्रम् । 'सहस्र-शतमानादण्' (६।४।१३६) अण्प्र० → अ । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रास्थिकः ]** प्रस्थोऽस्मिन् वृद्धिरायो लाभ उपदा शुल्कं वा देयं = प्रास्थिकम्(कः) । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्रौणिकम् ]** द्रोणोऽस्मिन् वृद्धिरायो लाभ उपदा शुल्कं वा देयं = द्रौणिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पञ्चको देवदत्तः ]** पञ्चन् मण्ड्यते । पञ्चास्मै देवदत्ताय वृद्धिरायो लाभ उपदा शुल्कं वा देयं = पञ्चको देवदत्तः । 'सङ्ख्या-डतेश्चाऽशत्०' (६।४।१३०) कप्र० ।

**[ शत्यः, शतिकः ]** शतमस्मै देवदत्ताय वृद्धिरायो लाभ उपदा शुल्कं वा देयं = शत्यः, शतिकः । 'शतात् केवलादतस्मिन् येकौ' (६।४।१३१) य-इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ साहस्रः ]** सहस्रमस्मै देवदत्ताय वृद्धिरायो लाभ उपदा शुल्कं वा देयं = साहस्रः । 'सहस्र-शतमानादण्' (६।४।१३६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रास्थिकः ]** प्रस्थोऽस्मै देवदत्ताय वृद्धिरायो लाभ उपदा शुल्कं वा देयं = प्रास्थिकः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छा।

## पूरणा-ऽर्द्धादिकः ॥ ६।४।१५९ ॥

**[ पूरणाऽर्द्धात् ]** पूरणं च अर्द्धश्च = पूरणाऽर्द्धम्, तस्मात् ।

**[ इकः ]** इक प्रथमा सि ।

**[ द्वितीयिकः ]** द्वितीयमस्मिन्नस्मै वृद्धिरायो लाभ उपदा शुल्कं वा देयं = द्वितीयिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ तृतीयिकः ]** त्रि । त्रयाणां पूरणः = तृतीयः । 'त्रेस्तृ च' (७।१।१६६) तीयप्र० - त्रि० → तृदेशश्च । तृतीयमस्मिन्नस्मै वा वृद्धिरायो लाभ उपदा शुल्कं वा देयं = तृतीयिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पञ्चमिकः ]** पञ्चानां पूरणः = पञ्चमः । 'नो मट्' (७।१।५९) मट्प्र० → म । पञ्चममस्मिन्नस्मै वा वृद्धिरायो लाभ उपदा शुल्कं वा देयं = पञ्चमिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ षष्ठिकः ]** षष् । षण्णां पूरणः = षष्ठः । 'षट्-कति-कतिपयात् थट्' (७।१।१६२) थट्प्र० → थ । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) थ० → ठ० । षष्ठमस्मिन्नस्मै वा वृद्धिरायो लाभ उपदा शुल्कं वा देयं = षष्ठिकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अर्द्धिकः, अर्द्धिका स्त्री ]** अर्द्ध । अर्द्धमस्मिन्नस्मै वा वृद्धिरायो लाभ उपदा शुल्कं वा देयं = अर्द्धिकः, अर्द्धिका । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

अर्द्धशब्दो रूपकार्द्धे रूढः ॥छ॥

### भागाद् येकौ ॥ ६।४।१६० ॥

**[ भागात् ]** भाग पञ्चमी ङसि ।

**[ येकौ ]** यश्च इकश्च = येकौ ।

**[ भाग्यः, भागिकः, भागिका स्त्री ]** भाग । भागोऽस्मिन्नस्मै वा वृद्ध्यादीनामन्यतमं देयं = भाग्यः, भागिकः । 'तदत्रास्मै वा०' (६।४।१५८) इति प्राप्तस्य अनेन अपवाद य-इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

भागशब्दोऽपि रूपकार्द्धस्य वाचकः ॥छ॥

### तं पचति द्रोणाद् वाऽञ् ॥ ६।४।१६१ ॥

**[ तम् ]** तम् पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ पचति ]** पचतीति पचत्, तस्मिन् ।

**[ द्रोणात् ]** द्रोण पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ अञ् ]** अञ् प्रथमा सि ।

**[ द्रौणः, द्रौणिकः ]** द्रोण । द्रोणं पचति = द्रौणः । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । एवम्-द्रौणिकः । 'इकण्' (६।४।१) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्रौणी, द्रौणिकी स्थाली गृहिणी वा ]** द्रोणे पचति = द्रौणी । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । एवम्-द्रौणिकी । 'इकण्' (६।४।१) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । स्थाली गृहिणी वा ।

**[ द्विद्रोणी ]** द्वौ द्रोणौ पचति = द्विद्रोणी । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । अनेन अञ्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) अञिकणोर्लुप् । 'परिमाणात् तद्धितलुक्यबिस्ताऽऽचितकम्बल्यात्' (२।४।२३) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छ॥

### सम्भवदवहरतोश्च ॥ ६।४।१६२ ॥

**[ सम्भवदवरहतोः ]** सम्भवंश्च अवहरंश्च = सम्भवदवहरन्तौ, तयोः = सम्भवदहरतोः । सप्तमी ओस् ।

**[ च ]** च प्रथमा सि ।

**तत्राधेयस्य-ओदनादेः प्रमाणानतिरेकेण धारणं सम्भवः । अतिरेकेणावहारः ।**

**[ प्रास्थिकः कटाहः, प्रास्थिकी स्थाली ]** प्रस्थं पचहारः । प्रस्थं पचति सम्भवत्यवहरति वा = प्रास्थिकः कटाहः । कडादि इति नाम प्रसिद्धिः । प्रास्थिकी । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ खारीकः ]** खारी । खारीं पचति सम्भवत्यवहरति वा = खारीकः । 'खारी-काकणीभ्यः कच्' (६।४।१४९) कच्प्र० → क । 'न कचि' (२।४।१०५) इत्यनेन ह्रस्वनिषेधः ।

**[ कौडविकः ]** कुडवं पचति सम्भवत्यवहरति वा = कौडविकः । अनेन 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

सम्भवतिः संमात्यर्थेऽकर्मकः, धारयत्यर्थे सकर्मकश्च । सम्भवतीति च सकर्मक इह ग्राह्यः । सम्भवति अवगृह्णातीत्यर्थः । चकारः पचत्यर्थेन सह सम्भवदवहरतोः समुच्चयार्थः, तेनोत्तरत्र यस्याप्यनुवृत्तिः ॥छ॥

## पात्रा-ऽऽचिता-ऽऽढकादीनो वा ॥ ६।४।१६३ ॥

**[ पात्राऽऽचिताऽऽढकात् ]** पात्रश्च आचितश्च आढकश्च = पात्राऽऽचिताऽऽढकम्, तस्मात् ।

**[ ईनः ]** ईन प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ पात्रीणः, पात्रिकः, पात्रीणा, पात्रिकी स्थाली ]** पात्रं पचति सम्भवत्यवहरति वा = पात्रीणः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-पात्रिकः । 'इकण्' (६।४।१) इत्यनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । स्थाली ।

**[ आचितीना, आचितिकी, आढकीना, आढकिकी ]** आचितं आढकं च पचति सम्भवत्यवहरति वा । स्वमते पुल्लिङ्गः । परमते स्त्री-नपुंसकः । आचितीना, आढकीना । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'इकण्' (६।४।१) इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

पात्रादयः परिमाणशब्दाः ॥छ॥

## द्विगोरीनेकटौ वा ॥ ६।४।१६४ ॥

**[ द्विगोः ]** द्विगु पञ्चमी ङसि ।

**[ ईनेकटौ ]** ईनश्च इकट् च = ईनेकटौ ।

**[ वा ]** वा प्रथमा सि ।

**[ द्विपात्रीणः, द्विपात्रिकः, द्विपात्रः, द्विपात्रीणा, द्विपात्रिकी, द्विपात्री ]** द्वे पात्रे पचति संभवत्यवहरति वा = द्विपात्रीणः, द्विपात्रिकः । अनेन ईन - इकट्प्र० → इक । अनयोर्विधानसामर्थ्यान्न लुप् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-द्विपात्रः । 'संभवदवहरतोश्च' (६।४।१६२) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । एवमग्रेऽपि । 'आत्' (२।४।१८) आप्प्र० । 'अणञेयेकण्०' (२।४।२०) ङी । 'परिमाणात् तद्धित०' (२।४।२३) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ द्व्याचितीना, द्व्याचितिकी, द्व्याचिता ]** द्वे आचिते पचति संभवत्यवहरति वा = द्व्याचितीना, द्व्याचितिकी । अनेन ईन - इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम् = द्व्याचिता । 'संभवदवहरतोश्च' (६।४।१६२) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । यथाक्रमेण 'आत्' (२।४।१८) आप्प्र० । 'अणञेयेकण्०' (२।४।२०) ङी । 'परिमाणात् तद्धितलु०' (२।४।२३) इति निषेधात् ङीर्न भवति ।

**[ द्व्याढकीना, द्व्याढकिकी, द्व्याढकी ]** द्वे आढके पचति संभवत्यवहरति वा = द्व्याढकीना, द्व्याढकिकी । अनेन ईन - इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० । 'अणञेयेकण्०' (२।४।२०) ङी । एवम् = द्व्याढकी । 'संभवदवहरतोश्च' (६।४।१६२) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । 'परिमाणात् तद्धितलुक्य०' (२।४।२३) ङी । तारकाढकेति त्रिलिङ्गः ॥छ॥

## कुलिजाद् वा लुप् च ॥ ६।४।१६५ ॥

**[ कुलिजात् ]** कुलिज पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ लुप् ]** लुक्(प्) प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ द्विकुलिजीना, द्विकुलिजिकी, द्विकुलिजी, द्वैकुलिजिकी ]** द्वे कुलिजे पचति संभवत्यवहरति वा = द्विकुलिजीना, द्विकुलिजिकी । अनेन ईन-इकट्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० । 'संभवदवहरतोश्च' (६।४।१६२) इकण्प्र० → इक । अनेन वा लुप् । 'परिमाणात् तद्धितलुक्यबिस्ताऽऽचितकम्बल्यात्' (२।४।२३) ङी । द्वितीये वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ॥छ॥

## वंशादेर्भाराद्धरद्वहदावहत्सु ॥ ६।४।१६६ ॥

**[ वंशादेः ]** वंश आदिर्यस्य सः = वंशादिः, तस्मात् ।

**[ भारात् ]** भार पञ्चमी ङसि ।

**[ हरद्वहदावहत्सु ]** हरंश्च वहंश्च आवहंश्च = हरद्वहदावहन्तः, तेषु ।

**[ वांशभारिकः ]** वंशस्य भारः = वंशभारः । वंशभारं हरति वहति आवहति वा = वांशहा(भा)रिकः । इकण्प्र० → इक । वृद्धिः ।

**[ कौटभारिकः ]** कुटभारं हरति वहति आवहति वा = कौटभारिकः । अनेन 'इकण्' (६।४।१) इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वांशिकः ]** भारभूतान् वंशान् हरति वहति आवहति वा = वांशिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कौटिकः ]** भारभूतान् कुटान् हरति वहति आवहति वा = कौटिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वाल्वजिकः ]** भारभूतान् वल्वजान् हरति वहति आवहति वा = वाल्वजिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**हरतिर्देशान्तरप्रापणे चौर्ये वा । वहतिरुत्क्षिप्य धारणे । आवहतिरुपादाने ॥छ॥**

**द्रव्य-वस्नात् केकम्** ॥ ६।४।१६७ ॥

**[ द्रव्यवस्नात् ]** द्रव्यश्च वस्नश्च = द्रव्यवस्नम्, तस्मात् ।

**[ केकम् ]** कश्च इकश्च = केकम् । प्रथमा सि ।

**[ द्रव्यकः ]** द्रव्यं हरति वहत्यवहरति वा = द्रव्यकः ।

**[ वस्निकः ]** वस्नं हरति वहत्यवहरति वा = वस्निकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**सोऽस्य भृति-वस्नांशम्** ॥ ६।४।१६८ ॥

**[ सोऽस्य ]** तद् प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'तः सौ सः' (२।१।४२) स० । 'सो रुः' (२।१।७२) स० → र० । अथवा सो पञ्चमी ङसि । सूत्रत्वाल्लुप् । इदम् षष्ठी ङस् । अथवा अस्य सप्तमी ङि । सूत्रत्वाल्लुप् ।

**[ भृतिवस्नांशम् ]** भृतिश्च वस्नश्च अंशश्च = भृतिवस्नांशम् ।

**भृतिर्वेतनम् । वस्नो नियतकालक्रयमूल्यम् । अंशो भागः ।**

**[ पञ्चकः कर्मकरः ]** पञ्चन् । पञ्चास्य भृतिः = पञ्चकः । 'सङ्ख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । कर्माणि करोति = कर्मकरः । 'भृतौ कर्मणः' (५।१।१०४) टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ पञ्चकः पटः ]** पञ्चन् । पञ्चास्य वस्नं = पञ्चकः पटः । 'सङ्ख्या-डतेश्चाऽशत्०' (६।४।१३०) कप्र० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

